
॥ श्रीः ॥

काशी-संस्कृत-ग्रन्थमाला

१५३

(व्याकरणविभागे एकोनत्रिंशं पुष्पम्)



श्रीमद्भगवत्पतञ्जलिमुनिनिर्मितं

व्याकरणमहाभाष्यम्

(नवाह्निकम्)

अष्टाध्यायीप्रथमाध्यायप्रथमपादव्याख्यानम् ।

श्रीमदुपाध्यायकैयटनिर्मित 'प्रदीप' प्रकाशितम् ।

सर्वतन्त्रस्वतन्त्रश्रीमन्नागेशभट्टविरचितोद्द्योतोद्भासितम् ।



काशीहिन्दूविश्वविद्यालयाध्यापक व्याकरण-न्याय-वेदान्ताचार्य-लब्धस्वर्णपदक-

पण्डितश्रीरुद्रधरझाशर्मप्रणीतया

'तत्त्वालोक' टीकया समुल्लसितम् ।

भूमिकालेखकः

महामहोपाध्यायश्रीगिरिधरशर्मा चतुर्वेदः

चौखम्बा संस्कृत सीरिज, बनारस-१

प्रकाशकः—
जयकृष्णदास हरिदास गुप्तः,
चौखम्बा-संस्कृत-सीरिज आफिस,
पो० बाक्स नं० ८, बनारस-१

The Chowkhamba Sanskrit Series Office.
P. O. Box 8, Banaras.
1954

॥ श्रीः ॥



लेखक—म० म० श्रीगिरिधरशर्मा चतुर्वेद, वाचस्पति

पाणिनीय-परिचयः ।

सुप्रथितमिदम्, यद् व्यवहारातीता भाषा व्याकरणसाहाय्यमन्तरेण न शक्या प्रतिपत्तुमिति ।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

इत्यभियुक्तोक्तेषु शक्तिग्राहकेषु व्यवहारस्तावच्छक्तिग्राहकशिरोमणिरिति सर्वेषामैकमत्येनाभ्युपगमः । कमपि शब्दमज्ञातार्थं शिशुर्नान्यैरुपायैः शक्यो बोधयितुम् ऋते व्यवहारात् । तत्तच्छब्दैस्तेषु तेषु पदार्थेषु प्रवृत्तिनिवृत्ती वयोवृद्धानामाविरतं पश्यन् स भाषाया व्युत्पद्यत इति सततं प्रत्यक्षीकुर्मः । अत एव येषां बालानामग्रे मातापित्रादयः सर्वेऽपि वयोवृद्धाः संस्कृतेनैव व्यवहरन्ति, ते विनाप्यध्ययनं संस्कृत एव व्युत्पन्नाः संस्कृतमेव भाषमाणा अवलोक्यन्ते, येषां तु समक्षं सर्वेऽप्याङ्गलभाषामेव सततमुच्चारयन्ति, ते विनाप्यध्ययनम् आङ्गलभाषां बुध्यन्ते चोच्चारयन्ति च तामेवेति सुप्रत्यक्षम् । स एष व्यवहारः संस्कृतभाषाया एवंविधोऽद्यत्वे न दृश्यते, कैश्चिदेवातिविरलैर्बालव्युत्पत्त्यर्थमेवावलम्ब्यत इति तादृशमपवादं विहाय संस्कृतभाषा शिक्षणे नैवाधिगन्तव्या कालेऽस्मिन् । व्यवहारातिरिक्ता अन्ये उपमानाप्तवाक्य-वाक्यशेषविवृतिसिद्धपदसान्निध्याख्या शक्तिग्रहोपायाः क्वचित्पदविशेष एवोपयुक्ता इति भाषाज्ञाने न पूर्णं साहाय्यमावहन्ति । ततश्च व्यवहारपदात् प्रच्युताया भाषाया परिज्ञानाय कोशो व्याकरणञ्चेति द्वावेव मुख्योपायौ । तत्रापि कोशो नाम्नां शक्तिग्रहमात्र उपयुज्यते, भाषायाः स्वरूपसंघटनं तु व्याकरण एव सर्वात्मना आयतत इति निश्प्रचम् ।

व्याकरणानि च यद्यप्यनेकानि स्मर्यन्ते—

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥

इत्यभियुक्तोक्तिमनुसृत्याष्टौ व्याकरणान्येभिः प्रणीतानीति बहवो विश्वसन्ति । क्वचित्पद्यमिदमित्थमपि पठ्यते—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥

तद्रीत्या अन्यान्यपि व्याकरणानि कौमारसारस्वतशाकलानि सिद्ध्यन्ति । परमिदानीं समुपलभ्यमानेषु व्याकरणेषु पाणिनीयमेव व्याकरणं सर्वतः प्राचीनमिति बहुभिरभ्युपगतो युक्तिसिद्धोऽर्थः ।

श्रीमत्सत्यव्रतसामश्रमिप्रभृतीनां विचारदक्षाणां तु मतमिदम्—यत्पाणिनितः प्राचीनमेवंविधं सर्वतोमुखं व्याकरणं नासीदेवेति । 'इन्द्रश्चन्द्रः' इत्यादिपद्ये हि अष्टावादिशाब्दिका इत्येवोक्तम्—न त्वेते व्याकरणकर्तार इति । शाब्दिकत्वं तु शब्दशास्त्रप्रौढत्वम्, शब्दशास्त्रपारदृश्वत्वम्, शब्दशास्त्रप्रचारकत्वमित्यादिभिरनेकैः प्रकारैः शक्यं व्यवहर्तुम् । शब्दशास्त्रपदेन च न केवलं व्याकरणमेव, अपि तु कोशं मीमांसादिकमपि शक्यते ग्रहीतुम् । 'पदवाक्यप्रमाणपारावारीण' इति महत्सु चिरात्प्रयुज्यमाने विशेषणे 'पद' शब्देन व्याकरणम्, 'वाक्य' शब्देन मीमांसा, 'प्रमाण' शब्देन च न्यायं व्यपदिशन्ति शिष्टाः । शब्दपदेन च पदं वाक्यं चोभयमपि शक्यते संग्रहीतुमिति वाक्यार्थनिर्णायिका मीमांसापि शब्दशास्त्रम् । ये चैतेऽष्टौ शाब्दिकाः परिगणिताः, तेषु विभिन्नप्रकारकमेव शाब्दिकत्वं प्रमाणान्तरैः प्रसिद्ध्यति । तथा हि—इन्द्रोऽत्र प्रथमं शाब्दिकः पठितः, तद्विषये दृश्यते पस्पशाह्निके महाभाष्ये एवैकमाभाणकम्—'एवं हि श्रूयते–बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम । बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, तथापि नान्तं जगाम । किं पुनरद्यत्वे—यः सर्वथा चिरं जीवति, स वर्षशतं जीवति' इत्यादि । तेन इन्द्रस्य बृहस्पतिसकाशे प्रतिपदोक्तानां शब्दानां पारायणरूपेणाध्ययनं प्रसिद्ध्यति । यथा चाधीतम्—तथैव तेन व्याकरणं निर्मितं स्यादिति शब्दकोशरूपव्याकरणनिर्मातृत्वमेव तत्र सिद्ध्यतीति श्रीसामश्रमी निरुक्तालोचने प्राह स्म । वस्तुतस्तु इन्द्रोऽप्यनेकविधः । श्रुतिषु हि अनेकविधा देवाश्च देवविशेषा इन्द्राद्याश्च श्रूयन्ते—सन्ति अविग्रहाः प्राणविशेषा जगन्निर्मातारो देवा इन्द्राद्याः, सन्ति च तारामण्डलेऽपि इन्द्रादिपदभाजो नक्षत्रविशेषाः

धितेति शक्यमनुमातुम्। व्याकरण तु तत्प्रणीत यदि स्यात्, तर्हि बहुवार तन्मतप्रदर्शनाय नाम स्मर्येत। शाकल्य, गालव, गार्ग्यश्च बहुधा पाणिनिना स्मृता —

सम्बुद्धौ शाकल्यस्येतावनार्षे (१।१।१६) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (६।१।१२७) लोप शाकल्यस्य (८।३।१९) सर्वत्र शाकल्यस्य (८।४।५१) इति शाकल्य।

इको ह्रस्वोऽड्यो गालवस्य (६।३।६१) तृतीयादिषु भाषितपुंस्क पुंवद् गालवस्य (७।१।७४) अड् गार्ग्यगालवयो (७।३।९९) नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् (८।४।६७) इति गालव।

ओतो गार्ग्यस्य (८।३।२०) (पूर्वोक्ते (७।३।९९) (८।४।६७)) इति गार्ग्य।

तेषु शाकल्य ऋक्संहिताया पदपाठकर्तृतया प्रसिद्ध इति प्रातिशाख्यमपि किञ्चित्तेन निर्मित भवेत्, तत एव प्रातिशाख्ये-ष्वपि 'शाकल्य' 'शाकल्यपिता' इत्यपि च स्मर्यते। तेन प्रातिशाख्यप्रणेतैव स सभाव्यते, सन्धिविषये तस्य क्वचित् क्वचिद्विभिन्ना विचारा एव प्रसिद्धा स्यु, व्याकरण न तेन निबद्ध भवेदित्यपि शक्यते कल्पयितुम्। गार्ग्यस्तु निरुक्तकृता भगवता यास्केनापि अनेकधा स्मृत।

तत्र (सर्वाणि नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च। न सर्वाणीति गार्ग्यो वैयाकरणाना चैके) (निरुक्त १।४) इत्युक्तिस्वारस्येन तस्य नैरुक्तेषु गणनाऽऽसीत्, न तु वैयाकरणेष्विति प्रतीयते। 'वैयाकरणाना चैके' इत्यत पृथग् गार्ग्यनामस्मरणात्। यदि नाम गार्ग्योऽपि वैयाकरणोऽभविष्यत्, 'वैयाकरणाना चैके' इत्यनेनैव तर्हि तस्यापि गृहीतत्वाद् 'गार्ग्य' इति पृथङ् नाभ्यधास्यत। यदि अन्यस्यापि कस्यचिद् वैयाकरणस्य विशिष्यात्र नामनिर्देश स्यात्, तर्हि गार्ग्यस्यापि पृथङ् नामनिर्देश समञ्जसो भवेत्, 'वैयाकरणाना चैके' इति सामान्योक्त्या तु ये वैयाकरणा निरूढान्यपि नामानि स्वीकुर्वन्ति, ते सर्वे एवोपात्ता इति गार्ग्यस्य पृथङ् नामग्रहण न कथमपि सामञ्जस्यमावहति—वैयाकरणेभ्य पृथक् शाकटायनस्यापि नामात्र गृहीतमिति शाकटायनोऽपि न वैयाकरणत्वेन यास्कस्याभिमत इति सत्यव्रतसामश्रमिमहाशया मन्वते। मन्मते विद तेषा मत न सम्यक् प्रतिभासते—पक्षान्तरे शाकटायनस्य नामग्रहणेन तादृशकल्पनानुदयात्। 'सर्वाणि नामानि धातुजानि न सन्ति, कानिचिद्रूढान्यपि सन्ति' इति मत केषाचिद्वैयाकरणाना प्रदर्शितम् 'वैयाकरणाना चैके' इति। शाकटायनस्तु वैयाकरणोऽपि सन् सिद्धान्तेऽस्मिन्नन्येभ्यो वैयाकरणेभ्यो विप्रतिपन्न, स हि सर्वाणि नामानि धातुजान्यभ्युपगच्छतीति तस्य नामोल्लेख पक्षान्तरबोधनायावश्यक एव। प्रत्युत यदि शाकटायनो वैयाकरणो नाभविष्यत्, तत्तर्हि पक्षान्तरे 'वैयाकरणाना चैके' इति नाभ्यधास्यत। शाकटायनातिरिक्ताना वैयाकरणाना धातुजव्यतिरिक्तनिरूढनामस्वीकारे सहमतत्वात्। शाकटायन एव तत्र विमत, सोऽपि च वैयाकरण इति तत एव सर्वेषा वैयाकरणानामेकमत्य नास्तीति सूचयितु 'वैयाकरणाना चैके' इत्युक्तम्। अन्यवर्ग्योऽपि यदि स्वेन सहमतो भवति, तस्य तर्हि प्राधान्येन नामोल्लिखन्ति पक्षाभिनिविष्टा इति सर्वजनीनोऽय प्रत्यय। तत एव वैयाकरणै सह वाद कुर्वता भगवता यास्केन वैयाकरणस्य स्वपक्ष्यस्य नाम प्रथम गृहीतम्, 'सर्वाणि नामान्याख्यातजानीति शाकटायन' इति। तदनु च स्वपक्ष्याणा नाम सामान्येन निर्दिष्टम्—'नैरुक्तसमयश्च' इति। समय —सकेत सिद्धान्त इति यावत्। अस्माक नैरुक्ताना तु नामाख्यातजानीति सिद्धान्त एवास्तीति तत्राभिनिवेश सूचित। पर नैरुक्तपक्ष्योऽपि गार्ग्य सिद्धान्तेऽस्मिन् नैरुक्तेभ्यो विप्रतिपन्नो वैयाकरणमतानुयायीति तस्य नाम पक्षान्तरे निर्दिष्टम्—'न सर्वाणीति गार्ग्य' इति। तस्य च सिद्धान्तस्य लघु वख्यापनाय 'वैयाकरणाना चैके' इत्युपात्तमिति लेखसामञ्जस्य सुष्ठु सम्पद्यते। शाकटायनो हि वैयाकरणोऽपि सन् सर्वेषा नाम्ना धातुजत्वसिद्धान्ते तेभ्यो विप्रतिपन्न इति तस्य नामोल्लेख पृथग् युज्यते। गार्ग्यस्तु वैयाकरणानेवानुसरत्यस्मिन् पक्ष इति यदि स वैयाकरणेष्वेव प्रसिद्ध स्यात्—तर्हि वैयाकरणसामान्यात् पृथक् तन्नामोल्लेखो न समञ्जस स्यादिति सार। ब्राह्मणवसिष्ठन्यायाश्रयण त्वगतिकगति। गोबलीवर्दन्यायाश्रयण चापि तथैव। न च ब्राह्मणेषु वसिष्ठस्येव गोषु बलीवर्दस्येव वा वैयाकरणेषु विशिष्य प्रसिद्धिरस्ति गार्ग्यस्येति न तादृशन्यायावतारणमत्र युज्यते। अल प्रसक्तानुप्रसक्त्या। गार्ग्यस्य नैरुक्तत्वमेव यास्कनिरुक्तेन सिद्ध्यतीति व्याकरणनिर्मातृता न शोभनकल्पनास्पदम्। पाणिनिसूत्रेषु तत्साहचर्यणोपात्तस्य गालवस्यापि विषये तथैव कल्पन न्याय्य स्यात्। तस्मात्पाणिनिसूत्रेषु समुल्लिखितनामान सर्वेऽपि भिन्नभिन्नव्याकरणप्रवर्तका इति लघुत्रिमुनिकल्पतरुकृता कल्पना न विचाररमणीया। इदमपि चात्र विवेच्यम्—पाणिनीयेषु सूत्रेषु मतभेदप्रदर्शनाय तत्तन्नामोल्लेखोऽयमाधिक्येन सन्धिविषये स्वरविषये वा, सुबन्तसाधने केवलम् 'तृतीयादिषु भाषितपुंस्क पुंवद् गालवस्य' इति पुंवद्भावविधानार्थं गालवनामोल्लेखो दृश्यते। तिङन्तसाधने च 'अड् गार्ग्यगालवयो' 'ऋतो भारद्वाजस्य' इति अडागम इडागमे च नामोल्लेख, सोऽपि वर्णोपजनरूपत्वात् सन्धिप्रक्रियाविषय एव नैरुक्तप्रक्रियाविषय एव वा शक्यते वक्तुम्। तथैव 'तृषिमृषिकृशे काश्यपस्य' इति क्त्वाप्रत्ययस्येडागमविषयेऽपि च तथैव। तत केवलम् 'लङ शाकटायनस्यैव' इति तिङादेशविषये नामोल्लेख परिशिष्यते। अन्येषु विभक्त्यर्थसमासतद्धितस्त्रीप्रत्ययकृत्प्रत्ययादिविषयेषु सुमहत्स्वपि प्रकरणेषु, सत्स्वपि च तत्र बहुषु विकल्पेषु न कस्याप्याचार्यस्य नामोल्लेख। तेनेदमपि शक्यतेऽनुमातुम्—यत्पाणिनिनिर्दिष्टनामानोऽमी महान्त आचार्या प्रातिशाख्यप्रणेतार, तत्प्रवक्तारो वा भवेयु। प्रातिशाख्यानि हि सन्धिविषय स्वरविषय च केवल विचारयन्ति समुपलभ्यन्ते, न तत्र सुबन्ततिङन्तकृत्तद्धितसमासादिसाधनप्रक्रिया काऽप्युपलभ्यते। तस्मात्सन्ध्यादिविषय एव तेषा मतभेद पाणिनिना प्रदर्शित। पुंवद्भावविषये कुमादेशविषये च तादृशप्रयोगाभिरुचिरेव तेषा बोधिता स्यात्—न त्वेतावन्मात्रेण तुच्छेन मतभेदेन पृथग् व्याकरणनिर्मातृत्व कश्चिद्विचारप्रवीण परिकल्पयत्। तदेवमापिशलिरपि कस्यचित्प्रातिशाख्यस्य प्रवक्ता निर्माता वा सम्भवेत्, शब्दप्रयोगविषये परिगणनीय शिष्टो वा भवेत्, व्याकरणनिर्मातृत्व तु तस्य सशयविषयता नातिक्रामति, दृढतरप्रमाणानुपलब्धेरिति।

शाकटायन । यद्यपि सुप्रसिद्धो वैयाकरण एवेति प्रत्यपीपदाम पूर्वम्, तथापि तद्रचितं व्याकरणं कीदृशमासीदिति न शक्यते कथमप्यनुमातुम् । प्रमाणानुपलब्धे । यत्तु इदानीं जैनसमुदाये शाकटायननाम्ना प्रसिद्धमेकं व्याकरणं प्रचलति, मुद्रितमपि प्राप्यते, तत्तु न कथमपि पाणिनेः प्राक्तनं भवितुमर्हतीति तद्वचनापरीक्षणेनैव स्पष्टं सिद्ध्यति । तद्धि सर्वरूपेण पाणिनीयं व्याकरणमनुकरोति, न केवलं सूत्रकारस्य पाणिनेः, अपि तु वार्तिककारस्य भाष्यकारस्यापि च सिद्धान्ताननुवदन्ति तदीयानि सूत्राणि । एतद्विषये मनाग् विवेचयाम ।

प्रचलितशाकटायनव्याकरणविचारः ।

पाणिनीये व्याकरण इवात्र शाकटायनव्याकरणेऽपि 'अइउण्' इत्यादिसूत्राणि उपजीव्यत्वेनाश्रितानि, तदाधारेण प्रत्याहारप्रक्रिया च सूत्रेषु निबद्धा । केवलं चतुर्दश सूत्राणि त्रयोदशत्वं प्रापितानि, भेदं प्रत्यापयितुं किञ्चिद् व्यत्यासश्च कृत, तत्र कारणमनुपदं चिन्तयिष्याम । इमान्यक्षरसमाम्नायरूपाणि चतुर्दश सूत्राणि पाणिनये महेश्वरेणोपदिष्टानीति सर्वजनीना चिरन्तनी प्रसिद्धिः । नन्दिकेश्वरकृतकाशिकाया च तथैव विस्पष्टं प्रतिपादितम् । भारते प्रसिद्धासु अनेकविधासु वर्णमातृकासु इयमन्यतमा माहेश्वरी वर्णमातृका पृथगेव परिगण्यते । सोऽयं माहेश्वरोपदेशः साक्षाद्वा डमरुनादद्वारेण वा भवतु, 'तेने ब्रह्म हृदा य आदिकवये' इति प्रक्रियया बुद्धौ प्रादुर्भावनेन वा भवतु, पाणिनेः पूर्वमयमक्षरसमाम्नायक्रमो नासीदिति, तदाधारेण प्रवृत्ता चेयं प्रत्याहारप्रक्रिया पाणिन्युपज्ञमेवेति च तस्याः प्रसिद्धेर्मूलमभ्युपगन्तव्यमेव । 'न ह्यमूला जनश्रुतिः' ततश्च पाणिनेः पूर्वकालभवेन शाकटायनेन कथमेवंविधो वर्णसमाम्नाय उपजीव्यत्वेनाध्रीयताम्, कथं वा प्रत्याहारप्रक्रिया स्वसूत्रेष्वनूद्यताम् ? अथ यत्परिवर्तनं सूत्रेष्वेषु दृश्यते—तत्रापि मूलमन्विष्यताम्—'ऋलृक्' इति सूत्रे लृकारग्रहणं वार्तिककारेण प्रत्याख्यातम् (महाभाष्यस्य द्वितीयाह्निके विचारोऽयं द्रष्टव्यः) तदत्रापि परित्यक्तम् । तेन सूत्रकाराद् पाणिनेः का कथा, वार्तिककाराद् वररुचेरपि परभवत्वमस्य शाकटायनस्य स्पष्टं सिद्ध्यति । तथैव 'अइउण्' 'लण्' इत्युभयत्र णकारोपादानमपि भाष्यकृता चिन्तितम् 'किं पुनर्वर्णोत्सत्तिविवाय णकारो द्विरनुबध्यते' इत्यादिना, साधिता च तेन 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति परिभाषा, इह तु सर्वमिमं विवादं परिहर्तुं 'लण्' सूत्रस्थो णकारः परित्यक्तः, लकारश्च पूर्वसूत्र एव 'हयवरलञ्' इति निवेशितः । तथैव अनुस्वारविसर्गायोगवाहानामपि अकारोपरि शर्षु च पाठः कर्तव्य इति भाष्यकृता साधितम्, इहापि 'शषसर' इति सूत्रे सकारात्परतोऽयोगवाहानां पाठो दृश्यते, तेन महाभाष्यकृतः पतञ्जलेरपि परभवत्वमस्य शाकटायनस्य सिद्ध्यति । पाणिनिर्हि भगवान् स्वपूर्वजं शाकटायनमादरेण स्वीयेषु सूत्रेषु स्मरति, यदि तेन शाकटायनस्येदृशानि प्रत्याहारसूत्राणि दृष्टान्यभविष्यन्, कुतस्तर्हि तत्र सन्देहोत्पादकमेव परिवर्तनं व्यधास्यत । तस्मादस्य शाकटायनस्य पाणिनिपूर्वभवत्वं न कथमपि कल्पयितुं शक्यम् । तथा 'शश्छोऽटि' इति पाणिनेः सूत्रम्, वार्तिककारेण च तत्र 'तच्छ्लोकेन' इत्यादिप्रयोगाणां सिद्धये 'अटि' स्थाने 'अमि' इत्युपसंख्यातम् । इह तु इदानीं प्रकाशिते शाकटायनव्याकरणे 'शश्छोऽमि' इत्येव सूत्रं दृश्यते । यदि हि पाणिनेः पूर्वमपि 'तच्छ्लोकेन' इत्याद्याः प्रयोगाः प्राचलिष्यन्, तदन्वाख्यानपरं च 'शश्छोऽमि' इति स्पष्टं सूत्रं पाणिनिना अद्रक्ष्यत, तर्हि कथं स तान् प्रयोगानुपेक्ष्य 'अटि' इति स्वसूत्रे अवक्ष्यत् । तस्मात्स्पष्टमिदं सिद्ध्यति, यत्पाणिनिना अडतिरिक्ते वर्णे परे छकारादेशो न दृष्टः, पूर्वमप्रचलितत्वाद्वा अनवधानाद्वेत्यन्यदेतत्, तत एव तेन अटि पर एव छकारादेशो विहितः, वार्तिककारेण तु लकारादावपि परे छकारादेशं पश्यता तन्न्यूनतापूरणं कृतम् । ततोऽपि परभवेन शाकटायनेनानेन वार्तिकमतमेव प्रमाणीकृत्य 'शश्छोऽमि' १।१।१४४ इत्येव सूत्रं पठितम् । तदिदमेव 'शश्छोऽमि' इति सूत्रमस्य शाकटायनस्य पाणिनेः कात्यायनाच्च परभवत्वं साधयितुं ज्वलदङ्गारकसन्निभं प्रमाणं न केनाप्येतिहासिकदृष्टिमताऽपलपितुं शक्यम् । तथैव 'प्रौह', 'प्रौढ', 'प्रैष', 'स्वैर' इत्यादिप्रयोगाणां सिद्धये वृद्धिविधानं पाणिनिसूत्रेषु न दृश्यते, वार्तिककृता 'प्रादूहोढोढ्येषैष्येषु' 'स्वादीरेरिणोः' इत्याद्युपसंख्यातम् । इह तु शाकटायनीये तत्साधनार्थं 'प्रस्योढोढ्यूहैषैष्ये' १।१।८४ 'स्वैरस्वैर्यक्षौहिण्याम्' १।१।८५ इत्यादि सूत्राणि दृश्यन्ते । यदि भगवता पाणिनिना सूत्राणीमानि दृष्टानि अभविष्यन्, कथं तर्हि स तत्समानार्थकं सूत्रं स्वव्याकरणे न प्राणेष्यत । कियदुदाहराम, वार्तिककृता यत्र यत्रोपसंख्यानं कृतम्—तत्सर्वमत्र सूत्रेष्वनूदितं दृश्यते तच्च सर्वं वार्तिककारात् परभवत्वमस्य साधयितुं सुपर्याप्तम् । किंच 'अचो रहाभ्यां द्वे' इति पाणिनिना रेफहकाराभ्यां परस्य यरो द्वित्वं विहितम्, एवं सति 'मद्हृद' इत्यादौ हकारोत्तरवर्तिनो रेफस्यापि द्वित्वं प्राप्नोतीति तत्र 'नेमौ रहौ कार्यिणौ द्विर्वचनस्य' इत्यादि माठरपरिवेषन्यायेन स्वीकृत्य भाष्यकृता तत्र द्वित्वप्रतिषेधः साधितः । इह तु सूत्र एव स्फुटम् 'अचो हो द्वः' १।१।११७ इति रेफहकारयोर्द्वित्वप्रतिषेध उपलभ्यत इति भाष्यकृतोऽपि परभवत्वमस्य शाकटायनस्य सुस्पष्टम् ।

प्राचीनं यत्तु शाकटायनो निरुक्तकृतो यास्कादपि पूर्वभवः, यास्केन तन्मतस्य तत्राऽनेकशोऽनूदितत्वात् । एतत्सूत्रकृच्छाकटायनस्तु न निरुक्तपूर्वभवः सिद्ध्यति । निरुक्तकृता हि 'अरण्यानी' इति पदं निर्ब्रुवता 'अरण्यानी—अरण्यस्य पत्नी (निरुक्त ९।३।८) इत्युक्तम् (९।२९) पत्नी–पालयित्री देवतेति तद्व्याख्याता दुर्गाचार्यः । पाणिनिना भगवता प्रयोग एव तत्रानुक् ङीप् च विदधता तदेवानुसृतम् । वार्तिककृता तत्र 'हिमारण्ययोर्महत्त्वे' इति विशेषं ब्रुवता 'महदरण्यमरण्यानी' इति विग्रहो व्यञ्जितः । इह च शाकटायनव्याकरणे 'हिमारण्याद् गुरौ' १।३।५७ इति वार्तिकानुसारेण सूत्रं दृश्यते । तेन स्पष्टमिदं सिद्ध्यति, यत्पूर्वं निरुक्तकाले पाणिनिकाले च उभयोरपि हिमारण्ययोः पत्नीत्वमारोप्य तदधिष्ठातृदेवताभिप्रायेण वा 'हिमानी' 'अरण्यानी'-प्रयोगौ प्राचलताम्, परतस्तु महत्त्वार्थत्वेन प्रसिद्धो जात इति महत्त्वार्थं एव वार्तिककृता अनेन शाकटायनेन च प्रयोगाविमौ साधितौ । तदियमयं शाकटायनो न पाणिनेर्नापि वा निरुक्तकारात् प्राक्तनः कथमपि सिद्ध्यति । ताभ्यां पूर्वं आसीत् कश्चन शाकटायन इति सत्यम्, परं तेन किञ्चिद् व्याकरणं निर्मितं न वेति सन्दिग्धमेव । तथैव निरुक्तकृता 'सर्वाणि नामान्याख्यातजानीति शाक-

दायन' इति या शाकटायनस्य प्रतिज्ञाऽनूदिता, यच्च 'पदेन पदेतराद्धीन् सञ्चस्कार शाकटायन, एते कारित च यकारादिं च, अस्ते शुद्धं च सकारादिं च' इत्यादिना या 'सन्तमर्थं माययतीति सत्यम्' इति सत्यशब्दव्युत्पत्ति प्रदर्शिता शाकटायनमतेन, न तादृश किमप्यत्रोपलभ्यते। तस्मादपि निरुक्तकृत परिचितो नाय शाकटायन इति स्फुटीभवति। एवं शौनकेनापि ऋक्प्राति शाख्ये 'प्रथम शाकटायन' (प० १ सू० १६) इति सूत्रे शाकटायनोऽवसाने वा प्रथममेव व्यञ्जन ककारादि मन्यते। गार्ग्यस्तु अवसाने द्वितीय व्यञ्जनमाहेत्युक्तम्। परमत्र शाकटायनव्याकरणे तु 'चर्नश' (१।१।६४) इति विकल्पेनैवावसाने चर्त्वं मुक्ता उभयमप्यनुज्ञातम्। तस्माच्छौनकपरिचितो नाय शाकटायन इति सिद्ध्यति। तथैव कात्यायनप्रातिशाख्येऽपि 'परिण इति शा टायन' (३।८७) इत्यादिना 'युष्मदादेशस्य न' इति पदस्य णत्वं यच्छाकटायनमतेनोक्तम्, तदपि नेह प्राप्यते इति ...त्यायनस्यापि परिचितोऽय शाकटायनो न भवति। किमन्यत् प्रातिशाख्ये बहुत्र शाकटायननाम गृहीतमिति वैदिकशब्द-साधनमपि शाकटायनेन पूर्वेण कृतमिति स्फुटीभवति। तस्माद् केवललौकिकव्याकरणप्रणेताऽय शाकटायन न पूर्वभव। किञ्च छान्दसस्यैव लिट स्थाने क्वसुकानचौ पाणिनिना विहितौ। परतस्तु कतिभिर्लौकिकेऽपि तेषा प्रयोग आरब्ध इति दृष्ट्वा लौकिकमेव व्याकरण केवलमुपनिबध्नता अनेन शाकटायनेनापि क्वसुकानचौ विहिताविति पाणिन्यपेक्षया बहुर्वाचीनत्वमस्य सुस्पष्टीभवति।

निबन्धशैल्यप्यस्य शाकटायनस्यार्वाचीना स्फुट प्रतीयते प्रेक्षावताम्। तथाहि—'पञ्चकृत्व' 'दशकृत्व' इत्यादिप्रयोगान् साधयितु पाणिनि 'अभ्यावृत्तिगणनायाम्' कृत्वसुच्प्रत्यय विधत्ते। इह तु शाकटायने 'वारे कृत्वम्' ३।४।३२ इति समुपलभ्यते। 'अभ्यावृत्तिगणना' स्थाने 'वार' शब्दप्रयोग कियदर्वाचीन इति विवेचका एवात्र प्रमाणम्। तथैव पाणिनिना 'अभूततद्भावे' च्विप्रत्ययोऽन्वाख्यात, अनेन शाकटायनेन तु तत्र 'कर्मकर्तृभ्या प्रागतत्तत्त्वे ३।४।५५ इति च्विविधान सूत्रितम्। 'प्राग् अतस्य तत्त्वम्' इति अभूततद्भावशब्दापेक्षया शब्दोऽय कियतीं प्राञ्जलता गाहते ऋषेर्मुनेर्वा किमीदृशी भाषा भवितुमर्हतीति सुधिय एव विवेचयन्तु। अथ तिङ् तत्प्रकरणे पाणिनिना 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम' 'अस्मद्युत्तम' इति युष्म दस्मच्छब्दयो कर्तृत्वे कर्मत्वे वा मध्यमोत्तमपुरुषौ विधाय तत 'शेषे प्रथम' इति तदतिरिक्ते सामान्येन प्रथमपुरुषो विहित। इह तु 'लोऽन्ययुष्मदस्मासु तिप् तसन्झि' १।४।१ इत्यादिना सूत्रेण युगपदेव सर्व प्रथमाद्या पुरुषा विहिता। तत्र युष्मदस्मच्छ-ब्दाभ्या प्रागुपात्तोऽन्यशब्द कथ तदपेक्षयाऽन्य शब्द बोधयेदिति जानाति सूत्रकृदेव। किञ्च 'सामानाधिकरण्यबोधनाय न कश्चि च्छब्दोऽत्रोपात्त, न वा कुतश्चिदनुवृत्त, ततश्च 'अन्य–युष्मद्–अस्मद्–शब्देषु सन्निहितेषु प्रथमाद्या पुरुषा स्युरिति 'देवदत्त त्वया गच्छतु' इत्यादौ युष्मच्छब्दसान्निध्येऽपि कुतो न मध्यम इति मृग्यमत्र समाधानम्। 'अन्ययुष्मदस्मदर्थे प्रत्येकमेकद्विबहुषु वर्त मानाद्धातोर्लस्य यथासख्य तिप्–तस्–झि इत्यादेशा भवन्ति' इति प्रक्रियासग्रहकृतोक्तोऽर्थस्तु न कथमपि बुद्धावुपारोहति, न हि 'त्व करोषि' इत्यादौ कृधातुर्युष्मच्छब्दार्थे वर्तते इति केनापि शेमुषीजुषा शक्य वक्तुम्। 'युष्मदाद्यर्थेषु वर्तमाना या क्रिया, तद्वाचकाद्धातो' इत्याद्यर्थकरणेऽपि न निर्वाह, इह हि क्रियाशब्देन व्यापारो वा विवक्ष्येत, फल वा? आद्ये 'त्व सन् क्रियसे' इत्यादौ कथ मध्यम, व्यापारस्य युष्मदर्थेऽभावात्। अन्त्ये च 'त्वा स करोति' इत्यादौ कुतो न मध्यम, फलस्य युष्मदर्थगामि त्वात्। तस्मात् 'सामानाधिकरण्ये' इत्येव पाणिनेर्भगवत उक्ति सुपपादा भवति, न ता परित्यज्य सम्भवेदुपपत्ति। किञ्च 'त्व चाह च ते च गच्छाम' इत्यादौ कुतो न मध्यमपुरुष प्रथमपुरुषो वा? युष्मदर्थस्य अन्यार्थस्य च क्रियाश्रयत्वात्। पाणिनेस्तु युष्मदस्मच्छब्दसामानाधिकरण्ये जाग्रति शेषपदार्थस्यासम्भवान्न तत्र प्रथमपुरुषप्राप्ति, मध्यमपुरुषन्तु परत्वादुत्तमपुरुषो बाधत इति न काप्यनुपपत्ति। एवमेव बहुधैतानि सूत्राणि न चोदक्षमाणि न तद्ग्रथनशैली आर्षीति कृत विस्तरेण।

यत्तु 'त्रिप्रभृतिषु शाकटायनस्य' इति पाणिनिसूत्रे यच्छाकटायनमतमुपात्तम्, तदत्र 'न सयोगे' १।१।११९ इति सूत्रे दृश्यते, यच्च 'व्योर्लघुप्रयत्नतर शाकटायनस्य' इत्युक्तम्, तदत्र 'अच्यस्पष्टश्रुतिश्च' 'यानुनात्' १।१।१५४, ५६ इति सूत्रयोर्दृश्यते, तथा 'लङ शाकटायनस्यैव' इति यत्पाणिनिना जुसादेश उक्त, सोऽप्यत्र 'आद् द्विषो, लेर्जुस् वा' १।४।१०६ इति दृश्यते—तेन अयमेव शाकटायन पाणिने परिचित—इति साधयन्ति, तत्र चोदक्षमम्। प्रायेण पाणिने सर्वाण्येव सूत्राण्यत्र शाकटायनेऽ नूदितानि शब्दान्तरैर्दृश्यन्ते, तथैवैतान्यपि पाणिनिसूत्राण्यत्रानूदितानीत्यपि शक्यते वक्तुम्। यतो हि शाकटायनो 'द्विष परस्य लङो र्जुस मन्यते' इति पाणिनिनोक्तम्। अर्थादन्ये न मन्यन्त इति सूचनाद्विकल्प सिद्ध्यति। न तु शाकटायनोऽपि विकल्पेन मन्यत इति पाणिनेरुक्ति। इह तु सूत्रे शाकटायनोक्तऽपि विकल्प एव विहित इति पाणिनेरनुवाद एवाऽय सिद्ध्यति, पाणिनिना यन्नाम गृहीतम्—स तु शाकटायनो भिन्न एवेति दृढाभिर्युक्तिभि प्रत्यपीपदाम। मतभेदोऽपि च दृश्यते, पाणिनिना शाकटाय नमतेन लघुप्रयत्नतरौ यकारवकारौ दर्शितौ, इह तु अस्पष्टश्रुती तौ विहितौ। यदि पाणिनिना एतत्सूत्रमनुद्धृत स्यात् तर्हि 'अस्पष्ट-श्रुती' इत्येवोक्त स्यात्। न हि पाणिनि शब्दान्तरैर्गोपायित परमतमनुवदितुमिच्छति, स्पष्ट शाकटायननामग्रहणात्। तस्माद् नेनैव शाकटायनव्याकरणकृता पाणिनिमतमनूदितम्, लघुप्रयत्नतरशब्द स्पष्टीकर्तुं च तत्र 'अस्पष्टश्रुती' इति निवेशितम्। सोऽ यमस्पष्टश्रुतिशब्दो लघुप्रयत्नतरता स्पष्टमावेदयितु शक्नोति न वेत्यन्यदेतत्। किंच शाकटायनमते लघुप्रयत्नतरौ यकारवकारौ भवत । अन्यमते तु न भवत इति पाणिन्युक्त्या विकल्प फलति, न तु शाकटायनोऽपि विकल्पमिच्छतीति पाणिनिसूत्रात् प्रतीयते। इह तु लघुप्रयत्नतरौ स्वयमपि विकल्पेन विहिताविति पाणिनिसूत्रानुवाद एवात्र फलतीति भाव्य सुधीभि। अन्यदपि विचार्यताम्—जैनमहाभागा उणादिसूत्राण्यपि शाकटायनकृतानि मन्यन्ते, न चोपलभ्यमानानामुणादिसूत्राणामेभि शाकटायन-सूत्रैरेककर्तृत्व सम्भवति। अय हि प्रसिद्धशाकटायनव्याकरणप्रणेता केवल लौकिक व्याकरणमन्वाचष्टे, न तु वैदिकशब्दसाधनेऽस्य प्रयत्नो दृश्यते। अत एव वैदिकशब्देषु इष्टस्वरसिद्धये येऽनुबन्धा पाणिनिना अन्ययागमादिष्वासञ्जिता, तेऽनेन परित्यक्ता।

तथाहि—स्वरार्थमेव स्त्रीप्रत्यये ङीप्ङीषोर्भेदः पाणिनिना कृतः, अत्र शाकटायने तु 'ङी' इत्येक एव प्रत्ययः उभयोः स्थाने दृश्यते, 'दिवादिभ्यः श्यन्' इति पाणिनिः, श्य एव तत्र शाकटायने । 'चिण्' स्थाने (जि) इत्येवात्र शाकटायने दृश्यते । तेन स्वरार्था अनुबन्धा नेह समादृता इति स्फुटमेव । उणादिसूत्रेषु तु स्वरार्थमनुबन्धासञ्जनं स्फुटं दृश्यते—उप्रत्ययप्रकरणे हि 'धान्ये नित्' इति पठितमुणादिषु 'अणु' शब्दसिद्ध्यर्थम् । तत्र नित्त्वं केवलं स्वरार्थमेव विहितम्, नान्यत्किमपि प्रयोजनं नित्त्वस्य । तथा चास्मिन् शाकटायनीये न स्वरसिद्ध्यर्थं यत्नः, उणादिषु तु स स्फुट इति कथमुभयोरेककर्तृकतास्तु । तथैवात्र शाकटायने गुणवृद्धि सम्प्रसारणादिसंज्ञा न दृश्यन्ते—उणादिषु तु ता एता 'रुहेर्वृद्धिश्च' रौहिषो मृगविशेषः, 'स्यन्देः सम्प्रसारणं धश्च' सिन्धुः, इत्यादि सूत्रेषु बहुशो व्यवहृता । एवं टिसंज्ञापि शाकटायने न दृश्यते, उणादौ तु 'मृजेष्टिलोपश्च मलम्, इत्यादौ सापि व्यवहृता । षित्त्वप्रयुक्तो ङीप्रत्ययोऽस्मिन् शाकटायने न विहितः, उणादिषु तु ङीप्रत्ययार्थं षित्त्वं 'कॄ शॄ वृञ् चतिभ्यः ष्वरच्' इत्यादौ दृश्यते, शर्वरीत्याद्या प्रयोगाश्च तत एव सिद्ध्यन्ति । कियदुदाहराम, उणादिसूत्राणामेतस्य शाकटायनव्याकरणस्य चैककर्तृकत्वं न केनापि सम्भावयितुमपि शक्यम् । तस्मान्नेदं शाकटायनव्याकरणं प्राचीनशाकटायनमुनिकृतम्, नापि वा इमानि उणादिसूत्राणि पाणिनिपूर्वभवेन शाकटायनेन रचितानि । उपलभ्यमानेषु उणादिसूत्रेषु सर्वापि प्रक्रिया पाणिन्यनुसारिणी प्रतीयत इति पाणिनेः 'उणादयो बहुलम्' इति सूत्रं दृष्ट्वा परभवेन केनचित् तद्विस्तारार्थमिमानि उणादिसूत्राणि रचितानीत्युणादौ पठिती कश्चिदपि जानीयात् । भवेयुः कदाचित् पाणिनेः पूर्वमपि कानिचिदुणादिविधायकानि सूत्राणि, उपलभ्यमानानि तु न सम्भवन्ति पाणिनेः पूर्वभवानि । एवं च पाणिनेः पूर्वं शाकटायनव्याकरणं न प्रमाणैः प्रसिद्ध्यति । संस्कृतव्याकरणशास्त्रेतिहासलेखकेन श्री युधिष्ठिरमीमांसकमहाशयेन तु एतच्छाकटायनव्याकरणरचयितुर्नामापि 'पाल्यकीर्ति' इति जैनग्रन्थप्रमाणैरेव साधितम् । समयश्च तस्य नवमी दशमी वा विक्रमशताब्दी निर्दिष्ट इति नात्रेदानीं विस्तरावश्यकता । आसीच्छाकटायनो वैयाकरणः, अतिप्राक्तनः, तेन व्याकरणं रचितमिति तु सन्दिग्धम् ।

अथामरजैनेन्द्रयोस्तु पाणिनिपरभवत्वं सुप्रसिद्धमेव । तथैव पद्यान्तरे प्रोक्तानां सारस्वतादीनामाधुनिकत्वेऽपि न कस्यापि विवादः । तदित्थं पाणिनेः पूर्वं कस्यापि व्याकरणस्य सत्तामनुमातुं नास्ति दृढतरं प्रमाणमिति श्रीमान् पाणिनिरेव प्रथमो व्याकरणकर्ता स्वीकार्यः—इति श्रीमतः सत्यव्रतसामश्रमिमहाशयस्य मतं निरुक्तालोचने विवृतं दृश्यते—तदेवात्रोपबृंहितमस्माभिः ।

पाणिनेः पूर्वमपि व्याकरणसत्तासाधनम् ।

वयं त्वत्र ब्रूमः । इदानीं पाणिनेः पूर्वभवं किमपि व्याकरणं सर्वाङ्गपूर्णं नोपलभ्यत इति सत्यम्, किन्तु पाणिनेः पूर्वं किमपि व्याकरणं नासीदेवेति न शक्यमभ्युपगन्तुम् । पूर्वमपि व्याकरणसत्ताया बहुभिः साक्षिभिः साध्यमानत्वात् । तथाहि—पाणिनिरेव भगवान् 'आङि चापः' इति तृतीयाविभक्तेरेकवचनमाङ्शब्देनाह, न च तृतीयैकवचनं तेन 'आङ्' इति पठितम्, किन्तु 'टा' इति । तत्र 'आङिति टासंज्ञा प्राचाम्' इत्येव व्याख्यातारो ब्रुवते । तेनेदमेव सिद्ध्यति—यत्प्राचीनेषु व्याकरणेषु तृतीयैकवचनम् 'आङ्' इत्येव श्रुतमासीत्, तत्स्वपरिभाषाया ङित्त्वप्रयुक्तानि कार्याणि परिहर्तुं पाणिनिना 'टा' रूपतां प्रापितम्, परं पूर्वभवव्याकरणसंस्कारवशात्—तस्यापि स्मरणसंरक्षणार्थं वा सूत्रे 'आङ्' अपि निर्दिष्टः । तथैव 'औङ आपः' इत्यपि । न हि प्रथमाद्वितीययोर्द्विवचने 'औङ्' प्रत्ययः पाणिनिना स्वव्याकरणे स्वीकृतः, अपि तु 'औ' 'औट्' इति । प्राक्तनव्याकरणसंस्कारवशात्तु सूत्रे 'औङ' इत्यप्युच्चारितम् । किमन्यत्—'कर्मणि द्वितीया' 'कर्तृकरणयोस्तृतीया' इत्यादिषु द्वितीयातृतीयादिनाम्ना विभक्तयः पाणिनिना विहिताः, न तु द्वितीयातृतीयादिसंज्ञा स्वशास्त्रे कृता तत्रापि प्राक्तनव्याकरणप्रसिद्धसंज्ञाभिरेवात्र व्यवहार इति व्याचक्षते व्याख्यातारः । न च 'सु–औ–जस्' इत्यादीनां क्रमेण गणनयैव प्रथम–द्वितीयत्वादिसिद्धेस्तदर्थं संज्ञाप्रयासो न कृत इति शक्यं समाधातुम् । तिङ्प्रत्ययेषु प्रथम–मध्यमोत्तमताया अपि सन्निवेशेनैव सिद्धतया तदर्थं सूत्रप्रणयनवैयर्थ्यप्रसङ्गात् । प्रसिद्धो ह्यन्यार्थबोधक उत्तमशब्दः संस्कृतवाङ्मये । तस्मात्स्पष्टप्रतिपत्तये संज्ञा कर्तव्या एवेति पाणिनेः शैली, न च सा सुप्सु समादृतेति तत्र व्याकरणान्तरसंज्ञासमाश्रयणमेव युक्तमापतति । तथैव 'तितुत्रतथसिसुसरकसेषु च' इति दशसु कृत्प्रत्ययेषु इण्निषेधः पाणिनिना पठितः । न चैतेषु बहवः प्रत्ययाः पाणिनिशास्त्रे कृत्प्रत्ययेषु पठ्यन्ते—तस्माद् व्याकरणान्तरस्था अप्यत्रानूदिता इत्येव वक्तव्यं स्यात् । उणादिष्वेते पठिता इति चेत्, तदपि व्याकरणान्तरमेव, न पाणिनीयमित्यनुपदमेव साधितमस्माभिः । ऋतधातुः, स्तम्भु–स्तुम्भुप्रभृतयश्च न पाणिनीये धातुपाठे दृश्यन्ते, सूत्रेषु तु पठ्यन्ते । यान् सौत्रान् धातूनाहुर्व्याख्यातारः । त एतेऽपि पूर्वव्याकरणसंस्कारेणैव पाणिनिना स्वसूत्रेषु निबद्धा इत्येव स्वीकर्तुमापतति । एवं 'चर्करीतं च' इत्यदादिगणे पठितं पाणिनिनाचार्येण, यङ्लुगन्तं तेन गृह्यत इति व्याख्यातार आहुः । न च पाणिनीये व्याकरणे यङ्लुगन्तं चर्करीतमिति परिभाष्यते, प्राक्तनेष्वेव व्याकरणेषु कारितमिति णिजन्तम्, चिकीर्षितमिति सन्नन्तम्, चेक्रीतमिति यङन्तं, चर्करीतमिति यङ्लुगन्तं व्यवहृतमासीत्, निरुक्तेऽपि दृश्यते तथा व्यवहारः । तस्मात्प्राचीनव्याकरणसंस्कारेणैव पाणिनिना चर्करीतं च इत्यदादौ निबद्धितम् । किंच प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् । कालोपसर्जने च तुल्यम् १।२।५७ इत्यत्र प्रत्ययार्थस्य प्राधान्याय अनद्यतनादिकालविवरणाय च वचनं न कर्तव्यमिति पाणिनिना तादृशवचनं खण्डितम्, तद्वचनं केषाञ्चिद्यदा भवेत्, तदैव तत्खण्डनमुपपद्येत, निरवलम्बस्य खण्डनस्यायुक्तत्वात्, तच्च वचनं पूर्वेषां वैयाकरणानामेव भवेदित्यतोऽपि पूर्वव्याकरणसत्ता स्फुटं सिद्ध्यति । किं चात्रैव पूर्वं 'लुपि युक्तवद्व्यक्तिवचने' इति स्वयं लिङ्गवचनं विधाय 'तदशिष्यं संज्ञाप्रमाणत्वात्' १।२।५३ इति पाणिनिना तदर्थं सूत्रकरणानावश्यकता या प्रकटिता, तत्रापीदमेव शक्यं वक्तुम्—यत्पूर्वव्याकरणान्यनुसृत्य पूर्वं विधानं कृतम्, तदनु च स्वमतेन तत्खण्डितमिति । तस्माद्भगवान् पाणिनिरेव स्वपूर्वभवव्याकरणसत्ताया मुख्यः साक्षी । अथ भाष्यस्यापि साक्ष्यं दृश्यताम् । 'अत एकहल्मध्ये' इत्यादिसूत्रे 'देभतुः' इत्युदाहरति पतञ्जलिः । 'मदेः परस्य लिटि' इति सूत्रे च 'सस्वजे' इति ।

तावेतौ प्रयोगौ पाणिनिसूत्रैर्न सिद्ध्यतः, दम्भधातोरुपधाभूतस्य मकारस्य, स्वञ्जधातोरुपधाभूतस्य ञकारस्य च लिटि लोपार्थं पाणिनिना प्रयत्नाकरणात्। संयोगात्परस्य लिट् पाणिनिपरिभाषया कित्त्वाभावात्। तस्मात् 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति व्याकरणान्तरमनयोरुदाहरणयोर्भाष्यकृतानुसृतमिति भट्टोजिदीक्षित आह। 'न दुहस्नुनमां यक्चिणौ' इति सूत्रे च भारद्वाजीयाः पठन्ति—'णिश्रन्थिग्रन्थि' इत्यादि महाभाष्यकृतोक्तम्, त इमे भारद्वाजीया व्याकरणान्तराचार्या एव शक्या उररीकर्तुम्। 'औङ आपः' इति सूत्रे च द्विवचने ङित्त्वप्रयुक्तं कार्यं याडादि कुतो नेत्याशङ्क्य 'अथवा पूर्वसूत्रनिर्देशोऽयम्, पूर्वसूत्रेषु च येऽनुबन्धा न तैरिहेत्कार्याणि क्रियन्ते' इति स्पष्टं भाष्यकारः पूर्वसूत्रसत्तां स्वीकरोति। वार्तिकमपीह तदर्थप्रतिपादकं पठितमिति वार्तिकभाष्याभ्यामुभाभ्यामपि पाणिनेः पूर्वं व्याकरणान्तरसत्ताया स्पष्टं साक्ष्यं दत्तम्। इदमेव भाष्यं व्याचक्षाणेन कैयटेनोक्तम् 'पूर्वाचार्यैर्ह्रे अपि द्विवचने ङितौ पठिते, न चेह (पाणिनीये व्याकरणे) क्वचिदपि औङ्ङयोरस्ति, सामान्यग्रहणार्थं पूर्वसूत्रनिर्देशः' इति। 'पृषोदरादीनि यथोपदिष्टम्', इति सूत्रे च वार्तिककृता तद्व्याख्यात्रा भाष्यकृता च 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' इति स्फुटतरैरेव शाकटायनव्याकरणसत्ता स्वीकृता। शकटस्य तोकम्—शाकटायनो व्याकरणे नाम धातुजमाह—इत्युक्त्या तदीयव्याकरणसत्ता स्पष्टं प्रतीयते—न तु तस्य मतमात्रम्। यद्यपि उपलभ्यमानं शाकटायनव्याकरणं न पाणिनितः प्राचीनं भवितुमर्हतीति विस्तरेण प्रत्यपीपदाम, तथापि आसीत् किमपि शाकटायनं व्याकरणं पाणिनेः पूर्वमित्यत्र तु न संशयलेशः। पाणिनिना तन्नामग्रहणात्—निरुक्तवार्तिकभाष्यादिषु तद्व्याकरणनामोल्लेखाच्च। 'शताच्च ठन्यतावशते' ५।१।२१ इति सूत्रभाष्यव्याख्यायां च स्फुटं कैयट आह 'आपिशलिकाशकृत्स्नयोस्तु 'अग्रन्थे' इति वचनाद् अन्यत्र प्रतिषेधाभावः। नियतकालाश्च स्मृतयो व्यवस्थाहेतवः' इति मुनित्रयवचनेनाद्यत्वे साधुत्वमात्रप्रविभाग' इति। अनेन लेखेन स्पष्टं प्रतीयते—यत् कैयटेन स्वयमापिशलिकाशकृत्स्नयोर्व्याकरणं दृष्टम्। तत एव च तन्मते पाणिनिसूत्राद्वैषम्यं स्पष्टं निर्दिष्टम्। अस्मिन् युगे च वैयाकरणे पाणिनीयव्याकरणमेव प्रमाणत्वेन मन्तव्यमिति यदि स्वमतमुपन्यस्तम्। ततः पूर्वं भर्तृहरिणा च भाष्यस्य त्रिपादीव्याख्यायां 'सर्वादिगणपाठस्य आपिशलिव्याकरणे क्रमो भिन्न इत्युक्तम्' तेन च सोऽप्यापिशलिव्याकरणं दृष्टवानिति स्फुटं प्रतीयते। अत्रोभयत्र तद्धितविषयकः सुबन्तविषयकश्च निर्देश इति आपिशलिकाशकृत्स्नयोः प्रातिशाख्यं ताभ्यां दृष्टं स्यादित्यपि न वक्तुं शक्यम्, प्रातिशाख्ये हि केवलं स्वरविषयः सन्धिविषयश्च भवतीति तद्धितसुबन्तादिविचारस्य तत्र न सम्भवः। प्राचीनानि प्रातिशाख्यानि सुबन्त-तिङन्त-तद्धितादीनपि व्याख्यान्ति स्मेति चेत्—व्याकरणान्येव तर्हि तानि, इति नाममात्रेऽयं विवादः पर्यवस्यति। माधवोऽपि धातुवृत्तौ तनादिगणे 'क्षिणु हिंसायाम्' इति धातुप्रकरणे आह—'अत्र सर्वत्र विद्वचनेषु विकरणापेक्षो गुणः संज्ञापूर्वको विधिरनित्य' इति न भवतीत्यात्रेयमैत्रेयौ। तथा चापिशलिः शब्दविकरणेषु धातुगुणमभिधाय करोतेश्च सूदेश्चेत्यसूत्रयत्। पुगन्तलघूपधस्य च इत्यत्र रक्षितेन चोक्तम्।

शाकटायनक्षीरस्वामिभ्यामयं धातुर्न पठ्यते। इत्यादि। तेन स्पष्टमिदं सिध्यति—यन्माधवेनाप्यापिशलं शाकटायनं च व्याकरणं दृष्टम्, तयोरुद्धरणं वा आत्मग्रन्थे क्वचन दृष्टमिति। भट्टारकहरिश्चन्द्रादिभिश्च ऐन्द्रव्याकरणस्यापि सूत्रमुद्धृतमिति तदपि बहुकालपर्यन्तं प्रचलितमासीदिति प्रसिद्ध्यति। किं च या एता 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्याद्याः परिभाषाभाष्यकृता पाणिन्युत्तरं साधिता, याभिर्विना पाणिनीये व्याकरणे न भवति निर्वाहः, ता अपि व्याकरणान्तरेषु वाचनिक्य इत्येव नागेशाद्या अभिमन्वते। तस्मात्सर्वेऽपि वैयाकरणाः पाणिनेः पूर्वं व्याकरणान्तरसत्ताया दृढं साक्षिणः। अथ शास्त्रान्तराणामपि साक्ष्यं गृह्यताम्। भगवता पाणिनिना 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' इति सूत्रयता पाराशर्यापरपर्यायव्यासविरचितशारीरकसूत्राणां सत्ता स्वस्मात्पूर्वं स्फुटमभिव्यञ्जिता। तदात्वे तेषां भिक्षुभिरध्येयत्वाद् भिक्षुसूत्राणीति प्रसिद्धिर्भवेदूनम्। व्याससूत्राणि चेमानि सर्वेभ्यो दर्शनसूत्रेभ्योऽर्वाक्तनानि, सर्वेषामत्र समालोचनदर्शनात्। ततश्च सर्वाणि दर्शनसूत्राणि पाणिनेः प्राग्भवान्येवेति उररीकर्तव्यं भवति। तत्र च गौतमीये न्यायसूत्रे 'विकारादेशोपदेशात् संशयः' इति सूत्रं शब्दनित्यत्वप्रकरणे द्वितीयाध्यायस्य द्वितीये पादे दृश्यते। तस्यायमेवाशयो यत् केचन वैयाकरणाः शब्देषु विकारान् विदधति, केचिच्चादेशान्। विकारो नाम तस्यैव वर्णस्य वर्णान्तरतापत्तिः, आदेशस्तु एकस्य वर्णस्य स्थाने वर्णान्तरप्रयोगः। तत्रानयोः किं सत्यमिति विचार्यते। एवं प्रतिज्ञाय तेन उभावपि पक्षौ चिन्तितौ, आदेशपक्षश्च सिद्धान्तितः। विकारादेशविधानं चेद् व्याकरणशास्त्रे एव सम्भवतीति ततः पूर्वं व्याकरणानां सत्ता सिद्धा भवति। तच्च व्याकरणं पाणिनेः पूर्वभवमेवेति तस्यापि साक्ष्यं पूर्वभवव्याकरणसत्तां प्रमाणीकरोति। न्यायसूत्रस्य पाणिनिपरभवत्वस्वीकारे समानकालिकत्वस्वीकारेऽपि च पाणिनिरादेशवादी, इह चोभयोरुपदेशः स्थापित इति विकारवादि व्याकरणमपि किंचित्पूर्वमासीदेवेति सिद्ध्यति। वाल्मीकीये रामायणे च हनुमतः प्रथमदर्शनकाले श्रीरामेण लक्ष्मणं प्रत्युक्तम्—

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्। बहु व्याहरताऽनेन न किंचिदपशब्दितम्। (वा० रा० कि० काण्डे)

तेन तदात्वेऽपि व्याकरणसत्ता प्रतीयते। न च पाणिनीयस्य तदात्वे सम्भव इति व्याकरणान्तरमेव प्राग्भवं स्वीकार्यं स्यात्। किं बहुना वेदाङ्गेषु मुख्यतया सर्वत्र व्याकरणं पठ्यते—ब्राह्मणेष्वपि च तत्र तत्र व्याकरणविषया निर्दिश्यन्ते—इति एतद्युगजातपाणिनिपर्यन्तं मुख्यं वेदाङ्गं नैव प्रचलितमिति न कथमपि श्रद्धातुं शक्यम्। चीनदेशाद्भारतभ्रमणार्थमागतः ह्यूआनचूआन नामकः पर्यटकोऽपि पाणिनेर्विषये बहु लिखन्निदमपि जगाद—यत् पाणिनेः पूर्वं बहूनि व्याकरणानि परस्परं विप्रतिपन्नानि विशृङ्खलानि च प्रचलन्ति स्म। तत्रेन्द्रस्य व्याकरणकर्तृतया स्पष्टमनेन नाम गृहीतम्। एतस्य लेखानामितिवृत्तविषये बहुतरं प्रामाण्यमभ्युपगम्यते ऐतिहासिकैः। युक्ततरं च तत्, देशान्तरादागतेन स्पष्टमनिभ्या विलोक्य यत्किंचित् तत्राविश्वासे कारणाभावात्। व्याकरणान्तरसत्ता यद्यपि न तेन स्वयं दृष्टा—अथापि द्वादशशतमितवत्सरेभ्यः पूर्वमपीद

जना पाणिने प्राग्व्याकरणसत्तामभ्युपगच्छन्ति स्म, नेभ्य एव तेन श्रुतमिति तु निर्विवादम्। ततश्च 'नह्यमूला जनश्रुति' इति न्यायेन न तत्र संदेहोऽवतरेत्। बृहत्कथामूलकेषु कथासरित्सागर-बृहत्कथामञ्जरीप्रभृतिष्वपि पाणिने पूर्वमैन्द्रव्याकरणस्य सत्ता, पाणिनीयव्याकरणप्रसारोत्तर तद्विलोपश्चेति स्पष्टमुद्घुष्यत एव। तस्मादेवानेन प्राणरूपेणेन्द्रेण ज्ञानाधिष्ठात्रा मानुषी वाग् व्याकृतेति व्याख्यानपूर्वं श्रुतेस्तात्पर्यमनभिशङ्कनीयमास्ता वैज्ञानिकदृष्ट्या, अथापि मनुष्य विशेषोऽपि कश्चिदिन्द्रो व्याकरणग्रन्थमपि कञ्चन निर्मितवानेवेति बहुभि सात्विभि साधितोऽयमर्थो नापलपनीय कथ मपि। यद्यपि पस्पशाह्निके महाभाष्ये कथ शब्दानुशासन कर्तव्यम्—इति प्रश्नमुत्थाप्य शब्दाना प्रतिपदपाठ कर्तव्य इति पूर्वपक्षरूपेणोपन्यस्य तस्य शब्दप्रतिपत्तावनभ्युपायता प्रदर्श्य उत्सर्गापवादरूपेण नियमबोधकसूत्रनिर्माणमेवात्रोपाय इति सिद्धा न्तितम्, तेन पाणिनीयव्याकरणमेव सूत्रैर्नियमपरिष्कारकमिति ध्वन्यत इवेति केचिदागृह्णन्ति, बृहस्पतीन्द्रनामोल्लेखाद् बृहस्पति नेन्द्राय शब्दपारायणमेव शिक्षितम्—इति स्पष्टोक्त्या च बृहस्पतेरधीत्य शब्दपारायणरूपमेव व्याकरणमिन्द्रेण विरचित स्यादि त्यप्यनुमिन्वन्ति, पर महाभाष्यकारेणैव यदा पूर्वप्रदर्शितरीत्या नियमबद्धव्याकरणसत्ता पूर्वमपि स्वीकृता, तदेसे व्यञ्जनानुमाने न प्रसर्तुं प्रभवत। अपि तु लक्षणरूपस्य व्याकरणस्यावश्यकत्वमेव तेन व्याकरणप्रयोजननिरूपणावसरे स्थापितम्, तच्च लक्षणरूप व्याकरण प्राक्तन पाणिनीय चेति सामान्येन सर्व सगृहीतमित्येवाभ्युपगन्तव्य स्यात। अग्रे च शब्दस्य नित्यत्व-कार्यत्वविचारमुपक्षिप्य 'सग्रहे एतत्प्राधान्येन परीक्षितम्' इत्यादिना विस्तरभियाऽत्र त विचारमुपेक्षमाणेन 'उभयथाऽपि लक्षण प्रवर्त्यम्' इति वैयाकरणाना नैकत्राभिनिवेश इति प्रदर्शयता 'कथ पुनरिद भगवन पाणिनेराचार्यस्य लक्षण प्रवृत्तम्' 'सिद्धे शब्दा र्थसम्बन्धे' इति पाणिनिव्याकरणविचारारम्भ सूचयता महाभाष्यकारेणैव स्फुटमिद ध्वनितम्—यत्पूर्वमपि सन्ति विभिन्नानामा चार्याणा लक्षणानि, तेषु कानिचिच्छब्दस्य नित्यता कानिचिच्चानित्यता लक्ष्यीकृत्य प्रवर्तन्ते—पाणिनिस्तु भगवान् शब्दनित्यता वादमेव लक्ष्यीकृत्य प्रवृत्त इति। 'इद लक्षण कथ प्रवृत्तम्' इत्युक्त्या लक्षणान्तराणामपि सत्ता ध्वन्यत एवेति सुधिय एव विवे चयन्तु। इत आरभ्यैव पाणिनीयस्य व्याकरणस्य विचारारम्भ इतीत प्रागुक्त प्रयोजनादिक सर्वमपि सर्वव्याकरणसाधारणमित्यपि स्फुटीभवति, तेन लक्षणरूप व्याकरण पाणिनीयमेवेति पूर्वोक्ता व्यञ्जना न पद लभते। आस्ता विस्तर। श्रद्धेयस्यापि सामश्र मिमहाभागस्य पाणिने पूर्वं व्याकरणान्तरसत्ता नासीदेवेति निरुक्तालोचनप्रदर्शित मत न वयमभ्युपगन्तु प्रभवाम। इदानीं पाणिने पूर्वभव किमपि व्याकरण नोपलभ्यत इति तु स्फुटमेव। तेन तानि व्याकरणानि कियन्ति कीदृशानि वा आसन्-इत्यादि विवेक्तु नास्त्येव किमपि साधनम्। विप्रतिपत्तिस्तेषा क्वचित्कदासीदिति तु पाणिनिसूत्रेषु तत्तन्मतोद्धरणादेव प्रतीयते, चीन पर्यटकस्य लेखेनापि च तत्सिद्ध्यति। सत्यामपि तादृश्या विप्रतिपत्तावद्यत्वे पाणिनीय सिद्धान्त एवास्माभिरादर्तव्य इत्यपि च कैयटोक्त्या प्रदर्शितपूर्वम्।

प्रातिशाख्यानां पाणिनेश्च पौर्वापर्यविचारः।

अथ यान्येतानि प्रातिशाख्यान्यद्यत्वे समुपलभ्यन्ते, तानि पाणिने प्राक्तनानि पश्चाद्भवानि वेत्यत्रापि विप्रतिपत्तिरेव। सत्य व्रतसामश्रमिमहाशय पाणिनेरर्वाक्तनान्येतान्युपगच्छति। युरोपीयास्तदनुयायिनश्च भारतीया गवेषका विद्वास केचन पाणिने प्राक्तनानि प्रातिशाख्यानि मन्यन्ते। केचित्तु पाणिनेरर्वाक्तनानि। केचित्तु शौनकादीनि प्राक्तनानि, कात्यायनादीनि चार्वाक्तनान्य भ्युपगच्छन्ति। आश्चर्यमिद यत्प्रातिशाख्यान्यपि पञ्चाशतोऽप्यधिकाना पूर्वाचार्याणा नामानि गृह्णन्ति, पर न क्वापि तेषु पाणिने-र्नामग्रहणम्। पाणिनिनाऽपि भगवता स्मृता केचिदाचार्या शाकल्य-शाकटायन-गार्ग्य-गालव-काश्यपप्रभृतय, समुपलभ्यमान प्रातिशाख्यप्रणेतृणा शौनक-कात्यायन-कुथादीना नामानि तु न क्वापि स्मृतानि। ये तु ऋक्तन्त्रप्रातिशाख्य शाकटायनकृतम भिमन्यन्ते, तेषामपि नये न ऋक्तन्त्रप्रणेता शाकटायन पाणिनिना गृहीतनामेति सम्भाव्यते—तादृशाना मतानामप्रदर्शनात्। न च ऋक्तन्त्रप्रातिशाख्यमिदानीमुपलभ्यमान पाणिने पूर्वभव सम्भवतीत्यनुपद दर्शयिष्याम। यदि क्वापि परस्पर नामोल्ले खोऽभविष्यत्तर्हि सुख पौर्वापर्यनिश्चयोऽभविष्यत्। ये तु शौनकादिभ्यश्छन्दसि (४ ३-१०६) इति शौनकनामग्रहणात् शौनक पाणिने प्राक्तन सिषाधयिषन्ति ते नितान्त भ्रान्ता। नह्यत्र प्रातिशाख्यप्रवक्ता शौनको गृह्यतेति, प्रत्युत शौनकप्रोक्ते च्छन्दसि विवक्षित एव णिनिप्रत्यय पाणिनिरनुशास्ति—वेदाङ्गे तु वाच्ये शौनकीया शिक्षा—इत्येव तत्र प्रत्युदाह्रियते। अस्ति च मन्त्रद्रष्टापि शौनक सुप्रसिद्ध। ननु च अङ्गप्रवक्तृव्यावर्तनाय यत्सूत्रे छन्दसीत्युपात्तम् तेन अङ्गप्रवक्तुरपि परिचय पाणिने सिद्ध्यति, अन्यथा कस्य व्यावर्तनाय 'छन्दसि' पद सूत्रोपात्त स्यात्, तेन प्रातिशाख्यप्रणेता शौनकोऽपि पाणिने प्राक्तन सिद्ध्यतीति चेत्, तदपि भ्रान्तम्। 'शौनकीया शिक्षे' ति प्रत्युदाहरणदर्शनेन शिक्षाप्रवक्तुरेव पाणिने प्राक्तनत्वसिद्धे। न हि शिक्षाप्रवक्ता प्रातिशा ख्यप्रवक्ता च शौनक एक शक्य आस्थातुम्, शौनकीये प्रातिशाख्ये शिक्षाविषयाणा वर्णक्रम-स्थानप्रयत्नादीनामपि दर्शनात्। यदि हि भगवता शौनकेनानेनैव पृथक् शिक्षा निरमास्यत, न तर्हि प्रातिशाख्ये ते विषया समग्रहीष्यन्त, पुनरुक्त्यापत्ते। तस्मात् प्रातिशाख्यप्रवक्तु शौनकस्य पाणिनिपरिचितत्वे न किमपि मानमिति सुस्पष्टम्। यत्तु 'अष्टावाद्यानवसानेऽप्रगृह्यानाचार्या आहुरनुनासिकान् स्वरान्' (शौ० प्रा० प० १ सू० ६३) इत्यत्र आचार्यपदेन पाणिनिरेव शौनकेन स्मृत, तेन पाणिनिपरभवत्व शौनकादीना प्रातिशाख्यकर्तृणा सिद्ध्यतीति सामश्रमिमहाशय आह स्म, तन्न युज्यते। यतो ह्यत्र अष्टानामपि स्वराणामवसानेऽ नुनासिकत्वमुक्तम्, अष्टौ स्वराश्च शौनकेन 'अकारौकारावि उ ए ओ ऐ औ' इत्यादावेवोक्ता। तत्र दीर्घाणा परिगणनेऽपि अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, इत्यष्टौ भवन्ति। ततश्च ऋकारस्याप्यत्रानुनासिकत्व विहितमिति स्पष्ट भवति। पाणिनिना तु 'अणोऽप्र गृह्यस्यानुनासिक' इति अणपदेन 'अ, इ, उ' इति त्रयाणामेवानुनासिकत्व विहितमिति न ऋकारस्यानुनासिकत्व तन्मते सिद्ध्यति। अत्राण पूर्वणकारेणैव ग्रहणस्य भाष्यकृता सिद्धान्तितत्वात्। ततश्च सत्येव मतवैषम्ये 'आचार्या आहु' इति आचार्य

पदेन कथं पाणिनेर्ग्रहणं सिद्ध्येत्। न हि पाणिनिरध्यानामनुनासिकत्वमाहेति मृषा प्रलापः शौनकस्य तथा सति सिद्ध्येत्। तस्मादविचारिताभिधानमेवेदं सामश्रमिमहाशयस्य। यदपि च तेनैवोक्तं निरुक्तालोचने 'व्याडिना पाणिनीयानि सूत्राणि सग्रहे व्याख्यातानि, व्याडेश्च नाम शौनकेन बहुधा स्मृतम्—

परिग्रहे त्वनार्षान्ता तेन वैकाक्षरीकृतात्। परेषां न्यासमाचारं व्याडिस्त चेत् स्वरौ परौ (पट ३।२२)

उभे व्याडिः समस्वरे (३।२८) व्याडेः सर्वत्राभिनिधानलोपः (६।४३)

समापाद्यं नाम वदन्ति षत्वं तथा णत्वं सामवशाश्च सन्धीन्। उपाचारं लक्षणतश्च सिद्धमाचार्या व्याडिशाकल्यगार्ग्याः (३।२१) व्याडिर्नामिक्यमनुनासिकं च (१३।२७) इत्यादिषु। तच्चेदं व्याडेर्नामग्रहणं पाणिनेरेव नामग्रहणं प्रयेतव्यम्। व्याडेः पाणिनिसूत्रव्याख्यातृत्वादिति। तदेतदपि न मनोरमम्। कोऽयं व्याडिः, कति च व्याडिनामान आचार्याः, इति सर्वमेतावदपि अस्फुटमेव। पाणिनिनापि 'छ्यादयः शालायाम्' (६।२।८६) इति सूत्रे छ्यादिगणे व्याडिपदं सगृहीतम्। तेन पाणिनेः प्राक्तनोऽपि कश्चिद्व्याडिरासीदिति निश्चयवम्। व्याडिकृता विकृतिवल्ली प्रसिद्ध्यति, तत्र तेन बहुधा शौनकमतं सगृहीतम्। मङ्गलाचरणे च—'नत्वादौ शौनकाचार्यं गुरुं वेदमहानिधिम्' इति गुरुत्वेन शौनकः स्मृत इति सामश्रमिणैवोक्तम्। न हि शौनकः स्वशिष्यस्य व्याडेराचार्येषु नाम गृह्णीयात् 'आचार्या व्याडिशाकल्यगार्ग्याः' इति। तस्मादन्यो विकृतिवल्लीप्रणेता व्याडिः, अन्यश्च शौनकेनाचार्येषु परिगणितो व्याडिरित्येव वक्तुं युक्तं भवति। शौनकेन च स्वरविषय एव प्रायेण व्याडिः स्मृतः, अन्येष्वपि प्रातिशाख्येषु तस्य नाम दृश्यते, इति प्रातिशाख्यप्रवक्तैवाय सम्भाव्यते। स एव च प्राचीनो व्याडिः पाणिनिनाऽपि छ्यादिषु पठितो भवेत्, शालासम्बन्धिनं हि व्याडिं पाणिनिः स्मरति, प्रातिशाख्यकृता चासन् परिषदः शालाश्चेति श्रीवासुदेवशरणप्रभृतयः प्रमाणैः प्रसाधयन्ति इति। पाणिनिसूत्राणि व्याडिना व्याख्यातानीत्यपि किंवदन्तीमात्रम्, न तु प्रमाणसिद्धम्। महाभाष्यकृता हि सग्रहग्रन्थस्य नाम गृहीतम्, न तु सग्रहो व्याडिकृत इति, पाणिनिसूत्रव्याख्याभूत इति वा तेन क्वचिदुक्तम्। नागेशादिभिः किंवदन्तीमात्रमेवाश्रित्य सग्रहस्य व्याडिकृतत्वादि ख्यापितम्। सग्रहः स्वतन्त्र एव ग्रन्थः शब्दविचारपरो भवेदित्यपि सम्भाव्यत एव। अतिप्राचीनेन हरिणाऽपि तस्य लोप एवोक्त इति तद्विषयकः यत्किमप्यनुमानं कपोलकल्पनामात्रमेव। कथासरित्सागरादौ पाणिनिसमकालिको व्याडिरुच्यते, परं सामश्रमिमहाशयः कथासरित्सागरमयथार्थं निनिन्देति कथं तदाधारेण पाणिनिसमकालिकं व्याडिमभ्युपगच्छतु। मान्यानपि पूर्वाचार्यान् नामसादृश्यभ्रान्ताननेकत्रोपहसन् सामश्रमिमहाशयः कथं व्याडिनामविषय एव विभ्रान्त इति न वयं विवेक्तुं प्रभवाम। तस्माद् व्याडिस्मरणेन पाणिनेरर्वाग्भवत्वसाधनं प्रातिशाख्यानां न दृढमिति पौर्वापर्यं पाणिनीयात् प्रातिशाख्यानां सन्दिग्धमेव भवति। तथैव बृहद्देवतायां शौनकविरचितायामेव 'भगवानाह शौनकः' इति शौनकस्य 'भगवान्' इति विशेषणं दृश्यते। तस्माद्यन्तं विभिन्नाः कति शौनका इत्यपि न निश्चितं भवति।

प्रातिशाख्यानां पाणिनिपूर्वभवत्वं ये वदन्ति, तेषामेषा युक्तिः—यत् प्रतिपदमुच्चार्यं षत्वणत्वादिविधाने प्रातिशाख्यकारा क्लिश्यन्ति, तत् पाणिनेरुत्तरभवानां न सम्भवति। पाणिनिना षत्वणत्वाद्यनुगमस्य कृतत्वात्, तादृशक्लेशस्य पश्चादनवसरदुःस्थत्वात्। तथा हि शौनकीये ऋग्वेदप्रातिशाख्ये—पञ्चमपटलस्यादित एव अष्टत्रिंशसूत्रपर्यन्तं षत्वप्रपञ्चो दृश्यते, तत्र च प्रत्नाक्षेषु सूत्रेषु बहुत्र *प्रतिपदमुच्चार्य षत्वं विहितम्। तत उत्तरं च तत्रैव ऊनचत्वारिंश सूत्रमारभ्य सप्तपञ्चाशं सूत्रं पटलान्तं* यावण्णत्वप्रपञ्चः कृतः, तत्रापि बहुत्र प्रतिपदमुच्चार्यं णत्वविधिनिषेधौ दृश्येते। तथैव कात्यायनीये प्रातिशाख्येऽपि तृतीयस्याध्यायस्य षट्पञ्चाशं सूत्रमारभ्य चतुरशीतितमसूत्रपर्यन्तमष्टाविंशत्या सूत्रैः षत्वस्य विधिनिषेधप्रपञ्चः, आधिक्येन च प्रतिपदपाठ एव तत्र शरणीकृतः, तदग्रे च तत्रैव पञ्चाशीतितमं सूत्रमारभ्य प्रायेण नामग्राहमेवैकादशभिः प्रत्नत्वे सूत्रैर्णत्वप्रपञ्च उक्तः। अन्येष्वपि प्रातिशाख्येषु सेयमेव प्रक्रिया प्रायेण दृश्यते। सोऽयं प्रपञ्चः स्वस्वशाखार्थमेवेत्यपि न विस्मर्तव्यम्। पाणिनिना तु भगवता लौकिकेषु वेदस्य सर्वासु च शाखासु अनुगतीकृत्य लघुभिः पञ्चषष्ट्या सूत्रैः (अष्टमाध्याये तृतीये पादे ५५–११९ सूत्रैः) सर्वोऽपि षत्वविधिः समापितः, णत्वं च तदनुगतीकृत्य लोकवेदसाधारण्येन लघुभिरूनत्रिंशन्मितैः सूत्रैः सर्वमपि बोधितम् (८।४।२–३९)। एवं विसर्जनीयस्य कुत्र सकारो भवति, कुत्र वा षकारः, क्व वा रेफः, क्व तु विसर्ग एवेत्येतदर्थं प्रतिपदग्रहणानि अतिप्रत्नानि ऊनचत्वारिंशत् सूत्राणि शौनकीये प्रातिशाख्ये चतुर्थे पटले (२५–६३) अवलोक्यन्ते, कात्यायनोऽपि तृतीयाध्यायस्य षष्ठसूत्रमारभ्य एकचत्वारिंशसूत्रपर्यन्तं षट्त्रिंशता सूत्रैः स्वशाखीयं विसर्गाणामुक्तविधं विकारं प्रत्यपादयत्। पाणिनिस्तु ८।४।३४ सूत्रमारभ्य ८।४।५४ पर्यन्तमेकविंशत्या लघुभिः सूत्रैर्लोकवेदसाधारण्येन विसर्गस्योक्तविधान् आदेशान् समग्रहीत्। इतोऽतिरिक्तोऽपि 'अन्तरिक्षक्षन्ति' 'प्रातरग्निम्' 'अविभरुपस्थे' इत्यादिषु, रेफस्योत्वव्यावृत्तये 'अम्नोदात्तमन्तः' 'प्रातः' 'अविभः' इत्यादिः महान् प्रपञ्चः शौनकस्य प्रथमे पटल उपलभ्यते। पाणिनिना तु रोरुत्वम्, केवलस्य रेफस्य नोत्वमित्यनुगमेन सर्वं साधितम्। तथैव एङः पदान्तादति (६।१।१०९) इति पाणिनिना यदकारस्य पूर्वरूपमुक्तम्, तत्कुत्र भवति, कुत्र वा न भवतीत्येतस्य शौनकीयद्वितीये पटले चतुर्दशसूत्रमारभ्य षट्त्रिंशं सूत्रं यावत्प्रतिपदग्रहणपुरःसरं महान् प्रपञ्चो दृश्यते। एतद्धि प्रातिशाख्येषु अभिनिधानमुच्यते। यजुःप्रातिशाख्ये चापि चतुर्थाध्यायस्य एकषष्टितमं सूत्रमारभ्य षडशीतितमसूत्रपर्यन्तमस्यैव पूर्वरूपस्य महान् प्रपञ्चः कृतः। पाणिनीये तु केवलं सप्तभिरेव सूत्रैश्छन्दस्यपवादोऽनुगतीकृत्य दर्शितः। कियदुदाहार्यम्। अनुगमाभावेन सर्वत्रैव प्रातिशाख्येष्वेवमेव स्वरसंस्कारविषये विस्तरो दृश्यते। यदि हि पाणिनीयं व्याकरणं पूर्वमभविष्यत्, तत्र चानुगमात् प्रातिशाख्यकृद्भिरुद्दधयन्त, तर्हि नैवमननुगमकृतः क्लेशस्तैः सोढव्योऽभविष्यत्। एवमेव वर्णानां तदीयस्थानप्रयत्नादिविवरणं चापि प्रातिशाख्येषु सुविस्तरं निर्दिष्टमिति नैव पाणिनीयसदृशे व्याकरणे स्थिते सम्भवति। पदक्रमादीन् विकृतिपाठानपि च प्रातिशाख्यानि विदधति, तच्चेदं क्रमादिकं स्वरवर्णविपर्यासपरिहारायैवाभ्यस्यत इति सुस्पष्टमेव। पाणिनीये व्याकरणे तु स्थिते

सर्वत्र प्रकृतिप्रत्ययादिविभागपुरःसरं पदं एव स्फुटं सुस्पष्टमवगते न स्वरवर्गादिविपर्ययशङ्केति क्रमादिविधानं व्यर्थमेवापतेत्। तस्मात्पाणिनेः पूर्वभवान्येव प्रातिशाख्यानीति केचिन्मन्यन्ते।

परे त्वेवं प्रत्यवतिष्ठन्ते—पाणिनिना सुप्तिङ्कृदादयः सर्वेऽपि व्याकरणभागाः सुस्पष्टं निरुक्ता इति तत्रानुगमः शक्यते कर्तुम्। प्रातिशाख्यानि तु केवलं स्वरं सन्धींश्च विवृण्वत इति ते केन प्रकारेणानुगमं कर्तुं शक्नुयुः। प्रतिपदपाठातिरिक्तं किं तेषां शरणम्? यथा—आदेशप्रत्यययोरिति पाणिनिः षत्वमनुगमयति, केवलं प्रातिशाख्यमधीयानस्तु आदेशं प्रत्ययं वा कथं परिचिनोतु? तत्तदुपसर्गयोगे तत्तद्धातोस्तत्र तत्र षत्वमित्यपि पाणिनेरनुगमः। यस्तु धातुप्रत्ययादिकं न सम्यक् परिचाययति, स कथं तथाविधमनुगमं प्रदर्शयतु? तस्मात् पाणिनेरनन्तरभाविभिरपि प्रातिशाख्यैः प्रपञ्चः कर्तव्य एव स्यात्। किञ्च पाणिनिर्विकल्पनिर्देशेन बाहुलकेन च बहुत्र सङ्क्षेपं करोति, सर्वशाखानां सर्वेषां लौकिकानाञ्च प्रयोगाणां निर्वाहकेण कर्तव्यमेवेदं भवेत्। प्रातिशाख्यानि तु स्वस्वशाखामात्रनियतानि न विकल्पेन बाहुलकेन वा प्रवर्तितुं प्रभवन्ति। वेदेषु हि बिन्दुविसर्गादिकमपि किञ्चित् कथमपि न परिवर्तितं स्यादित्येतदर्थं प्राचामाचार्याणां महान् प्रयत्नो दृश्यते। तस्य प्रयत्नस्य प्रतिनिधिभूतान्येव प्रातिशाख्यानि। तानि यदि विकल्पं बाहुलकं वा निर्दिशेयुः, कुत्र तर्हि षत्वादिकमिदं प्रयोक्तव्यम्, कुत्र वा न प्रयोक्तव्यमिति सन्दिहाना एव प्रयोक्तारो भवेयुः। प्रातिशाख्येषु तु तत्रैव विकल्पो व्यवह्रियते यत्र स्वशाखायामपि द्विविधः प्रयोग उपलब्धः स्यात्, तत्रापि च विभागस्तत्र तत्र स्पष्टं तैर्बोधनीयो भवति। तस्मात् स्थितेऽपि पाणिनीये व्याकरणे न निःसन्देहं वेदेषूच्चारणं सिद्ध्येदिति अनन्तरमपि सम्भवेदेव प्रातिशाख्यानामपेक्षा। यथा—पूर्वपदात् (८।३।१०६) इति सूत्रेण पूर्वस्थितात् पदात् परस्य सकारस्य विकल्पेन षत्वं पाणिनिना विहितम्, तेन 'दिविष्ठ' इत्यत्र षत्वं जायते 'युवं हि स्थः स्वर्पती' इत्यत्र तु न जायते। विकल्पविधानादेव। प्रातिशाख्यकृतां तु नैतावता परितोषः, यदि कश्चिद् 'दिविस्थ' इति षत्वाऽभावघटितं प्रयुञ्जीत, 'युवं हिष्ठ' इति च षत्वविशिष्टम्, तदपि पाणिनिरीत्या शुद्धं स्यात्। तथा च विप्लवो वेदे प्रसज्जेत। तदर्थं शौनकेन 'द्व्यक्षरेणैव सत् स्थ' (५।४) इति विशिष्य नियमः प्रदर्शितः। 'सद्, स्थ' इत्यनयोः पदयोर्द्व्यक्षरपूर्वयोरेव षत्वं जायते इति तदर्थः। तेनासन्देहो जातः। तथैव 'सुञः' (८।३।१०७) इति निपातस्य सुञः पूर्वपदस्थान्निमित्तात् परस्य अविशेषेण षत्वं पाणिनिना विहितम्, तेन 'ऊ षु णः' 'अभी षु णः' इत्यादि सिद्ध्यति। 'सुदीतिभिः' 'सुदीदिहि' इत्यादौ तु सुञः षत्वं यन्न दृश्यते तदर्थं न विशिष्य प्रयत्नः कृतः, विकल्पेन बाहुलकेन वा तत्समाधानं स्यात्। शौनकेन तु 'स्वबह्वक्षरेण' (५।५) इति वचनाद्बह्वक्षरात्पदात् परस्य षत्वं न भवतीति स्पष्टं व्यवस्था कृता। एवमेव 'त्व षु णो मरुतो मृळयन्तु' (ऋ. १।१६९।५) इत्यत्र सुञः षत्वं दृश्यते, 'त्वे सु पुत्र शवसः' (ऋ. ८।९२।२४) इत्यत्र तु न दृश्यते तदर्थमपि 'एकारेणापि स्विति न परं चेत्' (५।८) इति शौनककृता व्यवस्था दृश्यते, पाणिनेस्तु विकल्पेनैव निर्वाहः। विकल्पपक्षे कुत्र भवति कुत्र न वा भवतीति व्यवस्थित्यभावेन वेदेषु विप्लवाशङ्का। कात्यायनेन तु स्वशाखायां यावदुपलम्भम् 'ओकारात् सुः' 'उश्चापृक्तात्' (अ. ३।६१–६२) इति ओकारादुकाराच्चापृक्तात्परस्यैव सुञः षत्वं विहितम्, न ततोऽतिरिक्ताः षत्वप्रयोगास्तस्यां शाखायां लभ्यन्त इति। एवं पाणिनिना 'युष्मत्तत्ततक्षुष्वन्तःपादम्' (८।३।१०३) इति युष्मच्छब्दावयवे तच्छब्दावयवे च तकारे परे सामान्येन षत्वं विहितम्, परं 'तित्तिरिस्ते सर्पाणाम्' इत्यादौ यजुषि षत्वं न दृश्यत इति नामग्राहं तन्निषेधः कात्यायनेन कर्तव्योऽभूत् (३ अ. ८१ सू.) यद्यपि कात्यायनेन तच्छब्दे परे सामान्येन षत्वं न विहितम्, तथापि यत्र विहितम्–तद्व्यावृत्तयेऽपि नामग्राहं निषेध आवश्यकोऽभूत्। एवं 'सेकेव कोशं सिसिचे पिबध्यै' (ऋ. ३।३२।१५) 'बहुसाकं सिसिचुरुत्समुद्रिणम्' (ऋ. २।२४।४) इत्यादौ 'आदेशप्रत्यययोः' इति प्राप्तमपि षत्वमभ्यासात्परस्य सकारस्य न दृश्यत इति नामग्राहमेव तन्निषेधः शौनकेन (५।२९) कृतः, नान्या गतिः। णत्वेऽपि 'वा भावकरणयोः' (८।४।१०) इति भावकरणार्थकप्रत्ययनिष्पन्नपानशब्दनकारस्य णत्वं विकल्पेन पाणिनिना विहितम्, किन्तु 'इदं त्व पात्रमिन्द्रपानम्' (ऋ. ६।४४।१६) इत्यादौ नकार एव पाठ्यः 'सुप्रपाणं भवत्वघ्न्याभ्यः' (ऋ. ५।८३।८) इत्यादौ तु णकार एवेति व्यवस्थार्थं शौनकेन (५।४३) प्रयत्नः करणीय एवाभूत्। तथा अस्मदादेशस्य 'नः' इति पदस्य 'नश्च धातुस्थोरुषुभ्यः' (८।४।२७) इत्यनुशासनानुकूल्यं णत्वं पाणिनिना दर्शितम्, परम् 'ईशानासो ये दधते स्वर्णः' (ऋ. ७।९०।६) 'अर्यमा णो अदितिः' (३।५४।१८) इत्यादिषु धातुस्थोरुषुभिन्नेष्वप्युपपदेषु णत्वं दृश्यते 'सोमाभिरक्ष नः' (९।११४।४) इत्यादौ तु धातुस्थात्षकारात्परस्यापि न दृश्यते, तदिदं पाणिनीयैर्बाहुलकादेव समाधेयम्, शौनकीये प्रातिशाख्ये तु तदर्थं विशिष्य प्रयत्न आवश्यक एव वेदरक्षार्थम्, (शौ. प्रा. ५।५८) यजुःप्रातिशाख्येऽपि 'इन्द्र एणम् प्रथमो अध्यतिष्ठत्' 'समिन्द्रे णो मनसा नेषि गोभिः' इत्यादौ प्रतिपदमुच्चार्यैव णत्वं विहितम्, नैतत्पाणिनीयैः सूत्रैः सिद्ध्यति। तथैवाभिनिधानेऽपि 'अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च' (६।१।११६) इति पाणिनीयसूत्रं व्याचक्षाणेन कौमुदीकृतैव स्पष्टमुक्तम्—'यद्यपि बह्वृचैस्तेनोऽवन्तु रथतूः' 'सोऽयमागात्' 'तेऽरुणभिः' इत्यादौ प्रकृतिभावो न क्रियते, तथापि बाहुलकात् समाधेयम्। प्रातिशाख्ये तु वाचनिक एवायमर्थः, इति। उव्वटेनापि शौनकप्रातिशाख्यं व्याचक्षाणेनादावेव प्रयोजनप्रस्ताव उक्तम्—'अथ व्याकरणे यत्सामान्येन 'ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणाम्' (पा. सू. ६।३।१३३) इति। तद्व्यवस्थापयितुमिदमारभ्यते—न सर्वाण्येतानि प्रोक्तानि पदान्यस्यां शाखायां दीर्घाणि भवन्ति, इत्यादि। तैत्तिरीयप्रातिशाख्यकृद्भिरपि च तथैव प्रतिपादितम्। अल्पमुदाहरणमात्रमिहास्माभिरुपदर्शितम्, सन्ति शतशो वैदिकास्तथाविधाः प्रयोगाः, ये पाणिनीयैः सूत्रैरसन्दिग्धं न सिद्ध्यन्ति, बाहुलकं वा विकल्पो वा तत्र शरणीकरणीयो भवति। तत्र सन्देहनिवृत्तये सत्यपि पाणिनीये व्याकरणे प्रातिशाख्यानामावश्यकता जागर्येवेति नैतावता पाणिनिपूर्वभवत्वं प्रातिशाख्यानां सुशकं साधयितुम्। प्रत्युत परभवत्वमेव प्रकरणैरेभिः सिद्ध्येत्, यदि पाणिनेः पूर्वमेव प्रातिशाख्यकृद्भिरेव षत्वणत्वाभिनिधानादिविषयेऽनुगमविशेषाः प्रादर्शयिष्यन्त, तर्हि तानालोच्य पाणिनिरपि स्वीयेषु सूत्रेषु तदन्वकरिष्यदेव। परं नैतदपि दृढं प्रमाणम्। एवं सर्वेषां प्रातिशाख्यानां प्रतिपदपाठान् यदि पाणिनिः सङ्गृह्णीयात्, तर्हि तादृशो गुरु-

भूतस्तद्ग्रन्थ स्यात्, यस्य प्रचारो नैव लोके सम्भवेत्। तस्माल्लौकिकाना प्रयोगाणा सर्वासा च वेदशाखानातु स्वरूपमेक व्याकरण निबध्नता विकल्पबाहुल्यकाद्याश्रयणीयमेव, नान्या गति। तदित्थ सन्देहास्पदान्येवैतानि प्रमाणानि।

पाणिनीये स्थिते क्रमादिविधान व्यर्थमेव भवेदिति च यत्कैश्चिदुपक्षिप्तम्, तदपि न मनोरमम्। नहि व्याकरणमधीत्यैव वेदा अध्येया–इत्येषा परिपाटी युगेऽस्मिन् प्रचलतीति महाभाष्यकृतैवोक्तम्। ये च केवल वेदमेव बाल्यादधीयते–तदधीनैवाधिक्येन वेदरक्षा। तस्मात्तेषा कृते पदवर्णबिन्दुविसर्गाद्यन्यथाभावशङ्कानिवृत्तये अद्यापि पदक्रमजटाद्या विकृतयोऽपेक्ष्यन्त एव। न च पाणिनीयेन व्याकरणेन सर्वासु शाखासु वर्णस्वरादिसन्देहा निवर्तयितु शक्यन्त इत्यनुपदमेव प्रत्यपीपदाम। तस्मान्न योऽपि हेतु पूर्वापरीभावसाधनायाल भवति। किञ्च पाणिनीयस्य व्याकरणस्य महान् व्याख्याता यो व्याडिरभ्युपगम्यते प्रायेण सवरैतिहासिकै, तेन विकृतिवल्लया क्रम–जटा–शिखा घनाद्यभिधा अष्टौ विकृतयो रचिता इति पाणिनेरनन्तर विकृतीनाम नावश्यकता क कथ प्रतिपादयतु? यदपि वर्णनिर्देशतत्स्थानप्रयत्नाद्यनुविधानदर्शनेन प्रातिशाख्याना पाणिनिपूर्वभव च सिषाधयिषन्ति, तदपि नैवावकल्पते। पाणिनिर्हि वैयाकरण, पदान्वाख्यान तस्य लक्ष्यम्। तत एव वर्णस्वरूप स्थानप्रयत्नादिबोधनार्थं स शिक्षा पृथङ् न्यबध्नात्। प्रातिशाख्यानि तु शिक्षामपि स्वस्वरूपेऽन्तर्भावयन्तीति शिक्षाविषया वर्णास्तत्स्थानाद्याश्च कथ तैर्न निरुच्येरन्। तदुक्त शौनकीयप्रातिशाख्यभाष्य उव्वटेन प्रयोजनकथनावसरे—

शिक्षाच्छन्दोव्याकरणै सामान्येनोक्तलक्षणम्। तदेवमिह शाखायामिति शास्त्रप्रयोजनम्॥

अयमभिप्राय—वेदाङ्गतया ख्यातान्यपि पृथक् शास्त्रता प्राप्तानि शिक्षा, छन्द, व्याकरणम्—इति त्रीणि यत् सर्ववेदलोकसाधारण्येन लक्षण ब्रुवन्ति, तस्य स्वशाखाया विशेषेणैव बोद्धव्यमिति निरूपयितु प्रातिशाख्यान्यारभ्यन्त इति। तथा च स्पष्टमेव शिक्षापि प्रातिशाख्यै स्वस्वरूपेऽन्तर्भाव्यत इति।

विष्णुमित्रोऽप्याह—

लक्षण यो न वेत्यृक्षु न कर्मफलभाग् भवेत्। लक्षणज्ञो हि मन्त्राणा सकल भद्रमश्नुते।

तस्मात्ताव पूर्वं लक्षणमुच्यते। लक्षणपूर्वक ह्यर्थपरिज्ञानम्। तथा चोक्तम्—

स्वरो वर्णोऽक्षर मात्रा दैव योगार्थमेव च। मन्त्र जिज्ञासमानेन वेदितव्य पदे पदे। इति।

स्वर, वर्ण, अक्षरम्, मात्रा, इति तत्र प्रातिशाख्यविषया वेदितव्या। दैव योगार्थश्च निरुक्तविषया इत्यादि विवेच्यम्। तस्मात् प्रातिशाख्यै स्थानप्रयत्नादि स्वविषयतया निर्देष्टव्यमेवेति न तावता पौर्वापर्यसिद्धे कोऽपि सम्बन्ध।

अथेदमपि विचार्यं भवति–प्रातिशाख्येषु शब्दोत्पत्तिविज्ञान विशिष्य प्रदर्शितम्, पाणिनिना तु न तद्विषये विशिष्य किमपि स्वीये सूत्रपाठ उक्तम्। इदञ्च सस्कृतसाहित्यालोचकै सुस्पष्ट विज्ञायते–यत्प्राचीनाना ग्रन्थानामस्ति विज्ञानेन सम्बन्ध, अर्वाचीनेषु तु क्रमेण विज्ञानसम्बन्धो दूरीभवति। तदेष विज्ञानसम्बन्ध प्रातिशाख्याना प्राचीनत्वमवगमयितुमल भवेदिति। तथा हि शौनकीये प्रातिशाख्ये—

माण्डूकेय सहिता वायुमाह तथाकाश चास्य माक्षव्य एव।
समानतामनिले चाम्बरे च मन्वागस्त्योऽविपरिहार तदेव॥ २॥

'अध्यासमस्तृतौ शूरवीर सुतश्च वाङ्मनसयोर्विवदन्त्यानुपूर्व्ये' इत्यादिना उपनिषदुक्त सहितास्वरूप वाङ्मनसयो पूर्वापरीभावे विप्रतिपत्ति च प्रदर्श्य—

'वाक्प्राणयोर्यश्च होम परस्परम्'

इति 'तद्यत्रैतदधीते गायते वा, वाचि तदा प्राणो भवति, वाक् तदा प्राण रेढि, अथ यत्र तूष्णीं वा भवति स्वपिति वा, प्राणे तदा वाग् भवति, प्राणस्तदा वाच रेढि (ऐत आ ३।१।६) किमर्था वयमध्येष्यामहे, किमर्था वय भक्ष्यामहे, वाचि हि प्राण जुहुम, प्राणे वा वाचम्, यो ह्येव प्रभव, स एवाप्यय (ऐ आ ३।२।६) इत्यादि श्रुत्युक्तो वाक्प्राणयोरन्योन्यस्मिन् होम स्पष्ट निर्दिष्ट, स एष विज्ञानस्य गूढतमो विषय। अग्रे च—

वायु प्राण कोष्ठ्यमनुप्रदान कण्ठस्य खे विवृते सवृते वा।
आपद्यते श्वासता नादता वा वक्त्रीहायाम् (शौ पट १३।१)

इत्यादिना वर्णोत्पत्तिविज्ञान विवृतम्। तथा कात्यायनीये वाजसनेयप्रातिशाख्ये—'वायु खात्' शब्दस्तत्' (अ १।६,७) इत्यादिना वर्णोत्पत्तिविज्ञानमुक्तम्। किन्तु शौनकाद्यपेक्षयाऽतिस्वल्पम्। ऋक्तन्त्रे च—

'अथ वाचो वृत्ति व्याख्यास्याम, वायु प्रकृतिमाचार्या, वायुर्मूर्च्छन् श्वासीभवति, श्वासो नाद इति शाकटायन'। वायुरयमस्मिन् क मूर्च्छति–अटतीत्येषोऽर्थ–स खलु खविशेष प्रतिपन्न श्वसितिर्भवति, स श्वसिति शिर प्रतिपन्न आकाशमद्वारक नदतिर्भवति'।

इत्यादिना विशिष्य वर्णोत्पत्तिविज्ञान विवृतम्। एवमन्यत्रापि। तथा च प्रातिशाख्यानामेषा पाणिनिपूर्वभवत्वमेवाऽनुमीयत इति। अत्राऽपि परे विप्रतिपद्यन्ते–प्रातिशाख्येषु हि शिक्षादिविषयोऽपि सगृहीत इत्युक्त प्राक्। वर्णोत्पत्तिविज्ञानप्रदर्शन

च शिक्षाया एव विषय । पाणिनिना च शिक्षा पृथगेव रचिता, न व्याकरणसूत्रेषु सगृहीता, तस्माद्वर्णोत्पत्तिविज्ञानस्य सूत्रेषु प्रसङ्ग एव नास्ति, शिक्षायान्तु पाणिनिनाऽपि वर्णोत्पत्तिविज्ञान विवृतमेव—

आत्मा बुद्धया समेत्यार्थान् मनो युङ्क्ते विवक्षया । मन कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन् मन्द्र जनयति स्वरम् । इत्यादिना ।

प्रत्युत प्रातिशाख्यै श्वासनादादिविवरणेन वैखर्या वाच एवोत्पत्तिरनुक्रान्ता । प्राणवायुव्यापारादुत्तरमेव ते व्यापार विवृण्वते, पाणिनिस्तु प्राणव्यापारात्पूर्वमपि आत्म-बुद्धि मनोव्यापार सगृह्णन् मध्यमा पश्यन्ती चाऽपि वाचमभिव्यञ्जयतीति तत्रैव विज्ञानाधिक्य स्फुटति । किञ्च ऋक्तन्त्रे प्रथमे प्रपाठके विषयोऽय विवृत । स च प्रपाठको न व्याख्यात्रा व्याख्यात इति मूलग्रन्थात्पृथग्भाव एव तस्यानुमीयते, शौनकीयेऽपि प्रथमात्पटलात्प्रागेव विषयस्याऽस्य विवरणमिति प्राक्तनात्कस्माच्चिद् ग्रन्थादत्र वैज्ञानिको विषयोऽय सगृहीत इत्येव प्रतीयते । अन्येषु तु प्रातिशाख्येषु न तथा प्रतिपाद्यते विज्ञानमिति नायमपि निर्णयहेतुर्दृढ प्रसिद्ध्यति । सन्देहास्पदमेवाऽद्यापि पौर्वापर्यम् । किञ्च पाणिनिरादेशवादी, प्रातिशाख्यानि तु विकारवादीनि । एकस्य वर्णस्य वर्णान्तरतापत्तिर्विकार इत्युच्यते, एकस्य वर्णस्य वर्णसमूहरूपस्य प्रातिपदिकस्य धातो पदस्य वा स्थानेऽन्यस्योच्चारणन्तु आदेश इति । तत्र दार्शनिकरीत्या विचार्यमाणो वर्णपदादिषु विकारो नैवोपपद्यते । न शब्दनित्यत्ववादे, न वा अनित्यत्ववादे—उभयथापि विकारो न सम्भवति । नित्यतावादे हि कूटस्था अविचालिनो वर्णा इति कथ विकार सम्भवेत् । अनित्यत्ववादे च उच्चरितप्रध्वस्ता वर्णा न तावत् स्थितिं लभन्ते—यावत् तानुपमर्द्य वर्णान्तर तत्रागच्छेत् । न च वर्णसमूहरूप प्रातिपदिकधातुपदादि वस्तुत स्वरूप धत्ते—वर्णानामुच्चरितप्रध्वस्ताना समुदायासम्भवात्, तस्माद् बुद्धिपरिकल्पिता एव धातुप्रातिपदिकाद्या इम इति न तत्रापि विकारसम्भव । सोऽय विकारासम्भव शब्दानामनित्यत्ववादिना न्यायसूत्रकृता गोतमेन सूत्रेषु सम्यग्विवृत इत्यवोचाम । तत एव पाणिनिर्विकारपक्ष परित्यज्य आदेशपक्षमेव गृहीतवान्—'षष्ठी स्थानेयोगा' इति परिभाषमाण । विवृतञ्च विस्तरेण तन्महाभाष्ये । प्रातिशाख्यानि तु विकारपक्षमेव परिगृहीतवन्ति । पदान्तादिष्वेव विकारशास्त्र पदे दृष्टेषु वचनात् प्रतीयात्' (पट २ सू० ५) इति शौनकेन सन्धिशास्त्रप्रवृत्तौ स्पष्ट विकारपद प्रयुक्तम् । ऋक्तन्त्रप्रणेत्राऽपि 'विकार' (सू ९१) 'सस्थान' (सू ९२) इति स्पष्ट विकारपद प्रयुक्तम् । कात्यायनोऽपि 'तमिति विकार' (१।१३३) इति विकारमेव स्वीकरोति 'द्वितीयया विभक्त्या यो निर्दिश्यते स विकार प्रत्येतव्य' इति तदर्थ, एवमन्यत्रापि । सूत्रणशैल्यप्येषा विकारस्यापिकैव, 'ककारपकारयो सकारम्' (३।२१) (ककारपकारयो परयोर्विसर्जनीय सकारमापद्यते—सकाररूपता गच्छति) इत्यादि कात्यायन । रौद्यम्' (९३) (स्वरौ दीर्घमापद्येते) इत्यादि ऋक्तन्त्रकार, 'ह्रस्वपूर्वस्तु सोऽकारम्' (पट २।२७) (ह्रस्वपूर्वस्तु स विसर्जनीय स्वरोदयो अकारमापद्यते) इत्यादि शौनक । 'औकार आवम्' (९।१५) (औकार यदा स्वरपर, आव विकारमापद्यते) इत्यादि तैत्तरीयप्रातिशाख्ये । तस्मादसम्भवद्विकारवादिप्रातिशाख्यापेक्षया आदेशवादी पाणिनिरेव वैज्ञानिकमूर्धन्य इति स्फुटीभवति । वर्णा अपि स्वस्वशाखोपयुक्तास्तैस्तै प्रातिशाख्यकृद्भि सगृहीता इति तत्सरण्यापि पौर्वापर्य न निर्णेतु शक्यते । भवतीद यद्यपि विचार्यम्—शौनकीये प्रातिशाख्ये लृकार स्वरेषु न परिगण्यते, पाणिनीये ह्रस्व एव लृकारो गृहीत । दीर्घस्तु नास्त्येव । कात्यायन—ऋक्तन्त्रयोस्त्रिविधोऽपि लृकार परिगृहीत । तैत्तरीय प्रातिशाख्ये च पाणिनिवत् केवल ह्रस्व इति । अद्यत्वेऽपि स्वरान्तरवद् ह्रस्वदीर्घौ लृकारौ वर्णसमाम्नाये गृह्येते । स्वरान्तराणामिव तस्यापि भेदोऽस्त्येवेति, तमेत मतभेदमाश्रित्य पूर्वापरीभाव कथञ्चिदनुमीयेत । त्रिविधमपि लृकार गृह्णन्तोऽर्वाचीना, अगणयन्तस्तु सर्वत प्राचीना इति सम्भाव्यते । पर भाष्यटीकादिकृद्भि सर्वैरेव स्वशाखोपयुक्ता वर्णा इह सगृह्यन्ते इत्येवोक्तमिति नैतदप्यनुमान दृढ भवितुमर्हति ।

अथ सूत्रप्रक्रियाया अन्तरङ्गपरीक्षा कर्तव्या । तद्दृष्ट्या कात्यायनप्रातिशाख्यन्तु पाणिनेरर्वाचीनमेवानुमीयते । तस्य हि सूत्रग्रन्थनशैली पाणिनिना बहुतर सवदति । किञ्च 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (अ १।१३४) 'तस्मादित्युत्तरस्यादे' (१।१३५) 'षष्ठी स्थानेयोगा' (१।१३६) इति सूत्राणि स्पष्ट पाणिनिसूत्रानुकारीणि दृश्यन्ते । तत्र पाणिनिनैव प्रातिशाख्यादुद्धृतानीति विपरीतमेव किं नस्यादिति चेद्, नैषा परिभाषाशैली अन्येषु प्रातिशाख्येषु दृश्यते इति पाणिनेरेव शैली कात्यायनेनानुकृतेति मन्तव्य स्यात् । इदञ्च विशेषेणावधेयम्—पाणिनिना हि 'आदे परस्ये'त्येतदपेक्षया 'अनेकाल्शित्सर्वस्य' इत्यस्य परत्व रक्षितुम् 'तस्मादित्युत्तरस्य' 'आदे परस्य' इति पृथग्योगौ कृतौ, तेन 'अष्टाभ्य औश्' इत्यादौ 'तस्मादित्युत्तरस्ये'ति प्रवर्तते, 'आदे परस्ये'त्येतत्तु 'अनेकाल्शित्सर्वस्ये'त्यनेन बाधित न प्रवर्तते, तदेतत्स्पष्टीकृत सिद्धान्तकौमुद्याम् । प्रातिशाख्ये तु 'अनेकाल्शित्सर्वस्ये'ति परिभाषणाऽभावात् पृथग्योगकरणस्य नास्त्यावश्यकत्वमित्यनुसन्धाय कात्यायनेनात्र 'तस्मादित्युत्तरस्यादे' इत्येक एव योग कृत, तदेतत् पाणिनेरनुकरण स्पष्ट बोधयति । किञ्च 'षष्ठी स्थानेयोगा' इति नास्ति प्रातिशाख्याना शैली, तेषु स्थानी न प्रायेण षष्ठ्या निर्दिश्यते, अपि तु प्रथमया निर्दिश्यते—'अमुको वर्ण अमुकरूपतामापद्यते' इत्यादि क्रमेण, तदेतन्निदर्शित प्राक् । कात्यायनेनापि प्रायेण सैव शैली सूत्रेष्वनुसृता—'विसर्जनीय' (प्राति ३।६) 'चछयो शम्' 'तथयो' सम्' (३।७-८) 'तकारो ले लम्' (४।१३) 'मश्चानुमानिकम्' (४।१४) 'सर्वो अकार ओकारम्' (४।४३) इत्यादिषु । क्वचिदेव तु स्थानषष्ठी निर्दिष्टा—'यकाराकारयोर्जास्पत्ये पदे' (४।४१) 'यवयो पदान्तयो स्वरमध्ये लोप' (४।१२७) इत्यादौ । तथापि 'षष्ठी स्थानेयोगा' इति परिभाषा कृता तेन स्पष्ट प्रतीयते परिभाषेय पाणिन्यनुकारिणी, सूत्रप्रणयन तु स्वजातीयप्रातिशाख्यसस्कारेणेति ।

'अन्त्याद्वर्णात्पूर्वं उपधा' (१।३५) 'समानस्थानकरणास्यप्रयत्नः सवर्णः' (१।४३) 'मुखनासिकाकरणोऽनुनासिकः' (१।७५) 'संख्यातानामनुदेशो यथासंख्यम्' (१।१४३) 'निकारी यथासम्भवम्' (१।१४२) 'विप्रतिषेधे उत्तरं बलवदलोपे' (१।१५९) 'स्पर्शे परपञ्चमम्' (४।१२) इत्यादीनि च सूत्राणि कात्यायनीये प्रातिशाख्ये 'अलोऽन्त्यात्पूर्व उपधा' 'तुल्यास्यप्रयत्नं सवर्णम्' 'मुखनासिकावचनोऽनुनासिकः' 'यथासंख्यमनुदेशः समानाम्' स्थानेऽन्तरतमः' 'विप्रतिषेधे परं कार्यम्' 'अनुस्वारस्य ययि परसवर्णः' इत्यादिभिः पाणिनिसूत्रैः समानार्थानि किञ्चित्परिवर्तिताक्षराणि दृश्यन्ते। किमन्यत्—पाणिनिसूत्रेषु वार्तिककारोऽपि कात्यायन उच्यते, प्रातिशाख्यकृदपि। तयोर्मतसंवाददर्शनादेकत्वमेवानुमीयते। तथा हि—अत्रैव 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रे आस्यपदस्य प्रयत्नविशेषणतामभ्युपगम्य विभिन्नस्थानानामपि सवर्णसंज्ञामाशङ्क्य 'आस्ये तुल्यदेशप्रयत्नं सवर्णम्' इति न्यासो वार्तिककृतोट्टङ्कितः, प्रातिशाख्ये च 'समानस्थानकरणास्यप्रयत्नः सवर्णः' इति आस्यात् स्थानग्रहणं पृथक् कुर्वता सैव प्रक्रियाऽनुसृता। 'विप्रतिषेधे परं कार्यम्' इति पाणिनीये सूत्रे 'लुग्लोपयणयवायावेकादेशेभ्यः' इति लुकः परापेक्षयापि बलवत्त्वं वार्तिक उट्टङ्कितम्, प्रातिशाख्ये तु लुको लोपस्य च पार्थक्याभावेन लोपमात्रे विप्रतिषेधविधिर्निरुद्धः 'विप्रतिषेधे उत्तरं बलवदलोपे' इति। 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इत्यप्यस्ति पाणिनीये वार्तिकम्। प्रातिशाख्येऽपि 'लुङ् सुदि जिपरे (३।१३)' इति तदनुवादो दृश्यते। 'तद्बृहतो करपत्योश्चोरदेवतयोः सुट् तलोपश्च' इति पाणिनीये वार्तिकम्, 'तद्बृहतो करपत्योस्तलोपश्च' (३।५३) इति प्रातिशाख्ये तदनुवादः। यद्यपि तद्बृहतो करपत्योरित्येतद्गणपाठे पारस्करादिगणे केचित् पठन्ति, परं भाष्यकृता 'वक्तव्यः' इत्युपन्यासाद् वार्तिकमेवेदं प्रतीयते। न हि गणसूत्राणि भाष्यकृदनुवदति। भवतु वा गणसूत्रम्, तथापि पाणिन्यनुकृतिस्तु प्रातिशाख्ये सिद्धैव। 'दाराबाहनोऽणन्तस्य च टः संज्ञायाम्' 'चारौ वा' इति दार्वाघाट-चार्वाघाटादिशब्दसिद्ध्यर्थं प्रयत्नः पाणिनिवार्तिककारेण कृतः, प्रातिशाख्येऽपि 'स आद्यादनाडम्बरात्' इति तत्सिद्ध्यर्थं प्रयत्नो दृश्यते। प्रक्रियाभेदोऽत्र यो दृश्यते, स तु प्रातिशाख्येऽण्वादिप्रत्ययानामविवरणादेव। 'रषाभ्यां नो णः समानपदे' (८।४।१) इति पाणिनीये सूत्रे 'ऋकाराच्चेति वक्तव्यम्' इति वार्तिककृतोक्तम्, प्रातिशाख्येऽपि 'ऋषरेफेभ्यो नकारो णकारं समानपदे' इति ऋकारं संयोज्य पाणिनिसूत्रमर्थतोऽनूदितम्। 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेऽपि 'अन्यव्यवाये प्रतिषेधः' इति वार्तिककारः, प्रातिशाख्येऽपि 'स्वरयवहकवर्गैश्च' (३।८०) इति सूत्रेण सम्भाव्यव्यवधानमुक्त्वा अन्ते 'शिलिसिवर्गमध्यमव्यवहितोऽपि (३।९५) इति प्रतिषिद्धव्यवधाने नकारस्य प्रकृतिभावोऽपि विहितः। भाष्यकृता सूत्रस्य नियमार्थतामाश्रित्य वार्तिकं खण्डितमित्यन्यदेतत्। 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रे 'षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च' इति वार्तिकमारब्धम्। प्रातिशाख्येऽपि 'षड् दशदन्तयोः मरयावयोर्धयोश्च' (३।४७) इति तदेवानुक्रान्तम्। अत्र तु उव्वट आह 'षोडन्' इति, एतच्च शिष्यव्युत्पादनार्थम्, नहि संहितायामुदाहरणं लभ्यते, इति टीकान्तरे च शाखान्तरस्योदाहरणं दर्शितम्। तद्रीत्या तु स्फुटमेवेदं भवति, यत्पाणिनीये वार्तिके यदुक्तम्, तत्संस्कारेण तदनुवादरूपेणैव दन्तशब्दोऽत्र निवेशित इति। एवं पाणिनीयवार्तिके 'वर्णात्कारः' इति पठितम्, प्रातिशाख्येऽपि 'निर्देश इतिना, कारेण च' (१।३७) इति तदनूदितम्। यत्तु प्रातिशाख्ये 'नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः' इति अनुस्वारादिशब्देभ्यः कारप्रत्ययस्य निषेध आख्यातः, स तु पाणिनीये प्रत्याहारसूत्रेष्वेषां वर्णत्वेनानिर्देशात्तत्रोपेक्षित इति प्रतीयते। एवमेवान्विष्यमाणे प्रसङ्गे बहुत्र पाणिनीयवार्तिकस्य वाजसनेयप्रातिशाख्यस्य च सनैक्यमुपलभ्यते। यानि तु वार्तिकानि न प्रातिशाख्येऽनुसृतानि तत्साध्याः शब्दा अस्यां शाखायां न सन्तीत्येव प्रायेण सिद्ध्येत्। यदि हि वाजसनेयप्रातिशाख्यं पाणिनेः पूर्वमभविष्यत् पाणिनिना विधानानीमानि तत्राद्रक्ष्यन्त, तर्हि, कथं स इमानि विधानानि स्वसूत्रेषूपैक्षिष्यत। कथं शर्परे खरि विसर्गलोपस्तेन स्वसूत्रैर्न विहितः स्यात्। कथं च षोडशादिशब्दसिद्ध्यर्थं षष उत्वं न विधीयेत। मनुष्यसुलभमनवधानं शब्देषु सम्भवतीति सत्यम्, परमन्येषां विधीन् स्पष्टं दृष्ट्वापि कथमनवधानमनल्पमन्ते। सम्भवेत्। तस्मात् पाणिनेरर्वाक्तनमेव यजुःप्रातिशाख्यमिति सिद्ध्यति। *एवं पाणिनीयाः समासतद्धितादिसंज्ञा अप्यत्रारम्भ एव स्फुटमुक्ता —'तिङ्कृत्तद्धितचतुष्टयसमासाः शब्दमयम्' (का०* प्रा० १।२९) अत्र हि चतुष्टयेति समासविशेषणं स्पष्टं पाणिनीयव्याकरणं स्मारयति। व्याकरणान्तरेऽपि कृत्तद्धितसमासादिसंज्ञाः स्युरित्यभ्युपगमेऽपि समासस्य भेदचतुष्टयं तत्राप्यासीदिति कल्पनायां मानाऽभावः। नचैवंविधा शब्दभेदा अन्येषु प्रातिशाख्येषूपलभ्यन्त इति पाणिनीयसंस्कारेणैव कात्यायनेन विभागोऽयं प्रदर्शित इति सुस्पष्टं शक्यमनुमातुम्। एवं संज्ञाकरणपद्धतिरपि यजुःप्रातिशाख्येऽनुसृता 'दन्त्यस्य मूर्धन्यापत्तिर्णतिः (१।४२) इत्यादिना। न ह्यन्येषु प्रातिशाख्येषु बाहुल्येन संज्ञाकरणं दृश्यते। एवमेव एङः परस्याकारस्य पूर्वरूपमभिनिधानशब्देन शौनकादिभिरुच्यते, कात्यायनेन तु 'एङोऽक्षयां पूर्वमकारः (४।१२) इति पूर्वरूपशब्दं वदता पाणिनिप्रक्रियैवानुसृता। 'नरछव्यप्रशान्' इति पाणिनीयप्रक्रियायां च परं लाघवमत्र 'चछयोः शस्' 'तथयोः सम्' इति (३।१३४-१३५) प्रदर्शितम्—इत्याद्यनुसन्धेयम्। तेन यजुःप्रातिशाख्यस्य पाणिनिपरभवत्वमेवास्मद्रीत्या सिद्ध्यति। अभ्युपगम्यते चाप्यैतिहासिकैर्बहुभिस्तथैव। तैत्तिरीयप्रातिशाख्यमपि अनेनैव तुल्ययोगक्षेमम्। तत्रापि हि 'उच्चैरुदात्तः' (१।३८) 'नीचैरनुदात्तः' (१।३९) 'समाहारः स्वरितः' (१।४०) इति सूत्राण्यनूदितानि लभ्यन्ते। 'तस्यादित उदात्तमर्धह्रस्वम्' इति पाणिनीयसूत्रं च 'तस्यादिरुच्चैस्तरामुदात्तादनन्तरे यावदर्धह्रस्वस्य' 'उदात्तसमः शेषः' (१।४१-४२) इति सूत्रद्वयेनानूद्यते। अत्रापि ह्रस्वपदं स्वार्थात्प्रच्युतमेव पाणिनीये सूत्र इव व्याख्यातृभिरुच्यते। 'एकवर्णं पदमपृक्तः' (१।५४) इत्याद्याः संज्ञा अपि पाणिनिनेव प्रपञ्चिताः। 'एकः पूर्वपरयोः' 'अन्तादिवच्च' इति पाणिन्यनुकरणेन 'अथैकमुभे' (१०।१) इत्याद्यधिकारसूत्रम् 'आद्यन्तवच्च' (१।५५) इति परिभाषापि किञ्चिद्विषयभेदेनाश्रीयते। 'विप्रतिषेधे परं कार्यम्' इत्यस्य स्थाने 'तत्र पूर्वं पूर्वं प्रथमम्' (५।३) इति विपरीतं परिभाष्यते। 'वर्णात्कारोत्तरो वर्णाख्या' (१।१६) 'न विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्यानाम्' (१, १६-१८) इत्यादि च कात्यायनेनेव विधीयते। अन्यदपि कात्यायनानुकरणमत्र दृश्यते इति तस्यापि पाणिनिपरभवत्वे न सन्देहः।

अथ ऋक् तन्त्रप्रातिशाख्यमेवमेवालोच्यते। तत्र हि सुडागमप्रकरणे बहूना सूत्राणा पाणिनिसूत्रैरक्षरश, किञ्चिद् व्यत्यासेन, अर्थतो वा पर साम्य प्रतीयते। तान्युदाहरिष्याम —

ऋक्तन्त्रे	पाणिनीये
१ स सङ्करोतौ (१८९)	१ सम्परिभ्यां करोतौ भूषणे (६।१।१३७) समवाये च (६।१।१३८)
२ अङ्गव्यवाये चाङ्गपर (१९०)	२ सुट्कात्पूर्वं (६।१।१३५)
३ कृचकारमस्वय दृष्टे (१९१)	३ ,, ,,
४ पर्युपभूषणप्राचुर्यवाक्येषु (१९२)	४ सम्परिभ्याम्० (पूर्वोक्तम्) उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च (६।१।१३९)
५ अव मर्यादावचस्कयो (१९३)	५ वर्चस्केऽवस्कर (६।१।१४८)
६ पार पर्वते (१९४)	६ पारस्करप्रभृतीनि च सञ्ज्ञायाम् (६।१।१५७)
७ अप रथे (१९५)	७ अपस्करो रथाङ्गम् (६।१।१४९)
८ किरतावध्यासम् (१९६)	८ अपाच्चतुष्पाच्छकुनिष्वालेखने (६।१।१४२)
९ उपप्रती हिंसायाम् (१९७)	९ किरतौ लवने (६।१।१४०) हिंसाया प्रतेश्च (६।१।१४१)
१० वि शकुनौ (१९८)	१० विष्किर शकुनिविकिरो वा (६।१।१५०)
११ कुस्तुम्बुरु जाति (१९९)	११ कुस्तुम्बुरूणि जाति (६।१।१४३)
१२ आस्पदमास्थायाम् (२००)	१२ आस्पद प्रतिष्ठायाम् (६।१।१४६)
१३ अपरस्पर सात ये (२०१)	१३ अपरस्परा क्रियासातत्ये (६।१।१४४)
१४ प्रस्कण्व ऋषि (२०२)	१४ प्रस्कण्वहरिश्चन्द्रावृषी (६।१।१५३)
१५ गोष्पदमुदकमाने (२०३)	१५ गोष्पद सेवितासेवितप्रमाणेषु (६।१।१४५)
१६ अगोष्पदमनाचरिते (२०४)	१६ ,, ,, ,,
१७ आश्चर्यमनित्ये (२०५)	१७ आश्चर्यमनित्ये (६।१।१४७)
१८ आस्का आस्क्रमो निस्फुलिङ्गा (२०६)	१८ × × ×
१९ समास ऋच्छु चन्द्रे (२०७)	१९ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे (६।१।१५१)
२० कास्तीराजस्तुन्दे नगरे (२०८)	२० कास्तीराजस्तुन्दे नगरे (६।१।१)
२१ नदी रथस्या (२०९)	२१ रथस्या नदी (गणपाठे (६।१।१५७) सूत्रोपरि)
२२ मस्करी वेणु (२१०)	२२ मस्करमस्करिणौ वेणुपरिव्राजकयो (६।१।१५४)
२३ तस्कर स्तेन (२११)	२३ तद्बृहतो करपत्योश्चोरदेवतयो सुट् तलोपश्च (गणपाठे ६।१।१५७ सूत्रोपरि)

कश्चिदपि विचारक एतद् सुधादेव, यदीदृश मादृश्य यादृच्छिक न सम्भवति, अवश्यमेकेन परस्य सूत्रपाठोऽनुकृत एव, तत्र केन कस्य पाठोऽनुकृत इति विचार्यम्। कतिपयेषु सूत्रेषु एकस्यापरेण भेदो दृश्यते, तत्र पाणिन्यपेक्षया प्रातिशाख्ये यत्र न्यूनता, तत्र तु शक्यमेव वक्तुम्—यत्सामशाखाया तादृशा प्रयोगा नोपलभ्यन्ते इयत प्रातिशाख्यकृता ते परित्यक्ता। यथा—'मस्करमस्करिणौ वेणुपरिव्राजकयो' इति पाणिने पाठ, 'मस्करी वेणु' इति लघुश्च प्रातिशाख्यस्य। तत्र परिव्राजकार्थो मस्करिशब्द सामशाखाया नोपलभ्य स्यादित्येव प्रातिशाख्यकृता परित्यक्त इति सम्भाव्यते। तथैव 'प्रस्कण्वहरिश्चन्द्रावृषी इति पाणिनिसूत्रस्य हरिश्चन्द्रपद यत्प्रातिशाख्ये परित्यक्तम् 'प्रस्कण्व ऋषि' इति सूत्रे, तत्रापि 'समास ऋच्छुचन्द्रे' इति सूत्रेणैव हरिश्चन्द्रशब्दसिद्धिरिति हेतु सम्भाव्यते। पाणिनिना तु 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सूत्रयतापि लौकिकहरिश्चन्द्रपदसाधनार्थं प्रस्कण्वहरिश्चन्द्राविल्यत्रापि हरिश्चन्द्रपदग्रहण कृतम्। एवमन्यत्राप्यूह्यम्। पर प्रातिशाख्यविधान यत्र पाणिनिना परित्यक्तम्, तत्र हेतुर्न दृश्यते। यथा 'अवमर्यादावचस्कयो' इति मर्यादाया वचस्के च ऋक्तन्त्रकार अवस्करपद साधयति, पाणिनिस्तु वर्चस्के एव। तत्र मर्यादार्थे अवस्करशब्द कथ पाणिनिनोपेक्षित ? पाणिनिर्हि सर्ववेद—लोकसाधारण व्याकरण निबध्नातीति न सामशाखाप्रयोगास्तस्योपेक्ष्यो भवितुमर्हन्ति। तथैव 'आस्का आस्क्रमो निस्फुलिङ्गे इति कथ पाणिनिनोपेक्षितम् ? सम्भवति मनुष्यसुलभमनवधान तेषा श्रुत्यादिदृष्टाना प्रयोगाणामित्यवोचाम, पर यदि पाणिनिना ऋक्तन्त्रसूत्राण्यनुकृतानि स्यु, तर्हि मध्ये स्थितमेक सूत्र स कथ परित्यजेत् ? प्रयत्न परिदृश्यमाने सूत्रे तु नानवधानमल्पमतेरपि सम्भाव्यते, किं पुनरनल्पमते। तस्मात्पाणिनिना ऋक्तन्त्रसूत्राणि नानुकृतानि, अपि तु ऋक्तन्त्रकृतैव पाणिनिसूत्राण्यनुकृतानि, तत्र स्वशाखायामदृष्टा प्रयोगविशेषा अर्थविशेषाश्चोपेक्षिता, अनवधानेन विस्तरभयेन वा पाणिनिना त्यक्तास्तु स्वशाखाया दृश्यमाना कतिचिदर्था प्रयोगा वा सगृहीता इत्येव सम्भाव्यते। तदित्थमृक्तन्त्रस्यापि पाणिनिपरभवत्वमेवान्तरङ्गपरीक्षया सिद्ध्यति। यत्तु 'किरताव ध्यासम्' इत्यस्पष्ट प्रातिशाख्य उक्तम्, पाणिनिना तु 'चतुष्पाच्छकुनिष्वालेखने' इति स्पष्ट तद्विवरण कृतम्, तस्मात् पाणिने परभवत्वमेव केचित्साधयन्ति। तदेतदुक्तस्य प्रमाणस्याग्रे अतीव दुर्बलम्, चतुष्पाद्रूप शकुनिरूप च विशेषमुपेक्ष्य सङ्क्षेपेण अध्यासमित्येव प्रातिशाख्यकृता समुद्धृतमित्यत्र तथाविधविशेषाभावात्। दृपजीविकाकुलायकरणाद्या विशेषास्तु वार्तिककृता दर्शिता, न सूत्रकृता पाणिनिनेति।

सूत्रान्तराणामपि ऋक्तन्त्र सादृश्य दृश्यते—

ऋक्तन्त्रे	पाणिनीये
१ उद स्थास्तम्भो (१६७)	१ उद स्थास्तम्भो पूर्वस्य (८।४।६१)
२ पृषोदरादीनाम् (१६६)	२ पृषोदरादीनि यथोपदिष्टम् (६।३।१०९)
३ सन्निकर्ष सहिता (६७)	३ पर सन्निकर्ष सहिता (१।४।१०९)
४ गो (७९)	४ सर्वत्र विभाषा गो (६।१।१२२)
५ न वा (८०)	५ „ „ „
६ अवङ् वा (८१)	५ अवङ् स्फोटायनस्य (६।१।१२३)

दीर्घप्रकरणे तु सकारप्रकरण इव विशेषेण सादृश्यमुपलभ्यते। यथा—

ऋक्तन्त्रे	पाणिनीये
२१५ कर्णस्य शृङ्गे (कर्णाशृङ्ग)।	×
२१६ वृषस्य करिमोदनीदर्भश्वेषु। (वृषामोदनी, वृषाकपि)	×
२१७ कर्णे प्लीहाङ्कुशकुण्डलोपरिणिष्यञ्जनवाणानाम्। (प्लीहाकर्णी, अङ्कुशाकर्णी, कुण्डलाकर्णी इत्यादि)	कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य (६।३।११५)
२१८ विश्वस्य नरवसुराट्सु। (विश्वानर,विश्वावसु,विश्वाराट्)	विश्वस्य वसुराटो (६।३।१२८) नरे सज्ञायाम् (६।३।१२९)
२१९ मित्र ऋषौ।	मित्र चर्षौ (६।३।१३०)
२२० श्वविन्पदवराहकर्णदन्तदंष्ट्रेष्वमप्रति चेत्। (श्वाविन्, श्वापद, श्वावराह इयादि)	शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्य (वार्तिकम्)
२२१ सर्वनाम्नो दृशि। (कीदृग्, अस्मादृक् इयादि)	इदङ्किमोरीश्की (६।३।९०) आ सर्वनाम्न (६।३।९१)
२२२ उच्चैर्हतौ। (उच्चाहती)	×
२२३ उपनरवे। (उपानरवो रोग)	×
२२४ साङ्गेन च समागमे। (हस्ताहस्ति, मुखामुखि, केशाकेशि, दण्डादण्डि)	अन्येषामपि दृश्यते (६।३।१३७)
२२५ अष्ट। (अष्टाकपालम्)	छन्दसि च (६।३।१२६) अष्टन कपाले हविषि (वार्तिकम्) (गवि च युक्ते) (अष्टागवम्, अष्टाकपालम्)
२२६ प्राक् शताच्च। (अष्टादश, अष्टाविंशति)	द्व्यष्टन सख्यायामबहुव्रीह्यशीत्यो (६।३।४७) (प्राक् शतादिति वक्तव्यम्)
२२७ पद-गोयुक्त दन्त-शालीये च तीर्थ। (अष्टापदम्, अष्टागोयुक्तम्, इत्यादि)	अष्टन सज्ञायाम् (६।३।१२५)
२२८ नाम्ना षाडि। (तुराषाट्, सत्राषाट्)	छन्दसि सह (३।२।६३) ण्विप्रत्यय उपधावृद्धि)
२२९ वने यवशरप्रभृतीना प्राच्यभरतसज्ञा चेत्। (औलपावनम्, सुन्दरावनम्)	वनगिर्यो सज्ञायाम् कोटरकिंशुलुकादीनाम् (६।३ ११७)
२३० उपसर्गस्य घानावेकाक्षरे नामभूते। (उपानत्, प्रावृट्)	नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ (६।३।११६)
२३१ इयक्षरे गुर्वादावकारान्ते (नीवर्त, परीवर्त, परीवाप)	उपसर्गस्य घञ्यमनुष्ये बहुलम् (६।३।१२२)
२३२ प्रदन्त्यादौ मादमुदमङ्गमेनेषु। (प्रामाद, प्रामङ्ग, प्रामेन इत्यादि)	„ „ „
२३३ न सत्त्वभावे लुडिते चे। (प्रामादो गुरूणाम्, प्रमादो मृत्तिकाया)	„ „ „
२३४ निष्ठायामित्तादौ (नीत्त, वीत्त, परीत्त)	द्वस्ति (६।३।१२४)
२३५ उ च काशे दर्शने (चकारादिकारोऽपि गृहीत (प्रतीकाशते, अनूकाशते)	इक काशे (६।३।१२३)
२३६ सुग्म घु। (एवा ह्यसि, योना न्विन्द्र)	द्व्यचोऽतस्तिङ (६।३।१३५)
२३७ उघोघुनि घेषादि (तमू शुचिम्, अश्वस्य नू मह)	ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् (६।३।१३३)
२३८ इ (श्रुधी हवम्, यदी वहन्ति, शृणुही गिर)	×
२३९ सोऽस्मि दन्त्यऽन्वे (कृधी न, अभीषुण, इत्यादि	×
२४० कण्ठ्ये	×

अग्रेऽपि प्रातिशाख्ये दीर्घस्य बहुप्रपञ्च—२५५ सूत्रपर्यन्तम्। नामग्राह तत्र तत्र दीर्घविधानम्। तच्च प्रायेण 'ऋचि तुनुघ' इति निर्दिष्टे सूत्रेऽन्तर्भवति। अग्रे पाणिनीयेऽपि कतिचन सूत्राणि दृश्यन्ते येषा प्रतिरूपक प्रातिशाख्ये न लभ्यते।

यथा—वले (६।३।११८)। मतौ बह्वचोनजिरादीनाम् (६।३।११९)। शरादीनाञ्च (६।३।१२०)। इको वहेऽपीलो (६।३।१२१)। चिते कपि (६।३।१२७) मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ (६।३।१३१)। ओषधेश्च विभक्तावप्रथमायाम् (६।३।१३२)। वा षपूर्वस्य निगमे (६।४।९) (ऋभुक्षाणम्, ऋभुक्षणम्) इति।

अत्रापीदं सादृश्यं यादृच्छिकं न प्रतीयते, अवश्यमेकेन परस्य समन्थनं दृष्ट्वाऽनुवादः कृतः। तत्रापि पूर्वोक्ता युक्तिरनुसन्धेया, पाणिनीयसूत्राणां प्रतिरूपकं प्रातिशाख्ये यत्र न दृश्यते, तत्र सामवेदे एतादृशः प्रयोगा न लभ्यन्त इति वक्तुं सुशकम्। ऋक्तन्त्रस्य केवलं सामशाखीयत्वात्। सर्वशाखानां लौकिकप्रयोगैः सह समुच्चायकेन पाणिनिना तु प्रातिशाख्ये दृष्टास्तत्र तत्र विधयः कुतः उपेक्षिता इत्यत्र न किमपि समाधानं स्यात्। विश्वावसुः, विश्वामित्रः, इत्यादौ प्रातिशाख्ये दृष्टो दीर्घविधिर्यदि पाणिनिनानूदितस्तर्हि 'उपानत्' 'उत्त्रावृहती' इत्यादिषु कुतः उपेक्षित इति नैतदुत्तरयितुं शक्यते। तादृशप्रयोगाणामनति प्रसिद्धत्वादुपेक्षेत्यपि सर्वत्र न वक्तुं शक्यते—'वृषाकपि' इत्यादि प्रयोगाणां संस्कृतवाङ्मये सुप्रसिद्धत्वात्। किञ्च 'श्वापद' 'श्वाराह' इत्यादौ पाणिनिनोपेक्षितमपि दीर्घत्वं वार्तिककारेणोपसंख्यातम्, तेनापि प्रयोगाणामप्रसिद्धिर्न सम्यक् प्रतीयते। पाणिनिर्हि 'द्व्यष्टन संख्यायम्' इत्यष्टन्शब्दस्य सामान्येन दीर्घं विधत्ते, 'अष्टसहस्रम्' इत्यादौ तु दीर्घं न दृश्यते, तदर्थं पाणिनेर्न कोऽपि यत्नः। प्रातिशाख्ये तु 'प्राक् शतात्' इत्युक्तम्, वार्तिककारेणापि 'प्राक्शतादिति वक्तव्यम्' इत्यनूदितम्। तस्मादनेन प्रकरणेनाऽपि 'ऋक्तन्त्रप्रातिशाख्यस्य' पाणिनिपरभवत्वमेव प्रतीयते। अनवधानेन मनुष्यसुलभेन पाणिन्युपेक्षिता प्रयोगा प्रातिशाख्ये सामसंहितायामन्विष्य विशेषेण संगृहीताः, त एव च वार्तिककृता पश्चादनूदिता इत्येव कल्पना ज्यायसी। सूत्राण्येवंविधानि संमुखे स्थितानि यदि स्युः, तर्हि अनवधानं न सम्भवतीत्यसकृदावेदितम्। किञ्च तिङ्कृदादिप्रत्यया प्रातिशाख्येषु न क्वापि विधियन्ते इत्यनेकधैतदुक्तम्। ततश्च इह दीर्घप्रकरणे 'निष्ठायामित्तादौ' इति यदिदं 'दस्ति' इति पाणिनिसूत्रस्य प्रतिरूपकं दृश्यते—तत्सर्वथास्य पाणिनिपरभवत्वं साधयतीति कृतं प्रपञ्चेन।

इदञ्च वैचित्र्यमालोक्यते, यद्—ऋक्तन्त्रकारः समासे विभक्तिलोपार्थमपि सूत्रं प्रणयति—'विभक्तिलोपः (६६) चकारे स्यादावभ्यासे चापि चकारघटितमनुविधत्ते 'कृ चकारमस्वयदष्टे' (पूर्वोक्ते (१९१) सूत्रे) नहि समस्तपदानां तिङन्तादीनां च साधनप्रक्रिया प्रातिशाख्येषु क्वाप्युपलभ्यते। समास-धातु-निष्ठा-सर्वनामादिसंज्ञाश्चाप्यस्य सूत्रेषु व्यवहृता दृश्यन्ते—या न विषया प्रातिशाख्यानाम्। नामैकदेशे नामग्रहणमिति परिपाट्यपि बहुधालोक्यते। सूत्ररचनाप्रणाली च बहुत्र पाणिनिमनुसरति, बहुत्र चातीव विलक्षणा। तच्च वैलक्षण्यं बुद्धिपूर्वकं सम्पादितमनेन प्रतीयते। तस्मात् पाणिनीयव्याकरणसंस्काराया तमेवैतदिति सम्भवति। इदं तु दृढं प्रमाणमस्य पाणिनिपरभवत्वे—यद्ये प्रयोगा पाणिनिसूत्रैर्न सिद्ध्यन्ति, वार्तिककृता यदर्थं प्रयत्न उपसंख्यात—स्तेऽत्र साधिता दृश्यन्ते। यथा—'स्वैरिणी' 'अक्षौहिणी' इत्येतदर्थं 'भाषायां र्णपरयो' (९६) इत्यौत्वं विहितम्। सामशाखाया व्याकरणं विरचयतो भाषाविषयिणी चर्चा कियदुपयुक्तेत्यपि विचार्यम्। अथवा भाषायामिति ब्राह्मणभाषाभिप्रेता स्यात्। तथैव प्रौहः, प्रैष्यः वत्सतरार्णम्, इत्यादिपाणिन्युपचितप्रयोगसिद्ध्यर्थमपि 'उपसर्गादूहेष्यौ प्रेष्यार्थे' (९८) 'वत्सतरादीनामृणे' (१०६) इति सूत्रयति, 'ऋते च तृतीयासमासे' इति वार्तिकमनुसरश्च 'मासे घसृति' (१०२) इति सूत्रयति। अत्र समासशब्दार्थे 'मास' शब्द एव प्रयुक्तः, दीर्घशब्दार्थे च 'घ' शब्द इत्यपि वैलक्षण्यमालोच्यमेव। 'शुनो दन्तदंष्ट्रा' इत्यादिदीर्घानुवादश्च दीर्घप्रकरणे दर्शित एव। यदि हि सूत्राणीमानि पाणिनिरद्रक्ष्यत्, तर्हि कथं तदनुसृत्य स्वयमपि 'स्वैरिणी' 'प्रोह' इत्यादि सिद्ध्यर्थं बुद्धिं न व्यधास्यत्। न ह्येवंविधमनवधानं सम्भवतीत्यसकृदवोचाम। तस्मात् पाणिनिपरभवत्वमेव ऋक्तन्त्रप्रातिशाख्यस्यापि स्पष्टं सिद्ध्यति। यत्तु शाकटायनप्रणीतत्वप्रसिद्ध्या पाणिनिपूर्वभवत्वमस्य प्रातिशाख्यस्य साधयन्ति, परभवत्वसाधकान्युक्तसूत्राणि च प्रक्षिप्तानि पश्चादिति वक्तुमीहन्ते—तदपि न दृढम्। शाकटायनप्रणीतत्वस्यैवासिद्धेः आरम्भ एवात्र 'श्वासो नादः इति शाकटायन' इत्येव नाम्नोल्लिखितः शाकटायनानुवादो दृश्यते, यदि हि शाकटायन एव ऋक्तन्त्रं प्राणेष्यत्, कथं स्वमतमेव स्वयमन्वावदिष्यत्? किञ्च अन्येषु प्रातिशाख्येषु शाकटायनमतं यदुद्धृतम्—न तत्सर्वमिह निभाल्यते। तथा हि—'प्रत्ययस्वर्णं मुदि शाकटायनः (का प्रा ३।९) जिह्वामूलीयोपध्मानीयौ शाकटायनः (३।१२) परिण इति शाकटायनः (३।८७) इति कात्यायन आह। शषसेषु परेषु विसर्गः शाकटायनमते षपसरूपतामाप्नोति, शाकल्यमते तु विसर्ग एव तिष्ठति। तथा कपयोः परयोर्विसर्गस्य जिह्वामूलीयोपध्मानीयौ भवतः शाकटायनमते, शाकल्यमते तु न भवतः। परि-उपसर्गात्पर 'न' इति पदस्य नकारो णत्वमापद्यते शाकटायनमते इति तदभिप्रायः। न तादृशं किमपि विधानमेषु सूत्रेष्वालोक्यते। 'प्रथमं शाकटायनः (प १ सू १६) इत्यादि च शौनकेनोक्तम्, अवसाने प्रथममेव व्यञ्जनं शाकटायनमतेन तिष्ठति, न तु तृतीयव्यञ्जनतामापद्यत इति तदभिप्रायः। तादृशमपि किञ्चिन्नेहालोक्यते। तस्मान्नेदं सूत्रं शाकटायनकृतमित्येव प्रतीयते। भवतु वा केनचिच्छाकटायनेन प्रणीतमिदम्, पाणिनिपरिचितस्तु शाकटायनोऽयं नैव सम्भवति 'लङः शाकटायनस्यैव' इत्यादीनां तिङन्तविधीनामत्र प्रसक्तेरेवाभावात्। माधवीयधातुवृत्तावुक्तपूर्वस्य त्रिगुधातोश्चाप्यत्राप्रसङ्गः। तस्मात् पाणिनिपरिचितः शाकटायनो वैयाकरण एव भवितुमर्हति, न प्रातिशाख्यकृत्। यत्तु पाणिनिपरभवत्वसाधकानि सूत्राणि प्रक्षिप्तानि, पश्चान्निवेशितानीत्युच्यते, तदपि प्रमाणाभावेऽनवधेयमेव भवति। भवतु वा प्रक्षिप्तरहितं किञ्चित्सूत्रं पाणिनेः पुरातनम्, तस्य किं रूपमिति ज्ञातुमद्य दुःशकमेव। अद्योपलभ्यमानन्तु पाणिनिपरभवमेवेति वयं साधयामः।

पुष्पसूत्रादीनि तु एतत्तुल्ययोगक्षेमाण्येवेति विस्तरभिया न पृथगालोच्यन्ते।

अथ शौनकीयम् ऋग्वेदप्रातिशाख्यं परं सन्दिह्यते। तस्य पाणिनिपूर्वभवत्वे परभवत्वे चोभयथापि युक्तयः सुदृढाः सम्भवन्ति। पूर्वभवत्वे तावद्युक्तीः प्रदर्शयामः—

१ अस्मिन् प्रातिशाख्ये, सूत्रप्रक्रिया सुव्यवस्थिता न दृश्यते। कारिकारूपाणि प्रायेण सूत्राणि, पाणिनिकाले हि सूत्रक्रमस्य सुव्यवस्थितता जाता, तत एव पाणिनिपरभवेषु प्रातिशाख्येष्वपि सूत्रशैली पाणिनिसमानैव प्रतीयते। केवलं शौनकप्रातिशाख्य एव कारिकादिरूपेण विलक्षणता दृश्यमाना तस्य पूर्वभवत्वं ख्यापयति।

२ सूत्रनिबन्धनशैल्यामपि गौरवं दृश्यते। यथा हि पाणिनिना 'तस्मिन्निति निर्दिष्टे पूर्वस्य' 'तस्मादित्युत्तरस्य' इत्यादिपरिभाष्य सप्तमीपञ्चम्यादिविभक्तिभिः सङ्क्षेपेण स्वाभिमतोऽर्थो बोधितः, कात्यायनादिभिः प्रातिशाख्यकृद्भिश्चापि सोऽध्वानुसृत। तथात्र शौनकीये न दृश्यते। तथा हि—'अकः सवर्णे दीर्घः' इति पाणिनिसूत्रसमानार्थकं सूत्रं तत्रालोच्यताम्—'समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम् (२५।१५ सू०) 'उभे समानाक्षरे सस्थाने (सवर्णे) एकं दीर्घं स्वरं प्राप्नुत इति तदर्थः। सवर्णसञ्ज्ञाया अकरणाद् 'एकः पूर्वपरयोः' इत्यपरिभाषणात् स्वरसन्ध्यादिप्रकरणविभागाभावाच्च कियद्गौरवमत्र कर्त्तव्यमभूदिति पर्यालोच्यम्। तथैव 'आद्गुणः' इत्यस्य स्थाने च 'इकारोदय एकारमकारः सोदयः' (प० २। सू० १६) अत्र 'अग्रे'—इत्यस्य स्थाने 'उदय' शब्दः प्रयुक्तः। इकारः उदयः परो यस्मात्, तादृशः अकारः सोदयः—अग्रिमवर्णसहितः एकारमापद्यते। अत्रापि तथैव गौरवं दृश्यते। 'इको यणचि' इत्यस्य प्रतिरूपकम् 'समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम्' (२।२१) इति। स्वरोदयम्—स्वरपरम्, समानाक्षरम्—अष्टौ समानाक्षराण्यादितः, इति परिभाषितम् इ-उ-वर्णादि, अकण्ठ्यम्—अकारभिन्नम्, स्वाम्—स्वसदृशीम्—अन्तःस्थाम्—अन्तःस्थवर्णरूपतामापद्यत इति। तत्रापि बाध्यबाधकभावाद्यविचारात् सवर्णदीर्घनिषेधेऽग्रे तन्निषेधः कृतः 'न समानाक्षरे स्वे स्वे' (२।२२) इति। पाणिनिप्रक्रिया तु यदि शौनकेन दृष्टाऽभविष्यत्, न तर्हि गौरवप्रस्तेयं परिपाटी तस्य सूत्रेष्वदृश्यत। तेन पाणिनिपूर्वभवत्वमस्य प्रतीयते।

३ सञ्ज्ञापरिभाषमत्रात्यल्पम्, यदपि दृश्यते—तद्विलक्षणमेव, तस्मात्पाणिनेः प्रभावोऽत्र न कश्चिदपि दृश्यते।

४ अनुगमः प्रायेण न दृश्यते, शब्दस्वरूपग्राहमेव तानि तानि कार्याणि विशेषेण विहितानि दृश्यन्ते। यथा—'आविर्हविर्ज्योतिरित्युत्तरश्चेत्ककारः' (४।४७) इति विसर्जनीयस्य षत्वं शब्दस्वरूपग्रहणपुरःसरमेव निर्दिष्टम्। पाणिनेस्तु 'इदुदुपधस्य चाप्रत्ययस्य' इत्यनुगमो दृश्यते। तथैव पाणिनिः 'षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु' (८।३।५३) इत्यनुगमेन पतिशब्दे पदशब्दे च सर्वत्र विसर्गस्य सत्त्वमुक्तवान्। शौनकस्तु प्रातिशाख्ये—'अन्तःपादं विग्रहे दकारपूर्वं पतिशब्दे ह्ययक्षरे पुरस्वादे' (४।४२) इति पतिशब्दे परे सत्त्वं विधायापि 'वास्तोरित्येतत्पतिशब्द उत्तरे (४।४६) इति पुनः पतिशब्दएव पष्ठता एव सत्त्वं विदधाति। पदशब्दे च परे पदानि गृह्णीत्येव सत्त्वमनुविधत्ते (४।५९ सूत्रे) एवं प्रायेण सर्वत्रैव, तस्मात् पाणिनिप्रक्रिया नास्य परिचिता, पूर्वभवत्वादित्येवमनुमातुं शक्यते।

५ क्वचिच्छौनकेन सामान्येन विहिते पाणिनिकृतो विशेषनिर्देशोऽपि दृश्यते। यथा 'ओकार आमन्त्रितजः प्रगृह्यः' (१।६८) इति सम्बोधनः ओकारस्य प्रगृह्यत्वं सामान्येन शौनकेनोक्तम्, प्रकृतिभावस्तु अग्रे 'प्रकृत्येतिकरणादौ प्रगृह्याः' (२।५१) इति इतिशब्दे पर एवोक्तः। पाणिनिना तु 'सम्बुद्धौ शाकल्यस्येतावनार्षे' इति प्रगृह्यसञ्ज्ञैव इतिशब्दे पर एव कृता, तत्राप्यवैदिक इतिशब्दे इति सोऽयं विशेषः। तथैव 'सः प्रथमैरुपधीयमानः शकारः शाकल्यपितुश्छकारम् (प० ४ सू० ४) इति शौनकेन वर्गप्रथमात्परस्य शकारस्य सर्वत्र छकारो विहितः। पाणिनिना तु 'शश्छोऽटि' इति झयः परस्य शस्य अटि पर एव छकारो विहित इति विशेषः। तस्माद्विशेषनिदर्शकः पाणिनिः परभव एव सम्भाव्यते इति।

अथ पाणिनेः पूर्वभवत्वे शौनकप्रातिशाख्यस्य परभवत्वे च युक्तयः प्रदर्श्यन्ते—

१ शौनकीये प्रातिशाख्ये मङ्गलार्थं पद्यं दृश्यत आदौ। पाणिनिपर्यन्तं सूत्रेषु मङ्गलाचरणपद्धतिर्न दृष्टा, अथशब्देन ओङ्कारेणैव वा सूत्रकृता मङ्गलपूर्तिः। तस्मात्प्रातिशाख्ये श्रूयमाणं मङ्गलं सूत्राणामेषां पाणिनिपरभवत्वमेव ध्वनयतीति विचार्यं विमर्शकृद्भिः।

२ उपधासमासादिसञ्ज्ञा अस्मिन् प्रातिशाख्येऽपि व्यवहृता, 'व्यवपूर्वाण्यसमासयोगे' (१।३९) 'सहोपधो रिफित एकवर्णवद्' (१।६७) इत्यादिषु सूत्रेषु। न तु सञ्ज्ञाऽत्र पूर्वं विहितेति पाणिनीयसंस्कारेणैव तत्तत्सञ्ज्ञाव्यवहारोऽनुमीयत इति परभवत्वमस्य सिद्ध्यति।

३ 'उत्तरौ च द्वौ स्वरौ' (आकारमापद्येते) अनेन सूत्रेण 'अन्वेत वा उ' इत्यत्र प्रथमत आकार एव विधीयते, पाणिनीये तु पूर्वमायादेशं कृत्वा ततो यकारलोप इति प्रातिशाख्ये लाघवं दृश्यते। यकारवकारलोपः पाणिनीये विकल्पितः, इह तु यत्र यकारादेर्लोपो न दृश्यते, तत्र 'वायवायाहि' इत्यादौ वकारागमो विहितः। एवमेव 'विसर्जनीयो अरिफितो दीर्घपूर्वः स्वरोदय आकारम्' इत्यादिना 'या ओषधीः' इत्यादौ विसर्गस्य स्पष्टमात्वमेव सङ्क्षेपेण विहितम्। 'ह्रस्वपूर्वस्तु सोऽकारम्' (२।२७) 'ओकारं ह्रस्वपूर्वः' (४।२१) इत्यादिभिर्विसर्गस्यैवाकाररूपता ओकाररूपता च लाघवेन कृता। पाणिनीये तु विसर्गस्य सत्वम् रुत्वम्, यत्वमुत्वं वा, तदनु लोपः सन्धिर्वेति गौरवं दृश्यते। लाघवं चेद् परवर्तिन एव सम्भवति, न हि पूर्ववर्तिनो लाघवं दृष्ट्वा परवर्ती गुरुभूतमुपायमारचयेदिति प्रकृतिसिद्धम्। तस्मात् परभवत्वमेव प्रातिशाख्यस्यानुमीयते।

४ पाणिनिना 'प्रकृत्यान्तःपादमव्यपरे' (६।१।११५) इति छान्दसप्रक्रियासूत्रे पररूपापवादं प्रकृतिभावं विदधता अकाराद्यकारवकारयोः परयोः प्रकृतिभावः प्रतिपिद्धः, तत्र पररूपं भवत्येवेति तदाशयः स्पष्टः। परम् 'व्रतैः सीदन्ते अव्रतम्' 'मित्रमहो अवद्यात्' इत्यादौ वकारपरेऽप्यकारे पररूपं न दृश्यते। तदिदं पाणिनीयैर्बाहुलकादेव समाधेयम्। प्रातिशाख्ये तु यकारवकारयोर्लघुत्वे यत्र, तत्रैव पररूपम् इति विशेषं ब्रुवता 'लघुयकारोत्तरः परः चेदिति (२।३५) सूत्रेण उक्तोदाहरणयोर्व-

कारस्य सयुक्तत्वेन सयोगपरत्वेन च गुरुत्व स्वपरिभाषयाश्रित्य पररूपसमाधान तत्र सम्यक् कृतम्। यदि पूर्वमेव पाणिनिनैद दृष्ट स्यात्, तर्हि न स 'अव्यपरे' इति सामान्येन ब्रूयात्। प्रत्यक्ष निधान दृष्ट्वा नानवधान सम्भवतीति। तस्मात्परभवत्वमेव प्रातिशाख्यस्यानुमीयते।

५ पाणिनिना 'शश्छोऽटि' इति झय परस्य शकारस्य अटि पर एव छकारो विहित। पर 'वज्रिन् छ्नथिहि' इत्यादावपि शकारस्य छत्वमाम्नायते। सोऽय न झय पर, न वाट्परक। तदर्थं प्रातिशाख्ये शौनकीये 'छकार तयोरुदय शकार' (४।१२) इति नकारचकारयो परस्य शकारस्य परवर्गनियममनाश्रित्यैव छकारो विहित। यदि हि पाणिनि पूर्वमीदृश विधानमद्रक्ष्यत, तर्हि अवश्य 'छ्नथिहि' इत्यादिप्रयोगसिद्ध्यर्थं स्वयमपि यत्नमकरिष्यत्। तेन परभवमेव प्रातिशाख्यमनुमीयते।

६ अथेदमेक विसर्गस्य सत्वविधायक सूत्र पाणिने शौनकस्य च वह्वशे सवदद् दृश्यते—

क करत्करतिकृधिकृतेष्वनदितेे (पा० ८।३।५०)

कर कृत कृधि करत्करित्यपि परेषु (शौ० प्रा० ४।४३)

अत्र पाणिनीये 'करति' इति पदमधिकम्, न तत्प्रातिशाख्ये दृश्यते। प्रातिशाख्ये च 'करम्' इत्यधिकम्, न तत पाणिनीये सूत्रे दृश्यते। अदिते पर्युदासश्च पाणिनिना प्रोक्त, न तु शौनकेन। तत्रास्माक पूर्वोक्ता युक्तिरत्राप्यालोच्या-पाणिनेर्योऽश प्रातिशाख्ये त्यक्त, स तु ऋकशाखायामनुपलम्भादिति शक्यसमाधि। यस्तु प्रातिशाख्याश पाणिनिना त्यक्त, तत्र समाधान न वक्तु शक्यम्। पाणिनीयस्य सर्वशाखासग्राहकत्वात्। 'सहस्करम्' इत्याद्या प्रयोगा कुत पाणिनिनोपेक्षिता-इति नैतद्युज्यते समाधातुम्। तस्मात् परभवेन शौनकेनैव पाणिनीय सूत्रमनूदितम्, तत्र च योंऽश स्वशाखाया अनुपयुक्त स परित्यक्त, यश्चाश स्वशाखीयोऽपि पाणिनेरनवधानेन त्यक्तोऽभूत् स सगृहीत—इत्येव कल्पना ज्यायसी। ततश्च परभवत्व मेव प्रातिशाख्यस्य स्पष्ट सिद्ध्यति।

७ अथेदमतिदृढ प्रातिशाख्यस्य परभवत्वे प्रमाणम्—दूडाश, दूणाश, दूढ्य, इत्यादीना सिद्ध्ये पाणिनेर्न दृश्यते प्रयत्न। वार्तिककृता तदर्थम्—'दुरो दाशनाशदभध्येषूत्त्वमुत्तरपदादे ष्टुत्व च' इत्युपसख्यातम्। शौनकीयप्रातिशाख्ये तु दृश्यते तदर्थं सूत्रम् 'दूढ्यदूणाशदूलभप्रवादा दुरदूभूतमधर तेषु नन्त्' (प ५।५५) यदि हि सूत्रमिद पाणिनिना दृष्ट स्यात्, कथ तर्हि तेनेमे प्रयोगा उपेक्षिता स्यु। तस्मादनवधानेनैव विसृष्टा इमे प्रयोगा, वार्तिककारेण प्रातिशाख्यकारेण च पश्चात् सगृहीता इत्येव सम्भवति।

८ तथैव 'ऊष्मोदय प्रथम स्पर्शमेके द्वितीयमाहुरपदान्तभाजम्' (प ६।५४) इति शौनकीयसूत्रम्। तच्चेद 'चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकस्यैवानुकृति। न हि पाणिनिसूत्रेष्विद दृश्यते। यदि हि पूर्वस्थितमिद पाणिनिना दृष्ट स्यात्, तर्हि नैवोपेक्षित स्यात्। तस्मात्परभवत्वमेव प्रातिशाख्यस्य दृढीभवति।

९. ऋकारात्परस्यापि णत्वविधानम् 'न मध्यमे स्पर्शवर्गेर्व्यपेतम्' इति निषिद्धव्यवधानपरिगणन च कात्यायनीये प्रातिशाख्य इवात्रापि दृश्यते। ततश्च तत्रोक्तयुक्त्यैवास्यापि परभवत्वमेव सिद्ध्यति।

१० शौनकीये व्याडेर्नाम दृश्यते। व्याडिश्च पाणिनिसूत्राणां व्याख्यातेति सुप्रसिद्धा किंवदन्ती। ततश्च व्याडेर्वाचीन शौनक कथ न भवेत् पाणिनेर्वाचीन।

ता एता पाणिनिपरभवत्वे युक्तय। अत्र परभवत्वे उपात्ता युक्तय एव दृढा प्रतीयन्ते। पूर्वभवत्वयुक्तयस्तु बाहुल्येन प्रातिशाख्यसामान्योपक्रम एव समाहिता अस्माभि। कारिकाभि सूत्राणा प्रणयनन्तु पाणिनेरुत्तरकाले एव प्रायेण दृश्यते। स्वय वार्तिककृता कात्यायनेनैव सूत्ररूपाण्यनेकानि वार्तिकानि श्लोकैरेवोक्तानि। सेय कात्यायनस्य शौनकस्य च समाना शैली न पाणिनिपूर्वभवत्व साधयितुमीष्टे—इत्यादि समाधेयम्। भाष्यकार उव्वटश्चापि प्रातिशाख्यस्यास्य पाणिनीयशेषत्वमेवाह प्रयोजनकथनावसरे—'तथा व्याकरणे यत्सामान्येन, यथा 'अचि श्नुधातुभ्रुवा य्वोरियङुवङौ' (पाणि ६।४।७७) इत्यादि तद्व्यवस्थापयितुमिदमारभ्यते। न सर्वत्रैतानि पदान्यस्यां शाखाया दीर्घाणि भवन्ति, इति। एव शिक्षाच्छन्दोव्याकरणैर् सर्वासु शाखासु सामान्येन लक्षणमुच्यते, तदेवास्या शाखायामनेन व्यवस्थाप्यते' इत्यादि। आथर्वणप्रातिशाख्य तु स्वय सुष्ठुतैवार्थोऽयमुपन्यस्त 'एवमिहेति च विभाषाप्राप्त सामान्येन' (अथ प्रा १।२) इति। सामान्येन लक्षणेन पाणिन्यादि विहितेन यद्विकल्पप्राप्तम्, तदेवमस्या शाखाया व्यवस्थित भवतीति तदर्थ।

यदि तु व्याडिरय पाणिने पूर्वभवोऽभिमन्यते, पाणिनिसूत्रव्याख्यातृत्व तस्य नाद्रियते, अन्यो वा व्याडि कश्चन पाणिने पूर्वभव स्वीक्रियते। प्रातिशाख्ये चास्मिन् बह्वोऽशा अर्वाक्तना पर्यन्योजिता अनुमीयन्ते, दृष्टा अप्यल्पप्रयोगा शब्दा पाणिनिना सक्षेपपक्षपातेनोपेक्षिता एवेति च स्वीक्रियते, तर्हि स्वीक्रियता नाम प्रातिशाख्यस्य पूर्वभवत्वमपि। इदानीन्तु यस्मिन् रूपे शौनकीय प्रातिशाख्य पश्याम —तदिद रूप पाणिने परभवमेवेति निर्णीतमस्माभि। भवेयुरवश्य पाणिने पूर्वमपि प्रातिशाख्यानि कानिचित्, न तानीदानीं दृष्टिविषयता कस्याप्यायान्ति। यानि त्विदानीं उपलभ्यन्ते व्याकरणानि प्रातिशाख्यानि वा तेषु सर्वत पूर्वभवो भगवान् पाणिनिरेवेत्यस्माक बुद्धौ निर्विवादम्। अत एव वैदिका अपि अङ्गग्रहणे वेदाङ्गेषु 'वृद्धिरादैच्' इति पाणिनेरादिसूत्रमेवाधीयते न तु प्रातिशाख्यादीनाम्। तस्मात् पाणिनेरभ्यर्हितत्व सर्वं स्वीकृतमिति निर्विवादम्। तत्र च प्राचीनत्वमपि मुख्यो हेतुरस्त्यवति।

निरुक्तकृतः पौर्वापर्यम्।

अथ निरुक्तकृतो भगवतो यास्काचार्यात् पाणिनिर्भगवान् पूर्वभव परभवो वेत्येतदपि कालनिर्णयप्रसङ्गे विचार्यमेव। अत्र विषयेऽप्युभयथा प्रतिपत्तिरस्ति, उभयत्र च सम्मान्या युक्तय सन्ति। श्रीसत्यव्रतसामश्रमिमहाभाग स्वीये निरुक्तालोचने भगवन्त पाणिनिं यास्काद् द्विशताब्दीपूर्वभवमङ्गीकरोति। तस्य चैता युक्तय —

१ पाणिने 'पर सन्निकर्ष सहिता' इति सूत्र निरुक्ते प्रथमेऽध्याये षष्ठे पादे (१७ क) उद्धृत दृश्यते इति सर्वत प्रधानतमो हेतु। अत्र केचन शङ्कन्ते 'पाणिनिनैव निरुक्तादुद्धृतमिति कुतो न मन्यते ? निरुक्तकृता स्वय तल्लक्षण सहितायाः कृत स्यात्, तच्च सम्यग ज्ञात्वा पाणिनिनैवोद्धृत स्यादित्यपि सभाव्यत इति। पर नेद ग्रन्थपर्यालोचनया सिद्ध्यति। निरुक्तकारो हि न तत्र सहिता लक्षयितु प्रवृत्त। किन्तु परेषा सम्मतिरेव तेन तत्रोद्धृतेति ग्रन्थपर्यालोचनया सिद्ध्यति। निरुक्तशास्त्रस्य प्रयोजनानि तत्र यास्केन वर्ण्यन्ते, तेष्विदमपि तेनोपात्तम् 'अथापीदमन्तरेण पदविभागो न विद्यते' इति। निरुक्तेन तत्तत्पदस्यार्थे विज्ञाते पदविभागो वेदमन्त्रेषु सम्भवति, अर्थज्ञाने च निरुक्त प्रधान सहायकमिति पदविभागोऽपि निरुक्तसाध्य इति तदाशय। 'अवसाय पद्वते रुद्र मृळ' इत्यस्मिन् मन्त्रे अवसायेति अवसशब्दस्य चतुर्थ्येकवचनम्, तस्मादत्र पदकारैरवग्रहो न क्रियते। 'अवसाय अश्वान्' इत्यत्र अवोपसृष्ट स्यतिर्ल्यबन्त इति अवेत्युपसर्गपदेऽवग्रह क्रियते। विनार्थज्ञान कथमिद विज्ञायेत कुत्र ल्यबन्त कुत्र वा चतुर्थ्यन्तमिति। एवमेव एकरूपमेव 'निर्ऋत्या' इति पद 'दूतो निर्ऋत्या इदमाजगाम' इत्यत्र 'निर्ऋत्याः' इति षष्ठ्यन्त मन्यते, 'परो निर्ऋत्या आचक्ष्व' इत्यत्र तु 'निर्ऋत्यै' इति चतुर्थ्यन्त विद्यते। तदिद विनार्थज्ञान कथ सम्भवेत्, कुत्र षष्ठ्यन्त कुत्र वा चतुर्थ्यन्तमिति। एव प्रयोजनमुक्त्वा अत्रैव 'पर सन्निकर्ष सहिता' इति 'पदप्रकृति सहिता' इति सूत्रद्वय मुदाहृतम्। तत्र प्रथम पाणिनीये, द्वितीय च व्यत्ययेन 'सहिता पदप्रकृति ' इति ऋक्प्रातिशाख्ये लभ्यते। अग्रे च निरुक्ते 'पदप्रकृतीनि सर्वचरणाना पार्षदानि' इत्युक्तम्। अत्र भाष्यकृद् दुर्गाचार्य 'पदविभागप्रसक्तमधुना सहितालक्षणमाह' इति सूत्रद्वयमवतारयामास। 'पदप्रकृति सहिता' इति चैव व्याचष्टे 'अत्र द्वेधा वर्णयन्ति–पदाना या प्रकृति सेय पदप्रकृति सहिता, सहितातो हि पदानि प्रक्रियन्ते, तस्माद्विकार पदानि। अपरे पुन पदानि प्रकृतिर्यस्या सेय पदप्रकृति। पदान्येव हि सहन्यमानानि सहिता भवति। तस्मात्पदान्येव प्रकृति, विकार सहितेति। सर्वेषा चरणाना शाखान्तराणाम्, यानि पार्षदानि—प्रातिशाख्यानि तानि पदप्रकृतीनि, पद तेषु सहिताया प्रकृतित्वेन चिन्त्यते। तेषामपि स एव समय इत्यभिप्राय'। अग्रे च श्रीदुर्गाचार्येण सहिताया प्रकृतित्व समर्थ्य 'समयमात्रमितरत्–स्वशास्त्रनियतमेव' इत्याद्युपसहृतम्। एव सहितालक्षणप्रसक्त प्रसङ्गोपात्तमेवेति व्याख्याकृतो मन्यन्ते। अप्रसक्त च निरुक्तकृत् स्वय लक्षण ब्रूयाद्–इत्यपेक्षया परस्य लक्षणमुद्धरेदित्येव समुचित प्रतिभाति। पाणिने शौनकस्य च सूत्रे निरुक्तकृतोद्धृते इत्येव कल्पना सम्यग भवति।

वयन्त्वत्र ब्रूम —न केवल प्रसक्तानुप्रसक्त्या अप्रकृतकथनमेव यास्कस्य मन्तव्यम्—अपि तु प्रसक्तेन सुसगतमेवैतत्। तथा हि—पदविभागो योऽय निरुक्तस्य प्रयोजनतयोपन्यस्त, तत्रेय शङ्का समुत्तिष्ठते–यन्माभूत्पदविभाग, किं नश्छिन्नम्, सहिताया ये मन्त्रा यथा पठिता, तेषा तथैव पाठेन वय कृतार्था। पठ्यमानाया सहिताया एवादृष्टोत्पादकत्वादिति। तत्रेद यास्कस्योत्तरम्–पदानि हि सहिताया प्रकृति, तान्येव मूलभूतानि। पदान्येव हि सहन्यमानानि सहिता भवति। यदि नाभविष्यन् पदानि–कथमिय सहिता प्रादुर्भवेत्। तस्मात् पदानामुपेक्षा न कर्तुं युज्यते इति। अस्यैव स्वपक्षस्य समर्थनाय तेन पाणिने शौनकस्य च लक्षणे उद्धृते। पदानामतिशयित सन्निधानमेव सहितात्वेन पाणिनिना मन्यते, शौनकेनापि च पदानि प्रकृतिर्यस्या सा सहितेत्युच्यते। सर्वाणि च प्रातिशाख्यानि पदाना प्रकृतित्व ब्रुवत इति। तदित्थ ग्रन्थस्य सुसङ्गति। अन्यदीय सूत्रद्वयमेव तत्रोद्धृतमिति चास्मिन् पक्षे सुस्पष्टम्। भाष्यकृद् दुर्गाचार्य पाठमात्रेणादृष्टफलोत्पत्तिवादी आधुनिक इति तेन सहिताया प्रकृतित्व बलादत्र ग्रन्थे समर्थितम्। यास्कस्तु अर्थपक्षपातीति पदानामेव प्रकृतित्व स ब्रवीति इति युक्त प्रतिभाति। ततश्च पाणिने तस्मादपि परभवस्य शौनकप्रातिशाख्यस्य सूत्रस्य चोद्धरणात् पाणिनिपरभवत्व तस्य सुतरा सिद्धम्।

२ निरुक्ते (अ ४ ख २५) अस्या इति अस्य इति च पदे प्रोक्त यास्केन 'अस्या इति चास्येति चोदात्त प्रथमादेशे, अनुदात्तमन्वादेशे, तीव्रार्थतरमुदात्तम्, अल्पीयोऽर्थतरमनुदात्तम्'। इद च 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' इति पाणिनिसूत्र सवादि, तदनुकरणमेव सूचयतीति पाणिनिपरभवत्वमेतस्यानुमीयते।

३ पाणिनिप्रोक्ता कृत्तद्धितसमासादिसज्ञा, उपधादिसज्ञाश्चापि निरुक्तकृता व्यवहृता पाणिनिपरभवत्वमेव तस्य ख्यापयन्तीति।

४ 'न सर्वाणीति गार्ग्यो वैयाकरणाना चैके (अ १) इति यद्यास्केन सर्वाणि नामान्याख्यातजानि न सन्तीति वैयाकरणमतमुपन्यस्तम्–तत्पाणिनेरेव सुस्फुट दृश्यते, तेनैव 'अर्थवदधातुरप्रत्यय प्रातिपदिकम्' 'कृत्तद्धितसमासाश्च' इति सूत्रयता स्फुट व्युत्पन्नाऽव्युत्पन्नद्विविधप्रातिपदिकसत्ता स्वीकृतेति।

५ 'आपनीफणदिति फणतेश्चर्करीतवृत्तम्' (निरु २।२८) इति यास्कोक्तिरपि पाणिनिनान्वाख्याता यङ्लुगन्तप्रक्रिया स्मारयन्ती परभवत्वमेव ख्यापयति।

श्रीसत्यव्रतसामश्रमिमहाशयस्तु निरुक्ते बहुत्र यद् व्याकरणपद वैयाकरणपद च व्यवह्रियते, तत्सर्वमेव पाणिनिपरभवत्व ख्यापक यास्कस्येति विस्तरेण प्रतिपादितवान्। पाणिनिपूर्वभवस्य कस्यापि व्याकरणस्याभावादिति। तत्त्वतदस्माभिर्दृढतया पाणिने पूर्वं व्याकरणान्तराणा सत्ता समर्थयमानैर्निराकृतमेव विस्तरेण। अत्रापि च प्रथमा युक्ति विहायान्या शिथिलप्राया एव। अस्या, अस्य, इति पदद्वय वेदेषु उदात्तमनुदात्त च दृश्यते। तदेतन्निरुक्तकृता स्पष्टीकृतम्—तदेव च पाणिनिनानूदित-

मित्यपि सम्भवति । नह्यत्र विनिगमकं पश्यामः—पाणिनिना यास्कमतमनूदितं वा यास्केन पाणिनिमतमनूदितमिति । उभयथाप्येतत्सम्भवति । प्रत्युत उदात्तानुदात्तयोर्लक्षणमिहार्थप्रधानं यन्निरुक्तकृतोक्तम्—तत्पाणिनीयेन विरुद्ध्यते, तेन ध्वनिकृतयोरेवोदात्तत्वानुदात्तत्वयोः स्वीकारात् । तथैव कृत्तद्धितादिसंज्ञा पूर्वेषु व्याकरणेष्वपि भवेयुः । ता एव निरुक्तकृता व्यवहृताः स्युरित्यपि सम्भाव्यत एव । पूर्वैरपि वैयाकरणैर्नाम द्वैविध्येन न स्वीकृतमिति को नाम वक्तुमीष्टे, तेषां व्याकरणानां यावत् परिचयो न भवेत् । आपनीफणदिति चर्करीतवृत्तमिति तु प्रत्युत विपरीतम्—चर्करीतमिति नाम प्राचीनेषु व्याकरणेष्वेव प्रसिद्धमासीत्—इति हि स्फुटं पूर्वमसाधयामेति । केवलं संहितालक्षणस्योद्धरणमिति युक्तिरेवात्र प्रबला । 'दृष्टं वरमदृष्टात्' इति न्यायश्चास्य श्रीसामश्रमिणोऽनुकूलः । पाणिनीये ह्युक्तं सर्वं स्पष्टं दृश्यते—अन्येषु तु केवलं सम्भवमात्रमुच्यत इति पाणिनिपरभावस्वीकारे दृष्टमूला कल्पना स्यादिति ।

अथ यास्कस्य पूर्वभवत्वे युक्तय आलोच्यन्ताम्—

१ महाभारते यास्कस्य तदीयनिरुक्तस्य च नाम दृश्यते, पाणिनेस्तु न दृश्यते । तेन यास्कस्य महाभारतसंहितापेक्षयापि पूर्वभवत्वं स्पष्टं सिद्ध्यति ।

यास्को मामृषिरव्यग्रोऽनेकयज्ञेषु गीतवान् । शिपिविष्ट इति ह्यस्माद् गुह्यनामधरो ह्यहम् ॥
स्तुत्वा मां शिपिविष्टेति यास्क ऋषिरुदारधीः । मत्प्रसादादधो नष्टं निरुक्तमभिजग्मिवान् ॥
(महा शा प ३४२ अ ७०, ७१ श्लो)

न च तथाविधप्रसङ्गाभावात् पाणिनेर्नाम तत्र नायातमिति शक्यं वक्तुम् । यथा यास्केन 'शिपिविष्ट' नामनिर्वचनं कृतम्, तथा पाणिनिनापि 'वासुदेवार्जुनाभ्यां वुन्' 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्याद्यनेकधोक्तमेव । तत्र अर्जुनेन सह मां प्रकीर्त्य पाणिनिरेव सिद्धिं लब्धवानित्यादिस्तद्वत् प्रसङ्गोऽस्त्येव । भगवतः शङ्करस्य बहुधा माहात्म्यवर्णनं महाभारते, तत्रैव 'पाणिनयेऽभिनवं व्याकरणं दत्तम्' इत्यादि—कीर्तनस्यापि प्रसङ्गोऽस्त्येव, तथापि न पाणिनेर्नाम तत्र स्मर्यते । प्रत्युत 'महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु' (पा ६।२।३८) इति सूत्रे पाणिनिनैव महाभारतशब्दे महच्छब्दस्य प्रकृतिस्वरो विहितः । ततश्च महाभारतस्य परिचयोऽस्त्येव पाणिनेरिति स्पष्टं सिद्ध्यति । अहो ! या महाभारतसंहिता पतञ्जलितोऽप्यर्वाचीना सिषाधयिषति सामश्रमिमहाशय, सा पाणिनितोऽपि प्राक्तनी सिद्ध्यति । महाभारतप्रसिद्धानि युधिष्ठिरादिनामानि कुरुवृष्णिप्रभृतीनां वंशाश्चानेकधा कीर्तितान्येव पाणिनिना स्वीयेषु सूत्रेषु । तेनापि महाभारतपरिचयः पाणिनेः प्रसिद्ध्यत्येव । अन्या काचिदासीत् सा महाभारतसंहितेति तु दुराग्रहमात्रम् । 'दृष्टं वरमदृष्टात्' इति स्वयमेवाम्रेडितोऽनेकधा न्यायः इह विस्त्रियत इति किमन्यदाग्रहातिरिक्तं शक्यं वक्तुं कारणम् । आस्तां नामाप्रकृतम् । पाणिनेर्यास्कादर्वाचीनता त्वेवं सुस्पष्टं सिद्ध्यन्ती स्थैव नो वक्तव्यम् ।

२ मन्त्राणामर्थप्रतिपादकत्वमस्ति, पाठमात्रेणादृष्टोत्पादकत्वं वेत्यस्ति निरुक्ते मीमांसादर्शने च विचारः । तयोरत्यर्थं साम्यं दृश्यते । तथाहि—

निरुक्तस्य प्रथमेऽध्याये पञ्चमे पादे (१५ खण्डे) मन्त्राणामर्थाभावसाधकपूर्वपक्षवाक्यानि	मीमांसादर्शनस्य प्रथमाध्याये प्रथमपादे मन्त्राणामर्थाभावसाधनाय पूर्वपक्षसूत्राणि निरुक्तसमानार्थानि ।
(१) नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्ति ।	(१) वाक्यनियमात् । (मी सू १।२।३२)
(२) अथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते उरुप्रथस्वेति प्रथयति, प्रोहाणीति प्रोहति ।	(२) तदर्थशास्त्रात् । (मी सू १।२।३१)
(३) अथाप्यनुपपन्नार्था भवन्ति—ओषधे त्रायस्वैनम् । स्वधिते मैनं हिंसीरित्याह हिंसन् ।	(३) अचेतनेऽर्थबन्धनात् । (१।२।३५)
(४) अथापि विप्रतिषिद्धार्था भवन्ति— (१) एक एव रुद्रोऽवतस्थे न द्वितीय, असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम् । (२) अशत्रुरिन्द्र जज्ञिषे । शतं सेना अजयत् साकमिन्द्र' । इति ।	(४) (१।२।३६ एव सगृहीत) अविद्यमानवचनात् (१।२।३४) इति वा
(५) अथापि जानन्तं सम्प्रेष्यति 'अग्नये समिध्यमानायानुब्रूहि' इति ।	(५) बुद्धशास्त्रात् (१।२।३३)
(६) अथाप्याह अदितिः सर्वमिति । 'अदितिर्द्यौरदितिरन्तरिक्षमिति' तदुपरिष्टाद् व्याख्यास्यामः ।	(६) अर्थविप्रतिषेधात् । (१।२।३६)
(७) अथाप्यविस्पष्टार्था भवन्ति—'अम्यग् यादृश्मिन् जारयायि काणुका' इति ।	(७) अविज्ञेयात् (१।२।३८)

अत्र पूर्वपक्षे जैमिने सूत्रद्वयमधिकं दृश्यते—'स्वाध्यायवदवचनात्' (१।२।३७) इति, अनित्यसंयोगान्मन्त्रानर्थक्यम् (१।२।३९) इति च । नैतद्द्वयप्रतिरूपकं यास्कीये पूर्वपक्षे लभ्यते । यथा कश्चिदध्येता क्वचिद्—'अवघातमन्त्रमभ्यस्यति, तत्रैव चोपदिष्टा काचिद् योषिद् मुसलेन व्रीहीन् अवहन्ति । तत्र समन्त्रस्तस्या योषितोऽवघातस्य प्रकाशक इति न केनापि शक्यते वक्तुम्, तथैव यज्ञकालेऽपि अवघातसमये प्रयुज्यमानो मन्त्रो नावघातं प्रकाशयतीति (१।२।३७) पूर्वसूत्रार्थः ।

यदि मन्त्राणामर्थो मन्येत, तर्हि अनित्यानां देशनगरमनुष्यादिनाम्नां तत्र श्रवणाद्वेदानामनादिता भज्येत, तस्मान्नार्थप्रकाशका मन्त्रा इत्येवाभ्युपगन्तव्यमिति (१।२।३९) द्वितीयसूत्रार्थः ।

अथैतदुत्तरमपि पर्यालोच्यतामुभयत्र—निरुक्ते प्रथमाध्याये (पञ्चम पादे) (१६ खण्डे)	मीमांसादर्शने प्रथमाध्याये द्वितीयपादे
(स्वतन्त्र साधनम्)	(स्वतन्त्र साधनम्)
अर्थवन्त शब्दसाम्याद्, एतद्वै यज्ञस्य	अविशिष्टस्तु वाक्यार्थः (४०)
समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम्।	लिङ्गोपदेशश्च तदर्थवत् (५१)
क्रीडन्तौ पुत्रैर्नप्तृभिरिति।	ऊहः (५२) विधिशब्दाच्च (५३)
	अविरुद्धं परम् (४४)
पूर्वपक्षस्योत्तराणि	
(१) यथो एतन्नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति, लौकिकेष्वप्येतद्—यथेन्द्राग्नी, पितापुत्राविति।	
(२) यथो एतद् ब्राह्मणेन रूपसम्पन्ना विधीयन्त इति, उदितानुवादः स भवति	गुणार्थेन पुनः श्रुतिः (४१) परिसंख्या (४२) अर्थवादो वा (४३)
(३) यथो एतदनुपपन्नार्था भवन्तीति आम्नायवचनादहिंसा प्रतीयेत।	अभिधानेऽर्थवादः (४६)
(४) यथो एतद्विप्रतिषिद्धार्था भवन्तीति लौकिकेष्वप्येतद्—यथा—असपत्नोऽयं ब्राह्मणः, अनमित्रो राजेति।	गुणादविप्रतिषेधः स्यात् (४७)
(५) यथो एतद्—जानन्तं सम्प्रेष्यतीति जानन्तमभिवादयते, जानते मधुपर्कं प्राहेति।	सम्प्रैषकर्मणो गर्हानुपलम्भः संस्कारत्वात् (४५)
(६) यथो एतद् अदितिः सर्वमिति। लौकिकेष्वप्येतद् यथा सर्वरसा अनुप्राप्ताः पानीयमिति।	गुणादविप्रतिषेधः स्यात् (४७)
(७) यथो एतदविस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेनमन्धो न पश्यति, पुरुषापराधः स भवति। यथा—जानपदीषु विद्यातः पुरुषविशेषो भवति। पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति। इति।	सतः परमविज्ञानम्। (४९)
	उक्तश्च अनित्यसंयोगः (५०) परन्तु श्रुतिसामान्यमात्रम्। (१।१।३१)
	विद्यावचनमसंयोगात् (४८)

अत्रापि विवेचकैर्विद्वद्भिः स्फुटं प्रतीयेत, यद् नेदं सादृश्यं यादृच्छिकम्, अपि तु एकस्य पूर्वोत्तरपक्षावपरेणानुकृतौ। तत्र केन कस्यानुकृतिः—इति विचारे मीमांसादर्शने निरुक्तस्यानुकृतिरित्येव बुद्धावुपारोहति। बहुपूर्वजत्वं च निरुक्तकृतः सिद्ध्यति। तथा हि—निरुक्तकृद्वेदानामृषिप्रणीतत्वमभिप्रैति 'साक्षात्कृतधर्माण ऋषयो बभूवुः, तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः, उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुः, वेदं च वेदाङ्गानि च' इति प्रथमाध्यायान्ते स्फुटीकृतस्तेन स्वाभिप्रायः। 'एवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति (अ ७) यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति (अ ७) 'द्वयोर्भासो ससङ्गं दृष्ट्वैवमवदयत्' (अ ७) 'त्रितः कूपेऽवहितमेतत्सूक्तं प्रतिबभौ' ( ) इत्यादिषु च बहुत्र ऋषिकृतत्वमेव मन्त्राणां ध्वनितम्। अत एव वेदेषु नास्तीतिहास इत्यपि विचारस्तस्य नोदेति स्म, तत एव 'इत्यैतिहासिकाः' 'इति नैरुक्ताः' इत्यैतिहासिकपक्षोऽपि तेन तत्र तत्रानूदितः, 'देवापिः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः' (अ २) इत्यादौ च स्फुटमितिहासपरत्वेनैव मन्त्रव्याख्यानं कृतम्, 'तत्र ब्रह्मेतिहासमिश्रमृङ्मिश्रं गाथामिश्रं च भवति' इत्यत्र च स्फुटमितिहासप्रतिपादकता ब्रह्मणो वेदस्योक्ता। तत एव चात्र मन्त्राणामनर्थकत्वसाधनपक्षे अनित्यानां देशनगरमनुष्यादीनां वर्णनेन वेदस्यानित्यता प्रसज्येतेति शङ्का तेन नोद्भाविता। जैमिनिस्तु,बौद्धादीनां निराकरणाय वेदानामपौरुषेयत्वपक्षमभ्युपागमदिति वेदेष्वितिहाससत्तायां स्वीकृतायामनित्यत्वप्रसक्तिं दोषत्वेन पूर्वपक्षेऽगणयत्, उत्तरपक्षे च श्रुतिसामान्यमात्रं ब्रुवन् तत्समाधानं चकार। तेन निरुक्तकाले अपौरुषेयत्ववादो न दृढं शिष्टसमतोऽभूत्, मीमांसादर्शनकाले तु तस्यैवासीत्प्रसार इति बहुपूर्वत्वं निरुक्तकृतः सिद्ध्यति। तथैव अल्पबुद्धित्वाज्जनानां प्रत्यक्षघातं गणयित्वा मन्त्रघोषणप्रक्रिया जैमिनिकाले प्रचलितेति 'स्वाध्यायवद्वचनाद्' इति पूर्वसूत्रेण सिद्ध्यति, यथा ह्यद्यत्वेऽपि यावदयं डिण्डिमघोषस्तावदहं मन्त्रमिमं भूयो भूयो रटिष्यामीति दृश्यते मन्दबुद्धीनामभिनिवेशः। निरुक्तकाले तु नासीत्प्रचलिता प्रक्रियेयम्, तत एव पूर्वपक्षे नैतदपि संगृहीतं तेनेति शक्यमनुमातुम्। एवमेव 'स्वधिते मैनं हिंसीरित्याह हिंसन्' इत्युक्त्या केशच्छेदनेऽपि हिंसासम्भावना निरुक्तसमये आसीत्, तत एव 'आम्नायवचनादहिंसा प्रतीयेत' इति समाधानमपि तेन कृतम्। मीमांसायां तु 'स्वधिते मैनं हिंसीः, इत्यादौ क्षुरस्य संबोधनमेव दोषत्वेन पूर्वपक्षीकृतम्, न तु केशच्छेदने हिंसायाः सम्भावना कृता। एवमेव मन्त्राणां नियतानुपूर्वीकत्वम् 'इन्द्राग्नी', 'पितापुत्रौ' इत्यादिलौकिकप्रयोगमाश्रित्यैव निरुक्तकृता कृतोत्तरम्, जैमिनिना तु नियतानुपूर्वीकपाठे अदृष्टमपि स्वीकृतम्—इति अदृष्टवादस्य प्रायशः प्रचारो मीमांसाकाले सिद्ध्यति, न तु निरुक्तकाले। अन्य

दृष्यालोच्यतां सुधीभिरत्र तत्र। तदित्थं निरुक्तकृन्मीमांसादर्शनकर्तुर्बहुपूर्वजः स्फुटं सिद्ध्यति। पाणिनिस्तु उत्तरमीमांसाप्रणेतुरपि परभव इति 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' इति सूत्रदर्शनाद्बहवोऽभिप्रयन्ति, स्वयं सामश्रमिमहाशयोऽपि च उत्तरमीमांसाप्रणेतुः परभवत्वमेव पाणिनेरभ्युपगच्छति, उत्तरमीमांसा चेयं पूर्वमीमांसासमकालिकी परभवा वेति निरुक्तकृत्पाणिन्यपेक्षया बहुपूर्वत्वमनयान्तरङ्गपरीक्षया सिद्ध्यति। किं च पूर्वमीमांसायाम् 'आख्या प्रवचनात्' इति ऐतरेयतैत्तिरीय-शाकलवाष्कलादिसंज्ञा प्रवचनादेव जाता न तु विरचनात्-इति स्वमतं प्रतिपादितम्—तदेवानुसृत्य पाणिनिनापि 'कृते ग्रन्थे' इत्यधिकारात् पृथक् 'तेन प्रोक्तम्' इति वेदविषयकोऽधिकारः कृत इत्यनुमीयते। भाष्यकृतापि कृतोऽत्र बहुतरो विचारः इति तेनापि मीमांसापरभवत्वमेव पाणिनेः सिद्ध्यति। ततश्च निरुक्तस्य मीमांसातोऽपि पूर्वभवस्य पाणिनिपूर्वजत्वे न संदेहलेशः।

(३) वैदिकी भाषा स्वसूत्रेषु 'छन्द' पदेन पाणिनिना व्यवहृता, निरुक्तकृता तु 'नेति प्रतिषेधार्थीयो भाषायाम्' 'उभयमन्वध्यायम्' (अ० १) इत्यादौ अध्यायपदेन सा भाषा व्यवहृता। तदनेन निरुक्तकाले वैदिकी भाषा अध्येतव्यभाषाऽऽसीत्, न तु च्छन्दःपदं तस्मिन् काले भाषाबोधकं प्रचलितम्, पाणिनिकाले तु च्छन्दोबाहुल्याच्छन्दःपदं वैदिकभाषायां प्रचलितमिति ततोऽपि बहुपूर्वजत्वं यास्कस्यानुमीयते।

(४) पाणिनीयपरिभाषां प्रायेण निरुक्तकृन्न व्यवहरति। तद्धितशब्दो यत्र तेन क्वचिद्व्यवहृतः, स तद्धितप्रत्ययान्ताभिप्रायेण, प्रत्ययाभिप्रायेण तु 'तद्धितप्रत्ययस्थाने उपबन्धशब्दो व्यवहृतः, तथा हि—अध्वर्युशब्दनिर्वचने 'अपि वा अधीयाने युरुपबन्धः' अध्वरशब्दादध्येत्रर्थे युप्रत्यय इत्यर्थे उपबन्धशब्दः। 'सीमतः' इति शब्दव्याख्यायां च 'सीमेत्येतदनर्थकम्, उपबन्धमाददीत पञ्चमीकर्मागम्, सीम्नः-सीमतः-सीमातः-मर्यादातः' इहाप्युपबन्धशब्द एव तद्धितप्रत्ययं बोधयितुमुपात्तः। तथैव कृत्प्रत्ययं बोधयितुं 'नामकरण' शब्दः स प्रयुङ्क्ते—'कक्षो गाहतेः, क्स इति नामकरणः' 'क्षीरं क्षरतेर्घसेर्वा, ईरो नामकरणः' इत्यादिषु बहुत्र द्रष्टव्यम्। णिजन्तसन्नन्तयङ्लुगन्तादीन् प्रयोगान् सूचयितुं 'कारित' 'चिकीर्षित' 'चर्करीता' दिपदान्येव तेन व्यवहृतानि। सर्वत्र प्रत्ययव्यवस्थामपि निरुक्तकृन्न स्वीकरोति, बहुत्र अनेकान् धातूनेव संयोज्य नामानि निर्वक्ति। नैतत्सर्वं पाणिनेरुत्तरभवस्योपपद्यत इति पाणिनिपूर्वभवत्वमेव तस्य सम्भाव्यते। यास्तु पाणिनीये दृष्टाः संज्ञास्तेन व्यवहृताः, ता व्याकरणान्तरेऽपि पाणिनेः पूर्वभवे भवेयुरित्येव सम्भावयितुमापतति। पाणिनिकृतानि निर्वचनानि च प्रायेण निरुक्ते नानुकृतानि। विलक्षणान्येव तु तत्र निर्वचनानि प्राप्यन्ते। तथा हि—आङ्पूर्वाच्चरतेर्ण्यन्ता आचार्यशब्दं पाणिनिराह, निरुक्तकृत्तु—'आचार्यः—आचारं ग्राहयति, आचिनोत्यर्थान्, आचिनोति बुद्धिम्' इति निर्वक्ति 'आचारं ग्राहयतीति' वदता आचारशब्देन 'या' धातुं संयोज्य निरुक्तिः प्रदर्शितेति प्रतीयते। तथैव द्युरितिशब्दो दिवुधातोरेव पाणिनीयेऽन्वाख्यायते, निरुक्ते तु 'द्युरित्यह्नो नामधेयम्-द्योततः इति सतः' इत्येव द्युतधातोः स निरुच्यते। एवम् 'अर्थो अर्तेः अरणस्थो वा' इति निरुक्तम्। पाणिनीये तु 'अर्थ उपयाच्ञायाम्' इति प्रसिद्धो धातुः। किमन्यत्-पाणिनिः—आस्यदघ्नादिपदानि दघ्नच्प्रत्ययेन साधयति, निरुक्तकृत्तु दघ्नचिति न प्रत्ययं स्वीकरोति, अपितु दध्यानोर्दघ्नधातोर्वा दघ्नशब्दं निर्वक्तीति महद्वैषम्यम्। तथैव पाणिनीये अस्वीकृता अपि बहवो धातवस्तत्र मन्यन्ते। तथा हि 'मातिधग्' इति मन्त्रांशं व्याचक्षाणो निरुक्तकृत् 'मास्मानतिदही' 'मास्मानतिहाय दाः' इत्याह। अतिदही इति नैतत्पाणिनीये दृश्यते। अतिहाय दाः—इति च तदर्थकरणं विलक्षणमेव। तात्पर्यार्थं कृत इति सम्भाव्यते। पाणिनीयापेक्षया अर्थभेदा रूपभेदाश्चापि धातूनां बहुधा निरुक्ते दृश्यन्ते—यथा 'मृगो मार्ष्टेर्गतिकर्मणः' नहि मार्ष्टिर्गत्यर्थकः पाणिनीये दृष्टः। 'पर्षं पुनः पृणातेः' नहि पृणाति पाणिनीये पठितः, 'मीमयति शब्दकर्मा, श्रद्धः शृणातेः शम्नातेर्वा' शम्नाति पाणिनीये क्व? क्व वा मीमयति? बहून्येवंविधान्युदाहरणानि शक्यन्ते सुधीभिः पर्यालोचयितुम्, दिङ्मात्रमिदमुदाहृतम्। नैतत्सर्वं पाणिनिपरभवस्य युक्तं प्रतीयत इति पाणिनेः पूर्वभव एव निरुक्तकारो यास्कः प्रतीयते।

ता एता यास्कस्य पाणिनिपूर्वभवत्वे दृढतरा युक्तयः। एता पर्यालोच्येदमेव प्रतीयते यत् 'परः सन्निकर्षः संहिता' इति पाणिनिपूर्वभवेऽपि क्वचिद् व्याकरणे पठितं स्यात्, तदेव निरुक्तकृतोद्धृतम्-तदेव पाणिनिनानूदितम्। भवतु यथाकथंचित्। अनिश्चित एवायमर्थः—पाणिनिः पूर्वभवो वा, यास्कः पूर्वभवो वेति स्वस्माकं मतम्। अत्राधिकस्यान्वेषणस्य जागर्त्यद्याप्यपेक्षा।

यत्तु कौत्सः पाणिनेः शिष्य इति 'उपसेदिवान् कौत्सः पाणिनिम्' इति भाष्योक्त्या सिद्ध्यति, कौत्समतं चोद्धरति यास्को मन्त्राणामनर्थकत्वपूर्वपक्ष इति यास्कस्य पाणिन्यवरत्वं साधयन्ति, तदप्यतिमन्दम्। कौत्स इति हि गोत्रनाम, एकैकस्मिंश्च गोत्रे शततो व्यक्तयः सम्भवन्तीति कः कौत्सः पाणिनेः शिष्यः, को वा यास्केन स्मृत इति निश्चेतुमशक्यमेव। महाराजरघुकालेऽपि कालिदासः 'कौत्सः प्रपेदे वरतन्तुशिष्यः' इति कञ्चित् कौत्सं प्रस्तौति किं सोऽपि पाणिनेः शिष्योऽस्तु? यश्च पाणिनिर्वैदिकेषु मन्त्रेषु अर्थपरिचयाय प्रकृतिप्रत्ययादिकं विभजते, तस्य शिष्यो मन्त्राणामर्थाभावमभ्युपगच्छतीति इति नैतत् सम्भावनास्पदम्।

यत्तु सत्यव्रतसामश्रमिमहाशयेन 'अपार्णम्' इति निरुक्तदृष्टं पदमुपादाय यास्कस्य पाणिनिपरत्वे प्रधानोऽयं हेतुरिति महता हर्षोल्लासेन धृष्टतेवोक्तम्—पाणिनिकाले ऋणशब्दे परे वृद्धिर्नैवासीत् प्रचलिता, तत एव तेन तादृशं विधानं न कृतम्। निरुक्तकृत्काले 'अपार्णम्' इत्येको वृद्धियन्तिः प्रयोगः प्रचलितः, वार्तिककृत्समये तु 'प्रार्णम्' 'वत्सतरार्णम्' इत्यादौ बहुत्र वृद्धिः प्रचलिता, परम् 'अपार्णं' पदं विलुप्तं जातम्—तत एव वार्तिककृता कात्यायनेन 'प्रवत्सतरकम्बलवसनार्णदशानामृणे' इति बहुत्र वृद्धिरुपसंख्याता, अपात्तु नोपसंख्यातेति च स्वाशयस्तेन सम्यग् विवृतः।

अत्र ब्रूमः—पाणिनिकाले अप्रचलिता एव शब्दाः पाणिनिना नान्वाख्याताः, पश्चात् प्रचलितत्वात् पश्चाद्भवेन कात्यायनेन

तउपसंख्याताः—इति सिद्धान्त एव तावन्नोपपद्यते। तथा हि कुलटाशब्दे कुल + अटा इत्यत्र पररूपं पाणिनिना नान्वाख्यातम्—वार्तिककृता शकन्ध्वादिषु पररूपमुपसंख्यातम्—परं कुलटाशब्दोऽयं स्वयं पाणिनिना 'कुलटाया वा' इति सूत्रे व्यवहृतः। ततश्च पाणिनेः पूर्वं कुलटाशब्दो न प्रचलित इति क एतद्नुन्मत्तो वक्तुं शक्नुयात्। 'स्फटि-गृहि-पति-दयि इत्यादीन् इका, 'भजतेः' इत्यादौ श्तिपा च पाणिनिर्धातून् निर्दिशति, 'इक्श्तिपौ धातुनिर्देशे' इति विधानं तु वार्तिक उपलभ्यते इति कथमुक्तः सिद्धान्तः पदं दध्यात्। पूर्वोक्तेन वार्तिकेनैव साध्यमानो 'दशार्ण' शब्दः पाणिनिकाले देशवाचको नासीदित्यपि कश्चन साहसिक एव शक्नोति वक्तुम्, दशार्ण-देशस्य महाभारतादौ सुप्रसिद्धत्वात्। 'स्वैरी' 'स्वैरिणी' पदयोर्वृद्धिर्न पाणिनिनान्वाख्याता, वार्तिककृतोपसंख्याता, इमे च पदे छान्दोग्योपनिषदि स्फुटं श्रूयेते 'न मे स्तेनो जनपदे.........न स्वैरी स्वैरिणी कुत' इति। तत्किं छान्दोग्योपनिषदपि पाणिनिपरभवा ? एवं प्रैषशब्दः शतपथब्राह्मणे १३।५।१।२३ 'यज्ञ्व प्रजापतिमिति प्रैष' इति श्रूयते, स चापि प्रादूहोढोढ्यादिवार्तिकेनैव सिद्ध्यति। 'षोडश' शब्दोऽयं 'षष उत्व दतृदशधासु' इत्यादिना वार्तिककृतैव साधितः, पाणिनेस्तदर्थं प्रयत्नो न दृश्यते, परं शब्दोऽयं संहितास्वपि श्रूयते—इति कथमस्य पाणिनेः पश्चात् प्रचलितत्वं वक्तुं शक्येत ? पाणिनिना पृषोदरादित्वादेवास्य सिद्धिर्मतास्मि कृतेति चेत् 'द्वादश' 'अष्टादश' 'त्रयस्त्रिंशदादि'शब्दाः पृषोदरादित्वेन नोपेक्षिताः, षोडशशब्द एव तूपेक्षित इत्यपि वैचित्र्यमेवापतति। यत्तु श्रीयुधिष्ठिरप्रभृतय आधुनिकाः 'नैकमुदाहरणं योगारम्भं प्रयोजयति' इति भाष्यमनुसृत्य एकैकप्रयोगार्थं पाणिनिना सूत्राणि न प्रणीतानीति समादधति, तदपि न विचारसहम्। एकैकस्योदाहरणस्य साधनार्थमपि पाणिनेर्बहुसूत्रारम्भदर्शनात्। 'नृ च' इत्यस्यैकमेवोदाहरणम्—'नृणाम्' 'न तिसृचतसृ' इत्यत्रापि तिसृचतसृ शब्दयोरेकैकमेवोदाहरणम्। 'पचो व' 'क्षायो म' इत्यादीनामेकैकान्येवोदाहरणानि। सर्वस्यामप्यष्टाध्याय्यां सर्वतो बृहत्सूत्रम् 'अचतुरविचतुर'त्यादिसूत्रं तदनुगं दाधर्तिदर्धर्तीत्यादि महासूत्रं चैकैकान्येवोदाहरणानि सङ्कलय्य सदृश्यम्। 'मित्रे चर्षौ' इति सूत्रस्य चैकमेवोदाहरणम्—विश्वामित्र। शतश सूत्राण्येकैकोदाहरणार्थं सदृश्यानि दृश्यन्त एवम्। भाष्यकारेण तु यत्र यत्र तद्वाक्यं प्रोक्तम्—तत्र एकस्योदाहरणस्यार्थे सामान्यो योगो न क्रियते—इति तात्पर्यम्। यथा नामीति सूत्रस्थाने आमीति कृते पूर्वं दीर्घे नुण् न स्यादिति प्रस्तुते विचारे 'ह्रस्वनद्याप' इति ह्रस्वग्रहणं व्यर्थं सद्नुपूर्वणनिमाश्रयिष्यतीति समाधाने 'नृणाम्' इत्यादौ चारितार्थ्यमाशङ्क्य भाष्यकृता तथोक्तम्, एकस्य 'नृणाम्' उदाहरणस्यार्थे सामान्येन ह्रस्वग्रहणं नोचितं भवतीति तदाशयः, एवमन्यत्रान्यत्रापि। तत्रैकोदाहरणसाधनाय सूत्रमेव न क्रियते—इति तदभिप्राय सम्भवति। अत एव तथा सति 'नृनद्याप' इत्येव ब्रूयादिति भाष्यकृता नैव उक्तः। एतेन स्फुटमिदं जातम्—यदेकस्याप्युदाहरणस्य कृते सूत्रं तु भवति, सामान्यपदग्रहणं न भवतीति आस्तामप्रकृतम्। किं च केवलवैदिकप्रयोगसाधनाय 'छन्दसि' इति प्रकृत्य यानि सूत्राणि पाणिनिना प्रणीतानि, तेष्वपि कात्यायनकृतानि बहून्युपसंख्यानानि दृश्यन्ते वार्तिकपाठे च भाष्ये च। तत्रैतद्वता मते कथमुपपद्यताम् ? न हि वैदिकाः शब्दा अपि पाणिनेः पश्चात्प्रचलिताः, यदर्थं कात्यायनस्य प्रयत्नो दृश्येत। तस्मादनवधानवशादेव पाणिनिना केचन प्रयोगाः परित्यक्ताः, कात्यायनेन तदर्थं वार्तिकान्यारचितानीत्येव कल्पना सम्यगुपपद्यते। यद्यप्यनल्पमतिर्भगवान् पाणिनिः, यच्च तेन कृतम्, तादृशं न कोऽपि कर्तुं शक्तः। सर्ववेदशाखानुप्रयुक्तलौकिकसर्वप्रयोगबोधकं च कः कर्तुं शक्नुयाद् व्याकरणम् ? तथापि मनुष्यसुलभमनवधानं कचिद् भवत्येवेति तत्समाधानायैव कात्यायनस्य प्रयत्नः। इदन्तु सत्यम्—पाणिनिकाले भाषेयमेव व्यवस्थिता नासीत्, विविधा विचित्राः प्रयोगा अस्यां भाषायां प्रचलन्ति स्म। तत्र येऽत्यन्तविरलाः, ते पाणिनिना परित्यक्ताः, ये तु कथंचिदपि प्राप्तप्रचाराः, ते विकल्पादिना सगृहीताः। यथा कृशानोरुत्तमपुरुषे 'कुर्मि' इत्यपि वाल्मीकीये रामायणे दृश्यते—तेन 'कुर्मि कुर्व कुर्म' इति त्रितयमप्यासीत् प्रयुज्यमानम्, तत्र 'कुर्मि' इत्येतदतिविरलप्रचारं मत्वा समुपेक्षितं पाणिनिना, 'कुर्व', कुर्म' इति तु संगृहीतम्। एवमेव 'गदां गृह्ये'त्याद्या महाभारतादौ दृश्यमानाः, शतनाथाद्याश्च निरुक्तादिषु दृश्यमाना अतिविरलप्रचाराः प्रयोगा उपेक्षिताः, प्रचलितास्तु सूत्रैरन्वाख्याताः। परं प्रचलितेष्वप्येकप्रयोगार्थं सूत्रं न निर्मितमिति न कथमपि सिद्ध्यति। ततश्च यान् विरलप्रयोगान् मत्वा पाणिनिरुपेक्षते स्म, मनुष्यसुलभेन अनवधानेन वा विस्मरति स्म, ते कात्यायनेन उपसंख्याता इत्येव युक्तमभ्युपगन्तुम्। एवं च पाणिनेः पूर्वमपि यास्ककाले 'अपागम्' इति प्रचलितं भवेत्—पाणिनिना च विरलप्रयोगतया अनवधानेन वा त्यक्तं भवेदित्यपि सम्भाव्यत एव। किं च 'अपागम्' इति सिद्ध्यर्थं वार्तिककृतोऽपि न दृश्यते प्रयत्नः, वार्तिककृत्समयेऽपि न प्रचलितोऽयं प्रयोगः, यास्ककाले तु प्रचलित इति कल्पनया वार्तिककृदपेक्षयापि यास्कस्यार्वाचीनत्वमापतति, न चैतदिष्टं कस्यापि। न वा सम्भवति, वार्तिककृता स्वयं 'नाम च धातुजमाह निरुक्ते' इति अस्यैव निरुक्तस्योल्लेखात्। तस्मात् किञ्चित्करैवेयमपागमाधारीकृत्य प्रवृत्ता कल्पना। सन्दिग्धमेव च यास्कपाणिन्योः पौर्वापर्यम्। तत्राप्याधिक्येन यास्कस्यैव पूर्वभवत्वं सम्भाव्यत इति मत्यपीपदाम।

पाणिनिदेशकालौ।

अथास्य पाणिनीयव्याकरणस्य मुख्याचार्याणां पाणिनिकात्यायनपतञ्जलीनां देशकालादिविषयेऽपि किञ्चिद्विचार्यते। तत्र गुणाढ्यरचितबृहत्कथामाधारीकृत्य विरचिते कथासरित्सागरे पाणिनेः पाटलिपुत्रेऽध्ययनम्, मन्दबुद्धितयाऽध्ययने साफल्यमनासाद्य तपोऽर्थं गमनम्, महेश्वरादभिनवव्याकरणावाप्तिः, तत्र कात्यायनेन सह शास्त्रार्थः, महेश्वरहुङ्कारेणैन्द्रव्याकरणस्य नाशः तत्र पाणिनीयस्यैव प्रतिष्ठा—ऐन्द्रव्याकरणनाशेन मूर्तीभूतस्य कात्यायनस्यापि तपसा महेश्वरप्रसादनम्, तत्प्रसादात्—पाणिनीयव्याकरणवृत्तिशक्तिलाभ—इत्यादि वर्णितमस्ति, यत्सर्वत्रैव प्रसिद्धम्। नन्दराजेन च पाणिनेः प्रतिष्ठाकरणमपि तत्र वर्णितम्, तेन नन्दसमकालिकत्वं पाणिनेः सिद्ध्यति। पाणिनिकात्यायनयोश्च समकालिकत्वं सिद्ध्यति। नन्दराज्यकाले परं महती विप्रतिपत्तिः, आधुनिका ऐतिहासिकाः, यीशुतः पूर्वं चतुर्थ्यां शताब्द्यां नन्दराज्यं वदन्ति। पुराणेषु तु—

आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम् ।
एतद्वर्षसहस्रं तु शतं पञ्चदशोत्तरम् ॥

(श्रीभागवते १२ स्कन्धे २ अ० २६ श्लो० । तथैवान्यत्रापि)

इति परीक्षितो जन्मानन्तरम् १११५ वर्षेभ्योऽर्वाङ् नन्दराज्यप्रारम्भः, शतं वर्षाणि च नवानां नन्दानां राज्यमिति लभ्यते। तत्रापि च विप्रतिपत्तिः, पुराणानुशीलिनः कलेः प्रारम्भ एव परीक्षितो महाराजस्य जन्म मन्वते, कलेश्चाद्यावधि ५०५५ वर्षाणि व्यतीतानीति ततो १११५ वर्षाणां निःसारणे ३९४० वर्षेभ्यः पूर्वं (ईसातः पूर्वं विंशतितम्यां शताब्द्याम्) नन्दराज्यारम्भकालः प्रतीयते, वर्षशतकोत्तरं च (ईसातः पूर्वमूनविंश्यां शताब्द्याम्) नन्दराज्यसमाप्तिकालः। अथ राजतरङ्गिण्यान्तु कलेः ६५३ वर्षव्यतीतेषु कुरुपाण्डवा अभवन्नित्युक्तम्—'शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले। कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः, (१–५०) महाभारतयुद्धादनन्तरं च परीक्षितो जन्मेति कलेरष्टम्यां शताब्द्यां परीक्षितो जन्म लभ्यते। तदनन्तरं पूर्वोक्तरीत्या १११५ वर्षानन्तरं नन्दराज्यारम्भ इति कलेरेकोनविंशतितम्यां शताब्द्याम् ईसातः पूर्वं द्वादश्यां शताब्द्यां नन्दराज्यमायाति। केचिच्च पुराणान्तरसंवादात् पूर्वोक्ते श्रीभागवतपद्ये 'ज्ञेयं पञ्चशतोत्तरम्' इति पाठं मन्वाना परीक्षिज्जन्मानन्तरं १५०० वर्षेभ्योऽर्वाङ् नन्दराज्यप्रवृत्तिरिति राजतरङ्गिणीरीत्या ईसातः पूर्वं सप्तम्यष्टमी वा शताब्दी नन्दराज्यकाल इति साधयन्ति। सेयं विप्रतिपत्तिरद्याप्यैतिहासिकानां मल्ललीलाप्राङ्गणभूतैवेति नात्र स्वल्पकाये निबन्धे वयं तत्र पतितुमिच्छामः। पुराणभूमिकायां विषयमिमं विवेचयिष्यामः, एतावदेव तु वक्तव्यमत्रास्माकम्—यत् कथासरित्सागररीत्या नन्दराज्ये पाणिनेः समयः सिद्ध्यति। त्रिमुनिकल्पतरुप्रभृतिष्वपि तदेवानूद्यते। आर्यमञ्जुश्रीमूलकल्पे बौद्धग्रन्थेऽपि पाणिनिना माणवेन सह महापद्मनन्दस्य सौहार्दं बभूवेत्युक्तम्। तेनापि नन्दसमकालिकत्वं पाटलिपुत्रनिवासश्च पाणिनेः सिद्ध्यति। परं कथासरित्सागरमद्यतना ऐतिहासिका न प्रमाणयन्ति, विनोदमात्रार्था कथास्तत्र सगृहीता इत्येव ते मन्यन्ते। बौद्धग्रन्थे च योऽयं पाणिनिर्नाम माणव उक्तः, सोऽयमेव व्याकरणरचयिता पाणिनिरन्यो वा? इति न ततः सिद्ध्यति। माणव इति विशेषणं च विपरीतमिव। न हीदृश आचार्यः केनापि माणवपदेन विशेष्येत, तस्मात् स्वातन्त्र्येणैवात्र विचारधारा पाणिनिदेशकालविषये प्रवर्तनीया।

तत्र त्रिकाण्डशेषे कोषे पाणिनिनामसु 'शालातुरीय' इति पठनात्, गणरत्नमहोदधौ च जैनलेखकेन वर्द्धमानेन 'शालातुरो ग्रामः, सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्रभवान् पाणिनिरिति' तद्विवरणात् शालातुरो ग्रामोऽस्य भगवतः पाणिनेर्जन्मस्थानमिति पुरस्क्रियते। काशिकाव्याख्यायां न्यासग्रन्थेऽपि च ५।१।१ सूत्रव्याख्यायाम् 'अत शालातुरीयेण प्राक् ठञश्च इति नोक्तम्'—इत्युक्तम्। तेनापि शालातुरीयत्वं पाणिनेः सिद्ध्यति। गुप्तशिलालेखेषु वलभ्यां प्राप्त एकस्मिन् शिलालेखे (३१० सवत्सरलिखिते) पाणिनीयशास्त्रकृते 'शालातुरीयतन्त्रम्' इति प्राप्यत इत्यपि श्रीवासुदेवशरणमहोदयेनोक्तम्। ह्यू आन् चु आङ् नामकश्चीनदेशीयः परिभ्रमणशील ईशुखिस्तस्य सप्तम्यां शताब्द्यामिहायातः स्वयं शालातुरग्रामे गतः, तेन स्पष्टमेव तत्रत्यानां जनानां किंवदन्तीमाकर्ण्य शालातुरग्रामः पाणिनेर्जन्मस्थानमिति लिखितम्।

तदित्थमनेकैः प्रमाणैर्निश्चितं पाणिनेर्जन्मस्थानं शालातुरग्राम इत्येवैतिहासिका मन्यन्ते। अस्य च ग्रामस्य स्थाननिर्देशोऽपि चीनदेशीयेनोक्तेन परिभ्रमणशीलेन कृतः, यदयं शालातुरग्रामो गान्धारदेशे उद्भाण्ड इति प्रसिद्धात् स्थानात् प्रायेण क्रोशद्वयान्तरे लहुरग्रामसमीपेऽस्तीति। गान्धारदेश इदानीं कन्धार इत्युच्यते—इति बहूनां विश्वासः। उद्भाण्डपुरं चेदानीम्—ओहिन्दनाम्ना कुभायाः (काबुलनद्याः) सिन्धोश्च सङ्गमस्थानेऽस्ति, तत्रैव पश्चिमोत्तरस्यां दिशि लहुरनामको ग्रामोऽपि तावत्येव दूरे प्रसिद्ध इदानीमपि। तत्समीप एवासीत् शालातुरग्राम इति निर्णीतप्रायम्। तस्मिंश्च काले गान्धारदेशोत्पन्नः कश्चन बाल शिक्षार्थं पाटलिपुत्रं गच्छेदिति न सम्भाव्यते, तस्मात् तत्रैव प्रान्ते स्थिते तक्षशिलाविश्वविद्यालये पाणिनेः शिक्षा बभूवेत्याधुनिका अनुमिन्वते।

पञ्चनददेशे ये शब्दाः किञ्चिद्वैषम्येणापि प्रवृत्ताः, तेषामप्यन्वाख्यानं पाणिनीये दृश्यते, यथा 'उदक् च विपाशः' ४।२।७४ इति सूत्रेण विपाशो नद्या उत्तरकूले स्थितानां कूपानां वाचकेषु शब्देषु अञ्प्रत्ययो विधीयते, विपाशो दक्षिणभागे स्थितानां तु वाचकेषु अण् प्रत्ययः। अनयोश्च केवलं स्वरे भेदः—सोऽयं सूक्ष्मोऽपि भेदस्तेनान्वाख्यात इति पञ्चनदेषु परिभ्रमणं पाणिनेः स्पष्टं सिद्ध्यति। पाटलिपुत्रे वर्षाचार्यसमीपेऽध्ययनं तु काल्पनिकमेवाद्यत्वे मन्यते पाणिनिना ग्रन्थो विरचय्य महाराजसन्निधौ प्रेषितः, तेन च पाणिनिर्बहु सम्मानितः, ग्रन्थस्य प्रचारश्च पारितोषिकप्रदानादिना कृत इति चीनपरिव्राजकेनापि लिखितम्।

राजशेखरेण काव्यमीमांसायां चोक्तम्—'श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा,

अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः। वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः' इत्यादि। तेन ग्रन्थरचनोत्तरं पाणिनेः पाटलिपुत्रगमनं सम्भाव्यते, तत्रैव तद्ग्रन्थस्य परीक्षा सम्पन्ना भवेत्। तत एव 'उद्दालकपुष्पभञ्जिका' इत्यादि प्राच्यदेशप्रसिद्धक्रीडादिवाचकाः शब्दा अपि पाणिनिनान्वाख्याता दृश्यन्ते। एवंविधानां शब्दानां तत्तद्देशपरिभ्रमणमन्तरेण ज्ञातुमशक्यत्वात्।

बौद्धग्रन्थे मञ्जुश्रीमूलकल्पे समुद्धृतनामा पाणिनिरयमाचार्य एव चेद्, तदपि सम्भवति। पाटलिपुत्रे परीक्षणानन्तरं

तत्रत्येन महाराजेनास्य सत्यं सम्पन्न भवेदिति। स्वयं पाणिनिनापि च 'तूदीशलातुरवर्म … '(४।३।९४) इति' सिन्धुतक्षशिलादिभ्योऽणञौ' (४।३।९३) इति च प्रदेशाविमौ स्मृतौ। तदेव देशनिर्णये प्रायेणैकमत्यमेवैतिहासिकानाम्।

अथास्य कालविषये तु महती विप्रतिपत्तिः। यीशुमसीहात्प्राक् चतुर्थ्यां पञ्चम्यां वा शताब्द्यां पाणिनेः प्रादुर्भाव इत्याधुनिका ऐतिहासिका मन्यते। तत्र चैता युक्तीरुपन्यस्यन्ति—

१ भगवतो बुद्धादयमर्वाचीनः, 'कुमारः श्रमणादिभिः' इति सूत्रप्रणयनात्। श्रमणशब्दो हि बौद्धपरिव्राजकेष्वेव प्रसिद्धः। तत्रापि च श्रमणादिगणे श्रमणाशब्दः स्त्रीलिङ्गः पठ्यते। स्त्रीणां सन्यासग्रहणमपि बौद्धैरेव परिचालितम्। बुद्धश्चायं भगवान् यीशुतः प्राक् सप्तम्यां शताब्द्यां जात इति तन्मतप्रचारादर्वाचीनोऽयं पञ्चम्यां चतुर्थ्यां वा शताब्द्यां भवेत्।

२ 'पञ्चद्दशतौ वर्गे वा' (५।१।६०) इत्यस्ति तद्धिते पाणिनीयं सूत्रम्। तेन पञ्चानां वर्गः पञ्चत्, दशानां वर्गः दशत् इति सिद्ध्यति। विकल्पे च पञ्चकः, दशकः इत्यपि भवति, अयं च पञ्चानां दशानां च वर्गः प्रचारार्थं बौद्धपरिव्राजकेष्वेव प्रचलित इति बौद्धानां महावग्गग्रन्थे स्पष्टमुल्लेखः, पञ्चत् दशदिति शब्दावपि तत्र निर्दिष्टौ। तेषां साधनायैव पाणिनेः प्रयत्न इति सुतरां बुद्धादर्वाचीनत्वमस्य सिद्ध्यति।

३ पाटलिपुत्रनगरनिर्माणं बुद्धदेवस्य जीवितावस्थायामेवारब्धमिति बौद्धग्रन्थेभ्यः प्रतीयते। तस्य नगरत्वप्राप्तिः, तत्र राजधानीप्रतिष्ठापनम्, तदुत्तरं पाणिनिर्जातः। तत एव तद्रचितस्य ग्रन्थस्य नन्दराजधान्यां पाटलिपुत्रे परीक्षणं सम्भवति, इति बुद्धदेवाद् द्विशताब्दीपरत्वमेवास्य सम्भाव्यते। तस्मात् पञ्चमी चतुर्थी वा शताब्दी सुयुक्तोऽस्य कालः।

४ नन्दराज्ये पाणिनीयव्याकरणस्य या परीक्षा उक्ता, बौद्धग्रन्थे च यत् पाणिनेर्नन्दराजेन सख्यमुपवर्णितम्, तदप्येवमुपपद्यते। नन्दराजस्य चतुर्थ्यां पञ्चम्यां वा ईशात प्राक् शताब्द्यामेवैतिहासिकैरवधारणात्।

५ कीथप्रभृतय आङ्गलास्तु वदन्ति, यद् 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' इति सूत्रे यवनशब्दपाठो दृश्यते। इह यवनशब्देन न माहम्मदाः परिचेतुं शक्यन्ते, यतो ह्येतन्मतप्रवर्तकस्य श्रीमहम्मदमहाभागस्य जातस्य चतुर्दश्येवेयं शताब्दी। पाणिनिस्तु ततो बहुपूर्वज इति। तस्माद् यूनानदेशवास्तव्या एवेह यवनशब्देनोपात्ता इति स्फुटमेव। यूनानदेशीयानां परिचयश्च 'ग्रेट अलैग्जण्डर' सिकन्दरस्य भारताक्रमणकालादेव भारतीयैः प्राप्त इति सिकन्दराक्रमणादर्वागेव ईशातः पूर्वं चतुर्थी शताब्द्येव पाणिनेः कालो भवितुमर्हति, न ततः प्रागिति।

ता एता अर्वाचीनत्ववादिनां युक्तयः। प्राचीनत्ववादिनस्तु नैता दृढा मन्यन्ते। एवमुत्तरयन्ति च—

(१) श्रमणशब्दोऽयं न बौद्धोपज्ञम्—शतपथब्राह्मणे १४ काण्डे ७ अध्याये १ ब्राह्मणे २२ कण्डिकायामपि स्पष्टं श्रूयमाणत्वात्, तत्र हि सुषुप्त्यवस्थानिरूपणप्रसङ्गे सर्वोपाधिविनिवृत्तिप्रतिपादने (अत्र पिता अपिता भवति, माता अमाता, लोका अलोका, देवा अदेवाः … श्रमणो अश्रमणः, तापसो अतापसः) इत्यादि श्रूयते। इह परिव्राजकाभिप्रायेणैव श्रमणशब्दः प्रयुक्त इति स्फुटं शाङ्करभाष्यादिषु। सन्यासश्च याज्ञवल्क्यस्य तदुपदेशान्मैत्रेय्याश्चापीहैव काण्डे (बृहदारण्यकोपनिषत्सु) श्रुत इति श्रमणपदेन श्रमणापदेन वा न बुद्धदेवादर्वाचीनत्वं शक्यं कल्पयितुम्। किं च बौद्धमतमपीदं न शाक्यसिंहादेव प्रवृत्तम्—अपि तु बहुप्राचीनम्। 'कथमसतः सज्जायेत' इत्यादिना उपनिषत्स्वेव बौद्धमतानुवादनिराकरणयोर्दर्शनात्। वाल्मीकीयरामायणादावपि स्वयं रामेण बौद्धमतस्योल्लेखकरणात्। बौद्धग्रन्थेष्वपि शाक्यसिंहोऽयमन्तिमो बुद्धः स्मर्यते, ततः पूर्वं प्रादुरभूवन् बहवो बुद्धा इति स्फुटमेव। ततश्च बौद्धमतप्रचारादर्वाचीनत्वे पाणिनेः सिद्धेऽपि न शाक्यसिंहादर्वाचीनत्वं कथमपि सिद्ध्यति। [वस्तुतस्तु ब्राह्मणशब्दः श्रमणशब्दश्चेति द्वावपि शब्दौ विज्ञानमूलकावतिप्राचीनौ। ब्रह्मशब्दो हि 'ज्ञान' पर्यायः, श्रमशब्दश्च क्रियापर्यायः। तत्र ब्रह्मैवेदं सर्वमिति य आतिष्ठन्ते, ते ब्रह्मैकाद्वयवादिनो ब्राह्मणाः, क्रियैव (श्रम एव) सर्वमिदम्, नातोऽन्यद् ब्रह्मास्तीति येऽभ्युपगच्छन्ति, ते श्रमैकाद्वयवादिनः श्रमणाः। ज्ञानैकाद्वयवादः श्रमैकाद्वयवादश्चानादेः कालात् प्रवृत्त इति श्रमणशब्दाधारेण कालनिर्णयोऽयं वैदिकपरिभाषानभिज्ञानामेव शोभते, न तु विवेचकानाम्।

(२) पञ्चद्दशदादिशब्दाः पञ्चानां दशानां च वर्गे शाक्यसिंहात्पूर्वमपि प्रवृत्ताः स्युः, पूर्वभवां प्रक्रियामेवानुसृत्याधुनिकैर्बौद्धैस्तथा वर्गा विरचिताः स्युरित्यपि बहुलं सम्भाव्यते। बहुत्र बौद्धैः प्राक्तनी प्रक्रियानुसृता स्फुटं प्रतीयते। तस्मान्नेदमपि दृढं प्रमाणम्। यथा च नन्दराज्यादीनां काले विप्रतिपत्तिः, तथा भगवतः शाक्यसिंहापरपर्यायस्य बुद्धदेवस्य कालेऽपि पौराणिकानां विप्रतिपत्तिरस्त्येवेति शाक्यसिंहात्परभवत्वेऽपि पाणिनेरविप्रतिपन्नः कालो न सिद्ध्यत्येव। श्रीदेवसहायत्रिवेदिप्रभृतय इतिहासविचक्षणा सर्वामपि आधुनिकानां कालकल्पनां युक्तिभिः खण्डयन्ति, सहस्राधिकवर्षप्राचीनतां च तदभ्युपगतकालापेक्षया तत्तेषां साधयन्तीति कोऽयं यूरोपानुगामिष्वेव दृढतरो विश्वासः?

(३) यदा कथासरित्सागर इतिहासविषये न प्रमाणं मन्यते, बौद्धग्रन्थोक्तश्च पाणिनिर्माणवः पाणिनेराचार्याद् भिन्न एवाभ्युपगम्यते, तदा पाटलिपुत्रपरिचयोऽपि पाणिनेर्न सिद्ध्यत्येवेति पाटलिपुत्रनिर्माणकालेन तत्कालावधारणमपि न दृढम्। नन्दराज्य इव पाटलिपुत्रनिर्माणेऽपि पौराणिकदृशा महती कालविप्रतिपत्तिरस्त्येवेति ततोऽपि न कालनिर्णयः सुकरः।

(४) नन्दराज्ये पाणिनिग्रन्थपरीक्षेति राजशेखरादीनां किंवदन्तीमात्रोल्लेखः। नन्दराज्यकालोऽपि च महासन्देहास्पदमितीयमपि युक्तिः शिथिलप्राया।

(५) यवनपरिचय आर्याणां सिकन्दराक्रमणानन्तरमेवेति तु महदुपहासास्पदम्। श्रीकृष्णकालेऽपि कालयवनकृतमथुराक्रमणस्मरणात्, महाभारतयुद्धेऽपि च यवनादिसैनिकवर्णनात्, तस्मादतिचिरन्तनोऽयं यवनपरिचयो भारतीयानाम्।

एवमर्वाचीनत्वप्रतिपादिका युक्तयः शिथिला एव प्रतीयन्ते।

इदानीन्तनेषु विवेचकेषु श्रीसत्यव्रतसामश्रमिमहाभाग श्रीयुधिष्ठिरमीमांसकश्चातिप्राचीनतावादी। एतौ हि 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' 'वासुदेवार्जुनाभ्यां वुन्' 'गवियुधिभ्यां स्थिरः' 'राजे खश्' (जनमेजय) इत्यादिसूत्रेषु महाभारतनिर्दिष्टानां व्यक्तीनां कुलानां च नामोल्लेखात् तत्रोद्भूतव्यक्तिनामसाधनप्रयत्नाच्च महाभारतयुद्धपरभवत्वन्तु पाणिनेर्मन्येते, परं किञ्चित्परभवत्वमेव साधयतः। तत्रापि सामश्रमिमहाशयः —

शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः। (१–५०)

इति राजतरङ्गिणीवचनमप्रतिहतं प्रमाणं मन्वानः कलेरष्टम्यां शताब्द्याम्—यीशुख्रिष्टात् प्राक् चतुर्विंश्यां च शताब्द्यां पाणिनेः प्रादुर्भावमभिमन्यते। श्रीयुधिष्ठिरमीमांसकस्तु राजतरङ्गिणीवचनस्य पुराणादौ क्वाप्यननुमोदितत्वान्निर्मूलत्वमेव तस्य मन्वानः कलेः प्रारम्भ एव महाभारतयुद्धमभिमन्यमानः कलेस्तृतीयस्यां शताब्द्याम्, यीशुख्रिष्टाच्च पूर्वमूर्नत्रिंश्यां शताब्द्यां पाणिनिप्रादुर्भावं मनुते। सोऽयमन्तरोऽनयोर्भेदः। प्राचीनत्वसाधने युक्तयोऽपि चानयोर्विभिन्नप्रायाः। तत्र सामश्रमिमहाशयस्यैता युक्तयः, यत्पाणिनिरेव प्रथमो व्याकरणप्रणेता, तेन यत्र यत्रापि व्याकरणनाम स्मर्यते, तेभ्यः सर्वेभ्यो ग्रन्थेभ्योऽयं प्राचीनः, निरुक्तकृतो यास्काद्, अन्येभ्यश्च वेदाङ्गग्रन्थनिर्मातृभ्यः प्राचीनोऽयम्—तस्मादत्यवरजत्वमस्य नैव सम्भवति। प्रधानभूता चेयं तस्य युक्तिः यद् व्यासपुत्रस्य शुकस्य वैयासकिरिति नाम श्रीभागवतादौ पठ्यते, न च वैयासकिशब्दः पाणिनीये सूत्रे सिद्ध्यति, वार्तिककृता तु 'सुधातुरकङ् च' (४।१।९७) इति पाणिनीये सूत्रे 'व्यासवरुडनिषादचण्डालबिम्बानां चेति वक्तव्यम्' इत्युपसंख्याय, वैयासकिशब्दः साधितः। तेन स्फुटमिदं प्रतीयते—यद्व्यासपुत्रस्य शुकस्य यावच्च प्रसिद्धिरभवत्, वैयासकिपदं च न प्राचरल्लोके, तावदेव समुत्पन्नः पाणिनिः, तत एव तेन वैयासकिशब्दसाधनाय न कृतः प्रयत्नः। वार्तिककृत्काले तु प्रचलितः स शब्द इति तेन प्रयत्नः कृतः। तदित्थं व्यासात् किञ्चित्परभवत्वमेव पाणिनेः—सुप्रसिद्ध्यतीति।

ता एता सामश्रमिमहाशयस्य युक्तयोऽपि शिथिलप्राया एव। यतो हि पाणिनेः पूर्वमपि बहूनि व्याकरणान्यासन्निति दृढाभिर्युक्तिभिः प्रतिपादितं पुरस्तादस्माभिः। यास्कात्पूर्वभवत्वमपि खण्डितं प्राक्। किं च पाणिनिकाले अप्रचलिता एव शब्दा वार्तिककृता अन्वाख्याता इत्यपि पूर्वमेव दृढतरं निराकृतम्। एवमभ्युपगमे तु महती विशृङ्खलता स्यात्, अश्वत्थामन्नश्वत्थामशब्दयोः साधनार्थमपि न दृश्यते पाणिनेः प्रयत्नः, वार्तिककृतैव तु 'स्थाम्नोऽकारः' 'भवार्थे तु लुग् वाच्यः' इति शब्दौ तावन्वाख्यातौ। ततश्च महाभारतयुद्धे सुप्रतिष्ठिताद्द्रौणादश्वत्थामनोऽपि पूर्वभवत्वं पाणिनेरभ्युपगन्तव्यं स्यादिति भवदभ्युपगतं महाभारतयुद्धादर्वाचीनत्वमपि न सिद्ध्येत्। 'गवियुधिभ्यां स्थिरः' इत्यादिसूत्रनिर्माणं च निरालम्बनं भवेत्। पृषोदरादित्वकल्पना तूभयत्रापि समाना। किं च 'दाह्य' 'दैव' दैव्यादिशब्दा अपि 'देवाद्यञञौ' 'बहिषष्टिलोपो यञ्च' इत्यादिभिर्वार्तिकैरेव सिद्ध्यन्ति, अतिप्राचीनाः, श्रुतिषु श्रूयमाणा अपि। तस्मात्प्राक् प्रसिद्धा अपि बहवः शब्दा अनवधानेन अल्पप्रसिद्ध्या पृषोदरादित्वाभिमानेन वा पाणिनिना त्यक्ताः, वार्तिककृता त्वन्वाख्याता इत्येवानुमानं सम्यग् भवेत्। ततश्च वैयासकिपदाधारेण क्रियमाणा कल्पना अतिशिथिला।

अथ युधिष्ठिरमीमांसकमहाशयस्तु यास्कशौनकपिङ्गलव्याडिप्रभृतीनां पाणिनिसमकालिकत्वं महत्यारभट्या प्रतिपादयन्, अस्य प्रातिशाख्यकृतः शौनकस्य नैमिषादौ सूतात् पुराणानां श्रोतुश्च शौनकस्यैक्यमभ्युपगच्छन्, तस्य जनमेजयकालिकत्वं च प्रसाधयन् वर्षशतत्रयपरिमितमायुश्च तस्याभिमन्वानः, शौनकसमकालिकत्वादेव पाणिनिमप्येतावत्प्राचीनं साधयति। ता एता अस्यापि महाशयस्य युक्तयः श्रद्धामात्रसारा नैतिहासिकानां प्रमाणपरतन्त्राणां पुरः स्थातुमुत्सहेरन्। यतो ह्यनेके शौनकाः शौनकप्रणीतेभ्य एव ग्रन्थेभ्यः सिद्ध्यन्तीति प्रातिशाख्यप्रकरणे प्रागस्माभिः सुप्रतिपादितम्। किमन्यत्—शौनकप्रणीतायामेव बृहद्देवतायाम्—

'काशीवत् सर्वमिति भगवानाह शौनकः' (बृ० दे० ३।१५२) इति शौनकस्य भगवानिति विशेषणं सामश्रमिमहाशयेन निरुक्तालोचने प्रदर्शितम्। न हि स्वस्यैव विशेषणं भगवानिति कश्चिदनुन्मत्तो वदेत्। मन्त्रद्रष्टाऽप्यस्ति शौनकः, मण्डलद्रष्टापि, वेदाङ्गप्रातिशाख्यकृदपि, यास्कादर्वाचीनो बृहद्देवताप्रणेतापि। नैषां सर्वेषामैक्यं कश्चिदपि प्रतिष्ठितधीसुधीः सम्भावयेत्। तस्माद्यदा बहवः शौनका अभ्युपगन्तव्या एव, शौनक इति गोत्रनाम अनेकासु अतिविभिन्नकालासु व्यक्तिषु प्रतिष्ठितम्, तदा पुराणानां श्रोतुः प्रातिशाख्यकर्तुश्च शौनकस्यैक्यप्रकल्पनमपि कल्पनामात्रमेव भवेत्। टीकाकृतो विष्णुमित्रस्य—

शौनको गृहपतिर्वै नैमिषीयैस्तु दीक्षितैः।
दीक्षासु चोदितः प्राह सत्रे तु द्वादशाहिके।

इति शास्त्रान्तरोक्तिरपि चैतिहासिकग्रन्थकारकालप्रसूता किंवदन्तीमूर्तिकैव न प्रमाणकोटिं प्रवेष्टुमीष्टे। वर्षशतत्रयायुःप्रकल्पनमपि च कलियुगप्रारम्भे सर्वप्रामाणिकग्रन्थविरुद्धमिति कल्पनाचातुरीमेव व्यापयेन्नैतिहासिकं तथ्यम्। यास्कादीनां

समानकालिकत्वमपि न प्रमाणे सिद्ध्यतीति प्रागेव प्रत्यपीपदाम। 'पाणिनिर्दाक्षीपुत्र इति भगवता भाष्यकारेणाख्यात, व्याडिरपि दाक्षायण इत्युक्त, तस्माद् व्याडिरय पाणिनेर्मातुल' इत्यादिकल्पना अपि बादरायणसम्बन्ध स्मारयन्त्यो विनोदायैव प्रभवन्ति न तत्त्वान्वेषणनिरूपाय। गोत्रनाम्नामतिविभिन्नकालेऽप्यैक्यदर्शनात्, तदाधारेण कालकल्पनाया कथमपि दुष्प्राप्य सम्भवात्। तथैव वायुपुराणादौ पाणिनिगोत्रस्मरणमपि नास्य व्याकरणाचार्यस्य पाणिने कालनिर्णयाय समुपयुक्त भवत्, स नामा मतिविभिन्नकालेष्वनुवृत्तिदर्शनात्। व्याकरणप्रणेता पाणिनिरिति यदि पुराणेषु क्वाप्युक्त स्यात्, तर्हि निश्चत्तु तस्य स्यात्तदीय काल। तादृश तु किमपि मीमासकमहाशयेन–नोद्धृतमिति सन्देहास्पदमेवाद्यापि पाणिनिसमय।

मम त्विद प्रतिभाति—यत्पाणिने कात्यायनस्य च समये चतुष्पञ्चशताब्दीपरिमितेनान्तरालेनावश्य भाव्यम्, तथैव कात्यायनस्य पतञ्जलेश्चापि समये तावदन्तरालमवश्यमपेक्ष्यते। तत्र सन्ति हेतव —

१—पाणिनिना 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' इति सूत्रे ब्राह्मणानामपि पुराणप्रोक्तत्व विशेषण ददता याज्ञवल्क्यदृष्टस्य शतपथब्राह्मणस्य नवीनत्व व्यञ्जितमिव। अन्यथा विशेषणदानवैयर्थ्यप्रसङ्गात्। कात्यायनेन तु तत्र 'याज्ञवल्क्यादिभ्य प्रतिषेध, तुल्यकालत्वात्' इति शतपथस्यापि समानकालिकत्वमेव ब्रुवता नवीनत्व नोररीकृतम्। ततश्च स्पष्टमिद विज्ञायते–यत् पाणिने समय याज्ञवल्क्यो नात्यन्तमर्वाक्तन। तस्मिन् काले याज्ञवल्क्यस्य नवीनत्वप्रसिद्धिरासीदिति। कात्यायनकाल तु सा नवीनत्वप्रसिद्धिस्तिरोहिता, याज्ञवल्क्यस्यापि अन्यब्राह्मणप्रवक्तृणामिव प्राक्तनत्वमेव प्रसिद्ध जातम्। नैतावद् वैषम्यमन्तत चतुष्पञ्चशताब्दीव्यवधानेन विना सिद्ध्यतीति प्रथमो हेतु। यत्तु युधिष्ठिरमीमासकमहोदयन समानकालिकत्वकथनात् कात्यायनस्य याज्ञवल्क्यसम्बन्धित्व तत्कुलत्व वानुमितम्, तदेतदुपहासास्पदमिव। न हि कस्यचित्कुलज सम्बन्धी वा नवीन प्राचीन स्यापयितु सन्नद्धो भवेद्यथार्थवादी। एवविधानुमानेन तु कात्यायनस्यानाप्तत्व ख्यात्येतेति। तस्मात् कात्यायनकाले याज्ञवल्क्यस्यापि पुराणत्वप्रसिद्धिरेव जाता–इत्येव वक्तव्य स्यात्। अतश्च व्यवधानाधिक्यमवश्यमुररी कर्तव्यम्।

२—पाणिनि सस्कृतभाषा भाषापदेनैव व्यवहरति। तेन तस्य काले सस्कृतभाषैव भाष्यमाणासीत्, भाषान्तरप्रवृत्ति न बभूव, अल्पीयसी वा बभूव इति स्फुटमनुमीयते। कात्यायनस्तु 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम' इति वदन् भाष्यकाररीत्या 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियम क्रियते' अर्थात् साधुशब्दैरेव व्यवहारे धर्मो भवति, नासाधुशब्दैर्व्यवहारे इति सस्कृतभाषाया धर्मजनकत्वमात्रेण उत्कर्ष बोधयति। तेन तस्य काले अपभ्रष्टशब्दघटिताया भाषाया बाहुल्येन प्रवृत्तिरासीदिति स्फुटीभवति। अथ भाष्यकारस्तु 'सन्त्येकैकस्य शब्दस्य बहवोऽपभ्रशा, यथा गोशब्दस्य गावी गोणी गोता गोपोतलिकेत्यादय' इति वदन् धर्मनियमञ्चापि 'याज्ञे कर्मणि स नियम अन्यत्रानियम' इति यज्ञकर्ममात्रे व्यवस्थापयन् स्वकाले व्यवहारार्थमपभ्रष्टभाषाणामेव प्रयोगमभिव्यञ्जयति। नैतत्सर्वमल्पेन समयेन सम्भवति–इति त्रयाणामेषा सुमहता कालव्यवधानेन अवश्यभाव्यम्।

३—पाणिनिर्गान्धारदेशवासीति ऐतिहासिकानामैकमत्य प्राक् प्रादर्शयाम। कात्यायनपतञ्जली तु प्राग्देशवासिनौ। तेन पाणिनिकाले गान्धारप्रदेश, तत्सलग्न पञ्चनदप्रदेशो वा विद्याकेन्द्रमासीदिति प्रतीयते। विद्याकेन्द्रे एव एतादृशाना ग्रन्थाना मुद्भव सम्भवतीति। कात्यायनपतञ्जलिकाले तु प्राग्देश एव विद्याकेन्द्रतामापेति प्रस्फुटमेव। इय घटनापि नाल्प कालसाध्या।

४—पाणिनिसूत्राणामुपरि अनेकानि वार्तिकानि प्रागपि विरचितान्यासन्, तदनन्तर कात्यायनेन स्वीयो वार्तिकपाठो विरचित। तथैव वार्तिकस्यापि भाष्यान्तर प्रथममभूत् तदनु पातञ्जल भाष्यम्, इति युधिष्ठिरमीमासकमहोदया साधयन्ति। एतत्सर्व यदि दृढ निश्चित स्यात्, तर्हि इदमपि कालव्यवधानबाहुल्याय पर्याप्त भवति प्रमाणम्। किञ्च प्रातिशाख्यानि इयन्ति प्रायेण पाणिनिकात्यायनयोरन्तराल एव विरचितानीत्यस्माभि साधितपूर्वम्, ततोऽपि कालव्यवधानाधिक्यमेव शक्य मनुमातुम्।

तदित्थ भाष्यकार पतञ्जलिरीशुखिष्टात् पूर्वं द्वितीयस्या शताब्द्या जात, कात्यायनस्तृतीयस्या चतुर्थ्या वा पाणिनिश्च चतुर्थ्या पञ्चम्या वा इत्याधुनिकानामैतिहासिकाना विनिर्णयो न सम्यग् बुद्धावुपारोहति। कस्यचिदपि ग्रन्थस्य एव विस्तृतव्याख्या नापेक्षा नाल्पीयसा कालेन शताब्दीमात्रेण सम्भवतीति विचार्य सहृदयै। तस्मादस्माक मते भाष्यकार पतञ्जलिर्यदि ईशुत प्राक्तन्या द्वितीयस्या शताब्द्या जात, तर्हि कात्यायन प्राक्तन्या सप्तम्या शताब्द्याम्, पाणिनिश्चाप्यतन प्राक्तन्या द्वादश्या शताब्द्या जातो भवेदिति सम्भावयाम। यदि नन्दराज्यकाल अस्मत्पुराणपर्यालोचनरीत्या ईशुतसहस्राब्दीत्रितयात्प्राक्तन, तदा नन्दस्य पाणिनेश्च सम्बन्ध प्राक्तनैर्ग्रन्थकारैरुल्लिखित सत्यतया सिद्ध्यति। यदि तु अर्वाचीनैतिहासिकदृष्ट्या नन्दराज्य मीशुखिष्टात् प्राक् चतुर्थ्या शताब्द्यामेवेति सत्यम, तदा नन्दस्य पाणिनेश्च सम्बन्धकथा केवल काल्पनिक्येव, पाणिनेस्तथा र्वाचीनत्वासम्भवात्। आस्तात्ताम्, इदमित्थभावेन कालनिर्णय कस्यापि सुदुष्कर, यैरपि क्रियते, तैरपि साहसमात्रमेवानुष्ठीयते, केवलमेतावदेव वक्तु शक्यम्, यत्पाणिनिर्भगवान् भाष्यकाराक्तन, सहस्राब्दीपूर्वभवोऽवश्य स्वीकार्य इति।

अथ कात्यायनदेशकालौ।

अथ कात्यायनस्य देशकालविषये तु न स्फुटं किमपि विज्ञायते। ऐतिहासिकैरपि एतद्विषये स्फुटं निश्चेतुं न पारितम्। कात्यायन, वररुचि इत्यादीनि नामान्यपि बहुतरदेशकालव्यवहितानामनेकासां व्यक्तीनां सम्भाव्यन्ते—इति सोऽयं देशकालनिर्णये महानन्तरायः। कात्यायनो हि शुक्लयजुःश्रौतसूत्रकार एकः, सोऽतिप्राचीनः सम्भाव्यते। प्रातिशाख्यकर्ताऽपि कश्चित् कात्यायनः, पाणिनेः सूत्रवार्तिककारोऽपि च कात्यायनः, स्वर्गारोहणकाव्यनिर्माताऽपि च कात्यायन उच्यते। तदत्र कस्य कस्यैक्यं को वा भिन्न इति जटिलोऽयं प्रश्नः। तथैव वररुचिरपि एकः कौटिल्येन स्वीयेऽर्थशास्त्रे राजनीतेराचार्यत्वेन स्मृतः। एकश्च विक्रमस्य सभायां नवसु रत्नेष्वपि स्मर्यते, वाररुचं काव्यं चापि तत्र तत्रोल्लिख्यते—इति तत्राप्यैक्यं भिन्नत्वं वा सुदृढं वक्तुं सुदुष्करम्। अत्रैतावदेव शक्यते वक्तुम्—यत्कथासरित्सागरे पाणिनिकात्यायनयोः समकालिकत्वं परस्परं विद्वेषः शास्त्रार्थादिकञ्च यदुपनिबध्यते, तत्तु प्रायेण काल्पनिकमेव प्रतीयते। उक्तरीत्या पाणिनिकात्यायनयोर्बहुकालव्यवधानमेवानुमीयते। यच्च कथासरित्सागरे कौशाम्बीनिवासित्वं कात्यायनस्योक्तम्, कौशाम्बी च प्रयागसन्निहितामेव सम्भावयन्त्यैतिहासिकाः, तदेतदपि अनुपपन्नमिव। भाष्यकारो हि 'प्रियतद्धिता दाक्षिणात्याः, यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते' इत्यादिना दाक्षिणात्यत्वेन वार्तिककारमुपहसति। तेनानेन दृढेन प्रमाणेन कात्यायनस्य दाक्षिणात्यत्वं स्फुटीभवति। ततश्च प्रयागप्रान्तवासित्वं न तस्य सम्भवति। यदि तु कौशाम्बी दक्षिणप्रान्त एव क्वचिद् भवेत्तर्हि सम्भवति कौशाम्बीवासित्वम्। भाष्यकारसमये कुत आरभ्य दक्षिणदेशो गण्यते स्म, इत्यपि निश्चेतुं दुःशकमेव। ततश्चाभिजननिश्चयोऽपि कात्यायनस्य न पूर्णतया विधातुं शक्यः। दाक्षिणात्यः स आसीदित्येतावन्मात्रं भाष्यरीत्या निश्चितं प्रतीयते।

अथास्य कालविषये यीशुख्रिष्टात् पूर्वं चतुर्थी शताब्दी तस्य काल इति कैश्चित्पाश्चात्यैरैतिहासिकैर्निर्णीतम्। दृढं प्रमाणन्तु तत्र न किमप्युपलभ्यते, केचित्तु 'पाण्डोर्ड्यण्' इति वार्तिककरणात् पाण्ड्यराज्यपरिचयः कात्यायनस्यासीत्, पाणिनेस्तु तदर्थं प्रयत्नाकरणात् पाण्ड्यराज्यपरिचयस्तस्य नासीदिति सम्भावयन्ति। परं सर्वमेतददृढानुमानमात्रम्। पाणिनेः परभवा एव शब्दाः कात्यायनेनोपसंख्याता इति मूलभूतः सिद्धान्त एव सपरिकरमस्माभिः खण्डितः। पाण्ड्यराज्यस्य स्थापनकालोऽपि चाद्यावधि सम्यङ् न निश्चितः। तस्मात् कालस्य सम्यङ् निश्चयो नास्ति। अस्मन्मते कौटिलीयेऽर्थशास्त्रे ये राजनीतेराचार्याः परिगणिताः, तेषूक्तो वररुचिरयमेव स्यादिति विशेषेण सम्भाव्यते। पाणिनिप्रकरणोक्तरीत्या अस्य कात्यायनापरपर्यायस्य वररुचेः कौटिल्यपूर्वभवत्वसम्भवात्। भाष्यकृतः पतञ्जलेः कात्यायनस्य च काले चतुष्पञ्चशताब्दीव्यवधानेनावश्यं भवितव्यमिति प्रोक्तमेतदस्माभिः। सत्यव्रतसामश्रमिमहाशयोऽपि चैतदेव साधयति। तत्रेदमपि प्रमाणं तेनोपन्यस्तम्, यद् वार्तिककृता स्त्रीप्रत्ययसिद्ध्यर्थं सभाशब्दात् क्रियमाणे प्रत्यये यदनुबन्धासञ्जनमुपसंख्यातम्, तद् भाष्यकृता 'कथं स्त्री नाम सभासु साध्वी स्यात्' इत्युक्त्वा प्रत्याख्यातम्। तेनेदं शक्यतेऽनुमातुं यत् कात्यायनकाले सभासु स्त्रीणां साधुत्वम्—अर्थाद् वक्तृत्वादिना भागग्रहणं प्रचलितमासीत्, भाष्यकारकाले तु तन्निवृत्तमिति। एवंविधं सामाजिकं परिवर्तनं नाल्पेन कालेन सम्भवतीत्यनयोश्चतुष्पञ्चशताब्दीव्यवधानेनावश्यं भाव्यम्। अस्माभिरपि भाषापरिवर्तनविधया तदेतत् साधितमेव। तस्माद् यीशुख्रिष्टात् षष्ठ्याः सप्तम्या वा शताब्द्या अर्वाङ् न सम्भवति कात्यायनकाल इत्यनुमिनुमः। कथासरित्सागरे तु नन्दराज्यकाले स्थितः पाणिनिसमसामयिक एवायमुक्त इति लिखितपूर्वमेतत्। तस्य चैतिहासिकदृष्ट्या न प्रामाणिकत्वमित्यपि चोल्लिखितपूर्वम्। इदमपि स्मर्तव्यम्—सरूपसूत्रे 'द्रव्याभिधानं व्याडिः' इति व्याडिनाम कात्यायनः स्मरति। तेन व्याडिना पाणिनिसूत्रव्याख्यारूपः सङ्ग्रहो निर्मित इति यदि सत्यं तर्हि तस्मात्परभवेनैव कात्यायनेन भवितव्यम्। तस्मात्पाणिनेरस्य च विशेषेण कालव्यवधानमावश्यकमेव।

पतञ्जलेर्देशकालौ

अथ भाष्यकारस्य पतञ्जलेस्तु कालनिर्णये अस्ति दृढं साधनम्। पाणिनिना हि भगवता भूतार्थे लकारत्रयं विहितम्—लुङ्, लङ्, लिट् चेति। तत्र भूतसामान्ये लुङ्, अनद्यतनभूते लङ्, परोक्षानद्यतने लिडिति सूत्रोक्ता व्यवस्था। तत्रानद्यतने लङिति सूत्रे 'परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये' इति वार्तिककृतोक्तम्। तत्रोदाहरणप्रत्युदाहरणे आह भाष्यकारः 'अरुणद्यवनः साकेतम्, अरुणद्यवनो माध्यमिकाम्। प्रयोक्तुर्दर्शनविषये इति किम्—'जघान कंसं किल वासुदेवः।' इति। एतद् व्याख्यातवान् कैयटः। 'अननुभूतत्वात् परोक्षोऽपि प्रत्यक्षयोग्यतामात्राश्रयेण दर्शनविषय इति विरोधाभावः'। उद्द्योतकृन्नागेशश्चैवं व्याख्यातवान् 'भाष्ये जघानेति—कंसवधो हि नेदानीन्तनप्रयोक्तुर्दर्शनयोग्योऽपीत्यर्थः। अरुणदित्युदाहरणे तु तुल्यकाल प्रवक्तेति बोध्यम्'। सर्वस्यास्येदं तात्पर्यम्, यद् या घटना स्वयं न दृष्टा, परं स्वकाल एव जातत्वेन दर्शनयोग्या लोकप्रसिद्धा च, तस्यां बोध्यायां पाणिनिरीत्या अदृष्टत्वेन परोक्षत्वात् लिडेव प्राप्तः, परं तत्र 'लङ्' प्रयोक्तव्य इति वार्तिककृता स्वसम्मतिः प्रदर्शिता। तत्र च पतञ्जलिना भाष्यकृता 'अरुणद्यवनः साकेतम्, अरुणद्यवनो माध्यमिकाम्' इत्युदाहरणद्वयं दत्तम्। तेनेदं स्फुटीभवति—यद्यवनकृतः साकेतावरोधो माध्यमिकावरोधश्च यद्यपि पतञ्जलिना स्वयं न दृष्टः, अथापि पतञ्जलिसमसामयिकत्वाद् दर्शनयोग्यो लोकप्रसिद्धश्चेति तत्र लङ्लकारप्रयोगोदाहरणं तेन दत्तम्। अथायं साकेतावरोधो माध्यमिकावरोधश्च यवनकृतः कदा बभूवेति ऐतिहासिकैः सुस्पष्टमेव निर्णीतम्। ऐतिहासिकदृष्ट्या यीशुख्रिष्टात् ३२७ वर्षेभ्यः पूर्वम् अलक्षेन्द्रस्य (अलैग्जेण्डरस्य) आक्रमणम्। तदनन्तरं चन्द्रगुप्तराज्यकाले सिल्यूकसनामा यवनो भारतमाचक्राम। चन्द्रगुप्तेन परा-

जितश्च स्वकन्यां तस्मै दत्वा गत इति सुप्रसिद्धा घटना। तस्यैव मिल्यूस्मनाम्नो यवनस्योत्तराधिकारी 'मीनाण्डर' नामाऽन्यो यवन पुष्यमित्रराज्यकाले पुनर्भारतमाचक्राम। स इत्थ यद्यपि मधुरापर्यन्तमेवायात, पर तत्सेनानायकैरयोध्या विजित्य ततोऽपि पूर्वस्या दिशि बहुदूरपर्यन्तमाक्रमण कृतम्। अनन्तर तेऽपि तत्रावस्थातुमशक्ता परावृत्ता। सोऽयं साकेतावरोध। एतत्सहचारिण्यैव च सैन्यपङ्क्तिका चित्रकूट (चित्तौड) प्रान्तेऽपि गता। तत्र च चित्तौडसमीपवर्तिनी माध्यमिका नगर्यपि तयाऽऽक्रान्तेति साधितमैतिहासिकै। अस्याक्रमणस्य वृत्तमस्मदीयाया गर्गसंहितायामपि प्राप्यते। तत्र 'मेनन्द्र' इति 'मीनाण्डरस्य' नाम निर्दिष्टम्। संस्कृतीकृत्यैव तन्नाम भारतीयै परिचितमिति ऐतिहासिका मन्यते। अत एव 'मेनन्द्र' नाम्नैव खरोष्ठी व्याख्यायां लिप्या तन्मुद्रा अपि मथुराप्रान्ते समुपलब्धा। ततश्च सुसिद्धमिद जात यत् पुष्यमित्रराज्यकाल एव यवनस्य साकेतावरोधकालो माध्यमिकावरोधकालश्च। स एव च भाष्यकारस्य पतञ्जलेरपि समय। महाभाष्ये 'पुष्यमित्र याजयामहे' इत्यप्युदाहरणमुपलभ्यते। तेन पुष्यमित्रपुरोहितोऽयमित्यपि बहव अभिप्रयन्ति। रावसभा, चन्द्रगुप्तसभा, इत्युदाहरणदर्शनाच्चन्द्रगुप्तसभेत्समस्य सिद्धयत्येव। पुष्यमित्रसमयश्चाधुनिकानामैतिहासिकाना दृष्ट्या यीशुख्रिष्टात् पूर्वा द्वितीया शताब्दी। पौराणिकदृष्ट्या तु यीशुख्रिष्टात् पूर्वं सहस्राब्दीतोऽपि पुरातन पुष्यमित्र इति सोऽयं मतभेद सर्वत्रैव जागर्ति, न च लघुनिबन्धेऽस्मिन् स विवाद उपस्थापयितु शक्य इति प्रागेव न्यवेदयाम। तस्मात् पुष्यमित्रराज्यकालो य कोऽपि वा भवतु, स एव पतञ्जले काल इति सुनिर्णीतमेतावन्मात्रम्।

देशोऽप्यस्य 'गोनर्द'। स्वयमेव भाष्यकृता स्वमतमभिनिवेशेन तत्र तत्रोपन्यस्यता 'गोनर्दीयस्त्वाह' इत्युक्तम्। यद्यपि केचिन्महाशया परमतमेवेदम्, अन्य एव कश्चिद् गोनर्दीय इत्यपि ब्रुवन्ति, पर प्रामाणिकव्याख्याकृतो गोनर्दीयपदेन स्वमतमेवोपन्यस्तमित्येवाभ्युपगच्छन्ति। वयमपि च तत्र तत्र भाष्यकारशैली दृष्ट्वा व्याख्याकृतो मतमेवानुमोदामहे। तेन गोनर्दाभिजनो गोनर्दीयो भाष्यकार इति स्फुटीभवति। गोनर्ददेशश्चाय 'गोंडा' इति प्रसिद्ध प्रान्त इति बहवो मन्यन्ते। पुष्यमित्रस्य यद्यपि प्रधानभूता राजधानी पाटलिपुत्रमासीत्, अथापि अयोध्यायामपि तेनोपराज्यस्थान स्थापितमित्यप्यैतिहासिका विवृण्वन्ति। ततश्च 'गोंडा' प्रान्तवासिन पतञ्जलेस्समभवदयोध्याया वसता पुष्यमित्रेण सम्बन्ध। पुष्यमित्रेण अश्वमेधराजसूयाद्यनुष्ठान कृतमिति प्रसिद्धमेभ्योऽभिलेखेभ्यो हरिवंशादिभ्यश्चापि प्रसिद्धयति। एवंविधेषु महत्सु यज्ञेषु पतञ्जलिसदृशो महाविद्वान् सम्मिलितो बभूवेति क एतन्नानुमन्येत। अन्ये तु 'गोनर्द' स्थानमुज्जयिनीप्रान्ते मध्यदेशेऽभ्युपगच्छन्ति। यस्य प्राकृत नाम गोनद्दमित्यासीत्, व्यापारिगाश्च तत् केन्द्रस्थान बभूव। पुष्यमित्रादीना शुङ्गवशीयाना च मूलस्थान 'विदिशा' नगरी। येदानीं ग्वालियरराज्ये 'भिलसा' इत्याख्यायते। तदेवमभिजनस्थानसामीप्याद् पुरातन एव पतञ्जलिपुष्यमित्रयो सम्बन्ध इति तेषामभिप्राय। काशिकादिषु व्याकरणग्रन्थेषु तु प्राग्देशेष्वेव गोनर्दस्य गणना कृतेति गोंडाप्रान्तमेव गोनर्दपदेन वयमधिक सम्भावयाम।

इत्थ दृढै प्रमाणैर्निश्चितयो पतञ्जलिदेशकालयो पुनरपि केचिद्विप्रतिपद्यन्त एव। तत्र सामश्रमिमहाशयो नेदमनुमन्यते, स तु अन्तरे शकनगात् प्रागेव,बुद्धकालाच्च किञ्चिदर्वाक् प्रायेण पञ्चमीं शताब्दीं (ई पू) पतञ्जलिकाल मन्यते। तत्र चेमे हेतवस्तेनोपन्यस्ता —

१ अभिमन्युराज्यकाले चन्द्राचार्यादिभिर्विलुप्तप्रायस्य महाभाष्यस्य पुस्तकमेक सुदुर्लभ कश्मीरेष्वानीत तैरेव च तस्य प्रचारस्तत्र कृत इति राजतरङ्गिण्यामुक्तम्—

> चन्द्राचार्यादिभिर्लब्ध्वादेश तस्मात्तदागमम्।
> प्रवर्तित महाभाष्य स्व च व्याकरण कृतम्॥

राजतरङ्गिणीतरङ्ग १ श्लो० १७६। हरिणा च वाक्यपदीये कश्चिद् विशेष उक्त—

> पर्वतादागम लब्ध्वा भाष्यबीजानुसारिभि।
> स नीतो बहुशाखत्व चन्द्राचार्यादिभि पुन॥

(वाक्यपदीय २।४८९)

अभिमन्युराज्यकाले च अस्ति पाश्चात्याना विप्रतिपत्ति। विल्फर्डमहाशय यीशुख्रिष्टात् ४२३ वर्षेभ्य पूर्वमभिमन्युराज्यकाल मन्यते। बोथलिङ्महाशयश्च यीशुख्रिष्टात् शताद् वर्षेभ्य पूर्वम्। प्रिंसिपमहोदय यीशुख्रिष्टात् ७३ वर्षेभ्य पूर्वं तद् राज्यावसान मन्यते। लासेन-महाशयश्च यीशुख्रिष्टात् ४० वर्षेभ्य पश्चान्मन्यते। तदत्र बोथलिङ्प्रिंसिपमहाशययोर्मतेन प्रायेण सवदतीति तत्रैव विश्वसिति सामश्रमिमहाशय। तथा च यीशुख्रिष्टात् शताद् वर्षेभ्य पूर्वं दूरात् दाक्षिणात्यपर्वतप्रान्तान्महाभाष्यपुस्तक कश्मीरेषु गतम्। ईदृशस्य च महतो ग्रन्थस्य प्राच्यदेशे विरचितस्य दाक्षिणात्येषु पर्वतप्रदेशेषु तस्मिन् काले प्रचारो यदा वाष्पशकट्यादिक नासीत्किमपि यानसाधनम्, तदनु च तस्य विलोप, इत्येतदर्थमन्तत त्रिचतुरशताब्दीसमयोऽवश्यमपेक्ष्यते। तस्मात् यीशुख्रिष्टात् पूर्वं पञ्चम्या शताब्द्या अर्वाक् महाभाष्यकारसमय कदापि न भवितुमर्हतीति।

२ 'सङ्कलादिभ्यश्च' (४।२।७५) इति सूत्रे पाणिनिना साङ्कलनगरस्य सत्ता प्रकटीकृता। तच्चेद नगर अलक्षेन्द्राक्रमणकाले तेन विनाशितमित्यैतिहासिकी प्रसिद्धि। महाभाष्यकृता च तत्र सूत्रे तद्विनाशविषये किमपि नोक्तम्। यदि हि महाभाष्यात् पूर्वमेव साङ्कलनगरविनाशोऽभविष्यत्, तर्हि ईदृशी प्रत्यग्रा घटना तेनावश्य तत्र निरदेक्ष्यत—साङ्कलनगरमिदानीं ध्वस्तमिति।

३ अलक्षेन्द्रेण पञ्चनदप्रदेशे क्षुद्रकेति प्रसिद्धा युद्धप्रवणा जातिर्विनाशितेत्यपि ख्यापितं यवनदेशीयैरैतिहासिकैः। महाभाष्ये तु 'एकाकिभिः क्षुद्रकैर्जितमि'त्युदाहरणं दृश्यते। यदि हि अलक्षेन्द्राक्रमणादनन्तरं महाभाष्यं विरचितमिति मन्येत, तदानुपदमेव पराजिताया विनष्टायाश्च जातेर्विजयशीलत्वं न कदापि तत्र वर्णितं स्यात्। तस्मादलक्षेन्द्राक्रमणात् प्रागेव महाभाष्यस्य निर्माणमिति। ता एता प्रधानास्तस्य युक्तयः। 'पुष्यमित्रं याजयामहे' 'चन्द्रगुप्तसभा' 'पुष्यमित्रसभा' 'अरुणद्यवनः साकेतम्' इत्यादीन्युदाहरणानि तु स्वकल्पितान्येवेति सामश्रमिमहाशयो वदति। यथा व्याकरणग्रन्थेषु देवदत्तयज्ञदत्तादीनि कल्पितान्येव नामानि तत्र तत्रोदाह्रियन्ते, तथैव पुष्यमित्रचन्द्रगुप्तादिनामान्यपि तदात्वे कल्पितान्येव महाभाष्यकृतोदाहृतानि। पश्चात्तु तन्नामका राजानोऽपि बभूवुरित्येव कल्पयितुमुचितम्। पुष्यमित्रो हि यीशुतः प्राग् द्वितीयस्यां शताब्द्यां जात इत्यैतिहासिकानां मतम्। ततश्च एकशताब्दीमात्रे समये महाभाष्यसदृशस्य दूरदेशे प्रचारस्तद्विलोपश्चापि नैव सम्भवतीति न युज्यते पुष्यमित्रकाले भाष्यनिर्माणम्। किञ्च महाभाष्ये 'अनुशोणं पाटलिपुत्रम्' इत्यप्युदाहरणं दृश्यते। कुसुमपुरापरपर्यायं पाटलिपुत्रञ्चेद् बुद्धदेवकाले एव वासयितुमुपक्रान्तम्, बुद्धदेवेन 'महदिदं नगरं भविष्यती'त्याशीरपि दत्ता। तच्चेद् प्राक् शोणतीरे निवासितम् तदनु च तत् परिवर्त्य गङ्गातीरे स्थापितमित्येतत्सर्वं बौद्धग्रन्थेभ्यः प्रतीयते। इत्थं च यावच्छोणतीरे आसीत्पाटलिपुत्रं तावदेव महाभाष्यं निर्मितमिति ततोऽपि महाभाष्यस्य अर्वाचीनता न सम्भवतीति।

ता एता सामश्रमिमहाशयस्य युक्तय उपदर्शितदृढतरयुक्त्यग्रे नैव स्थातुमुत्सहन्ते। पुष्यमित्रचन्द्रगुप्तयोर्नामनी स्फुटं महाभाष्ये दृश्येते। पुष्यमित्रस्य यागकरणमपि ततः प्रसिद्ध्यति। यवनकृतः साकेतावरोधो माध्यमिकावरोधश्चापि यदेतिहासेभ्यः प्रमाणीभवति, तदा सर्वमिदं कल्पितमित्युक्तिरुपहासायैव प्रेक्षावताम्। एवमपलापे तु कस्यापि ग्रन्थस्य कालनिर्णयः कदापि न सम्भवति। सर्वत्रैवमुच्छृङ्खलानां कल्पनानां जागरूकत्वसम्भवात्। तस्मात् ता प्रबलतरा युक्तयः। 'सङ्ख्यादिभ्यश्च' इति सूत्रे भाष्यमेव न दृश्यते, तदा केवलं नगरध्वंसवर्णनायैव भाष्यकारस्तत्सूत्रं व्याचष्टेत्येतदप्युपहासास्पदम्। न हि भाष्यमैतिहासिको ग्रन्थः, यत्रैवंविधा घटना अवश्यमुल्लिख्येरन्। क्षुद्रकजातिविषयेऽपि ऐतिहासिकैरन्यथैव प्रमाणितम्। मालवाः क्षुद्रकाश्चेति जातिद्वयं पञ्चनदप्रान्ते सुप्रसिद्धमासीत्। तयोश्च सर्वत्र युद्धादिषु साहचर्यमेव बभूव। परमलक्षेन्द्रस्याक्रमणकाले तेन सह युद्धावसरे तयोः साहचर्यं केनचिद्धेतुना न जातम्। ततश्च मालवैः पृथग् युद्धं कृतम्, क्षुद्रकैश्च पृथक्। ते एते जाती तदा विनष्टे इत्यपि भारतीयैरैतिहासिकैः खण्डितम्। अग्रे तयोर्जात्योर्देशान्तरेषु निवासः स्फुटं सिद्ध्यतीति। क्षुद्रका एकान्ततस्तदा पराजिता इत्यपि जायसवालमहोदयो नानुमनुते। यद्यपि यूनानदेशीया स्वलिखित इतिहासे क्षुद्रकाणां पराजयं वदन्ति, परमिदमप्यैतिहासिकैरुच्यते यद्युद्धान्ते क्षुद्रकेभ्यः ससम्मानं सभासु भोज्यादिकं यूनानदेशीयैरुपह्रियते स्म। न हि पराजितानामेवंविधः सत्कारः सम्भाव्यते। तस्माद् युद्धे सन्धिरेवासीत्, तत्र च यवनैतिहासिकैर्यवनानां जयो भारतीयैश्च क्षुद्रकाणां जय उद्घोष्यते स्म इत्यनुमीयते। तत्र भारतीयमतमेवानुसृत्य महाभाष्यकृता 'एकाकिभिः क्षुद्रकैर्जितम्' इत्युदाहृतम्। तादृशेन विश्वविजयिना महावीरेण सन्धिरपि नूनं जय एवेति जितमित्युक्तिर्न विरुद्धा। अत्र 'एकाकिभिः' इति पदं मालवसाहचर्यविरहं व्यञ्जयत् स्फुटमेव अलक्षेन्द्रयुद्धघटनां स्मारयति, तेन अलक्षेन्द्राक्रमणादनन्तरमेव महाभाष्यनिर्माणं सुस्फुटीभवतितराम्। पाटलिपुत्रं चापि विस्तृततमं नगरम्, गङ्गाशोणसङ्गमसन्निधाने निवासितम् अनुशोणमित्यनुगङ्गमिति च उभयथापि व्यपदेष्टुमद्यापि शक्यते। गङ्गाशोणसङ्गमश्च पूर्वं यत्रासीत् ततोऽद्य पश्चिमस्यां दिश्यागत इति प्राचीनाभिर्धन्वाभिः सिद्ध्यति। तस्मात्तदात्वे अनुशोणमित्युक्तिर्न कथमपि विरुद्धा। अभिमन्युराज्यकाले कश्मीरेषु भाष्यपुस्तकागमनमवशिष्यते। परमभिमन्युराज्यकाल एव यदा न निश्चितस्तदा तदाधारेण कथं पतञ्जलेः कालनिर्णयो दृढः स्यात्। यदि लासेनमहोदयस्यैव मतं सम्यक् स्यात्, यीशुशिष्टादनन्तरं चाभिमन्युराज्यकालः सिद्धः स्यात् तदा पुष्यमित्रादनन्तरमपि द्वित्रिशताब्दीव्यवधानं सम्भाव्यत एव। किञ्च नैव राजतरङ्गिण्यां न वा हरिणा प्रचारानन्तरं महाभाष्यविलोप उक्तः। पूर्वं देशान्तरेषु प्रचारः तदनु विलोप इति कल्पनामात्रमिदम्। इदमपि सम्भाव्यते यत् पूर्वं महाभाष्यप्रचारो नैव जातः, कैश्चित्पतञ्जलिशिष्यैः गुरोरधीत्य तत् पुस्तकं देशान्तरेषु नीतं तदेव च कथञ्चिच्चन्द्राचार्यादिभिः प्राप्तम्। प्रचारस्तु तैरेव पश्चात् कृत इति। अस्यां च कल्पनायां शताब्दीव्यवधानमात्रमपि पर्याप्तं भवति। तस्माद् दृढतरप्रमाणाग्रेऽनुमानसाधकानि प्रमाणानीमानि दुर्बलान्येवेति पुष्यमित्रराज्यकाल एव पतञ्जलिकाल इति मन्यामहे। स तु कालः कीदृश इति विप्रतिपत्तिर्न शक्यतेऽत्र समाधातुमिति निवेदितपूर्वम्।

तदेवं व्याकरणप्रधानाचार्याणां पाणिनिकात्यायनपतञ्जलीनां देशकालविषये यथोपलब्धि यथाशक्यं च विवेचितम्। एषां चाचार्याणां 'यथोत्तरं मुनीनां प्रामाण्यम्' इति श्रीभट्टोजिदीक्षितप्रभृतयो वैयाकरणा आहुः। पाणिनिसूत्रविषये यत्र कात्यायनेन काचिद्विप्रतिपत्तिः प्रदर्शिता उपसंख्यानादिकं वा कृतं तत्र कात्यायनस्यैव वचनं ग्राह्यम्। तद्वचनसंस्कृता एव प्रयोगाः साधुत्वेन मन्तव्याः। यत्र च कात्यायनवचनानि खण्डयित्वा भाष्यकारेण कश्चित् प्रयोगः समर्थितः, वार्तिकं वा प्रत्याख्यातं तत्र भाष्यकारवचनमेवानुसृत्य प्रयोगाणां साधुत्वमनुसन्धेयमिति तदाशयः। एतेन भाष्यकारस्य प्रामाण्यं सर्वोपरिस्थितमिति सिद्धं भवति। यथा 'न बहुव्रीहौ' इति बहुव्रीहिसमासे सर्वनामसंज्ञाप्रतिषेधं कुर्वतः सूत्रकारस्य मते बहुव्रीह्यवयवानामपि सर्वनामसंज्ञाभावे तत्राकजन् भवतीति 'त्वं पिता यस्येत्यादि' विग्रहे स्वार्थिके कप्रत्यये 'त्वकपितृक' इत्येव प्रयोगः साधुतयाऽभ्युपगन्तुं युक्तः प्राप्नोति। परं भाष्यकारेण 'गोनर्दीयस्त्वाह अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम्—त्वकत्पितृको मकत्पितृक इत्येव भवितव्यम्' इति स्वीकृतम्। तत्र भाष्यकाराभ्युपगता एव प्रयोगाः साधुतया मन्तव्या इत्याधुनिका वैयाकरणा मन्यन्ते। इत्थमेव च 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति परिभाषयाऽपि सिद्ध्यति। व्याख्या-

तस्यैवानया पूर्वसन्देहनिवारकत्वरूपस्य प्राबल्यस्य बोधनात्। श्रीमन्तो क्षाधिमथाचार्यास्तु 'यथोत्तरं मुनीनां प्रामाण्यमि ति ब्रुवते। पाणिनिरेव भगवान् मुख्यप्रमाणभूत इति तदाशय। आचार्याणां दृष्ट्या तदेव युक्तम्। स्वयमेव भाष्यकारादय पाणिनिवचन सर्वात्मभावेन प्रमाणयन्तीति। आधुनिकवैयाकरणदृष्ट्या तु व्याख्यानशैल्या व्याख्येयस्य तात्पर्यप्रतिपत्तिसम्भवात् भाष्यरूप व्याख्यानमेव मुख्य मन्यते-इत्युभयो सामञ्जस्यम्। मीमांसादर्शनभाष्यकृता श्रीशबरस्वामिनाऽपि दशमेऽध्याये अष्टमे पादे चतुर्थ सूत्रे प्रसङ्गादिदमुक्तम्-'सद्वादित्वात् पाणिनेर्वचन प्रमाणम् असद्वादित्वाद् न कात्यायनस्य' इति। नञ्समासेन नित्येन भवितव्य विकल्पितेन वेति तत्र विचार। पाणिनेर्विभाषाधिकारकरणात् तद्रीत्या विकल्प सिद्ध्यति, वार्तिककारेण तु 'वा वचनानर्थक्य च स्वभावसिद्धत्वात्' इति विभाषाधिकारखण्डन कृतम्। तद्रीत्या नञ्समासो नित्य सिद्ध्यतीति पाणिनिवचनमनुसृत्य विकल्पित एव समासो मन्तव्य इति शबरस्वामिनोऽभिप्राय। अस्ति विकल्प इति विकल्पाऽभ्युपगमात् पाणिनि सद्वादीति तेन स्थापित, नास्ति विकल्प इति कथनाच्च कात्यायनस्यासद्वादित्वमुक्तम्। वस्तुतस्तु कात्यायनस्य तत्रायमभिप्राय, समासविकल्पो न विधिसापेक्ष, अपि तु स्वभावसिद्ध। एकार्थीभावो व्यपेक्षा चेति द्विविधापि शब्दस्य वृत्तिर्वक्तुरिच्छाधीना। यो हि व्यपेक्षया प्रयोक्तुमिच्छति स राज्ञ पुरुष इति पृथक्पदघटित वाक्यमेव प्रयुङ्क्ते, यश्चैकार्थीभावेन प्रयोक्तुमिच्छति स राजपुरुष इत्येकपदता प्रापय्य प्रयुङ्क्ते इति व्यर्था तत्र सद्वादित्वासद्वादित्वकल्पना। स्पष्टीकृतमिद तत्रैव टुप्टीकाया भट्टपादै।

इद तु वार्तिकाना भाष्यस्य च पर्यालोचनया बहुत्र प्रतीयत एव-यत् वार्तिककार सूत्रकृत पाणिनेर्न्यूनताप्रदर्शनमेवाभिलक्ष्य वार्तिकरूपव्याख्याकरणे प्रवृत्त। महाभाष्यकारस्य तु पाणिनेर्गौरवरक्षार्थमेव दृश्यते प्रवृत्ति। अत एव 'प्रमाणभूत आचार्यो दर्भपवित्रपाणि शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्य वर्णेनाप्यनर्थकेन भवितु किं पुनरियता सूत्रेण' (अ. १ पा १ सू १ भा ३) इत्यादिकमनेकत्र तेनोद्घुष्टम्। अत एव कथासरित्सागरे पाणिनिकात्यायनयोर्विद्वेषपूर्वक परस्परशास्त्रार्थकिंवदन्त्यपि प्रवृत्ता। यद्यपि श्रीवासुदेवशरणप्रभृतय वार्तिककारस्य न्यूनता-प्रदर्शनबुद्ध्या विद्वेषबुद्ध्या वा प्रवृत्तिरिति श्रुत्वा विमनायन्ते, अनुकूलबुद्ध्यैव व्याख्यातरूपाण्येव वार्तिकानि तेन विरचितानीति ते मन्यन्ते। पर किं कुर्मो वय यदा भाष्यकार एव तथा ध्वनयति, तदाऽभ्युपगन्तव्यमेवेद भवति। तथाहि-प्रत्याहाराह्निके 'अ इ उण्' सूत्र एव 'अकारस्य विवृतोपदेश आकारग्रहणार्थ' इति वार्तिक विवृण्वता भाष्यकृता स्पष्टमुक्तम्'—आहो पुरुषिकामात्र तु भवानाह संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते इति, वय तु ब्रूम, विवृतस्योपदिश्यमानस्य प्रयोजनम न्वाख्यायत इति'। अत्र आहोपुरुषिकेति पद स्फुटमेव वार्तिककृतोऽहंकारपूर्विका प्रवृत्तिमन्वाचष्टे। तथैव 'ऌलृक्' सूत्रभाष्यान्तेऽपि 'स एष सूत्रभेदेन लकारोपदेश प्लुत्याद्यर्थ सन् प्रत्याख्यायते सेषा महतो वशस्तम्बाल्लट्वानुकृष्यते'। एवं परिहास स्फुटमेव कात्यायनस्य न्यूनताविष्करणरूपां प्रवृत्तिमभिव्यनक्ति। किमन्यत्, सर्वमपि भाष्य पर्यालोच्यतामाधिक्येन न्यूनताप्रदर्शनरूपाणा वार्तिकाना निराकरणमेव भाष्यकृता कृतम्। सूत्राक्षरैरेव वार्तिकार्थलाभाय च प्रयतितम्। अल्पश एव वार्तिक कृत उपसख्यानानि तेन स्वीकृतानि।

महाभाष्य चेद वार्तिकानामेव व्याख्यानमिति शक्यते वदितुम्, वार्तिकमेवावलम्ब्य भाष्यस्य सर्वत्र प्रवृत्तिदर्शनात्। स्वातन्त्र्येण सूत्राणि तु कतिचिदेव व्याख्यातानि। येषु सूत्रेषु वार्तिकानि न दृश्यन्ते तत्र भाष्यमपि प्रायेण न दृश्यत एव। इदमपि वैलक्षण्य व्याकरणेऽनुसन्धेयम्-यदन्यत्र मीमांसा-वेदान्त-न्याय-योग दर्शन-प्रभृतिषु भाष्यस्य व्याख्यानभूत वार्तिकम्, इह तु वार्तिकव्याख्यानरूप भाष्यमिति। अस्यापि इदमेव तात्पर्यं प्रतीयते यत् सूत्रेषु उक्तानुक्तदुरुक्तचिन्ता कात्यायनस्याभीष्टाऽभूत्। अत एव तेन स्वीयस्य ग्रन्थस्य वार्तिकमिति नाम कृतम्। 'उक्तानुक्तदुरुक्ताना चिन्ता यत्र प्रवर्तते। त ग्रन्थ वार्तिक प्राहुर्वार्तिकज्ञा मनीषिण'—इतिवार्तिकलक्षणात्। इद चाप्यतिदुष्करमापतित यत् कात्यायनकृत स्वतन्त्रो वार्तिकपाठ इदानीं नोपलभ्यते। भाष्यमेव तु दृष्ट्वा कैश्चिद्वार्तिकपाठ सज्जीकृत। पर नाय पाठ सर्वथाऽसन्दिग्धो गदितु शक्यते, यतो हि स्ववाक्यमपि यत्र व्याख्यायते तद् भाष्य भवतीति भाष्यलक्षण वदन्त्यभियुक्ता। 'सूत्रार्थो वर्ण्यते यत्र वाक्यै सूत्रानुसारिभि। स्वपदानि च वर्ण्यन्ते भाष्य भाष्यविदो विदु'। दृश्यते च महाभाष्ये बहुत्र तथैव यत् महाभाष्यकृत् पूर्वं सग्राहकवाक्यमुक्त्वा ततस्तद्विवरण वितनुते इति। तेन कुत्र महाभाष्यस्यैव तत्सग्राहक वाक्य कुत्र वा वार्तिककृतस्तथा वार्तिकमित्यसन्दिग्ध तु शका निर्णय। 'वक्तव्य न वक्तव्यम्' इत्यादिभाष्यशैल्या कथचिन्निर्णय सम्पाद्यते, परन्तु तथापि बहुत्र विप्रतिपत्तिर्न निवर्तत एव।

स्ववाक्यव्याख्याकरणरूपभाष्यपरिपाट्या बह्वी विप्रतिपत्ति प्रवृत्ता। यथा 'अथ शब्दानुशासनम्' इति यन्नाष्यकारस्य आदिम वाक्य तत्सूत्रमेवेति केचिन्महाशया मन्यन्ते। साधयन्ति च तदेव महत्यारभट्या। वय तु तेषां भ्रान्तिमेव मन्महे यतो हि भाष्यकार स्वयम् 'वृद्धिरादैच्' सूत्रे वृद्धिरद मङ्गलार्थमाह। 'अनुवाद्यमनुक्त्वा हि न विधेयमुदीरयेत्' इति नियममनुसृत्य पूर्वमुद्देश्यकथन तदनु विधेयकथनमित्यस्याचार्यस्य शैली। यथा 'इको यणचि, अक सवर्णे दीर्घ' इत्यादि। तथैव सज्ञासूत्रेष्वपि 'अदेङ् गुण' इत्यादिषु पूर्वमुद्देश्यकथन तदनु विधेयकथनमित्येव रीतिर्दृश्यते। तयैव च रीत्या सज्ञा-सज्ञिभावो निर्णेतव्य इति भाष्यकृता सिद्धान्तितम्। तत्रैव शङ्का 'कथ वृद्धिरादैच् इति' अत्र पूर्वं विधेयनिर्देश कथमिति प्रश्नस्याशय। तत्रोत्तरयति भाष्यकृत्-'एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्, माङ्गलिक आचार्यो महत शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादित प्रयुङ्क्ते। 'मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता यथा स्युरि'ति। एतस्य भाष्यस्य तुलनाया यानि 'अथ शब्दानुशासनम्' इति वाक्यस्य सूत्रत्वसाधकानि प्रमाणान्युपन्यस्यन्ते तान्यतिदुर्बलानि। अन्वयन्ते

च शिष्टाः आदिसूत्रत्वेन 'वृद्धिरादैच्' इत्येव परम्परया पठन्ति। तदेतदपि मुख्यं प्रमाणं मन्तव्यम्। तथैव 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिके सिद्धशब्दोऽपि मङ्गलरूपतया भाष्यकृता व्याख्यातः। तस्मात् 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इत्येतदादिमं वार्तिकं ये मन्यन्ते तेऽपि भ्रान्ता एव प्रतीयन्ते। किञ्च 'वृद्धिरादैच्' इति वृद्धिपदेन सूत्रकृतो मङ्गलम् 'सिद्धे शब्दार्थसम्बन्धे' इति सिद्धशब्देन च वार्तिककृतो मङ्गलम् इति व्याचक्षाणः पतञ्जलिः स्वयं महाभाष्यस्यारम्भे मङ्गलं न कुर्यादिति नैतदुपपद्यते। तस्मात् 'अथ शब्दानुशासनम्' इत्यथशब्देन तेन मङ्गलं कृतम्, इत्येव सम्यगाभाति। व्याख्यातं च प्रधानव्याख्यात्रा कैयटेन 'भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात् प्रयोजनमाह 'अथ शब्दानुशासनमि'ति। प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद् वक्ष्यन्ते' इति। एतेनोभयमपि भाष्यकारवाक्यमिति कैयटमतं स्फुटीभवति। यादृशी च भाष्यकारस्य शैली, यद् वार्तिकमुल्लिख्य तदनु तद्वाक्यानुवादेन 'कर्तव्य' 'वक्तव्यम्' इत्यादि वदति, तथा 'रक्षोहागमलघ्वसन्देहा' इत्यत्र न दृश्यते इत्येतदपि तस्य वार्तिकत्वाभावे बीजम्। यत्तु-मीमांसकविरुदभाजा श्रीयुधिष्ठिरमहाशयेन, संस्कृत-व्याकरणेतिहासे प्रोक्तम्-आदिशब्दो भाष्यकारस्य न सर्वादिबोधकः, अपि तु किञ्चित् परतोऽपि विद्यमाने मध्यगेऽप्यादिशब्दः प्रयुज्यते। एवमेवान्त्यशब्दः मध्यगशब्दश्चापि तस्य व्यभिचारी। तत्र निदर्शनं च 'भूवादयो धातवः' इति सूत्रे 'भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते' इति वार्तिकं तद्भाष्यं च। 'भूवादयः' इति सूत्रं हि नाद्यं नान्तिमं न वा मध्यगम, प्रथमाध्यायस्य तृतीयपादादौ वर्तमानत्वात्। तत्रापि च वशब्दः मङ्गलार्थत्वेनोक्तः तत्समर्थनञ्च 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते' इत्यादिरीत्यैव कृतम्। तस्मात् तस्यादित्वं मध्यगत्वं वा भाष्यकारेणाभ्युपगतम्। तेनैव सिद्धमिदं यदादिशब्दो मध्यगशब्दो वा सर्वादिभूते सर्वमध्यगे वा प्रयुज्येतेति नैष नियमः। ततश्च 'अथ शब्दानुशासनमि त्यस्य सूत्रत्वाभ्युपगमेऽपि 'वृद्धिरादैच्' इति वृद्धिशब्दस्य मङ्गलार्थता न विरुद्ध्यते। 'रक्षोहागमे'त्यस्य वार्तिकत्वेऽपि च 'सिद्धे शब्दार्थसम्बन्धे' इति सिद्धशब्दस्यापि मङ्गलार्थता युज्यते एव। तदिदमितिहासमीमांसकस्य वचनं बालानामप्युपहासाय भवेत्। 'सति हि परस्मिन् यस्मात् पूर्वो नास्ति स आदिः, सति च पूर्वस्मिन् यस्मात् परो नास्ति सोऽन्त्यः' इति स्वयमेव भाष्यकृता आद्यन्तयोर्लक्षणं कृतम्। तच्च स्वकीयं लक्षणं स्वयमेव स न मन्यते-इत्यहो तस्याज्ञता समर्थिता। 'भूवादयः' इत्यत्र यद् वशब्दस्य मङ्गलार्थत्वमुक्तम्, तस्य तु धातुपाठमङ्गलार्थत्वं प्रतीयते। सर्वो हि धातुपाठो 'भूवादयो धातवः' इति सूत्रेण संगृहीतः, ततश्च संग्राहके सूत्रे कृतं मङ्गलं धातुपाठस्यैव मङ्गलं संवृत्तमिति तदभिप्रायः। सम्भवेच्च मध्यगशब्दस्य व्यभिचारित्वमपि, आद्यन्तौ विहाय सर्वेऽपि मध्यगा वक्तुं शक्यन्ते। आद्यन्तशब्दौ तु व्यवहारे शास्त्रे च नियतौ न व्यतिक्रममर्हतः। 'वृद्धिरादैजि'ति सूत्रे हि 'एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्, माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते' इति स्पष्टमादिशब्दो भाष्यकृतोपात्तः। नैवं 'भूवादयो धातवः' इति सूत्रे आदिशब्दोपादानं दृश्यते। एवमेव सिद्धशब्दविषयेऽपि 'महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते' इत्यादिशब्दप्रयोगो दृश्यते। तस्मात् 'वृद्धिरादैजि'त्यतः प्राक् सूत्रकल्पना 'सिद्धे शब्दार्थसम्बन्धे' इत्यतः प्राग् वार्तिककल्पना च न कथमपि प्रामाणिकी भवितुमर्हति। यैर्ग्रन्थकृद्भिस्तथोल्लिखितं तद्भ्रमात्प्रमादाद्वेत्येव मन्तव्यं स्यात्। भाष्यकृतस्तुलनाया तेषां प्रामाण्याभावात्। अद्यावधि सर्वेषु पुस्तकेषु व्यवह्रियमाणेषु अध्यायाद्यङ्केषु प्राथम्यमेव 'वृद्धिरादैच्' सूत्रस्य दृश्यत इति 'अथ शब्दानुशासनमि'त्यस्य सूत्रत्वकल्पना सर्वप्रामाणिकविरुद्धेत्यास्तां तावत्। तस्माद् भाष्यकृतः किं स्वकीयं वाक्यं किं वा वार्तिककृतो वार्तिकम् इति निर्णयो दुःशक एवापतितः। भाष्यकारशैलीमेवावधानेन परीक्ष्य कथंचित् निर्णीयत एवाऽभियुक्तैः। सिद्धान्तकौमुद्यादिषु तु बहुत्र वार्तिकानि स्वरूपान्तरतामिव प्रापितानि दृश्यन्ते। केवलमर्थसम्बन्ध एव तत्रानुसृतः। भवतु नाम, वार्तिकपाठस्य प्रामाणिकस्योद्धारोऽन्वेषकाणां कर्तव्येषु मुख्यतया तिष्ठतीति अवश्यमवधेयम्।

इदं तु असंदिग्धमेव, यदद्यत्वे पाणिनीयस्य व्याकरणस्य यादृशी प्रतिष्ठा दृश्यते, यथा च शास्त्रेषु व्याकरणस्य मुख्यं स्थानं गण्यते, सोऽयं सर्वोऽपि कात्यायनस्य, भाष्यकृतः पतञ्जलेश्च प्रभावः। महाभाष्यं न केवलं व्याकरणनिबन्धः, अपि तु सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने स्थानेऽत्र सपरिकरं विवेचितानि। लौकिका व्यवहाराः, प्राक्तना इतिहासाः, आवश्यका धर्माः, दर्शनानां सिद्धान्ताः, गूढतमानि विज्ञानानि चेति सर्वमेतन्महाभाष्ये कृतपरिश्रमैस्सम्यक् परिचेतुं शक्यते। एतद्विधया विवेचनयैव संस्कृतस्य व्याकरणदास्त्रमियती प्रतिष्ठां गतम्। न च पतञ्जलेरिव सरलगम्भीरा प्राञ्जलतमा भाषाऽपि कस्याप्यन्यस्य ग्रन्थकृतो भारते विधिना निवेशिता। तस्मान्महाभाष्यमिदमलौकिकं वस्तु संस्कृतवाङ्मयमन्दिरस्य सुवर्णकलशायमानमित्यत्र न सन्देहः। आश्चर्यं विद् यश्च समयो भाष्यकारस्य निर्णीयते स आधुनिकस्य भौतिकविज्ञानस्य न तादृशः प्रचारसमयः शक्यते निर्धारयितुम्। भारतीयं वैदिकं विज्ञानं तदात्वे विलुप्तप्रायमेव सम्भाव्यते, तथापि विज्ञानस्यापि गूढतमाः सिद्धान्ता महाभाष्ये तत्र तत्र प्राप्यन्ते। यथा 'स्थानेऽन्तरतम.' इति सूत्रे 'अचेतनेष्वपि-लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग् गच्छति, नोर्ध्वमारोहति, पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः। तथा या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः, स धूम आकाशे निवाते नैव तिर्यग् गच्छति, नार्वागवरोहति, अब्विकारोऽप एव गच्छत्यान्तर्यतः। तथा ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितो नैव तिर्यग् गच्छति, नार्वागवरोहति, ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः इति। इह हि सजातीयाकर्षणसिद्धान्तः स्पष्टतया कियद्विदर्शित इति वैज्ञानिका विद्वांस एवात्र प्रमाणम्। यमाकर्षणसिद्धान्तं न्यूटनमहाशयेनाविष्कृतं पाश्चात्त्या मन्यन्ते, स भारते यीशुख्रिष्टतोऽपि पूर्वं विस्पष्टं प्रचलित आसीदिति नाल्पं गौरवं भारतस्य। अनन्तरं सिद्धान्तोऽयम्—

'आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत्पततीव भाति समे समन्तात् क्व पतत्वियं खे।' (सिद्धान्तशिरोमणौ)

इत्यादिना भास्कराचार्यप्रभृतिभिः स्वशब्दैरेव स्पष्टीकृत इत्यन्यदेतत्।

एवमन्यत्रापि तत्र तत्र द्रष्टव्यम्। शब्दविज्ञानन्तु पदे पदे महाभाष्ये जागर्त्येव। अनेकत्र तु भाष्यकृता निरूपितं विज्ञानं व्याख्याकृद्भिरपि न बुद्धम्। तेन च भाष्यकारस्याशय एव तैर्गर्ते पातितः। तत्र निदर्शनं 'स्त्रियाम्' इत्यधिकारसूत्रस्थं भाष्यम्—

संस्कृतभाषायामचेतनबोधका खट्वा-वृक्षादिशब्दा अपि तत्तल्लिङ्गभाजोऽभ्युपगम्यन्ते। तत्र वैज्ञानिकहेतुमुपदर्शयन् महाभाष्यकारो भगवान् पतञ्जलिः—

संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः।
संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान्॥

इति वार्तिकं व्याचक्षाण आह 'अधिकरणसाधना लोके स्त्री, स्त्यायत्यस्यां गर्भ इति, कर्तृसाधनश्च पुमान् सूते पुमानिति। इह पुनरुभयं भावसाधनम्—संस्त्यानं स्त्री प्रवृत्तिश्च पुमान्, कस्य पुनः संस्त्यानं स्त्री प्रवृत्तिर्वा पुमान्। गुणानाम्। केषाम्, शब्द-स्पर्श-रूप रस-गन्धानाम्। सर्वाश्च पुनः मूर्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः शब्दस्पर्शरूपरसगन्धवत्यः। यत्राल्पीयांसो गुणास्तत्रावरतस्त्रयः शब्दः स्पर्शो रूपमिति, रसगन्धौ न सर्वत्र। प्रवृत्तिः खल्वपि नित्या, न हीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते, वर्द्धते वा यावदनेन वर्द्धितव्यम्, अपायेन वा युज्यते, तच्चोभयं सर्वत्र, यद्युभयं सर्वत्र, कुतो व्यवस्था, विवक्षातः। संस्त्यानविवक्षायां स्त्री, प्रसवविवक्षायां पुमान्, उभयविवक्षाया नपुंसकम्' इति। अस्याभिप्रायः स्फुट एव—यत् सर्वत्र यज्ञप्रक्रियाविधया आदानप्रदाने प्रवर्त्तेते। सर्वमपि पदार्थजातं दृश्यमानं न कदाप्येकरूपम्, परिवर्तमानमेव विदं सर्वमुपलभ्यते। परिवर्तमानमपि च नैकान्तेन सत्तां जहाति। तदिदं सर्वं यज्ञकृतम्। स्वीयानां भावानामन्यत्रार्पणम्, अन्यतश्च भावानामादानमित्येषमादानप्रदानप्रक्रिया यज्ञः। यथा प्रदीपः प्रकाशं सर्वत्रार्पयति, तैलावयवांश्चाजस्रमादत्ते, मलं बलं च सर्वत्र प्रयोजयति। तथैव वृक्षा अपि मूलाज्जलमाददते, प्रसूनफलादिकं च ददति वाय्वादिष्वपि च स्वप्रभावमर्पयन्ति। इष्टका-प्रस्तरादिष्वत्यन्तजडेष्वपि प्रक्रियेयं सर्वत्र प्रवर्त्तते। तत एव नवस्य पुराणत्वं सर्वत्रैव जायते इति विभाव्यम्। सोऽयमादानप्रदानापरपर्यायोऽन्नान्नादभावः। तत्रादानविवक्षायां स्त्रीलिङ्गशब्दस्तत्र प्रवर्तते, प्रदानविवक्षायां पुँल्लिङ्गशब्दः, ताटस्थ्यविवक्षया तु नपुंसकलिङ्गशब्द इति। परं कैयटमहाभागो यज्ञप्रक्रियामिमामनभिलक्ष्यैव शब्दस्पर्शादिरूपेण स्वकृतमपि भाष्यकृतो विवरणं गौणं मत्वा गुणशब्दस्य सांख्यप्रसिद्धं सत्त्वाद्यर्थमुपगम्य तदुपचयापचयौ च काल्पनिकौ मत्वा सर्वां वैज्ञानिकप्रक्रियां निरोद्धाति। नागेशभट्टाद्याश्च तदेवानुसरन्ति। विज्ञानप्रक्रियाया देशे विलोप एवात्रापराध्यतीति न विस्मर्तव्यम्। एवमेव 'उच्चैरुदात्तः' इति सूत्रेऽपि शब्दोत्पत्तिप्रक्रिया या वैज्ञानिकी महाभाष्यकृतोक्ता, सा व्याख्याकृद्भिरन्यथैव नीता। उच्चैस्त्वं नीचैस्त्वं चेदमव्यवस्थितम्, यदेव एकस्य कृते उच्चैस्तदेवापरस्य कृते नीचैर्भवतीत्याशङ्क्य गात्रायामदारुण्यादिना क्रियमाणामपि व्यवस्थामनवस्थितां निरूप्य 'सिद्धन्तु समानप्रक्रमवचनात्, सिद्धमेतत्, कथम्—समाने प्रक्रम इति वक्तव्यम्। क पुनः प्रक्रमः, उरः कण्ठः शिर इति' इत्येवं मुख्यं समाधानमुक्तम्। वर्णानां हि द्विविधानि स्थानानि पाणिनीयशिक्षादौ दर्शितानि, सवनस्थानानि, आस्यान्तर्गतस्थानानि च। बुद्ध्यार्थान् समर्थ्यात्मना प्रेरितेन मनसाऽभिहतः कायाग्निर्यदा शारीरं मारुतं प्रेरयति, तदा स वायुः उरसि, कण्ठे, शिरसि वा मनोऽभिप्रायानुकूलमेव कञ्चित्प्रक्रमं करोति, तान्येतानि त्रीणि सवनस्थानानि शिक्षायामारम्भ एव स्पष्टीकृतानि—

मरुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।
प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम्॥ ७॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम्॥ ८॥

एवं त्रिषु प्रक्रमेषु क्रमेण मन्द्रमध्यमताराः स्वरा भवन्तीति प्रतिपाद्य अनन्तरम्—

'सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णान् जनयते'

इति आस्यस्थानेषु वर्णोत्पत्तिरुक्ता। उरसि कण्ठे शिरसि वा क्वचिद्वक्तुरभिप्रायानुसारेण केन्द्रं प्रकल्प्य पुनर्वायुस्तस्मात्केन्द्रादुत्थाय मूर्धपर्यन्तं गच्छति, तत्राभिघातमासाद्य मुखे आस्यस्थतत्तत्स्थानसम्बन्धेन वर्णान् जनयतीति स्फुटोऽभिप्राय। आस्यगतस्थानेष्वपि 'अष्टौ स्थानानि वर्णानाम्' इत्यादिना उरः कण्ठशिरांसि स्थानानि शिक्षायामुक्तानि, तान्येतानि सवनस्थानेभ्यः पृथग्भूतानि, अत्रैव हि कण्ठाच्चोर्ध्वस्तनो भाग 'उर' इत्युक्त, दन्तानां मूर्धा च शिर इति। तत्र ह्म, ह्व, इत्यादिषु हकारस्य उरःस्थानमुक्तम्—केवलस्य तु हकारस्य कण्ठ्यत्वमित्यादि सर्वं तत्रालोच्यम्। सवनस्थानानां च स्पष्टीकरणमग्रेऽपि शिक्षायाम्-

प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन।

मध्यन्दिने कण्ठगतेन चैव चक्राह्वसङ्कूजितसन्निभेन ॥

तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्।

मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥

प्रत्यक्षमनुभवसिद्धं चेदम्—स्वसामर्थ्यानुसारं कदाचित्कश्चिदुच्चैर्वदति, कदाचिन्नीचै, कदाचिच्च समेन स्वरेण इति। सोऽयं भेद सवनस्थानकृत एव। तान्येतानि सवनस्थानान्येव प्रक्रमशब्देनोक्तानि भाष्यकारेण उच्चैस्त्वनीचैस्त्वयोरव्यवस्थायाः समाधानं कृतम्, यद्यथाविधो यस्योपक्रम, तत्र यदुच्चैस्तदुदात्तमिति विज्ञातव्यम्—कामं तदन्यापेक्षया नीचैर्भवतु, न तेनास्माकं प्रयोजनमिति। परं कैयटमहाशय सवनस्थानानामास्यस्थानानां च भेदमविचार्यैव भाष्ये स्पष्टमुक्तम् 'उरः कण्ठः शिरः' इति स्थानत्रयमष्टानामपि स्थानानामुपलक्षणं मत्वा तत्र च प्रत्येकं स्थानेषु काल्पनिकमनुभवविरुद्धं बिन्दुत्रयमुरीचकारेत्येकदेशिता नापराध्यति। एवं महाभाष्यस्य गूढा आशया व्याख्यातृता कृपया अन्यथैव नीता इति निदर्शनमात्रमिदम्, सम्यगालोचने बहुत्रैव प्रतीयेत।

इदं तूपकारभारं महाभाष्यस्य कैयटमहाभागस्य नैव विस्मर्तव्यम्—यद् बहुत्र महाभाष्यं तद्व्याख्ययैवाद्यास्माद्दशैर्बुध्यते, यदि नाभविष्यत् कैयटकृतं व्याख्यानम्, तर्हि दुरवबोधमेव महाभाष्यं बहुत्राभविष्यदिति। यद्यप्यन्या अपि व्याख्या महाभाष्यस्य बह्व्य सन्तीति श्रीयुधिष्ठिरमीमांसकमहाशयेन संस्कृतव्याकरणशास्त्रस्येतिहासे स्फुटीकृतम्, हरिवृद्धं सेतुं तु कैयटः स्वयमाप्तत्वेन स्मरति, तथापि ता अनुपलब्धा अप्रचलिता वा, प्रसिद्धं प्रामाणिकं व्याख्यानं तु कैयटस्यैव भाष्यप्रदीपाख्यमेव। हरिर्वैयाकरणमूर्धन्य इत्यत्र न सन्देह, तदीयाद्वाक्यपदीयग्रन्थात्तथावगतेः, तन्त्रशास्त्रेष्वपि च तन्मतस्य मान्यताप्रसिद्धेः, परं तद्व्याख्याया क्रियाश्चिदेवांशो जर्मनपुस्तकालये प्राप्योऽस्ति। ततश्च तत्प्रतिलिपिं पञ्जाबविश्वविद्यालयेनापि आनाय्य स्वकीये पुस्तकालये रक्षिता तत कैश्चिद्विद्वद्भिरपि प्रतिलिपि कृता। प्रचारस्तु तस्या अद्यावधि नास्ति। स्वल्पपरिमाणैव च सा लब्धा इति भाष्यार्थावबोधकृते कैयट एवाद्यावधि शरणम्। अस्य च कालं दशमी एकादशी वा शताब्दी ऐतिहासिकैर्मन्यते।

कैयटकृतस्य भाष्यप्रदीपस्यापि कतिचिद्व्याख्यानानि सन्ति, परं तेषु प्रसिद्धो नागेशकृतो 'भाष्यप्रदीपोद्द्योत' विवरणापरनामा। तस्यापि च व्याख्या छायानाम्नी श्रीवैद्यनाथपायगुण्डनिर्मिता सुप्रसिद्धा। सा विस्तृतेति छात्राणां तत्रोत्साहाल्पता समभिलक्ष्य श्रीजयकृष्णदासगुप्तमहोदयेन व्याकरण-न्याय-वेदान्ताचार्यं श्रीरुद्रधरझामहोदयं प्रोत्साह्य 'तत्त्वालोक' नाम्नी अभिनवा व्याख्या निर्मापिता। अयमपि तत्त्वालोक प्रथमाह्निके सुविस्तृत, तत्र भाष्यस्य प्रदीपस्यापि च प्रतीकान्युपादाय विशेषेण विवरणं कृतम्। द्वितीयाह्निकात्तु क्रमेण सङ्क्षेप। तृतीयादौ च सोऽयं सङ्क्षेप औचित्यमेव प्राप्त, यादृशं कालेऽस्मिन्नपेक्ष्यते। झामहोदयेन पाण्डित्यपूर्णं विवरणं कृतमिति यत्र न संशय, परं तस्य प्रथम एवायं ग्रन्थविरचनसम्पादनाऽध्यवसाय इति क्वचित् क्वचित् त्रुटि प्रतीयते। शोधनेऽपि क्वचिदनवधानं लक्ष्यते। तथापि पुस्तकस्योपयोगितायाः अग्रे तदेतत्सर्वमगण्यम्, वारान्तरे च मुद्रणे त्रुटीनामासां निराकरणं सम्भाव्यत एव। अनेनाभिनवेन तत्त्वालोकेन सम्यगुपकृता स्युर्विद्यार्थिन इत्याशंसे इह सम्भावये। धन्यवादैश्च तत्त्वालोकनिर्मातारं पण्डितमहाशयं संस्कृतरत्नभाण्डागारस्य परिपूर्तयेऽभिवृद्धये च परम्पराऽनुक्रमेण सततं बद्धपरिकरं चौखम्बा-बनारस-काशी-हरिदासाद्यनेकसुप्रसिद्धग्रन्थमालाप्रकाशकश्रेष्ठिवरगोलोकवासिश्री-हरिदासगुप्तात्मजश्रीजयकृष्णदासगुप्तमहाशयं च सादरमभिनन्दयामीति।

दीपावली
वि० सं० २०११

विदुषां वशंवदो—
गिरिधरशर्मा चतुर्वेदः

सम्मतिपत्रम्

कवितार्किकचक्रवर्ती पण्डितश्रीमहादेवशास्त्री पाण्डेयः

[काशीहिन्दूविश्वविद्यालयीयसंस्कृतमहाविद्यालयाध्यक्षः]

श्रीरुद्रधरझाशर्मणा विनिर्मिता, क्वचिदतिसरलस्य क्वचिच्चातिकुटिलस्यात एवाम्नानं नागराजकृतिं मन्यापयतो वैयाकरणधुरीणैरनवरतं सश्रद्धं समुपास्यमानस्य महाभाष्यस्य व्याख्या तत्त्वालोकनाम्ना समवतीर्णा मया न्यभालि । यत्र-भाष्यस्य, प्रदीपस्य, उद्योतस्य च निगूढमैदम्पर्यं सम्यक् पर्यालोचितं, पूर्वं कृतं व्याख्यानञ्च स्थाने स्थाने चिन्तितम् । विभूष्यवैदुष्यसमलङ्कृतैषा गभीरतरं व्याकरणान्तरं प्रविविक्षूणामवश्यं चमत्करिष्यति, अध्यापयतामपि साहाय्यं कौतूहलञ्च संवर्द्धयिष्यति, परीक्षार्थिनाञ्च श्रेयसे जागरिष्यतीति विद्वद्भिराद्रियमाणा, सम्मान्यमानाधिकारिभिरेषा भूयो भूयः प्रशास्यते ।

पण्डितश्रीसभापतिशर्मोपाध्यायः एम. एल. सी पदविभूषितः

काशिक-बिरलासंस्कृतमहाविद्यालयाध्यक्षः

[उत्तरप्रदेश-विधानपरिषदः सदस्यः]

श्रीजयकृष्णदासहरिदासगुप्तकाशीसंस्कृतसीरिजग्रन्थमालायामैषमः (२०११ वैक्रमे) प्रकाशितं प्रदीपोद्द्योतगम्भीर-टीकोपेतं नवमाह्निकपर्यन्तं पातञ्जलमहाभाष्यं तत्रत्यगूढार्थप्रदर्शनप्रसन्नपराया नूतनायास्तत्त्वालोकव्याख्याया सहयोगेन विदुषां छात्राणाञ्च सन्तोषं जनयेदिति मन्यते ।

पण्डितश्रीगणपतिशास्त्री मोकाटे

[भूतपूर्व-काशिकराजकीयसंस्कृतकालेजप्रधानाध्यापकः]

भाष्यप्रदीपोद्द्योतेषु व्याख्यानभूतस्तत्त्वालोक आपाततो मया सकलोऽवलोकितः तत्राथ विशेष-अवतरणमुखेन तत्तत्पदानामर्थाभिलापनेन च पङ्क्तिलापनं समीचीनमिति छात्राणां कृते दुरूहोऽप्यर्थो झटिति हृदयङ्गमो भविष्यतीति । अपरञ्च विशेषः-तत्रेति तदिति तेनेति तच्छब्दार्थप्रदर्शनेन तत्त्वालोक इति नामापि सार्थकमभूदिति, अतो विशेषतो व्याख्याकारमभिनन्दयाम्यहमिति ।

पण्डितश्रीगोपालशास्त्री नेने

[भूतपूर्व-काशिकराजकीयसंस्कृतकालेजाध्यापकः]

इदं खलु पतञ्जलिप्रणीतव्याकरणमहाभाष्यस्य नवीनं संस्करणं नवमाह्निकान्तमापाततो दृष्टिपथमागतम् । अस्मिन् संस्करणे कैयटकृतप्रदीपं महाभाष्यव्याख्यानभूतं तद्विवरणं श्रीमन्नागोजीभट्टकृतोद्द्योताभिधञ्च सन्निवेश्य यत्र तत्र महाभाष्यप्रदीपोद्द्योतग्रन्थान् तदसाधारणव्याख्यानात्मकेन तत्त्वालोकेन सनाथीकृत्यास्य संस्करणस्य सर्वाङ्गीणसौन्दर्यमापादितं श्रीमता नवीनविदुषा झोपाख्येन सुगृहीतनामधेयेन रुद्रधरेणेति । एतन्मुद्रणं नवीन-सुन्दरसीसकाक्षरैश्चिक्कणकर्गलेषु प्रवीणाक्षरयोजकद्वाराऽनुरूपाकारं सुमहता प्रयत्नेन सम्पाद्य मुद्रणयन्त्रालयाध्यक्षैः श्रीजयकृष्णदासमहोदयैरल्पतरेण मूल्येन विद्यार्थिजनसुलभतामासादितमिति मन्येऽहमनेन नवीनेन संस्करणेन महानुपकारः संस्कृतविदुषां संस्कृतच्छात्राणाञ्च भवेदिति ।

निवेदनम्

अयि सुरसरस्वतीप्रेयांसः श्रेयांसो विद्वांसोऽन्तेवासिनश्च ?

विदितमेवैतत्तत्रभवतां भवतां यद् दृश्यमाने नामरूपात्मके जगति शब्दमन्तराऽर्थस्य व्यवहारप्रयोजकं ज्ञानमपि नोदेति। उक्तञ्च—'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥' इति। तत्रापि शब्दान्तरजनकत्वात्, लौकिकालौकिकसकलविषयप्रतिपादकत्वाच्च संस्कृतशब्दस्य महत्त्वं प्राचीनैरर्वाचीनैश्च सर्वैर्विद्वद्भिरनुमन्यत एवेति नाप्रकाशितं केषामपि शिक्षितानाम् ।

यदा कस्यापि शब्दराशेः सौविध्येन ज्ञानं व्याकरणमन्तरा न भवति, तदा—'सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः—एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं नवधाऽथर्वणो वेदः, वाकोवाक्यम्, इतिहासः, पुराणं, वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः' इति, 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगामे'ति च महाभाष्येण यस्य संस्कृतशब्दराशेर्महाप्रयोगविषयत्वमपरिमितत्वञ्च प्रत्यपादि, तस्य सौविध्येन ज्ञानं व्याकरणमन्तरा न सम्भवतीति किमु वक्तव्यम्।

यद्यप्यस्य संस्कृतशब्दराशेरनायासेन ज्ञानाय नवविधं व्याकरणमस्ति—'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥' इति श्रीतत्त्वनिधावुक्ते, 'सोऽयं नवव्याकरणार्थवेत्ता' इति श्रीवाल्मीकीयरामायणे उक्तेश्च । तथापि लौकिकालौकिकसकलशब्दव्युत्पादकत्वात्, समुपनिबद्धत्वात्, संक्षिप्तत्वाच्च पाणिनीयमेव व्याकरणं तेषु प्रधानमिति नाननुमतं केषामपि सदसद्विवेचकानाममरवाणीप्रणयिनाम् । उक्तञ्च—'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् ।' इति ।

यद्यपि पाणिनीयव्याकरणेऽपि बहवो ग्रन्था विराजन्ते, तथापि तेषु पाणिनिमुनिनिर्मिताया अष्टाध्याय्यास्तद्विवरणस्य पतञ्जलिमुनिप्रणीतस्य महाभाष्यस्य च प्राधान्ये न संशेरते केऽपि समालोचनपरायणाः सचेतसो विद्वांसः ।

यद्यपि महाभाष्यस्याप्यनेकाष्टीका समुपलभ्यन्ते, तथापि तासु कैयटोपाध्यायविरचितः प्रदीपो नागेशभट्टप्रणीतोद्द्योतेन क्रियद्विद्योतित इत्यत्र तत्प्रचार एव प्रमाणम् । किन्तु तयोरपि क्वचिद्विवरणीयानामप्यंशानामविवरणात्, क्वचिच्च काठिन्यात् कोमलमतीञ्छात्रान्, अतीक्ष्णबुद्धीनध्यापकांश्चाध्ययनाध्यापनयोः क्लेशमनुभवतोऽवलोकमानेन दयार्द्रहृदयेन निजप्रधानसम्पादकेन सहृदयेन प० श्रीरामचन्द्र झा व्याकरणाचार्यमहोदयेन प्रेरितैः काशीस्थचौखम्बासंस्कृतपुस्तकालयाध्यक्षैः संस्कृतभाषोपनिबद्धानामप्रचलितानामपि पुस्तकानाम्प्रकाशनेन संस्कृतानुरागिणा परमुपकारं कुर्वाणैर्गोलोकवासि-श्रेष्ठिप्रवर-श्रीहरिदासगुप्तात्मजैः श्रीजयकृष्णदासगुप्तमहोदयैः महाभाष्य-प्रदीपोद्द्योतानां टीकां निर्मातुं निवेदितेन मया छाया-विमला-शब्दकौस्तुभादि समीक्ष्य प्रणीतं प्रथमाह्निकस्य तत्त्वालोकं वीक्ष्य सन्देहनाय वाराणसेयवैयाकरणकेशरिभिराग्रहीतेन तथा निर्मितं द्वितीयाद्याह्निकानां तम्पश्यद्भिर्विद्वद्भिर्नाथर्वयकितैर्भूयतेत्याशासे ।

यदा संस्कृतव्याकरणानुरागिणः संस्करणमिदं समापयिष्यन्, तदा प्रस्तुतसंस्करणादपि सुन्दरं संस्करणान्तरं तेषाम्पुरस्तादुपास्यास्यदिति सुदृढो मे विश्वासः ।

यथाऽवधानं संशोधितेऽप्यत्र संस्करणे मनुजसुलभेन भ्रमेण जाताऽशुद्धिरवलोक्येत चेत्तर्हि तदपनोदनभारोऽपि विद्वद्भिरेव वहनीय इति सानुनयमभ्यर्थये ।

परमपूज्यपादाः कवितार्किकचक्रवर्तिमहानुभावप्रभृतयोऽत्र संस्करणे निजसम्मतिं प्रकाशयान्वगृह्णन्निति तेभ्यो भूमिकालेखकेभ्यो विश्वविख्यातवैदुष्येभ्यो महामहोपाध्यायमहोदयेभ्यश्च धन्यवादसन्ततिं सप्रणतिं वितरन्, तत्त्वालोकविषये—

न कश्चिदपि वञ्चितो जगति दोषलेशैर्विधिर्विधेरपि नरैः कृते किमकलङ्कविध्येषणा ।
गुणैककलनादराः परिहरन्ति दोषान् परं प्रकाशनपराः खलाः प्रकटयन्ति तानुत्सुकाः ॥

इति निवेदनमेव पर्याप्तं मन्ये ।

विजयादशमी
वि० सं० २०११

श्रीरुद्रधरशर्मणः



श्रीमत्पतञ्जलिमुनिविरचितं

महाभाष्यम्

प्रदीपोद्द्योततत्त्वालोकैर्विभूषितम्

प्रथमाध्याये प्रथमपादे प्रथममाह्निकम् ।

प्रदीपः—

सर्वाकारं निराकारं विश्वाध्यक्षमतीन्द्रियम् ।
सदसद्रूपतातीतमद्वयं माययावृतम् ॥ १ ॥

ज्ञानलोचनसंलक्ष्यं नारायणमजं विभुम् ।
प्रणम्य परमात्मानं सर्वविद्याविधायिनम् ॥ २ ॥

पुरुषाः प्रतिपद्यन्ते देवत्वं यदनुग्रहात् ।
सरस्वतीं च तां नत्वा सर्वविद्याधिदेवताम् ॥ ३ ॥

पदवाक्यप्रमाणानां पारं यातस्य धीमतः ।
गुरोर्महेश्वरस्यापि कृत्वा चरणवन्दनम् ॥ ४ ॥

महाभाष्यार्णवावारपारीणं विवृतिप्लवम् ।
यथागमं विधास्येऽहं **कैयटो** जैयटात्मजः ॥ ५ ॥

भाष्याब्धिः **क्वातिगम्भीरः** क्वाहं मन्दमतिस्ततः ।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ॥ ६ ॥

तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य प्राप्तास्मि पङ्गुवत् ॥ ७ ॥

उद्द्योतः—

नत्वा साम्बशिवं देवीं वागधिष्ठातृकां गुरून् ।
पाणिन्यादिमुनीन् वन्द्यान् पितरौ च **सतीशिवौ** ॥ १ ॥

नागेशभट्टो नागेशभाषितार्थविचक्षणः ।
हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः ॥ २ ॥

याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥ ३ ॥

नातिविस्तीर्णं न विस्तीर्णं मध्यानामपि बोधकृत् ।
भाष्यप्रदीपव्याख्यानं कुर्वेऽहं तु यथामति ॥ ४ ॥

भाष्यं व्याचिकीर्षुः शिष्टाचारप्राप्तं मङ्गलं शिष्यशिक्षायै निबध्नाति **सर्वेति** ॥ कृत्वान्तानां पञ्चमश्लोकोत्तरार्धेनान्वयः । **सर्वाकारत्वं** सर्वोपादानकारणत्वान्मृदादिवत् ॥ कार्यनिमित्तद्रव्यस्वरूपाभावाद् **निराकारत्वम्** ॥ कर्तृत्वाद् **विश्वाध्यक्षत्वम्** । **स ऐक्षते**ति श्रुतेः ॥ **अतीन्द्रियत्वं** निरतेन्द्रियत्वेन—**पश्यत्यचक्षुः** इत्यादिश्रुतेः ॥ सर्वप्रत्यक्षाकरणे तु स्वरूपचैतन्येनैव इन्द्रियाविषयत्वेन वानिन्द्रियत्वम् ॥ **तद्सद्रूपता** प्रपञ्चधर्मः । **एतच्च स्त्रियामिति** सूत्रे वक्ष्यते । तामतीतं तद्रहितमित्यर्थः । एव च सदैवेति भावः ॥ नन्वीदृशमस्माभिः कुतो न गृह्यत इत्यत आह—**अद्वयमित्यादि** ॥ **मायया वृतैरि**त्यस्य कल्पमाह—**ज्ञानेति** । **तत्त्वमस्या**दिमहावाक्यजनिताखण्डाद्वितीयसच्चिदानन्दब्रह्माकारा वृत्तिर्ज्ञानं तदेव लोचनं तेन सम्प्रेक्ष्यमित्यर्थः । **नारायणमित्यादि** । सर्वनरसमूहान्तर्यामिणमित्यर्थः ॥ **सर्वविद्या** वेदरूपा । तद्दायिनम् ॥ वक्ष्यमाणसन्दर्भविशेषरूपे ग्रन्थे समुचितत्वाद्वागधिदेवतां नमति—**पुरुषा इति** । **देवत्वं** पाण्डित्यम् ॥ सम्प्रदायशुद्धिं द्योतयन् गुरुं नमति—**पदेति** । व्याकरणमीमांसान्यायानामित्यर्थः ॥ **धीमतः** ऊहापोहकुशलस्य । **महाभाष्येति** । व्याख्यातृत्वेऽप्यस्येत्यादिकथनेनान्वाख्यातृत्वादितरभाष्यवैलक्षण्येन महत्त्वम् ॥ अवारपारयोर्भवम् । प्लूयतेऽनेनेति प्लवं सेतुम् ॥ **यथागमम्** । सम्प्रदायमनतिलङ्घ्येत्यर्थः ॥ औद्धत्यं परिहरति—**भाष्येति** । **मयूरव्यंसकादि**समासो रूपकं चेति बोध्यम् ॥ **पिशुनत्वं** दुष्टत्वम् ॥ नन्वेवं कथं प्रवृत्तिरत आह—**तथापीति** तत्त्वसारांश एवात्र निबद्ध इति भावः ॥ **शनैरि**त्यनेनात्यन्तग्रन्थसङ्कोचः । **पङ्गुवदि**त्यनेन व्याख्येयांशापरित्यागो व्याख्यानस्याविस्तृतत्वं च बोध्यते ॥

तत्त्वालोकः—

नवीननीरदश्यामं रामं राजीवलोचनम् ।
जानकीजानिमानौमि चिदानन्दमयं विभुम् ॥

प्रदीपे—अथ भाष्यं व्याचिख्यासुः कैयटः शिष्टाचारपरम्परानुमित“विघ्नध्वंसकामो मङ्गलमाचरेदि”ति वेदबोधिताभिमतसमयविधेयताकं “मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरि”ति वृद्धिसूत्रस्थमहाभाष्यादिस्मृतिसूचित-

सम्पादयता कश्च निजेष्टदेवादिनमनरूपं मङ्गलं प्रारिप्सितप्रकृतपरिसमाप्तिप्रत्यूहनिपरिपन्थिप्रत्यूहव्यूहविनाशाय विधाय व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय "शिष्या अप्येवं सम्पादयेयुरि"ति शिक्षणाय च प्रदीपे समुचितक्रमेण सर्वप्रथमं व्याख्यानादौ तावद् निबध्नाति— **सर्वाकारमिति—**सर्वे आकाराः (स्वरूपाणि) यस्येति, सर्वेषाम् आकारः (उपादानकारणम्) इति वा व्युत्पत्तिः । **निराकारमिति**-निर्गता आकारा यस्मादिति, आकारेभ्यो निष्क्रान्त इति वा विग्रहः । **विश्वाध्यक्षमिति**-विश्वस्य अध्यक्षः (सञ्चालकः) इति व्युत्पत्तिः । केचित्तु विश्वम् अध्यक्षं (प्रत्यक्षं) यस्येति विगृह्णन्ति तच्च, तथा सति योगिषु विश्वाध्यक्षत्वाप्रसक्तेः । तेषामपि योगजसन्निकर्षेण सकलविश्वप्रत्यक्षसत्त्वात् । परमात्मनो जगत्कारणत्वेऽपि न मायामादृश्यमिति सूचनायाह-**सदसद्रूपतेति ।** आरोपितसत्त्ववास्तविकासत्त्ववत्त्वेत्यर्थः । अनिर्वचनीयतेति फलितार्थः । सर्वेषां परमात्मा नादृश्य इति सूचनायाह-**माययावृतैरिति ।** अस्य पूर्वोक्तेनान्वयिता, तथा च चेतनस्वप्रकाशपरमात्मनो जन्तमोरूपमायाऽऽवृतत्वादेवादृश्यता, अत एव च मद्याकाराकारितान्तःकरणवृत्त्या (नयनेन) माया ऽवरणनाशपूर्वकं परमात्मनः साक्षात्करणीयताऽपि समुपपद्यते इति भावः । **नारायणमिति—**नाराः (नराणां समूहः) अयनं (स्थानं) यस्येति विग्रहः । **अजम्**-जन्मरहितम् । **ताम्**-प्रसिद्धाम् । **पारम्**-अशेषाशयम् । **यातस्य**-अवगन्तुः । **अपि** च । अभिधेयं प्रतिज्ञातुमाह-**महाभाष्येति ।** अवारञ्च पारञ्च अवारपारे, तयोर्भवं अवारपारीणं (राष्ट्रावारपाराद्घखाविति खप्रत्ययः) । महद् भाष्यम् महाभाष्यम्, तदेव अर्णवः (समुद्रः) महाभाष्यार्णवः, तस्य अवारपारीणं महाभाष्यार्णवावारपारीणं इति व्युत्पत्तिः । यथा रामस्य गुरुकुलमित्यत्र रामं विनैव तत्सम्बन्धिनो पि गुरौ कुलेन समासः, तथाऽत्र विहितं खप्रत्ययं विनैव तदन्वयिभ्यामपि अवारपाराभ्यां महाभाष्यार्णवस्य समासः । **विवृतिप्लवमिति**-विवृतिरेव प्लवः (सेतुः) इति व्युत्पत्तिः । उभयत्र रूपकं बोध्यम् ॥

भाष्येति-भाष्यमेव अब्धिरिति विग्रहः । **क्वेति**-भाष्यस्य मम च मध्ये महदन्तरमिति भावः । **ग्रन्थसेतुनेति**-ग्रन्थ एव सेतुरिति व्युत्पत्तिः ।

उद्योते--**नत्वेति ।** अहं नागेशभट्टः साम्बशिवादीन् नत्वा पातञ्जलभाष्यप्रदीपव्याख्यानं यथामति कुर्वे इत्यन्वयः । नमधात्वर्थः —स्वावधिकोत्कृष्टत्वप्रकारकज्ञानपूर्वकः कारशिरःसंयोगानुकूलव्यापारः । क्त्वार्थः उत्तरकालीनता । द्वितीयार्थो विषयिता । **वागधिष्ठानिकाम्**-वागधिष्ठात्रीं (सरस्वतीम्) **गुरून्**-गायत्र्यादिदीक्षागुरून् । अत्राभ्यर्हितमुनिनमनात्पूर्वं गुरुनतेरुक्ततया गुरुपदं जगद्गुरुपरं सद् मुनिविशेषणमिति व्याख्यानं न युक्तम्, "नास्ति तत्त्वं गुरोः परमि"ति वचनेन सर्वतो गुरूणामभ्यर्हितत्वबोधनात् । **पितरौ**-मातापितरौ । **च** सकलपूज्यसमुच्चयार्थः । स्वात्मेस्वनामाप्याह-**नागेशेति ।** नन्वेवं तस्य दोषः, "आत्मनाम गुरोर्नाम नामातिकृपणस्य च । श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥" इति स्मृते सत्त्वादिति चेन्न, तत्र न गृह्णीयादित्यस्य नोच्चारयेदित्यर्थेन तेषां लेखने दोषाभावात् ॥ भाष्यप्रदीपव्याख्यानसम्प्रदायोग्यतासूचनायाह-**नागेशभापितेति ।** पतञ्जलिभाषितभाष्यादावयविशिष्ट इत्यर्थः । कृतता प्रकारान्तरेणाह-**हरिदीक्षितेति ।** सिद्धान्तार्थप्रतिपादनोपयोगिबुद्धिस्थैर्यबोधनायाह-**याचकानामिति ।** पद्येनानेन रामसिंहवर्मणि क्रमशो दानवीरता युद्धवीरता तदुभयसाधिका वृत्तिश्च स्तुता ... निरूपितेति ... यनासूचनायाह-**नातिविस्तीर्णमिति ।** अभिधेयं प्रतिजानीते-**भाष्यप्रदीपेति ।** भाष्यञ्च प्रदीपश्च भाष्यप्रदीपौ, तयोः व्याख्यानमिति व्युत्पत्तिः । तेन प्राचीनव्याख्यातृविलक्षणता सूचिता । अभिधेयविषयकाज्ञानसंशयानुकरणादीनां निरासायाह-**यथामतीति ।**

क्त्वान्तानां-प्रणम्येत्यादिक्त्वान्तपदार्थानाम् । अत्र नम इत्युक्त्यैव निर्वाहे सत्यपि स्वेष्टदेवादिनमनस्य कार्याव्यवहितपूर्वकालवृत्त्यविधेयत्वसूचनाय क्त्वाप्रत्ययोक्तिः । **उत्तरार्द्धेनेति-**"यथागमं विधास्येऽहमि"ति पञ्चमश्लोकोत्तरार्द्धवाक्यार्थघटकप्रधानविधानक्रियेत्यर्थः । अविरोधाय मतान्तरमुपेक्ष्य वास्तवाद्वैतमतेनाह-**सर्वोपादानेति ।** "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ती"ति श्रुत्या परमात्मनः सर्वविवर्त्तोपादानकारणत्वादित्यर्थः । **मृदादिवदिति**-यथा स्वपरिणामत्वात् स्वस्वरूपभूतानां घटादीनामुपादानकारणानि मृदादयः, तथा स्वविवर्त्तत्वात् स्वस्वरूपभूतानां घटादीनामुपादानकारणं परमात्मेति भावः । परमात्मनो घटादिकार्यातिरिक्तस्य ... सत्त्वादाह-**दृश्येति ।** बहिरिन्द्रियबोध्येत्यर्थः । अत्रापि मृदादिवदिति दृष्टान्तः सम्बध्यते, किन्तूपपद्यते वैधर्म्येण, तथा हि—यथा मृदादीनां घटादिकार्यातिरिक्तं बहिरिन्द्रियगोचरं स्वरूपं वर्त्तते, तथा परमात्मनो घटादिकार्यातिरिक्तं बहिरिन्द्रियवेद्यं स्वरूपं नास्तीति भावः । **कर्तृत्वादिति**-विश्वस्येत्यादि । **ऐक्षतेतीति**-विश्वरचनाय तदीक्षणमकरोत्परमात्मेत्यर्थः । इन्द्रियाविषयत्वेनादृश्यत्वस्योपपिपादयिषितया अतीन्द्रियत्वोपपादनाय प्रकारान्तरमाह-**विगतेन्द्रियत्वेनेति ।** **अचक्षु** -चक्षुरिन्द्रियरहितः । नन्वेवं "स ऐक्षते"ति श्रुतिविरोध इत्यत आह-**सर्वप्रत्यक्षीति ।** परमात्मा स्वरूपचैतन्येनैव विश्वं साक्षात्करोति न तु मादृशवदिन्द्रियेणेति भावः । "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे"ति श्रुत्यनुरोधेन विनिगमनाया अभावादाह-**इन्द्रियेति ।** तथा च नञो दुरर्थकत्वाद् दृशो ज्ञानार्थकत्वाच्च दुर्ज्ञेयत्वपरतया अदृश्यत्वमुपपाद्यमित्याशयः । संसारः स्वाधिष्ठानब्रह्मगतसत्त्वेन स्वस्मिन्नारोपितेन सन्निवाभाति, वस्तुतोऽसन्नेवेत्याशयेनाह-**प्रपञ्चेति ।** **तद्विधायिनम्**-यत्न विना वेदाविभावकम् । सकलेनेन्द्रादिसाधारणदेवत्वस्याप्रापणादाह-**पाण्डित्यमिति ।** **गुरुमिति**-अत्रैकवचनेन एकस्मादेव गुरोः विद्यालाभः सूचितः । व्याकरणादिशास्त्रार्थावगन्तृत्वादेव धीमत्त्वे सूचिते पुनरुक्तिपरिहाराय धीमत इति व्याचष्टे-**ऊहेति ।** **ऊह** -अज्ञातोपादेयांशस्फुरणम् । **अपोह**-ज्ञातहेयांशत्यागः ।

व्याख्यातृत्वेऽपीति-व्याख्यानभूतत्वेऽपीत्यर्थः । भाष्यस्य व्याख्यानकर्त्तृत्वाभावाद् यथाश्रुतानुपपत्त्या लक्षणाया (गौण्या वृत्त्या) आश्रयणात् । एवम् 'अन्वाख्यातृ'वादि'त्यादावपि बोध्यम् । **अस्य**-प्रकृतभाष्यस्य । **इष्ट्यादीति**-आदिना उपसंख्यान-वाच्य-वक्तव्यादिग्रहः । **अन्वाख्यातृत्वात्**-पाणिनीयसूत्राविरुद्धविवरणत्वात् । **इति**-इति हेतौ । प्रकृते वेदानतिक्रमणकथनस्यानुपयोगित्वादाह-**सम्प्रदायमिति ।** अविच्छिन्नगुरुपरम्परामित्यर्थः ।

रूपकमिति-अस्य "विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यदि"ति लक्षणम् । अत्र प्रकृते उपमानोपमेययोरभेदेन कथनाद् रूपकम् । "पिशुनौ खलवृत्तावि"त्यमरकोशात् पिशुनशब्दस्य तदुभयवाचकत्वे पि सूचकत्वस्य प्रकृतानुपयोगित्वादाह-**दुष्टत्वमिति ।** **एवम्**-उपहासभयेन । **तत्रेति** -हरिनिबन्धेत्यर्थः । **अत्र**-प्रदीपे । **भाव** -सारांशः स्वास्य प्रतीयमान आशयः । **बोध्यते इति**-यथा पङ्गुः स्वपुरस्थितमेव प्राय समपन्थानं गृह्णन्नेव गम्यं गच्छति, तथाऽहं ... महाभाष्यं व्याख्यास्यामीति भावः

(शास्त्रारम्भप्रतिज्ञाभाष्यम्)

अथ शब्दानुशासनम् ॥

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ॥

(प्रदीपः) भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात्प्रयोजनमाह—**अथ शब्दानुशासनमिति ।** प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद्वक्ष्यति ॥ स्ववाक्यं व्याख्यातुं तदवयवमथशब्दं तावद् व्याचष्टे—**अथेत्ययमिति ।** इतिशब्दोऽथशब्दस्य स्वरूपावस्थापनाय प्रयुक्तः । एवं हि पदान्तरैः सामानाधिकरण्येन स्वरूपस्य सन्दर्शनं शब्दो व्याख्यातुं शक्यते । स्वरूपं वस्थितश्च सर्वनाम्ना परामृश्यते—**अयमिति । शब्द इति** स्वरूपकथनं विस्पष्टप्रतिपत्त्यर्थम् ॥ **अधिकारार्थ इति ।** अधिकारः प्रस्तावः प्रारम्भस्तस्य प्रयोजनमित्यर्थः । निपातानां च द्योतकत्वं वाक्यपदीये निर्णीतम् ॥ अथशब्दस्याधिकारार्थत्वे यो वाक्यार्थः सम्पद्यते तं दर्शयति—**शब्दानुशासनमिति ।** अनेकक्रियाविषयस्यापि शब्दानुशासनस्य प्रारभ्यमाणता अथशब्दसन्निधानेन प्रतीयते । व्याकरणस्य चेदमन्वर्थं नाम—शब्दानुशासनमिति । अत्र चाचार्यस्य कर्तुः प्रयोजनाभावादनुपादानादुभयप्राप्त्यभावात् **नोभयप्राप्तौ कर्मणीत्यनेन** षष्ठी, अपि तु **कर्तृकर्मणोः कृतीत्यनेन** । **कर्मणि चेति** समासप्रतिषेधाप्रसङ्गादिध्मप्रव्रश्चनादिवत्समासः ॥

(उद्द्योतः) यद्यपि पाणिनिना **"ब्राह्मणेन निष्कारणः"** इत्यादिश्रुत्या सर्वोपासनादावेव प्रत्यवायपरिहारार्थितयैवोक्ताधिकारिप्रवृत्तिर्भवत्, प्रयोजनं नोक्तम् । वार्तिककृतापि **'शास्त्रपूर्वके प्रयोगे धर्मः'** इत्यनेन मध्यमाधिकारिणि परमप्रयोजनं दर्शितम् । तथापि भगवान् विवरणकारत्वान्मन्दाधिकारिणां प्रवृत्तये प्रयोजनप्रयोजनप्रतिपत्तिप्रवणत्वाद्व्यवहितेषु स्वग्रन्थस्य पूर्वदिष्वनाश्वासात्साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं वदतीत्याह—**भाष्यकार इति ।** तत्र शब्दज्ञानरूपे प्रयोजने उक्ते विषयोऽप्युक्त एव । शास्त्रजन्यज्ञानविषयस्यैव शास्त्रविषयत्वादिति बोध्यम् । तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति अर्थादेव लभ्यम् ॥ नतु **कानि पुन**रित्यादिना प्रयोजनानि वक्ष्यति । तेन पौनरुक्त्यमत आह—**साक्षादिति ।** तदेवाह—**प्रयोजनप्रयोजनानीति । व्याख्यातुमित्यस्य** शब्दानुशासनमित्यादिनेति शेषः ॥ **तावत् प्रथमम् । व्याचष्टे इति ।** पदार्थज्ञानाधीनत्वाद्वाक्यार्थज्ञानस्य कत्वनिरासाय चेति शेषः । भाष्यत्वादेव च स्ववाक्यव्याख्यानमिति भावः । नन्विति विनाप्यथशब्दो निपातार्थ इत्येवोच्यतामत आह—**एवं हीति । पदान्तरैः** शब्दपदाधिकारार्थपदप्रयुज्यतइतिपदैः ॥ **व्याख्यातुमिति ।** अधिकारार्थत्वेनेति शेषः ॥ अथेतिशब्दोऽधिकारार्थ इत्युक्ते आनन्तर्याद्यर्थकत्वभ्रमणमिति प्राचेतोऽ**यमिति** भाष्ये । योऽयमस्मिन् वाक्ये स इत्यर्थः ॥ **विस्पष्टेति । नवेतीत्या**दौ शब्दतायां दर्शनेन तथा भ्रमं निवर्तयितुमित्यर्थः ॥ ननु निपातानां द्योतकत्वादभिधेयवाच्यार्थशब्दो नुपपन्नोऽत आह—**अधिकार इति ॥ प्रस्ताव इति ।** प्रारम्भ इत्यर्थः ॥ स चाथशब्दवाच्यायमानस्य । अर्थशब्दः प्रयोजनवाचीति भावः ॥ **निपातानां च द्योतकत्वमिति ।** निपातानां द्योतकत्वं चेत्यर्थः । उपसर्गनिरुक्तिनिपातानां द्योतकत्ववाचकत्वोभयस्तोकारस्याव्ययविभक्तीतिसूत्रभाष्ये स्पष्टत्वात् । उपसर्गाणां तु वाचकत्वमेवेति स्पष्टं **गतिर्गतौ**वेति सूत्रे भाष्ये इति तत्रैव निरूपयिष्यामः । अत एव मांगलिकः गुरुरित्यादि सङ्गच्छते । प्रारम्भक्रियाविषयत्वं तत्रापि अथशब्दस्य न्यायं नयमानदर्थ्या दिव मङ्गलत्वमप्युभयासेऽरयं प्रयुज्यत इति फलितम् ॥ परे त्वत्र वाचकत्वमेवेत्याहुः । अधिकृतमिति च तदर्थं वदन्ति ॥ भाष्ये **प्रयुज्यत** इत्यनेन वर्तमाननिर्देशेन सर्वदैवमिदमस्याधिकारार्थत्वं न तु वृद्धयादिवत्पारिभाषिकमिति ध्वनितम् । ननु विवरणे निकृतमित्यधिकृतपदाभावात् द्योतकत्वानुपपत्तिश्चेन्यत आह—**अनेकेति ।** उच्यते क्रियते क्रियते इति । **प्रतीयत इति ।** एतावतैव द्योतकत्वमिति भावः ॥ ननु भाष्यमाणस्यानुशासनस्य शास्त्रपदेन सामानाधिकरण्यमनुपपन्नमत आह—**व्याकरणस्य चेति ।** अन्वर्थत्वं प्रयोजनाभिधानोपपत्तिः । अनुशिष्यन्ते साधुशब्देभ्यो विविच्य ज्ञाप्यन्ते येनेति करणल्युडन्ततया शास्त्रपदेन सामानाधिकरण्यमिति भावः ॥ इदमेव ध्वनयितुं भाष्ये नामपदोपादानम् । नामनामिनोरभेदान्नाम शास्त्रमिति सामानाधिकरण्यम् ॥ अनेनैवास्य प्रधानाभिधेयत्वं सूचितं ध्वन्यता च ॥ **केषामिति** प्रश्नस्तु किं लौकिकमात्रविषयशास्त्रमयनादिशास्त्रमधिकृतम्, उत वैदिकमात्रविषयं प्रातिशाख्यम् इत्याति परे ॥ ननु **कर्मणि चेति** निषेधात्कथं कर्मषष्ठ्यन्तेन समास इत्यत आह—**अत्र चाचार्यस्येति ।** उभयोरप्राप्ते इत्युभयप्राप्तिरिति वर्तमाने इति सूत्रे भाष्ये स्पष्टम् ॥ **कर्तृकर्मणो**रिति षष्ठ्यामपि समासनिषेधः कुतो नेत्यत आह—**इध्मेति ।** चस्यैवार्थकतया कर्मणीत्युच्चार्य विहितषष्ठ्या एव समासनिषेध इति भावः ॥ भाष्ये **शास्त्र**मित्यस्य कर्तव्यत्वेनेति शेषः । विवरणकारत्वाद् व्याख्यानत्वेनेति शाप उचित इत्याये ॥ शास्त्रत्वं चास्य साधुत्वबोधकप्रयोजनसम्बद्धत्वाद्बोध्यम् ॥

(तत्त्वालोकः) भाष्ये-**अथ शब्देति**-अत्र प्रारभ्यमिति क्रियाविषयीभूतशब्दानुशासने कश्चित्क्रियामादायैव बोधस्य सम्पादनीयतया समानमित्यादिक्रियामध्याहृत्य शब्दानुशासनं समारब्धमित्यादिभ्रमस्य मासम्बोधनमादशब्दनिराकरणेऽपि निवृत्तिरित्यापत्तिरित्या । व्याख्येयभाष्यमभिधाय व्याख्यानभाष्यमाह-**अथेत्ययमिति ।** अत्र शब्दशब्दविशेषणत्वादिदम् पुल्लिङ्गता । ननु मङ्गलार्थतया अपि सम्भवात्कैवल्यम् अधिकारार्थ इति कथनमनुचितमत आह-**प्रयुज्यते इति ।** तथा चान्यार्थमेव नीयमानानां पूर्णकलशादीनामिव अधिकारार्थमेव प्रयुज्यमानस्याथशब्दस्यापि मङ्गलार्थतेति भावः । **वेदितव्यमिति**-लाहुज्ञानजिज्ञासुभिरिति शेषः । प्रकृतशास्त्रारम्भप्रतिज्ञापनायास्यैवाध्याहारो युक्तः, न तु भवत्वादेरिति बोध्यम् । तथा च साधुशब्दज्ञापनाय शब्दानुशासनपदकं व्याकरणशास्त्रं व्याख्येयत्वया प्रारब्धं बोध्यं जिज्ञासुभिरिति फलितार्थः ॥

प्रदीप—**विवरणेति**-तत्त्वं स्वप्रतिपाद्यार्थप्रतिपादकत्वम् । **साक्षात्प्रयोजनमाहेति**-व्याकरणाध्ययने निष्प्रयोजनात्प्रवृत्तये तस्य साक्षात्प्रयोजनं साधुशब्दज्ञानरूपं कथयन् शास्त्रारम्भप्रतिज्ञां वदतीत्यर्थः । तत्र **साक्षात्त्वं** अव्यवधानेन जायमानत्वम् । प्रतिज्ञा च अव्यवहितोत्तरसमयविधेयत्वप्रकारकबाधानुकूलशब्दप्रयोगरूपो व्यापारः ॥ **प्रयोजनेति**-व्याकरणाध्ययनसाक्षात्प्रयोजनेत्यर्थः । **स्ववाक्यम्**-अथ शब्दानुशासनमित्याकारकम् । **तदवयवम्**- वाक्यैकदेशम् । **प्रयुक्त इति**-तत्रानेन शब्दे प्रकारप्रभृतिह्नसमानार्थत्यनर्थकत्वस्य पदार्थविपर्यासकत्वस्य च न प्रसक्तिः । **एवं हि**-यतोऽथशब्दस्य (इति शब्दसमभिव्याहारात्) स्वरूपपरत्वे सति । **च**-तु । **अस्य**-अथशब्दस्य । **इत्यर्थ इति**-अत्र एवाधिकारार्थ इत्यत्राधिकारः (प्रारम्भः) अर्थः (प्रयोजनं) यस्येति व्युत्पत्तिः । **निर्णीतमिति**-अनेनात्राथशब्दस्य प्रारम्भवाचकत्वैव कुतो नेति शङ्का निरस्ता । **तमिति**-तमित्यनेन शब्दानुशासनपदार्थं कथयतीति शेषः । **प्रारभ्यमाणता**-प्रारम्भणा, "वर्तमानसामीप्ये वर्तमानवद्वा इति भूतल्ल्" । **निमित्तमिति** जिज्ञासायामाह-**शब्देति । अत्र**-(शब्दानामनुशासनं) शब्दानुशासनमित्यत्र । **आचार्यस्य**-पाणिनेः । **कर्तुः** - शब्दकर्मकानुशासन(व्याकरण)विधातुः । **प्रयोजनाभावादि-**

ति-प्रयुज्यतेऽनेनेति प्रयोजनं (फलं) तदभावात्, कर्तृप्रयोगकरणत्वाभावादित्यर्थः । यद्यप्यत्र कर्तृपादानस्य शाकटायनेन्द्रादिविभिन्नव्याकरणकर्तृव्यावृत्तिरूपं फलमस्ति, तथापि (शब्दानामिदमनुशासनं न त्वर्थानाम्) इति वाक्यस्यार्थनिवृत्तिपरत्वात् कर्तृविशेषनिवृत्तिपरत्वाभावाच्च सत्यपि कर्तुरविवक्षयाऽनुपादानमिति भावः । **उभयप्राप्त्यभावादिति**-उभयस्मिन् (कर्तृकर्मणोः) प्राप्तिः (षष्ठीप्राप्तिः) उभयप्राप्तिस्तदभावादित्यर्थः । **इध्मेति**-इध्मस्य प्रव्रश्चन इति विग्रहः ।

उद्द्योते-**इत्यादीति**-आदिना (धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति गृह्यते । **श्रुतेरिति**-व्याकरणस्य वेदाङ्गत्वात्तदध्ययने वेदाध्ययने इव नित्यतया प्राप्त इति शेषः । **एतेन** फलार्थितानिरासः । **नोक्तमिति**-अत एव "तत्तदङ्गत्वाविज्ञायमानत्वान्नोक्तं शास्त्रकृता स्वयम्। शास्त्रेण सर्वशब्दानामन्वाख्यानप्रयोजनम्" इति भट्टोक्तिः । **अपि-तु**। **परमप्रयोजनमिति**-परम्परया प्रयोजनमित्यर्थः । परमपदस्य पार्यन्तिकार्थकत्वात् । **भगवान्**-पतञ्जलिः । **विवरणकारत्वादिति**-अस्य साक्षात्प्रयोजनं च तैलनेन सम्बन्धः । विवरणकारस्य मूलानुक्तावश्यकतिपयप्रतिपादकतया औचित्याद् भाष्यकारस्य पाणिनिकात्यायनानुक्तस्यापि व्याकरणाध्ययनसाक्षात्प्रयोजनस्य कथनं सङ्गतमेवेति भावः । ननु-आचार्यादीनाम् (इमे व्याकरणाध्ययने प्रवर्त्तन्तामिति) अभिप्राये ज्ञाते आप्ता एते हितकारिणोऽस्मानत्र प्रवर्त्तयन्तीति अवश्यमेवेदं अस्मत्कल्याणकरं भवेदित्यनुमायैवात्र निरासवः प्रवर्त्तेरन्। आह च-'हितकारिभिरिवासौ ज्ञायमानः प्रयोजकः कर्ताऽज्ञायमानोऽपि नैव स्यात्प्रयोजकः ॥" इति। तथा चात्र प्रयोजनकथनं नावश्यकम्। अत एव शब्दकौस्तुभे आदौ व्याकरणस्य विषयं (साधुशब्दं) प्रतिपाद्य तत्तदध्ययनस्य रक्षोहादीनां प्रयोजनानां निरूपणे ततश्च किमिदमित्यादिना अधिकारिनिर्वचने प्रसङ्गसङ्गतिरपि भवता त्याशयेन "प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयदथ शब्दानुशासनमिति" इति लिखितमिति चेन्न, प्रवृत्तिम्प्रति इष्टसाधनताज्ञानं कृतिसाध्यताज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानञ्च कारणम्। एवञ्च केचिद् जिज्ञासुः तादृशाभिप्रायज्ञानोत्तरं सामान्यत इष्टसाधनत्वानुमित्या अत्र प्रवृत्तावपि केषाञ्चिन्मन्दनिदासतां तत्तत्समुदायस्य विशेषेष्टसाधनत्वाद्यज्ञानमन्तरा प्रवृत्त्यनुपपत्तौ तद्ज्ञापनायात्र प्रयोजनकथनस्यावश्यकत्वात् । अत एव 'अथातो ब्रह्मजिज्ञासे'त्यादौ प्रयोजनं निरूपितमित्याशयेनाह-**मन्देति** । **प्ररोचकप्रयोजनप्रतिपत्तिप्रसङ्गत्वाद्**-दृष्टान्तेनाभा... यथा ... । ...फलानुपदेशे स्वर्गफलकल्पना, ... आह-**व्यवहितेष्विति** । व्यवहितफलकेष्वित्यर्थः । अस्मिन् स्वर्गादीनि व्यवहितानि (पश्चाद्भावीनि) ... फलानि, ... व्यवहितानि फलानि येषाम्... अथवा स्वर्गो साक्षाद्, अपूर्वं च व्यवहितफलम् ... अपूर्वादि-व्यवहितपूर्वफलजनककर्माणि व्यवहितपरकालभावि सुखं दुःखं वा ... पूर्वत्वादि ... उपपादनाय कल्पितं कर्मजन्यं कर्मफलजनकं ... पूर्वशब्देन ... पुण्यपापशब्देन व्यवह्रियते ... । **अनास्थानात्**-... । **शब्दव्युत्पत्तिलक्षण**- प्रकृतिप्रत्ययविभागज्ञानपूर्वक) साधुशब्दज्ञानरू-

पम्। न्यूनता निराकरोति-**तत्रेति** । प्रयोजनादीनां मध्ये महाभाष्यवाक्ये वेत्यर्थः । **शब्देति**-साधुशब्देत्यर्थः । **विषय**-साधुशब्दरूपः । **उक्त इति**-स्वाध्यायोऽध्येतव्य इत्यत्रैवेति भावः। **ज्ञानेति**-साधुशब्दज्ञानेत्यर्थः । **शास्त्रविषयत्वादिति**-शास्त्रघटकत्वाच्चेत्यपि समूहनीयम्। **तज्जिज्ञासु**-साधुशब्दजिज्ञासुः । **इति**-इति तु। **अर्थात्**-अर्थापत्तिप्रमाणात् । **लब्धमिति**-एतावता अनुबन्धचतुष्टयं सूचितम् । तत्रानुबन्धत्वञ्च अध्ययनविषयकप्रवृत्तिप्रयोजकज्ञानजनकज्ञानविषयत्वम्। **तदेवाहेति**-साक्षात्प्रयोजनोपादानमेवेत्यर्थः । साक्षात्प्रयोजनस्य किं प्रयोजनमित्याकाङ्क्षायामिति शेषः । साधुशब्दज्ञानस्य व्याकरणाध्ययनसाक्षात्प्रयोजनत्वे सत्येव तत्साध्यरक्षोहादीनां प्रयोजनप्रयोजनतोपपद्यते इति भावः । **पदार्थज्ञानाय**-अथपदार्थबोधाय । वाक्यार्थबोधम्प्रति पदार्थज्ञानस्य कारणत्वादिति भावः । ननु अथशब्दार्थतया अनन्तरादिः प्रसिद्ध एवात आह-**आनन्तर्याद्यर्थकत्वेति** । आदिना "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इति कोशोक्तप्रश्नकार्त्स्न्यग्रहः । तथा च अत्र अथशब्द आनन्तर्यार्थः ? प्रश्नार्थो वा ? कार्त्स्न्यार्थो वा ? आद्ये कथितानन्तर्यार्थः ? अकथितानन्तर्यार्थो वा ? शास्त्रविषयजिज्ञासानन्तर्यार्थो वा ? वेदाध्ययनानन्तर्यार्थो वा ? नाद्यः, प्राक्किञ्चिदकथनात्। न द्वितीयः, तथा सति अव्यवस्थापातात्। न तृतीयः, शास्त्रविषयजिज्ञासानन्तर्यस्य शास्त्रविषयादिकथनेनैव सूचनात्, तथा सति पुनरुक्तिप्रसक्तेः । न चतुर्थः, वेदाङ्गव्याकरणाध्ययने वेदाध्ययनसमकालिकताबोधिकायाः "अनध्यायेष्वङ्गान्यधीयीत" इत्यादिस्मृतेः विरोधात्, अनधीतवेदस्यापि साधुशब्दज्ञानाय व्याकरणाध्ययने प्रवृत्तिसम्भवाच्च। न प्रश्नार्थः, कोऽप्यनन्तरानिर्वचनात्। न कार्त्स्न्यार्थः तथा सति सर्वेषां शब्दानामिति वक्तव्ये "केषां शब्दानाम्" इत्यग्रिमकथनस्यायुक्ततापत्तेरिति क्रमेणात्राथशब्दस्यानन्तर्याद्यर्थकत्वनिरासो बोध्यः ॥ **भाष्यत्वादेवेति**-"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥" इति भाष्यलक्षणलक्षितभाष्यत्वादेवेत्यर्थः । अनेन भाष्यं द्विविधं व्याख्येयव्याख्यानभेदादिति सूचितम् ॥ **स्ववाक्येति**-अथ शब्दानुशासनमिति वाक्येत्यर्थः । **इत्येवेति**-एतेन अथेत्यस्य व्युदासः । अथाधिकारार्थ इति, 'अथ' शब्दोऽधिकारार्थ इति बोक्तेः अनन्तरं कश्चिच्छब्दोऽधिकारार्थ इत्याद्यप्रमितेरापत्तिः । केचित्तु वाक्ये "अन्यो यं वा अथशब्दोऽधिकारार्थ" इति सन्देहमापद्यन्त इति वदन्तीत्याशयेनाह **अथेतीति**। **आनन्तर्येति**-कश्चिद् अथशब्द... **भ्राम्येदिति**-कश्चिद् अथशब्दस्यानन्तर्याद्यर्थकत्वभ्रमापत्तेः ... अधिकारार्थकत्वकथनमसङ्गतमिति वा भ्राम्येदित्यपि बोध्यम् । **योऽयमिति**-योऽयम् अथ शब्दः "अथ शब्दानुशासनमि"ति वाक्ये प्रयुक्तः (इतिपदेन स्वरूपं बोधितञ्च) स इत्यर्थः । तेन तदवयवमिति कैयटसङ्गच्छते । **न वेतीत्यादौ**-न वेति विभाषेत्यादौ । ... समभिव्याहृतत्वाच्छब्दस्येति शेषः । **तथा भ्रमम्**-अनाभाविशब्दसमभिव्याहृतशब्दस्य भावितम् अर्थपरत्वभ्रमम्। स्तुतिप्रतिपादकयोः भ्रमनिरासाय प्रस्तावनार्थमाह-**प्रारम्भ इति**। **सम्बन्धादिति**-प्रारम्भश्चार्थप्रवृत्तिसमागाद् व्याख्येयस्य (व्याकरणस्य) इत्यर्थः । अथ शब्दानुशासनमिति कथनात्। **अर्थशब्द इति**-अधिकारार्थ इत्यनेनेत्यादि । ... विरोधिसद्भावे सामञ्जस्याय चास्य व्युत्क्रमविधायाद्-**निपातानामिति**। ... वाचकतया समुच्चयाह-**उपसर्गेति**। **उभयस्वीकारस्येति**-ननु च 'चतुर्विधपदे चात्र द्विविधस्यार्थनिर्णयः । क्रियते ...पसर्गनिपातयोः ॥ तयोरभिधाने हि व्यापारो नैव विद्यते । यदर्थद्योतकौ तौ तु वाचकः स

१. असौ-प्रयोजनपदार्थः । २. प्रयोजक इति ३ अप्रयोजक इति च-प्राचत्स्यादि ।

विचार्यते ॥" इति भट्टोक्ति, "द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।" इति कारिका च विरुद्ध्येतेति चेन्न, तयोर्बहूनां चादीनां द्योतकत्वेत्यभिप्रायकत्वात् । चाप्यर्द्धजरतीयन्यायस्तैरभय न स्वीकार्यन्, क्वचित्थादौ द्योतकता, क्वचिन्निरर्थके हारायद्योतकत्वेत्येवमर्थ तस्य तायां द्योतकत्वान्तरादिमतेऽपि दुर्वारत्वात् । न च निपातानां वाचकत्वे शोभनं समुच्चय इत्यर्थे शोभनश्चेति, तथा घटस्य समुच्चय इत्यर्थे घटस्य चेति समानार्थतेति वाच्यम्, शब्दशक्तिस्वभावात् निपातानां नित्यपरतन्त्रतया तत्र विशेषणयोगस्य षष्ठ्याश्चासमन्वयात् ॥ उपसर्गभेदनिवेशफलमाह-**उपसर्गेति ।** अत्र एवोपास्यते गुरुरित्यादौ धातोः शब्दशक्तीयकर्मत्वकार्यान्वित्यर्थकत्वरूपसकर्मकत्वात् कर्मणि लकारः । **अत एव**-उपसर्गातिरिक्तनिपातानां द्योतकताया अपि स्वीकारादेव । **सङ्गच्छते इति**-धातोः निरुक्तसकर्मकत्वेन कर्मणि लकारस्य विधानादिति भावः । चादीनां वाचकत्वास्वीकृतिफलन्तु घटः पटश्च पश्येत्यादौ घटसमुच्चयादिमति घटादीनां लक्षणाया अकरणेनेति बोध्यम् ॥ **आरम्भेति**-भूतेत्यादि । तेनाधिकारादिपदानां भूतकालार्थककर्मप्रत्ययान्तता सूचिता । अत एव 'अधिकृतमि"ति भाष्योक्तिः सङ्गच्छते । **मङ्गलार्थमिति**-अत्र "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥" इति स्मृतिः स्मरणीया । **उभयार्थमिति**-स्वरूपतो मङ्गलार्थत्वम्, अर्थतोऽधिकारार्थमिति भावः । तेन "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयती"ति व्युत्पत्तिविरोधो न । तस्यानुभयार्थत्वे "अथकृतं शब्दानुशासनमि"त्येव वदेत् ॥ अन्यत्र विभक्तीति सूत्रायभाष्यानुसारेण प्राद्युपसर्गभिन्नचादिनिपातानां द्योतकत्ववाचकत्वे उभयस्मिन् स्वीकृते वाचकशब्दसमभिव्याहारसहकृतत्वप्रसङ्गे तेषां द्योतकता अनन्यलभ्यः शब्दार्थ इति न्यायात्, अन्यथा वाचकत्वेति नियमस्यावश्याभ्युपगन्तव्यतया प्रकृते वाचकाभावाद् अथशब्दस्याधिकारवाचकत्वमेव सम्यगित्याशयेन स्वमतमाह-**परे त्विति । अत्र**-अथशब्दे । **एवेन** द्योतकता व्युदस्ता । नन्वेवमथशब्दस्य प्रसूयते इति साध्यार्थवाचकतया नामशब्दता सिद्धार्थता क्षतिरित्यत आह-**अधिकृतमिति ।** न चैवमथशब्दस्य क्रियावाचकत्वानुपपत्तिः, यथा हिरुगादिशब्दानां सा यथा सत्त्वाभावेऽपि क्रियानाविशेषणपरतयैव क्रियावाचकव्यवहारस्तथाऽस्यापि तदुपपत्तेः । वस्तुतस्तु "चत्वारि पदजातानि" इत्यग्रिमभाष्ये निरुक्ते च नामनिपातयोः पृथगुपादानेनाव्ययेषु नामत्वास्वीकाराद् अथशब्दस्य साध्यक्रियान्तरत्वेऽपि न क्षतिः । **तदर्थम्**-अधिकारार्थम् । **अस्य**-अथशब्दस्य । **पारिभाषिकमिति**-मयाऽधुना परिभाष्यत इत्यर्थः । **विवरणे**-व्याख्यानभाष्ये । **इति**-इत्यादि । कैयटसरणिमनुसृत्याह-**वाचकपदाभावादिति ।** अस्य देहलीदीपन्यायेन पूर्वेणोत्तरत्र च सम्बन्धः । **एतावतेति**-प्रकृते वाचकशब्दासमभिव्याहृतस्याथशब्दस्य प्रकरणादितात्पर्यग्राहकतयैव क्रियाविशेषाक्षेपकतारूपा द्योतकता, प्रादेश विलिखतीत्यादाविवेति भावः । **एवेनो**पसर्गस्येवोपसन्धानेन द्योतकताया व्यावृत्तिः । व्याकरणप्रयोजनाभिधित्सयाह-**भावसाधनेति । शास्त्रपदेन**-शिष्यतेऽनेनेति व्युत्पत्तौ निष्पन्नेन । **व्याकरणस्य चेतीति**-अनेनात्र शास्त्रपदेन करणग्रहणमिति निरासोऽपि निवृत्तः । ननु नामशब्दसन्निधानेन रूढ्यैव शब्दानुशासनशब्दस्य प्रतीत्य प्रदापे "साक्षात्प्रयोजनमाह"ति कथनमनुपपन्नमित्यत आह-**अन्वर्थत्वादिति ।** (शब्दानुशासनशब्दस्य) यौगिकार्थानुसारित्वादित्यर्थः । "सम्पृषन् विदुषानय यो असाऽनुशासति" इत्यादिश्रुतावनुपूर्वकशासेर्विविच्य बोधने दृष्टत्वादाह-**असाधुशब्देभ्य इति । विविच्य**-विभज्य । **इदमेव**-शब्दानुशासनमिति व्याकरणस्यान्वर्था सञ्ज्ञेत्येव । अत एव नाम(प्रातिपदिक)शास्त्रमिति समस्त पदमित्यपास्तम्, शब्दानुशासने शास्त्रशास्त्रत्वस्यापि सत्त्वाच्च । **अभेदात्**-तादात्म्यात् । अत एव "ओमित्येकाक्षरं ब्रह्म"-त्यादिश्रुतिः, 'यो यच्छब्दः सोऽर्थो योऽर्थः स शब्द" इति महाभाष्यम्, श्लोकमध्यादर्थेन तादात्म्य वर्णेत्यादिव्यवहाराश्च सङ्गच्छन्ते । **अनेनैव**-शब्दानुशासनशब्दस्य व्याकरणान्वर्थनामत्वेनैव । नन्वेवं सन्देहाभावात् कथं "केषां शब्दानामि"त्यग्रिमभाष्यस्थप्रश्नसङ्गतिरित्यत आह-**केषामितीति । इतीति**-इति पूर्ववाक्यविषयसंशयाशयक इत्यर्थः । एवञ्च लौकिकानामेव वा वैदिकानामेव शब्दानाम् (इहानुशासनमारभ्यते) इति तात्पर्यकः स प्रश्न इति भावः । **परे**-भाष्यानुसारेण (नागेशादयः) । **निषेधादिति**-समासस्येत्यादि । शब्दानुशासनमित्यत्र न शष्ठी । **उभयोः**-कर्तृकर्मणोः । तथा च कृद्योगे कर्तृकर्मणोरुभयप्राप्तावेव कर्मणि षष्ठी, अन्यथा षष्ठीप्राप्ते, तत्रैव च "उभयप्राप्तौ"ति सूत्रस्य प्रवृत्तिरिति ताल्पर्यम् । **समासनिषेध इति**-'कर्मणि च"त्यनेनेत्यादिः । **चस्य**-'कर्मणि च"ति सूत्रघटकचकारस्य । निपातानामनेकार्थत्वादिति भावः । **भाव इति**-अत्र "अस्तु वा यत्र क्व चिदुभयप्राप्तिस्तथापि न क्षतिः उभयप्राप्ताविति सूत्रे विशेषेण विभाषेति पक्षस्यापि वक्ष्यमाणतया नियमाप्रवृत्तिपक्षे आचार्यस्य शब्दानुशासनमिति प्रयोगसम्भवात् । इत्यलक्षणाषष्ठी वा स्तु ।" इति शब्दकौस्तुभो द्रष्टव्यः । भाष्यनिष्ठकर्तव्यत्व शास्त्र आरोप्याह-**कर्तव्यत्वेनेति ।** आरोपकरणतात्पर्यं विविच्याह-**विवरणेति ।** यद्यपि प्रकृते साधुशब्दानामेव व्युत्पाद्यतया प्रस्तुतता, तथापि तत्प्रतिपादकत्वाद् व्याकरणशास्त्रस्यैव व्याख्येयतया प्रस्तुतता कथ्यत इति भावः । **अस्य**-व्याकरणस्य । न्यायादीनां सदर्थपरत्वेऽपि शास्त्रत्वात् "एकप्रयोजनसम्बद्धार्थानां साकल्येन प्रतिपादकत्वमेव शास्त्रस्य लक्षणमित्यभिप्रेत्याह-**साधुत्वेति । सम्बद्धत्वात्**-सम्बद्धार्थपरत्वात् । "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसा येनोपदिश्येत तच्छास्त्रमभिधीयते ॥" इत्यनुसारेण तु प्रवृत्त्याद्युपदेशकवाक्यस्य शास्त्रता, एतद्बोधिता साधुशब्दा एव प्रयोक्तव्या नासाधुशब्दा इत्याद्युपदेशसम्भवादिति बोध्यम् ॥

(अनुशासनीयशब्दनिर्णयाधिकरणम् ।)

(आक्षेपभाष्यम्)

केषां शब्दानाम् ? ॥

(प्रदीप) शब्दशब्दस्य सामान्यशब्दत्वाद्विना प्रकरणादिना विशेषे वृत्त्यानाभावात्तत्र शब्दकाव्यादीनामप्यनुशासनप्रसङ्ग इति मत्वा पृच्छति—**केषामिति ।** उत्तरपदार्थान्तर्गतस्यापि पूर्वपदार्थस्य बुद्ध्या प्रविभागात्किमा प्रत्यवमर्शः । यथा राजपुरुष इत्युक्ते 'कस्य राज्ञः ?' इति ॥

(उद्द्योत) सामान्यशब्दत्वादिति । लोकव्यवहारे ध्वनावपभ्रंशे च शब्दशब्दप्रयोगादिति भावः । एतेन ध्वनिव्यङ्ग्य एव तत्परत्वादौ शब्दशब्दप्रयोगादिति चिन्त्यमित्यपास्तम् ॥ ननु व्रीहीन् प्रोक्षतीत्यादौ सामान्यशब्दस्याप्यपूर्वीयेषु विशेषेषु प्रवृत्तिवद्वाचके साधौ तद्विशेषे प्रवृत्तिर्भविष्यतीत्यत आह—**विनेति ।** व्रीहिशब्दस्य तु प्रकरणाद्विशेषे प्रवृत्तिरिति भावः ॥ **वाशितादीनामित्यादिनाऽपभ्रंश**संग्रह ॥ ननूत्तरपदार्थान्तःस्पृष्टपूर्वपदार्थस्य कथं सर्वनाम्ना परामर्श इत्यत आह—**उत्तरपदार्थान्तर्गतस्येति ।** एतेन पृथगुपस्थित्यविषयस्येत्यर्थः ॥ **बुद्ध्या**-मानस्या, यद्वा वाक्यजन्यबुद्ध्या ॥

(तत्त्वालोकः) भाष्ये-यथा राजपुरुष इत्युक्ते कस्य राज्ञ इति प्रश्ने किमा परामृष्टस्य राज्ञः स्फुटबोधाय राज्ञ इति वदति, तथाऽत्र शब्द-

नुशासनमित्युक्ते केषां शब्दानामिति प्रश्ने किमा परामृष्टस्य शब्द-शब्दस्य स्पष्टप्रतिपत्तये एवाह-**शब्दानामिति।**

प्रदीपे—**सामान्येति**-ध्वनिकाकवाशितापभ्रंशसाधारणेत्यर्थः। **विशेषे**-शब्दविशेषे (साधुशब्दे)। शब्दशब्दस्येति शेषः। **प्रसङ्ग इति**-अथ शब्दानुशासनमिति प्रतिज्ञयेति शेषः। तथा च साधुशब्द जिज्ञासूनामिव असाधुशब्दजिज्ञासूनामप्यत्र प्रवृत्त्यापत्तिरिति भावः। **ननु** तन्त्र्यादिशब्दानां गान्धर्ववेदशकुनशास्त्रादिभिरेव निश्चयात्, तत्र प्रकृतिप्रत्ययविभागासम्भवाच्च नात्र तेषामनुशासनीयत्वप्रसङ्गोऽत आह-**सत्येति।** **पूर्वपदार्थस्य**-शब्दपदार्थस्य। **इतीति**-इति प्रश्ने समस्तराजपुरुषशब्दजन्यैकोपस्थितिविषयस्य विशेषणस्यापि राज्ञो बुद्ध्या विभज्य किमा परामर्शोऽन्वयेत्यर्थः। एवमेव "दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः" इत्यादावपि समुपपत्तिः। अथवा शब्दानामिति भाष्योक्तस्यैव किंशब्देन परामर्शः, तदुपादानसामर्थ्यात्। अत्र कल्पे "दशैते राजमतङ्गा" इत्यादौ तत्पदपरामृष्टराजमातङ्गे बाधितस्य तुरङ्गमस्वामित्वस्य "सविशेषणे हि विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामतः" इति न्यायेन राजन्यन्वयादुपपत्तिः, शिष्टं ध्वस्त इत्यत्रैवेति बोध्यम्।

उद्द्योते—**लोकेति**-नैरियवृद्धेत्यर्थः। **चेन** काकवाशितानां समुच्चयः। **एतेन**-लोकव्यवहारे तत्र तत्र शब्दशब्दप्रयोगेण। **ध्वनि व्यङ्ग इति**-शब्दानां ध्वनिरित्यादिनेत्यादि। **प्रयोगादिति**-शब्द शब्दस्यानर्थत्वाच्चेत्यपि बोध्यम्। **इदमिति**-तन्त्र्यादिशब्दादीनामनानुशासनीयत्वप्रसञ्जनमित्यर्थः। तथा च तपरसूत्रे तादृशप्रयोगस्य तन्त्र्यादिशब्दादीनामनानुशासनीयता नास्त्येवेतिसिद्धान्ताशयकत्वादेव सङ्गतिः बोध्या। **शब्देति**-व्रीहिशब्देत्यर्थः। **विशेषेषु**-व्रीहिविशेषेषु। सिद्धान्ते वाचकताया अपभ्रंशसाधारणत्वादाह-**साधाविति।** **तद्विशेषे**-शब्द विशेषे। **प्रकरणात्**-यागप्रकरणात्। **विशेषे**-व्रीहिविशेषे। ननु "सर्व नाम्ना प्रधानपरामर्शित्वम्" इति नियमात् शब्दानुशासनशब्दे विशेषणीभूतस्य शब्दशब्दस्य किमा परामर्शो न स्यादित्याशयेनाह-**ननूत्तरपदार्थेति।** अनुशासनपदार्थैकार्थीभावापन्नशब्दपदार्थस्येत्यर्थः। **सर्वनाम्ना**-किमा। **ततः**-अनुशासनपदार्थात्। समस्तशब्दानुशासनशब्दात् शब्दानुशासनपदार्थयोरेकैवोपस्थितिरिति भावः। शब्दानुशासनशब्दजन्यबुद्ध्या विभागासम्भवादाह-**मानस्येति।** तत्र नियमेन मानसबोधस्वीकारे मानाभावादाह-**यद्वेति।** **वाक्येति**-शब्दानामिति वाक्यैकदेशेत्यर्थः। न च शब्दानामित्यस्य पदतया तत्र वाक्यशब्दप्रयोगोऽसङ्गतः, "वाक्ये वाक्यैकदेश" इति न्यायात्, साकाङ्क्षपदस्थलविशेषे एकपदेऽपि वाक्यत्वस्य जयदेवेनोक्तत्वाच्च तदुपपत्तेः।

(समाधानभाष्यम्)

लौकिकानां वैदिकानां च। तत्र लौकिकास्तावद्— गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति॥ वैदिकाः खल्वपि—शं नो देवीरभिष्टये। इषे त्वोर्जे त्वा। अग्निमीळे पुरोहितम्। अग्न आयाहि वीतय इति॥

(**प्रदीपः**) सिद्धान्तवादी तु व्याकरणस्य वेदाङ्गत्वात्सामर्थ्याद्विशेषावगतिरिति मत्वाह—**लौकिकानामिति।** लोके विदिता इति—**लोकसर्वलोकाट्ठञिति** ठञ्। अथ वा भवार्थेऽध्यात्मादित्वाट्ठञ्। एवं वेदे भवा वैदिकाः। वैदिकानां लौकिकत्वेऽपि प्राधान्यख्यापनाय पृथगुपादानम्। यथा—**ब्राह्मणा आयाता वसिष्ठोऽप्यायात** इति वसिष्ठस्य। तेषां तु प्राधान्यं यत्नेनापभ्रंशपरिहारात्। अथ वा भाषा शब्दानामेव लौकिकत्वमिति भेदेन निर्देशः॥ तत्र लोके पदानुपूर्वी नियमाभावात्पदान्येव दर्शयति—**गौरश्व इति।** वेदे त्वानुपूर्वीनियमाद्वाक्यान्युदाहरति—**शं न इति॥**

(**उद्द्योतः**) **वेदाङ्गत्वादिति।** तच्च चागमसिद्धम्। अनेन तन्त्रीशब्दादीनामविषयता सूचिता॥ न च वेदाङ्गत्वाद्वैदिका एव विषयाः स्युः। तत्र तत्र **भाषायां छन्दसी**त्याद्युक्त्योभयोरपि विषयत्वात्॥ ननु चिदानन्दस्वरूपब्रह्मातिरिक्तस्य सर्वस्य लोकपदार्थत्वाद्वेदस्यापि लोकान्तर्गतत्वाद् भेदेनाभिधानं न युज्यत इत्यत आह—**वैदिकानामिति।** वैदिकानां लौकिकत्वेऽपीति पाठः॥ **तेषां त्विति।** लौकिकानां यागे कर्मण्येव तत्परिहारः, तेषां तु सर्वत्रेति भावः॥ **भाषाशब्दानामिति।** **भाषा** प्रयोज्यप्रयोजकवृद्धव्यवहारस्तत्र प्रयुज्यमानानामित्यर्थः। एवञ्च वेदमात्रान्तर्गत**कर्णेभिर्देवासो गृभ्णामी**त्याद्यतिरिक्तपरता लौकिकशब्दस्य, तन्मद्व्यवहारादर्शनात्। अत एव गौरश्व इत्यादीनां लौकिकोदाहरणत्वसङ्गतिः। लोके स्वरानादराद्वेदे तदादराच्च स्वरविशिष्टानां वेदमात्रविषयत्वमभिप्रेत्य **शं न** इत्यादीनां वैदिकोदाहरणत्वसङ्गतिरिति भावः॥ (भाष्ये **लौकिकास्तावदिति।** तावच्छब्दोऽनुक्रमे। पूर्वं लौकिका उदाह्रियन्ते, पश्चाद्वैदिका इत्यर्थः। वैदिकानां प्रधानत्वेऽपि लौकिकानां पूर्वनिर्देशस्तदादरसूचनार्थः॥) लोके पदानामुदाहरणत्वोक्तौ वेदे वाक्यानामेव तत्त्वोक्तावाशयमाह—**तत्रेति।** पदान्तरसमभिव्याहारेण स्वरविशेषाच्च वेदे वाक्यानामुदाहरणत्वोक्तिरित्यपि बोध्यम्॥ लोकवेदसाधारणतया पाणिनीयशब्दानुशासनस्यैवात्राधिकृतत्वम्, न तु शाकटायनादिव्याकरणस्येत्युत्तराशयः परे॥

(**तत्त्वालोक**) भाष्ये-व्याकरणस्य वेदाङ्गतया तत्र वैदिकानामेवाभ्यर्हितत्वात् वैदिकानामित्यस्य प्राक् वक्तव्यत्वेऽपि, निखिललोकेष्वेकरूपेण ख्यातानां साधुशब्दानामिहानुशासनं नापशब्दानां प्रतिदेशभिन्नानामिति सूचनाय सङ्कोचकाभावादत्र लोकशब्दस्य सकललोकपरतया लौकिकशब्दानां वैदिकशब्दापेक्षया व्यापकत्वात् प्रथममाह-**लौकिकेति।** **तत्र**-लौकिकवैदिकयोर्मध्ये। **गौरिति**-गोशब्दस्य सकललोकवेदसाधारणत्वात्, धर्मशास्त्रोक्तप्रभातदर्शनीयत्वेन मङ्गलस्य गोरूपार्थस्य वाचकतया मङ्गलत्वात्, भोगमोक्षसाधकगोरूपार्थवत्त्वाच्च प्रथममुपादानम्, अनेन साधुशब्दे गोसदृशता सूचिता। अत एव वक्ष्यति—"एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवती"ति। **शं न इति**-अथ प्रामाणिकग्रन्थेषु ऋग्यजुःसामाथर्ववेदानां क्रमशः उपलब्धतया, प्रकृतेऽथर्वयजुरृक्सामवेदानां क्रमेणोदाहरणोपादानं न युक्तमिति चेन्न, वेदानां यज्ञार्थत्वात् यज्ञोपादेयत्वक्रमेणैव तदुदाहरणानामभिधानात्। तथा हि—अथर्ववेदस्य "यज्ञैरथर्वा प्रथमः पथस्तते" इति ऋक्संहितोक्त्या यज्ञप्रक्रियाप्रथमप्रकाशकत्वादथर्वमुनिप्रोक्तत्वेनाभ्यर्हितत्वात्, सर्वत्र प्राग् विधेयमङ्गलार्थकशम्पदेन कर्मादिविरमणीयविघ्ननिवारकशान्त्यादिमन्त्रेण च घटितत्वात्, अथर्ववेदाध्ययनस्यैव "अथर्वाङ्गिरोभिर्ब्रह्मत्वमि"ति गोपथब्राह्मणवचनेन यज्ञप्रथमवरणीयब्रह्मत्वप्रयोजकत्वाच्च प्रागथर्ववेदोदाहरणोपादानम्। ततो यजुर्वेदस्य "अध्वर्युर्ऋत्विजि"ति क्रमप्रथमाध्वर्युकर्ममन्त्रप्रदर्शकत्वात्, तस्य गद्यात्मकतया पद्यात्मकऋग्वेदगीत्यात्मकसामवेदापेक्षया मुख्यत्वाच्च यजुर्वेदोदाहरणाभिधानम्। ततः ऋग्वेदस्य स्वाश्रितसामवेदापेक्षया प्रधानत्वात् तदुदाहरणकथनम्। ततः परिशेषात् सामवेदोदाहरणप्रतिपादनमिति बोध्यम्। **देवीरिति**-अत्र प्रथमाबहुवचनान्तम्। **अभिष्टये इति**-अत्र पररूपम्। **ईळे इति**-अत्र ळत्वम्।

प्रदीपे—प्रकरणाभावेऽपि सामर्थ्यस्य विशेषनिश्चायकताया वाक्यप्रकारान्तरेणाभिधानादाह-**सामर्थ्यादिति।** **विदिताः**-दित्या-

वा । लौकिकवैदिकेत्युभयसाधारण्यानुरोधादाह-**अथेति** । **तेषां तु प्राधान्यं**-वैदिकानां प्राधान्यं तु । तुना वैदिकप्राधान्ये वसिष्ठप्राधान्यतो विलक्षणता सूचिता । **यत्नेन**-सर्वथा । अन्यथा निष्प्रयोजनत्वादिति भावः । **परिहारादिति**-बोध्यमिति शेषः । एकरूपेण लौकिकत्वैदिकत्वे निर्देशे लाघवेन विनिगमनाविरहादाह-**अथेति** । **तत्र**-व्यर्थ इति ।

उद्योते—**तत्त्वं**-वेदाङ्गत्वम् । **आगमेति**-"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति" श्रुतीत्यर्थः । **अनेन**-वेदाङ्गत्वेन । **आदिना**-काकवाशितादिभ्रमशमनम् । **एवेन** लौकिकत्वव्यावृत्तिः । **उभयोः**-लौकिकवैदिकयोः । **भेदेनेति**-लौकिकवैदिकयोरित्यादि । **पाठ इति**-अनेन 'लौकिकत्वेन" इति पाठो निरस्तः । **लौकिकानामिति**-अर्थज्ञानार्थोच्चारणप्रसङ्गे इति शेषः । अथवा तस्य नियमाकाङ्क्षाया नाडियैकदेशेनान्वयः । **तदिति**-अपभ्रंशमित्यर्थः । **तेषां**-वैदिकानाम् । **सर्वत्रेति**-अपभ्रंशपरिहार इति शेषः । **प्रयुज्यमानानां**-उच्चार्यमाणानाम् **एवञ्च**-प्रयोजकप्रयोज्यवृद्धव्यवहारे प्रयुज्यमानानां लौकिकत्वे च । **तैः**-वर्णैरित्यादिभिः । **तदिति**-प्रयोजकप्रयोज्यवृद्धेत्यर्थः । **अत एव**-गौरश्व इत्यादीनां वेदमात्रानन्तर्गतत्वेन लौकिकत्वादेव । ननु गौर्न इत्यादीनामपि वेदमात्रानन्तर्गतत्वेन लौकिकत्वात् तथा वैदिकोदाहरणतयाऽभिधानमसङ्गतमित्यत आह-**लोके इति** । **तदिति**-स्वरेत्यर्थः । **मात्रेण** लोकव्यावृत्तिः । **तद्वत्**-वैदिकवत् । लौकिकानामपि "एकः शब्दः सम्यग्ज्ञात" इत्यादिश्रुत्युक्तफलवत्तया वैदिकवदादरणीयत्वेति भावः । **पदानां**-गौरश्व इत्यादिपदानामेव । **वाक्यानां**-शं नो देवीत्यादीनाम् । **तत्त्वोक्तौ**-उदाहरणोक्तौ । **आशयम्**-भाष्याशयम् । लोकेऽपि क्वचित् पदानुपूर्वीनियमसम्भवादाह-**पदान्तरेति** । येनानुपूर्वीनियमः समुच्चितः । श्रुतावानुपूर्वीनियमस्य सर्वत्रिकत्वात्, लोके तु क्वाचित्कत्वेति भावः । स्वसमरण्याऽऽह-**लोकवेदेति**-लौकिकवैदिकेत्यर्थः । **अत्र**-अथ शब्दानुशासनमिति महाभाष्यवाक्ये । करणस्याधिकरणत्वविवक्षया सप्तमी । **अधिकृतत्वमिति**-प्रतिपाद्यत्व इति शेषः । **व्याकरणस्येति**-लौकिकमात्रविषयस्य, प्रातिशाख्यस्य वैदिकमात्रविषयस्य वेति शेषः । **परे**-भाष्यानुयायिनः । अस्य प्रतिपादयन्तीति शेषः ।

(आक्षेपभाष्यम्)

अथ गौरित्यत्र कः शब्दः ? ॥

(प्रदीपः) अथ गौरयं शुक्ल इति शब्दार्थयोरभेदेन लोके व्यवहारदर्शनाच्छब्दस्वरूपनिर्धारणाय पृच्छति—**अथेति** । गौरिति विज्ञाने प्रतिभासमानेषु वस्तुषु कः शब्द इत्यर्थः ॥

(उद्द्योतः) **अभेदेन लोके इति** । अभेदेनैवेत्यर्थः । शब्दपरत्वाभिप्रायेणास्य गौरिति प्रयोगाभावादिति भावः । पुरोवर्तिव्यक्तिपश्यतो वाचकजिज्ञासया कोऽयमिति प्रश्ने अयं गौरयं वा शुक्ल इत्युत्तरस्थले सन्निहितमुद्दिश्य तादात्म्येन शब्दविधेयकप्रतीतेरिति तात्पर्यम् ॥ शब्दार्थयोस्तादात्म्यमेव शक्तिः । स्पष्टं चेदं पातञ्जलभाष्ये इति मञ्जूषायामस्माभिर्हर्यादिसम्मत्या व्युत्पादितम् । अत एव जात्यादिव्यक्त्योरिव "**रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः**" इत्यादौ शब्दार्थयोरपि अभेदेन व्यवहारः ॥ **अथ गौरिति** भाष्ये—अथेत्यस्य पृच्छ्यत इति शेषः ॥ किं पृच्छ्यते, तत्राह—**गौरित्यत्रेत्यादि** ॥ **कः शब्द** इति । कः शब्दशब्देनाभिधेय इति प्रश्नः ॥ **प्रतिभासमानेषु** । शब्दजातिव्यक्त्यादिषु ॥ नन्वेवं गुणक्रिययोः शब्दत्वाद्यननुपपत्तिः । नहि ते अपि गौरितिशब्दजन्यबोधे भासेते इति चेन्न । गुणगुणिनोः क्रियाक्रियावतोश्चाभेदात् । शब्दार्थयोरेव तत्त्वात् । **तदभिन्नाभिन्नस्येति** न्यायेन तच्छङ्कोपपत्तेः । यथा परमकारणाभिन्नकार्यकारणकस्य परमकारणेनाप्यभेदः । यद्वा **गुणसमूहो द्रव्यमिति** पक्षे **तस्य भाव** इति सूत्रस्थभाष्यसम्मते समूहस्य गोरव्यपदेशवत्त्वभूतगुणादीनामपि तद्बोध्यत्वमिति शङ्का बोध्या । अत्र **गौरिति विज्ञाने इति** सामान्योक्त्या तदाकारप्रत्यक्षादिज्ञानेऽपि गुणादीनां सामान्यरूपेण भानम् । अत एव प्रत्यक्षेऽपि अग्रवर्त्यादौ रसविशेषादिनिरासः, विशेषनिरासाय सामान्यतोऽनुपूर्वीत्वादिलाभे ॥ निरूपितं चैतन्मञ्जूषायाम् ॥

(तत्त्वालोकः) भाष्ये-अथ-अनन्तरम् लौकिकोदाहरणेषु गेशब्दस्य प्राथम्यादाह । प्रकृते प्राह-**गौरित्यत्रेति** प्रश्नमध्यगतो रसयोः सार्वत्रिकप्रश्नोत्तरभावलक्षणता बोध्या ।

प्रदीपे—**इति** इत्यादि । तत्रायं चार्थ इत्यादि सङ्गतम् । **व्यवहारेति**-आक्षेपादि । **दर्शनादिति**-नन्वयं यो इति इत्थं गौरिति स्वरूपे श्रोत्रग्राह्यगुणत्वेन शब्दत्वनिश्चयात्, गुणादीनां तत्र चित्तत्त्वमशक्यतया गौरिति रूपे कः शब्द इति प्रश्नस्यासम्भवात् गौरिति तात्पर्यस्य न स्वरूपपरता, किन्तु ज्ञानकारणपरतयाह-**विज्ञाने इति** । शब्दश्रोत्रे प्रत्यक्षादौ चेत्यर्थः अथ प्रतिभासनाद् ज्ञानस्यार्थबोधपत्ती, अत्रपदस्य प्रतिभासमानेष्वित्यर्थकतया सङ्गतता बोध्या **प्रतिभासमानेषु**-विषयभूतेषु । **वस्तुषु**-वस्तूनां मध्ये । निर्धारणे सप्तमीविधानात् ॥

उद्द्योते—**एवेन** भेदव्यावृत्तिः । शुक्लशब्दस्य गुणपरत्वे घटस्य शुक्ल इति, तथा गुणिपरत्वे घटः शुक्ल इति क्रमशः भेदेनाभेदेन च गुणगुणिनो व्यवहारो भवति । किन्तु शब्दार्थयोः गोशब्दस्य व्यक्तिपरत्वे अयं गौरित्यभेदेन व्यवहारस्य सत्त्वेऽपि, तस्य शब्दपरत्वे अस्य गौरिति भेदेन व्यवहारो न भवतीत्याशयेनाह-**शब्देति** । गोपदस्येत्यादि । नन्वेव गोशब्दगोचरज्ञानजनकतया अयं गौरिति शब्दप्रयोगाभावात् कथनेन शब्दार्थयोस्तादात्म्यमेतस्यनाति चेन्न, अयं गौरित्यत्र शब्देनार्थभिन्नतया शब्दविषयकज्ञानाजननादर्थपरता तयोस्तादात्म्यसिद्धेः ॥ उक्तरीत्या सिद्धं तयोस्तादात्म्यं "द्विर्बद्धं सुबद्धं भवती"ति न्यायेन द्रढयितुं तत्र हेत्वन्तरमाह-**पुरोवर्त्तीति** । तदाकारस्तु अयमित्येव इत्यादि । **सन्निहितं**-समीपदेशस्थं (साक्षादिन्द्रियसम्बद्धम्) **प्रतीतेरिति**-तयोस्तादात्म्याभावे तयोरभेदावगाहिप्रतीतेरनुपपत्त्येन, अबाधेन च तयोरभेदावगाहित्वप्रतीतेरिति भावः । नन्वेवं तयोस्तादात्म्ये तदनुपपत्त्यैव शब्दस्य तद्रूपा शक्तिरित्यत आह-**शब्दार्थयोरिति** । तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । तत्र भेदस्य वास्तवतया अभेदस्य चाध्यस्ततया तयोरविरोधः । एवं भेदस्योद्भूतत्वविवक्षया अस्यार्थस्यायं वाचक इत्यादौ षष्ठी, तथा अभेदस्योद्भूतत्वविवक्षया वृद्धिरादैजित्यादौ प्रथमा । कः शब्दः कोऽर्थ इति प्रश्ने गौरित्ययं शब्दो गौरित्ययमर्थ इत्येकरूपोत्तरदर्शनात् शब्दार्थयोः परस्परतादात्म्यं सिद्धम् । स चादिपदार्थवदनादिरीश्वरकृतः । ननु शब्दार्थतादात्म्यं यावत्समवायिपदार्थवत्स्वरूपस्य सङ्केतापरपर्यायस्य तयोर्वा तद्विशेषसम्बन्धापरपर्यायसम्बन्धान्तररूपशक्तेः ज्ञापकत्वेति सिद्धान्ते कथनस्तादात्म्ये शक्तित्वप्रयोगः सङ्गच्छत इति चेन्न, तस्य पदनिष्ठतदुपस्थितिजनकतया तत्र शक्तिशब्दव्यवहारोपपत्तेः । **एवेनेच्छा**निरासः । **इदमिति**-"स्थितोऽस्य वाचकस्य वाच्येन सह सम्बन्धः । सङ्केतस्तु कृत ईश्वरस्य स्थितमेवाभिसम्बन्धमभिनयति, यथा व्यवस्थितः पितापुत्रयोः सम्बन्धः सङ्केतनातद्योत्यते—अयमस्य पिता, अयमस्य पुत्र" इत्यादिनेति शेषः ॥ "इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा । अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ सम्बन्धिशब्दे सम्बन्धो योग्यतां प्रति योग्यता । समयाद्योग्यतासंविन्मातापुत्रादियोगवत् ॥ सति प्रत्ययकर्तृत्वे सम्बन्धे उपपद्यते । शब्दस्यार्थे यतस्तस्मात् सम्बन्धोऽस्तीति गम्यते ॥" इत्यादिहरिप्रभृतिवचनानुसारेणाह-**हर्यादीति** ।

व्युत्पादितमिति-शक्तिविचारे इति शेष । **अत एव**-तयोस्ता त्म्यादेव । **आदिना** गुणक्रियासग्रह । द्वितीयादिना "गर्वमङ्गो मार्ग दम्य शौर्यमङ्गश्च वालिन„ ,इत्यस्य सग्रह । **किं पृच्छ्यते इति**-इति शङ्कायामिति शेष । **तदाहेति**-साधारणतया प्रश्नविषयीभूतम् (असाधारणीकृत्य) वदतीत्यर्थ । स्पष्टमपि **ये** आह-**प्रश्न इति**-शाब्दबोधे प्रत्यक्षे च गवि गोत्वमिव तादात्म्येन गोशब्दोऽपि विशेषण तया भासते, तादात्म्येनार्थस्य शब्देन वाच्यवाचकभावस्य वा तादात्म्यस्य च सत्त्वात् गृहीतशक्तिकम्प्रति शब्देनार्थादेरिव अर्थेन शब्दादेरपि स्मरणे बाधकाभावात् । आह च-"न सोऽस्ति प्रत्ययो लोके य शब्दानुगमादृते । अनुविद्धमिव ज्ञान सर्व शब्देन भासते । ग्राह्यत्व ग्राहकत्व द्वे शक्ती तेजसो यथा तथैव सर्वशब्दानामेते पृथगवस्थिते ॥ यत्नशास्मरण तत्र न तदप्ययहेतुकम् पिण्ड एव हि दृष्ट सन् संज्ञा स्मारयितु क्षम ॥" इत्यादि । यावेनाचष्टे-**शब्देति**। एषा शब्दस्योपस्थापकत्वात्, नातिविशेषणत्वात्, व्यक्तगुणाद्यविकरण वा च क्रमेणोक्तिः। **एवम्**-शब्देत्यादि प्रतिभासमाने सति वैयटस्य विशेष्यते। **ते-गुणक्रिये भासेते इति** गुणक्रिययो गोशब्देन तादात्म्यवाच्यवाचकभावयोरसत्त्वादित्याशय । **अभेदादिति**-पट शुक्ल, गौश्चल इत्यादिप्रतीते तयो समवायमनङ्गीकृत्य तादात्म्यस्य स्वीकारादिति भाव । **च तत्त्वात्**-अभेदाच्च। **भिन्नस्येति**-तदभिन्नत्वमिति शेषः। **तच्छब्देति**-गुणक्रिययो शब्दत्वशब्दे इत्यर्थ । शब्दाभिन्नगुणक्रियावदर्थाभिन्नगुणक्रिययो शब्दाभिन्नत्वमिति तयोरपि शब्देन तादात्म्यादिसत्त्वात् गोशब्दजन्यबोधे भासमानतया शब्दत्वशङ्कोपपत्तिरिति भाव । तत्र दृष्टान्तमाह-**यथेति** । मूलप्रकृतिरूपोपादाना भिन्नमहत्तत्त्वात्मककार्यरूपकारणा भिन्नाहङ्कारात्मककार्यस्य मूलप्रकृत्याऽभेद इत्यर्थ । गुणादे साक्षादपि गोशब्दवाच्यता सम्भवतीत्याशयेनाह-**यद्वेति। गुणसमूह इति**-निरन्तरत्वा मकायुतसिद्धत्व विशिष्टावयवविशेषानुगतसाधारणासाधारणगुणादिसमुदाय इत्यर्थ । अयुतसिद्धावयवविशेषानुगत समूहो द्रव्यमिति, गुणसमुदायो द्रव्यमिति च पतञ्जलिवचनसत्त्वात्। **भाष्येति**-किं पुनर्द्रव्यम् ? के पुनर्गुणा ? शब्दस्पर्शरूपरसगन्धा गुणा , ततोऽन्यद् द्रव्यमिति भाष्ये स्थ्यर्थ । तत्र स्पष्टत्वात्कथनादाह-**सम्मते इति** । अन्यथा उक्त इति कथयेदिति भाव । **समूहेति**-गुणादावपि । **अवयवेति**-समुदायस्तनीत्यादि । **आदिना** क्रयासग्रह । **तदिति**-गोशब्देत्यर्थ । **अत्र**-कैयट। **तदिति**-गौरिति यथ । **आदिना** अनुमितिसग्रह । **अपिना** शाब्दबोध समुच्चिन । **सामान्येति**-रूपत्वादीत्यर्थ । विशेषरूपेण तु तत्तदिन्द्रियेणैव भानमिति भाव । **भानमिति**-इति सूचितमिति शेष । **अत एव**-प्रत्यक्षादिनाने गुणादीना रूपादि वा दना भानादेव। **अपिना**-अनुमित्यादिसग्रह । **आदिना** गन्धानुपादनसग्रह । **अन्ये-सिद्धान्तिन** । **मञ्जूषायामिति**-दाशवादे इति शेष । तथा च गौरिति ज्ञाने विषयभूतेषु शब्दद्रव्यकर्मगुणसामान्येषु **क** शब्द शब्दाभिधेय इति सारार्थ ॥

(आक्षेपोपपादकभाष्यम्)

किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः ? ॥

(प्रदीप) तान्येव वस्तूनि क्रमेण निर्दिशति—**किं यत्तदिति** । उद्दिश्यमानप्रतिनिर्दिश्यमानयोरैकरूप्यमाश्रयन्ति सर्वनामानि पर्या-

१. अत्र लोकप्रदर्शनेन शब्दस्य निर्विकल्पकज्ञानविषयता सूचिता ॥

येण तल्लिङ्गमुपाददत इति कामचारतः **स शब्द** इतिपुल्लिङ्गेन निर्देशः॥

(उद्द्योतः) यत्तदिति समुदायो यद्वृत्त्यर्थे वर्तते, तस्यैव पुन स्तद्वृत्तेन स इत्यनेन परामर्श । यद्वा प्रसिद्धौ । ननु यत्तिपस्य नपुसकत्वेन तच्छब्देऽपि नपुसकलिङ्गमेवोचितमत आह—**उद्दिश्यमानेति** । सिद्धवत्कीर्तनमुद्देश । प्रतिपाद्यतया विधेयतया वा कीर्तन प्रतिनिर्देश , यथा "शैत्यं हि यत्सा प्रकृतिर्जलस्य" इत्यादौ स्त्रीलिङ्ग निर्देश ॥ **तल्लिङ्गमिति** । तयोर्लिङ्गमित्यर्थ ॥

(तत्त्वालोकः) भाष्ये—**किमिति**-अस्य शब्द इत्युत्तर योजना। तथा अग्रेऽपि सर्वत्र सम्बन्ध । **सास्नेति**-अत्र समाहारद्वन्द्वोत्तरमिन् प्रत्यय , तेनावयवो बोध्यते। **शब्दः**-शब्दशब्दाभिधेय । एवमग्रेऽपि सर्वत्र। तथा च य सास्नादिमानर्थ स शब्दः किमित्यर्थ ।

प्रदीपे—**निर्दिशतीति**-प्रश्नवाक्य द्रव्यक्रियागुणसामान्यानां शब्दत्व सिद्धान्तिमुखान्निरसितु तान्येव विशिष्य क्रमेण प्रश्नविषय तया निर्दिशतीत्यर्थ । यौगपद्येनोभयलिङ्गासम्भवादाह-**पर्यायेणेति। इति**-इत हेतो ।

उद्द्योते—**यत्तदितीति**-अस्य व्याख्यानान्तर्भूततया न प्रतीकता । घटोऽतीत्यादावुभयोरपि पदसमुदायात्मकवाक्यशब्दप्रयोग दर्शनादाह-**समुदाय इति** । सर्वनामशब्दसमुदाय इत्यर्थ । **यद्वृत्यार्थे**-यत्र यच्छब्देन वृत्त निष्पन्न यदिति तस्यार्थे। ते वय गच्छाम इत्याद्यनुरोधादाह-**यद्वेति**। यत्तदित्यस्य यदित्यर्थकत्वादाह-**यदित्यस्येति** । नपुसक लिङ्गार्थाभिधायित्वादित्याशय । नित्यसम्बद्धयोर्यत्तदोरेकविषयत्वेत्याशयेनाह-**उचितमिति**। उद्देश्यस्यासिद्धत्वेऽपि सिद्धत्वेन कीर्तनदर्शनादाह-**सिद्धवदिति** । प्रतिपाद्यताया असार्वत्रिकत्वादाह-**विधेयतयेति । स्त्रीलिङ्गनिर्देश इति**—उद्दिश्यमानशैत्यप्रतिनिर्दिश्यमानप्रकृत्यारैकत्वमापादयन् तच्छब्दस्य सेति स्त्रीलिङ्गनिर्देश इत्यर्थ । **तयोः**-उद्दिश्यमानप्रतिनिर्दिश्यमानयो ।

(आक्षेपबाधकभाष्यम्)

नेत्याह । द्रव्य नाम तत् ॥

(प्रदीपः) **नेत्याहेति** । भिन्नेन्द्रियग्राह्यत्वात् द्रव्य शब्द इति प्रतीतम्, अपि तु द्रव्यमिति । यदि च द्रव्यानुशासन विवक्षितमभविष्यद् 'अथ द्रव्यानुशासन'मित्येवावक्ष्यत् ॥

(उद्द्योत) भाष्योक्तहेतुमुपपादयति—**भिन्नेन्द्रियेति** । सामान्यव्यतिरिक्तत्वे सति श्रोत्रेन्द्रियग्राह्यत्व हि शब्दलक्षणमिति भाव ॥ **यदि च द्रव्येति** । यदि द्रव्य शब्दशब्दाभिधेयं स्यादित्यर्थ । तथा हि सति द्रव्यादीना तन्त्रान्तरे निरूपितत्वात्तस्य वैयर्थ्यापत्तिरित्यपि बोध्यम् ॥ तत्र द्रव्यस्य क्रियाश्रयत्वात्पूर्वमुक्ति । क्रियागुणौ च जात्याश्रयाविति तयोस्तत पूर्वमुक्ति । वैशेषिकसिद्धगुणानामपि संयोगविभागादीना क्रियात्व ध्वनयितु गुणात्प्राक् क्रियोक्तिरिति ध्येयम्। **यत्तर्हि शुक्ल** इत्यादौ गुणस्य शब्दत्वशङ्कापरे वाक्ये इतिशब्देन प्रकारार्थेन सुरभ्यादिभेदभिन्नगन्धादिलिङ्गसंख्यादिरूपगुणसङ्ग्रह इति न न्यूनता ॥ ननु शब्दस्यापि गुणत्वाद् **गुणो नाम स** इत्युत्तरमसङ्गतम् । तस्य द्रव्यत्व **द्रव्य नाम तदि**त्युत्तरमसङ्गतमिति चेन्न । उक्त द्रव्याश्रितो गुणो नाम स इत्यर्थात् ॥

(तत्त्वालोक) भाष्ये—उत्तरमनुवदति तदस्य -**नेत्याहेति** । न सास्नादिमद्वस्तु शब्द) इति वदति (सिद्धान्ती) इत्यर्थ । कुत एव मेत्यत आह-**द्रव्यमिति**। यत इत्यादिः। नामशब्द प्रसिद्धार्थक । एवमग्रेऽपि सर्वत्र। तथा च यत तत् (शब्द इति न प्रसिद्धम् , किन्तु) द्रव्यम् (इति) प्रसिद्धम् (अत तथा) इत्यर्थ ।

प्रदीपे—यत इत्यस्यार्थमाह-**भिन्नेति** । शब्दग्राहकश्रोत्रेन्द्रि-

यभिन्नचक्षुरादीन्द्रियग्राह्यत्व दित्यर्थ । तत्पदार्थमाह-**द्रव्यमिति ।** द्रव्यत्वेनाभिमत (सास्नादिमद्वस्तु) इत्यर्थ.। नामपदार्थमाह-**प्रतीत मिति ।** प्रसिद्धमित्यर्थ । तर्हि केन रूपेण तत् प्रसिद्धमित्यत आह-**अपि तु द्रव्यमितीति ।** प्रसिद्धम्, गुणाश्रयत्वाद् गुणसमूहत्वाद्वा नि शेष । ननु शब्दशब्दस्य कर्मधमन्तनया कुतो नार्थ द्रव्यस्य शब्दतेत्यत आह-**यदि चेति । अथेति**-नहीत्यादिः । **एवेन** शब्दानुशासनव्यावृत्ति ।

उद्योते—**हेतु**-(यत) द्रव्य नाम तदित्याकारकम् । नत्र हेतौ हेतुमाह-**सामान्येति** अत्र "येनेन्द्रियेण या व्यक्तिर्गृह्यते तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यते" इति नियमेन शब्दत्वे नथा तदभावे प्रत्यक्षमनाया अपि यात्रेन्द्रियग्राह्यत्वम्, तथा भाव्यत्वे सत्यपि देयम् । एव द्रव्यादावतिप्रसक्तिनिरासाय विशेष्यदलम् । **हि**-यत । यथाश्रुतानुपपत्त्या भावार्थमाह-**यदि द्रव्यमिति । स्यादिति**-अनेनावश्य दित्यस्य वदेदित्यर्थः सूचित । ननु द्रव्यस्य शब्दद्व्योभयशब्दवाच्यत्वेन त्रिगनमनाविरहात् शब्दानुशासनमिति कथितमित्यत आह-**तथा हीति ।** आदिना गुणादिनिरूपणस्य तत्रान्तरस्थाऽऽवश्यकत्वसूचनात् तस्यैव वैयर्थ्यं कुतो नेति शङ्का निरस्ता । **तन्त्रेति**-शास्त्रत्यर्थ । **तस्य**—द्रव्यानुशासनस्य । **तत्र**—गौरिति ज्ञाने भासमानानां वस्तूना मध्ये । **तयो**-क्रियागुणयो । **तत**-जातिन । ननु गुणस्य क्रियापेक्षया चिरस्थायित्वेनाभ्यर्हितत्वा प्राग्रुपादान कुतो नेत्यत आह—**वैशेषिकेति ।** मतेति शेष । गुणस्य शब्दत्व शङ्काकाले भिन्नेय प्रसङ्गादनैवाह-**यत्तर्हीति । प्रकारेति**-सादृश्ये त्यर्थ । अत एवेति पदस्य सङ्गता । **गन्धादीति**-आदिना स्पर्शादिसंग्रह । **सत्यादीति**-आदिना शक्तिप्रकारकसंग्रह । गुणस्य शब्दत्वनिराकरणावसरे विधेया शङ्का प्रसङ्गादनैवोपस्थापयति-**नन्विति । तस्य**-शब्दत्व । **द्रव्यत्वे**-द्रव्यत्वे तु । **उक्तेति**-सास्नादिमदित्यर्थ । **इत्यर्थात्**-इति "गुणो नाम स" इत्युत्तरार्थात् । एतेन "द्रव्य नाम तत्" इत्युत्तरस्य वक्ष्यमाणगुणाश्रयो द्रव्य नाम तदेत्यर्थ. सूचित । केचित्तु द्रव्य नाम गुणो नामेत्यादौ द्रव्यगुणयो श्रोत्राग्राह्यत्वेन विशेषिततया शब्दस्य मतनैदेन द्रव्यत्वे गुणत्वे वा न तदुत्तरद्वयासङ्गतिरिति वदन्ति ।

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति, स शब्दः ?॥

(प्रदीप) अनेनैव न्यायेन गुणक्रियासामान्यानां निराकृतेऽपि शब्दत्वे प्रपञ्चार्थं चोद्यपूर्वकं निराकरोति—**यत्तर्हीति ।** गोशब्दार्थे चैषां समवायाच्छब्दत्वमाशङ्कत । परिहारस्तु पूर्ववत् ॥ नत्रेङ्गितमभिप्रायस्य सूचक शरीरव्यापार । **चेष्टितं** कायपरिस्पन्द । **निमिषितं** अक्षिव्यापार ॥

(उद्योत) श्रोत्राग्राह्यत्वादेव क्रियादीनां शब्दत्वे निरस्ते किमुत्तरग्रन्थेनेत्यत आह—**अनेनैवेति ॥ गोशब्दार्थे चैषां समवादिति ।** अभेदसम्बन्धात्, तेन तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायेन शब्दत्वाशङ्का तेषामिति भाव ॥ यद्वा गोशब्दार्थे गुणसमूहे समूहितया एषा समवादित्यर्थ ॥ **शरीरव्यापारो** रोमाञ्चादि ॥

(तत्त्वालोक) भाष्ये-**यत्तर्हीति**- यदि सास्नादिमती व्यक्ति (द्रव्य न शब्द) तर्हि यत् तदिङ्गितादि तत् (द्रव्यान्यत्वात् शब्द किमित्यर्थ ।

प्रदीपे-**अनेन**-सास्नादिमति द्रव्ये शब्दत्वनिरासकेन । लोकव्यवहारानुसारेणाह-**न्यायेनेति ।** श्रोत्रभिन्नचक्षुरादिग्राह्यत्वेन हेतु-नेत्यर्थ । वैशेषिकदर्शनक्रमेणाह-**गुणक्रियेति । निराकृते**-निराकृतप्राये । **प्रपञ्चार्थम्**-जिज्ञासुबुद्धिवैशद्याय तस्य तस्य तेन तेन रूपेण प्रसिद्धः ज्ञानाय वा । **तत्**-तथा शब्दत्वम् । **चोद्येति**-प्रश्नेनत्यर्थ । **निराकरोति**-निरासत्तु निर्दिशति **गोशब्दार्थे**-सास्नादिमति पिण्डे । **एषां**-क्रियादानाम् । **पूर्ववदिति**-भिन्ने न्द्रियग्राह्य त्वात् क्रिया शब्द इति प्रतीतम्, अपि तु क्रियेति । यदि च क्रिया तदनुशासन विशेषणम भविष्यत् अथ क्रियानुशासनमित्येवावक्ष्यदिति रीत्यैत्यर्थ । **तत्र**-इङ्गितादित्रयमध्ये । *कायपरिस्पन्दः*-गमनागमनादि **अक्षिव्यापार**.-निमील्नोन्मीलनादि ।

उद्द्योते-**निरस्ते**-निरस्तप्राये । गुणादौ शब्दत्वशङ्काया कारण स्योद्योते विशदतया विचारितत्वादत्र सक्षेपेणाह **अभेदेति** गोशब्दाभिधेयगवार्थाभिन्नक्रियादीना गोशब्दभिन्नतया गौरिति ज्ञाने भासमानत्वात् तत्र शब्दत्वशङ्कोपपत्तिरित्याशयेनाह-**तेनेति ।** तत्र क्रियादीनां साक्षादपि भासमानता सम्भवतीत्यभिप्रेत्याह-**यद्वेति । गुणसमूहे**-गुणादिसमुदायात्मके (ज्ञायमाने)। **समूहितया**-अवयवतया। **समवात्**-ज्ञानसम्भवात् । कायपरिस्पन्द इत्यनेन शरीरव्यापारस्य वक्ष्यमाणत्वात् शरीरव्यापार इत्यस्यार्थान्तरमाह-**रोमाञ्चादिरिति ।** अनेन "भाव इङ्ग्यते येन तदिङ्गितमि"ति व्युत्पत्ति सूचिता ।

(निराकरणभाष्यम्)

नेत्याह । क्रिया नाम सा ॥

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः ? ॥

(प्रदीप.) शुक्लो नील इति । द्रव्यस्य प्राधान्यात् गुणमात्राभिधायिनोऽत्र शुक्लादयो द्रष्टव्या ॥

(तत्त्वालोक) भाष्ये—दस्य उत्तरमनुवदति-**नेत्याहेति ।** न (तदिङ्गितादि शब्द) इति वदति (सिद्धान्ती) इत्यर्थ । कुत इत्यत आह-**क्रियेति ।** यत (श्रोत्रभिन्नचक्षुरादिग्राह्यत्वात्) **सा** (*इङ्गितादिव्यक्तिः शब्द इति न प्रसिद्धिः किन्तु*) क्रिया (इति) प्रसिद्धि (प्राधान्येन कृदन्तधातुवाच्यत्वात्, अत इत्यर्थ । **यत्तर्हीति**- यदि तदिङ्गितादि क्रिया, न शब्द) तर्हि यः तच्छुक्लादि स (द्रव्यक्रियाभिन्नत्वात्) शब्द किमित्यर्थ । अत्र य इति वक्तव्ये प्रयुक्तस्य यदित्यस्याव्ययत्वात्साधु । **कपोत**-चित्र ।

प्रदीपे—ननु "गुणे शुक्लादय पुंसि गुणिलिङ्गास्तु तद्वति" इति कोशात् शुक्लादिशब्दाना गुणगुण्युभयवाचकतया अत्र के वाच्या इत्यत आह—**द्रव्यस्येति । मात्रेण** गुणवद्द्रव्यव्यावृत्ति ।

(निराकरणभाष्यम्)

नेत्याह । गुणो नाम सः ॥

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं, स शब्दः ? ॥

(प्रदीप) भिन्नेष्वभिन्नमिति । अनेन सामान्यस्यैकत्व कथ्यते ॥ **छिन्नेष्वच्छिन्नमिति ।** अनेन तु नित्यत्वम् ॥ **सामान्यभूतमिति ।** सत्ताख्य महासामान्य गोत्वादे सामान्यविशेषस्यो पमान निर्दिष्टम् । सामान्यमिव सामान्यभूतम् । भूतशब्द उपमार्थे, यथा—पितृभूत इति ॥

(उद्द्योतः) एकत्वमिति । अनेकसमवेतत्वस्याप्युपलक्षणम् । नित्यत्वेन संयोगनिरासः । एकत्वेन प्रत्यभिज्ञानप्रत्यक्षरूपं प्रमाणं दर्शितम् ॥ भूतशब्दप्रयोगानुपपत्तिं परिहरति—**सत्ताख्यमिति ।** एवं हि वृक्षत्वादाम्र इत्यादावस्ते । सामान्यश्रुते सर्वसामान्यविषयत्वेन प्रवृत्ताया सङ्कोचे कारणाभावाच्च । उपमाकथनस्य प्रकृतेऽनुपयोगाच्च । अध्याहारे गौरवाच्च नेदं युक्तम् । किं तु स्वरूपवाची सः । वृद्धिसंज्ञासूत्रस्थभाष्यप्रयोगस्य **'प्रमाणभूत'** इत्यस्य स्वयं करिष्यमाणव्याख्यानरीत्याऽस्यापि व्याख्यानसम्भवात् ॥ पितृभूत इत्यत्राप्यन्य**त्रान्यशब्दप्रयोगः सादृश्यपर** इति सादृश्यप्रतीतिर्न त्वस्य सादृश्यवाचकत्वे मानमस्तीति दिक् ।

(तत्त्वालोकः) भाष्ये-स तदनुवदति-**नेत्याहेति ।** न तच्छुक्लादि शब्द इति वदति (स) इत्यर्थः । कथमित्यत आह—**गुण इति ।** यतः (श्रोत्रभिन्नचक्षुर्ग्राह्यत्वात्) स (शुक्लादिः शब्द इति न प्रसिद्धम्, अपि तु गुण (इति) प्रसिद्धम् (द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वाद्, अतः) इत्यर्थः । ननु शब्दरूपयो गुणत्वेनाभेदात् शब्द इव रूपेऽपि शब्दशब्दव्यवहारः कुतो नेति चेन्न, तयो गुणत्वेनाभेदेऽपि शब्दशब्दव्यवहारार्थं नाप्रयोजकस्य श्रोत्रग्राह्यगुणत्वस्य शब्दातिरिक्तेऽसत्त्वात् **यत्तर्हीति**-(यदि तच्छुक्लादि गुणः न शब्द) तर्हि यत् (तस्य सकलगोषु सर्वदा वृत्त्यैक गोत्वं) तत् (द्रव्यक्रियागुणान्यत्वात् शब्दः किमित्यर्थः ।

प्रदीपे-**तुना** उक्तवैलक्षण्यं बोध्यते । सत्ताजाते द्रव्यगुणकर्मवृत्तित्वात् सकलजात्यपेक्षया अधिकदेशवृत्तित्वेत्याशयेनाह-**महेति । सामान्यभूतं**-महासामान्यसदृशम् । प्रकृतसामान्यशब्दस्य महासामान्यपरत्वात् । **उपमार्थे**-सादृश्ये । **पितृभूतः**-पितृसदृशः ।

उद्द्योते—कैयटस्य न्यूनतां निरसितुमाह-**अनेकेति ।** एतावता एकत्वे सति नित्यत्वे सति अनेकनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तिता तत्त्वं सामान्यलक्षणं सूचितम् । तत्रात्यन्ताभावेऽतिप्रसक्तिनिरासाय समवायेति । गगनपरिमाणादावतिव्याप्तिवारणायानेकनिरूपितेति । द्वितीयसत्यन्तकृत्यमाह—**संयोगनिरास इति ।** अनेन विभुद्वयसंयोगास्वीकारः सूचितः । अन्यथा नित्ये तत्रातिप्रसक्त्युदासाय संयोगभिन्नत्वे सतीति, पटादावतिव्याप्तिवारणाय नित्यत्वे सतीति च सम्ब्येत । प्रथमसत्यन्तस्य व्यावर्त्तकत्वाभावात् स्वरूपपरिचायकतामात्रमिति सूचयितुमाह—**एकत्वेनेति । प्रत्यभिज्ञा**-सोऽयं गौरित्याद्याकारिका । **प्रमाणमिति**-गोत्वादिसामान्यसद्भावे इत्यादि । कैयटकथितं कर्त्तयति-**एवं हीति ।** सामान्यविशेषयोरुपमानोपमेयभावस्वीकारे हीत्यर्थः । एतदन्वितपक्ष्यन्तानां नेदं युक्तमित्यत्र सम्बन्धः । **सामान्यश्रुते**-(अत्र) सामान्येतिशब्दश्रवणस्य । **सर्वसामान्येति**-सामान्यविशेषरूपसकलजातीत्यर्थः । **सङ्कोचे**-महासामान्यमात्रपरत्वे । **अध्याहारे इति**-गोत्वादिरूपजातिविशेषवाचकशब्दस्येव (द । **इदम्**-सामान्यविशेषयोरुपमानोपमेयभावाङ्गीकरणम् । प्रकृते सामान्यभूतेतिशब्दश्रवणेन इतिति बोधोपपत्तये भूतशब्दस्यार्थान्तरपरतामाह-**किन्त्विति । सः**-भूतशब्दः । ननु तस्य स्वरूपवाचकत्वे मानाभाव इत्यत आह-**वृद्धिसंज्ञेति । व्याख्यानेति**-"प्रामाण्यं प्राप्त इत्यर्थः । भू प्राप्तावित्यस्याऽऽधृषादेति णिजभावे रूपम् । वृत्तिविषये च प्रमाणशब्दः प्रामाण्ये वर्त्तते ।' इति व्याख्यानेत्यर्थः । **अस्य**-सामान्यभूतशब्दस्य । **सम्भवात्**-सम्भवाच्च । तथा चात्र सामान्यशब्दस्य सामान्यपरतया, प्राप्त्यर्थकभूधातो "आ धृषाद्" इति णिजभावे क्त प्रत्यये च सिद्धस्य भूतशब्दस्य प्राप्त्यर्थकतया च सामान्यभूतमित्यस्य सामान्यत्वं प्राप्तमित्यर्थः । ननु पितृभूत इत्यत्रेवात्रापि भूतशब्दस्य सदृशवाचकता कुतो नेत्यत आह-**पितृभूत** इति । **इति** इति न्यायेन । **अस्य**-भूतशब्दस्य । **दिगिति**-एतदर्थस्तु प्रकृते सामान्यञ्च तद्भूतञ्चेति कर्मधारयः । तथा गोत्वादिसामान्यस्यागवादिव्यावृत्तरूपत्वे तस्यायं गौरयं गौरित्याद्यनुगताकारप्रतीतिविधिमुखप्रवृत्तशब्दविषयत्वायोगेन प्रामाणिकत्वापानात् तस्य तद्रूपताव्यावर्त्तनाय परमार्थवाचको भूतशब्द उपात्त इति बोध्यः ।

(निराकरणभाष्यम्)

नेत्याह । आकृतिर्नाम सा ॥

(उद्द्योतः) भाष्ये—**आकृति**र्जाति संस्थानं च । आक्रियते व्यवच्छिद्यते स्वाश्रयोऽनयेति व्युत्पत्तेरिति भावः ॥ शङ्कापरभाष्ये **सामान्यभूत**मित्यस्य तद्व्यञ्जकं चेत्यप्यर्थो बोध्यः ॥ जातिमात्रपरत्वे **'जात्याकृतिव्यक्तयस्तु पदार्थः'** इति गौतमसूत्रेण तस्यापि पदार्थत्वबोधनात्, प्रत्यक्षादौ तद्भानाच्च, तस्य शब्दत्वाशङ्कातत्समाधानाभावेन न्यूनता स्यात् ॥ **सिद्धे शब्दार्थेति** वार्तिकव्याख्याने भाष्ये तस्यापि पदार्थत्वम् । नियत्वं च कैयटो वक्ष्यति । **तदभिन्नाभिन्नस्य तदभिन्नत्व**मिति न्यायस्तु यत्र स्वाभिन्नद्वारकं स्वस्वरूपानुगमस्तद्विषयः । यथा **परमकारणकार्यो**पादानकं परमकारणाभेदः । अत एव सुवर्णद्वयोर्नैक्यम्, नापि कुण्डलकटकयोस्तत् । कुण्डलारम्भकस्वर्णावयवानुगमस्य कटकेऽभावात् । एवं गुणसमूहस्यानुद्भूतावयवभेदस्य वाच्यत्वेऽपि समूहिना तत्तद्रूपेणावाच्यत्वान्न तेषां शब्दत्वशङ्केति भावः ॥

(तत्त्वालोकः) भाष्ये—उत्तरमनुवदति तटस्थ—**नेत्याहेति ।** न (तस्य गोत्वं शब्द) इति वदति (सिद्धान्ती) इत्यर्थः । कस्मादेवमित्यत आह—**आकृतिरिति ।** यतः (श्रोत्रभिन्नचक्षुरादिग्राह्यत्वात्) सा गोत्वादिव्यक्तिः शब्द इति न प्रसिद्धम्, किन्तु आकृति(जातिरिति) प्रसिद्ध (नित्यत्वे सत्यनेकसमवेतत्वाद्, अतस्तथा) इत्यर्थः ।

उद्द्योते-अत्राकृतिशब्दस्य न जातिमात्रपरता, जातिशब्दमनुपादाय आकृतिशब्दोपादाने तत्र जातिसंस्थानोभयबोधकतारूपस्यैव बीजस्य सत्त्वादित्याशयेनाह-**संस्थानमिति ।** अवयवसंयोगविशेष इत्यर्थः । प्रकृते संस्थानं गुणक्रियादिमत्सास्नाद्यवयवसन्निवेशविशेषरूपगवाकारः । अत्रोत्तरपरभाष्ये आकृतिशब्देन गृहीते संस्थाने शब्दत्वनिराकरणस्य सङ्गतये "प्राप्तौ सत्यां निषेधः" इति नियमेन तत्र शब्दत्वशङ्कोपपत्तेरावश्यकतयाऽऽह-**शङ्कापरभाष्ये इति । तद्व्यञ्जक**—सामान्यज्ञापकं (संस्थानम्) । एवंव्याख्याने युक्त्यन्तरमाह—**जातिमात्रपरत्वे इति ।** आकृतिसामान्यभूतशब्दयोरित्यादि । **पदार्थ इति**—"गौर्न पदा स्प्रष्टव्ये"त्यत्र जातिः पदार्थो व्यक्त्याकृती विशेषणे । "पिष्टकमय्यो गावः" इत्यत्राकृतिः पदार्थो जातिव्यक्ती विशेषणे । "गौर्गच्छती"त्यत्र व्यक्तिः पदार्थो जात्याकृती विशेषणे इति बोध्यम् । **तस्य**—संस्थानस्य । **बोधनादिति**—अत एव "गा लिपे" त्यादौ गवाकारस्य लेखनकर्मत्वोपपत्तिः । **तद्भानात्**—संस्थानभानात् । **स्यादिति**—केचित्तु अवयवसंयोगविशेषरूपसंस्थानस्य गुणत्वादेव तत्र शब्दत्वशङ्कासमाधानयोरुपपन्नतया न भाष्यकृतो न्यूनता, न वा प्रकृते आकृतिशब्दस्य जातिसंस्थानोभयपरतेति वदन्ति । संस्थानस्य पदार्थत्वे भाष्यकृत्सम्मतिमाह-**सिद्धे इति । तस्यापि**—संस्थानस्यापि । **पदार्थत्वमिति**—कथितमिति शेषः । ननु तदभिन्नाभिन्नस्येति न्यायेन क्रियादिषु विहिताया शब्दत्वशङ्काया 'नेत्याह । क्रिया नाम सेत्यादिरीत्या निराकरणे तस्य न्यायस्य निर्विषयत्वापत्तिरस्तरेण तेषां भेदबोधनादित्यत आह-**तदभिन्नेति । स्वेति**—कारणेत्यर्थः । **परमेति**—परमकारण

मूलप्रकृतिः, तत्कार्यं महत्तत्त्वम्, तदुपादानके अहङ्कारे, इत्यर्थः। अत एव-तस्य व्यापकस्य तादृशविषयत्वादेव। तत्-ऐक्यम्। कुत एतमित्यत आह-कुण्डलेति। वस्तुतः कुण्डलकनकयोः कारणरूपेणाभेदः, कार्यात्मना भेदः। अत एवाह—'कार्यरूपेण नानात्वमभेदः कारणात्मना। हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा"॥ इति। एवमग्रेऽपीदृशमेव तदभिन्नेनेति व्याख्यानोदाहरणमपि बोध्यम्। यद्वा कल्पेन तत्र तच्छङ्कायामेव निराकरणार्थमाह-एवमिति। तद्वदित्यर्थः। वाच्यत्वेऽपीति-गवादिशब्दस्येत्यादि। समूहिनाम्-अवयवानाम् (इङ्गितशुक्लादीनाम्)। तत्तद्रूपेण-तत्तद्विशेषरूपेण इङ्गितत्वादिना। तेषां-क्रियादीनाम्।

(आक्षेपोपसंहारभाष्यम्)

कस्तर्हि शब्दः ?॥

(प्रदीप.) द्रव्यादिषु निरस्तेषु पृच्छति—**कस्तर्हीति**।

(उद्द्योत) **पृच्छतीति**। प्रश्नविषयविशेषान्तराभावात् सामान्यरूपेण पृच्छतीत्यर्थः।

(तत्त्वालोक) उद्द्योते—अथ "किंय शब्द्यते स शब्दः। नेत्याह, अर्थरूपं तद्" इत्येकैकेनैव सिद्धिसम्भवे किमर्थमनेकोक्तिरनुपपन्नेति चेन्न, मन्दधियां स्पष्टबोधाय तथाऽभिधानात्। तथा च श्रोत्रग्राह्यत्वाद् द्रव्यक्रियागुणसामान्यानां न शब्दत्वमिति सिद्धान्तः। पूर्वप्रश्नापेक्षया प्रकृतप्रश्ने वैलक्षण्यमाह-**प्रश्नेति**। **विशेषान्तरेति**-व्यावर्त्यशब्दत्ववदित्यादि। अत एव शब्दस्य प्रश्नयोग्यस्य सत्त्वेऽपि नासङ्गतिः।

(समाधानभाष्यम्)

येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः॥

(प्रदीप) उत्तरमाह—**येनोच्चारितेनेति**। वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्। आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्तिविशेषप्रसङ्गात्तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः।—**उच्चारितेन**। प्रकाशितेनेत्यर्थः॥

(उद्द्योत) भाष्ये **उच्चारितेनेति**। शारीरमारुताभिहतकण्ठादिस्थानैरवयवद्वाराभिव्यञ्जितेनेत्यर्थः। अत्र विप्रतिपत्तिरवयवैयाकरणेष्वुपलक्ष्यते॥ **सम्प्रत्ययो** ज्ञानम्। ननु प्रत्यायकशब्दस्य वर्णमनुद्रूपतया येनेत्येकवचनमुक्तम्। न च वर्णमित्येवम् समूहाभिप्राय तत्। समूहस्य स्थिरस्य निरूपयितुमशक्यत्वादत आह—**वैयाकरणा इति**। वर्णव्यतिरिक्तपदानभ्युपगमे एकैकस्य वर्णस्य वाचकत्वं, समुदायस्य वा, नाद्य इत्याह—**वर्णानां प्रत्येकमिति**॥ द्वितीयमनूद्य दूषयति—**आनर्थक्ये तु प्रत्येकमिति**। प्रत्येकमानर्थक्ये तु समुदायस्य वाचकत्वमुपेयम्, तत्तु न युक्तम् इति शेषः। यतस्तत्र वक्तव्यम्—उत्पद्यमानसमुदायस्याभिव्यज्यमानसमुदायस्य वा वाचकत्वमिति। तत्राद्यं दूषयति—**उत्पत्तिपक्षे इति**। उत्पत्त्यभावादित्यस्य समुदायाभावादित्यनेनान्वयः॥ द्वितीयं दूषयति—**अभिव्यक्तीति**। उत्पन्नाभिव्यक्तयोर्ध्वंसत्वादित्यर्थः॥ ननु पक्षद्वयेऽपि पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतान्त्यवर्णानुभवहेतुकैकस्मृत्युपारूढानां वाचकत्वमस्त्वत आह—**एकस्मृतीति**॥ ननु तस्य नित्यत्वे सर्वदार्थप्रतीतिप्रसङ्गो नेत्याह—**नादेति**। नादो वर्णः॥ ननु येन क्रमेणानुभूता वर्णास्तेनैव क्रमेणैकस्मृत्युपारूढानां वाचकत्वे न सर्वदार्थप्रत्ययविषयप्रसङ्ग, अन्यथा तथापि नानाशब्दस्थवर्णकवाक्याभ्युपगमात् कथं पूर्वोक्तदोषापत्तिरित्याशयेन आह—**विस्तरेणेति**। इत्येक पदमेक वाक्यमिति प्रत्ययस्य स्फोटस्वरूपे तदैक्ये च प्रमाणम्। अनुभवक्रमेणैव स्मरणमित्यर्थे दृष्टान्ताभावाच्च क्रमेणानुभूतान् व्युत्क्रमेणापि स्मरणदर्शनात्। मम तु यथा घटः नानादेशवर्तिनानावर्णोत्पत्तिजनकः, तथा एकोऽपि मनुष्यः तत्तन्निमित्तजन्यज्ञानाश्रयः। न तच्च वर्णं वस्त्वनुरोधात् स च स्थिरः, तस्य च मनसा ग्रहणमिति न दोषः॥ अत्र येनेत्येकवचनेन विषाणिनामिति बहुवचनेन चार्थोच्चारणविषयत्वेऽपि स्फोटस्यैकत्वं सूचितम्। एवं च तेनैव दृष्टान्तेन घटपटादिबोधकसामान्येन वाचकस्यैकत्वं सूचितम्। भेदप्रत्ययस्त्वौपाधिक इत्याद्यस्मत्कृतमञ्जूषायां शक्तिवादे द्रष्टव्यम्॥ नन्वेवं तस्य तात्वोष्ठपुटव्यापारविषयत्वाभावादुच्चारितेनेत्ययुक्तमत आह—**प्रकाशितेनेति**। व्यञ्जकैरिति शेषः॥

(तत्त्वालोक) भाष्ये-ज्ञानसङ्केतग्रहस्यापि पदस्य नानार्थस्य बोधकत्वाभावादाह-**उच्चारितेनेति**। सः-स्फोटः। तथा च शब्द्यते येनेति व्युत्पत्त्या घटादिरभिप्रेत इत्याह-**शब्द इति**।

प्रदीपे-**उत्तरमिति**-सिद्धान्तत्वादिति। पदस्यापि कल्पितत्वादाह-**वाक्यस्य वेति**। **पक्षे तु**—पक्षेऽपि। उभयत्र स्फोटकारणभूतानां साम्यादाह-**अविशेषेति**। तदिति-वर्णत्वात् इत्यर्थः। **व्यवस्थापित इति**-तथा च स्फोटाभिप्रायेणैव येनेत्येकवचनप्रयोग इति भावः।

उद्द्योते—**अवयवद्वारेति**-इदं सखण्डस्फोटस्थम्। अखण्डस्फोटस्य तु साक्षात्। **लक्ष्यन्ते इति**-अनेन न्यूनता निराकृता। **ज्ञानम्**-अनुभवरूपम्। केचित्तु 'एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयति'' इति नियमेन पदज्ञानं परं ज्ञायमानोऽर्थसम्प्रत्ययः स्मरणात्मक एव भवतीति वदन्ति, तन्न, पदार्थोपस्थितेः स्मृतित्वस्य मञ्जूषायां खण्डितत्वात्। **समूहाभिप्रायम्**-अनुद्भूतावयवविशेषवर्णसमुदायतात्पर्यकम्। **तत्**-एकवचनम्। **समूहस्येति**—तद्वदनेत्यादि। **स्थिरस्य**-चिरस्थायिनः। वर्णानामुत्पत्तेरभिव्यक्तेर्वा यौगपद्यासम्भवात् क्रमिकत्वात् तेषां क्षणिकत्वात् अवयवानामपि पूर्ववर्णानवस्थानादाह-**अशक्यत्वादिति**। **द्वितीयमनूद्य दूषयति**-आद्यपक्षं तु विनैव द्वितीयम् निराकरोति। आद्यमाह—**प्रत्येकमिति**-वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णानां वैयर्थ्यमित्यर्थः। शेषं पूरयति-**समुदायस्येति**। **तत्तु**—तदपि। **तत्र**—समूहस्य वाचकत्वे। **तत्रेति**-तत्रेत्यर्थः। **उत्पद्यमानेति**—उत्पद्यमानानां समुदाय इति विग्रहः। एवमग्रेऽपि। क्रमेणैवोत्पत्तौ युक्तिमाह-**उत्पन्नेति**। उत्पत्तिश्चेत्यभिव्यक्तिरिति व्युत्पत्तिः। सशब्दस्य समवाचकत्वात्तथा पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतचरमवर्णस्य वाचकत्वासम्भवात्प्रकारान्तरमाह—**पूर्वपूर्वेति**। सा च पक्षद्वयेऽपि समुपपत्तिरिति भावः। **तस्य**-स्फोटस्य। **वर्ण इति**-अनेन ध्वनिनिरस्तः। वर्णमात्रत्वे ध्वनौ साक्षात् स्फोटाभिव्यञ्जकत्वाभावादित्याशयः। **प्रसङ्ग इति**—तथा च स्फोटो नाभ्युपेय इति भावः। **अन्यथा**-अनुभवक्रमेण स्मृतिविषयत्वानभ्युपगमे। **त्वया**-स्फोटवादिना। **पूर्वोक्तेति**—अर्थप्रतीत्यविशेषप्रसङ्ग इत्यर्थः। अत आह—"यैस्त्वानन्तर्यमाप्तो व्यज्यते वर्णबुद्धिभिः। सोऽपि पर्यनुयोगेन

१ यस्येति-तेनेति शेषः। २ पर्यनुयोगेन-प्रश्नेन।

न केनापि विमुच्यते ॥" इति । तदैक्ये-स्फोटैक्ये । हेत्वन्तरेण स्फोट ससाध्य वर्णसमुदायस्य वाचकत्वादिमते नदी, दीन इत्याद्यर्थ प्रतीत्यविशेषप्रसङ्गरूपदोषदानाय अनुभवक्रमविपरीतक्रमेण स्मरण विषयतामुपपादयितु युक्तिमाह—अनुभवेति। अत आह—"नानु भूतिक्रमाद्वर्णा क्रमिका स्मृतिगोचरा । गोचरोऽनुभवो न स्यात्त क्रमस्ते कुत पुन ॥" इति। दर्शनादिति—तृतीयदिनानुभूतकृष्ण मूर्ति विहाय द्वितीयदिनानुभूतरामप्रतिमास्मृतिश्चल इति भाव । अथैवस्फोटवादिनस्तवैव कथ सामाञ्जस्यमित्यत आह—मम त्विति। तस्मिन्—स्फोट। क्रमेणेति-न तु व्युत्क्रमेणेति भाव। स-स्फोट । स्थिर इति-अत एव न वर्णवत् क्षणिकताप्रयुक्तानु पपत्ति । स्फोटस्य श्रोत्रग्राह्यत्वादाह—तस्येति । स्फोटस्येत्यर्थ । अत्र-भाष्ये । विभिन्नोच्चारयितृकतया विभिन्नविषयकतया चोच्चारण स्यानेकत्वेनाशयेनाह—अनेकोच्चारणेति । सूचितमिति—तथा च विषाणिनामित्यत्र प्रश्नवाक्य एकवचनमेव कुतो नेति जिज्ञासा निरस्ता। एवञ्च-स्फोटस्यैकत्वसूचने च। वाचकस्य-स्फोटस्य। सूचितम्—समुचितम् । नन्वेव कथ घटपटादिशब्दाना परस्पर भेदप्रतीतिरित्यत आह-भेदप्रत्यय इति। औपाधिक —घपादि वर्णात्मकोपाधिभेदप्रयुक्त । एव—स्फोटस्य वर्णातिरिक्तत्वे। तस्य-स्फोटस्य। वर्णाना बहुत्वाद् वर्णैरेव व्यञ्जनात् स्फोटादर्थबोधस्वेष्ट त्वाच्चाह—अभीति। नन्वलौकिकस्फोटस्य शब्दपदार्थत्वे लौकिक शब्दानुशासनप्रतिज्ञा विरुध्येतेति चेन्न, व्यञ्जकानुशासनद्वारा व्यङ्ग्या नुशासनस्यैव विवक्षणात् ॥

(समाधानान्तरभाष्यम्)

अथवा-प्रतीतपदार्थको लोके ध्वनि शब्द इत्यु च्यते। तद्यथा शब्द कुरु, मा शब्दं कार्षीः, शब्द- कार्यय माणवक', इति ध्वनि कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्द ॥

(प्रदीप) अथवेति। अयत ध्वनिस्फोटयोर्भेदस्य व्यवस्थापि तत्वादिहाभेदेन व्यवहारे पि न दोष, द्रव्यादयो न शब्दशब्दवाच्या इत्यत्र तात्पर्यात्। ध्वनिं कुर्वन्निति। विधिनिषेधयोरप्रवृत्तविषयत्वा त्कथमस्य त्रिभि सबन्ध । उच्यते—शब्द कुर्वन्नपि शब्द कुर्वित्युच्यते विरामाशङ्कायां तन्निवृत्तये। तथानभिमतशब्दश्रवणोद्वेजितेनोच्यते— मा शब्द कार्षीरिति ॥

(उद्द्योत) भाष्ये अथवा प्रतीतपदार्थक इति। लोके व्यव हर्तृषु पदार्थबोधकत्वेन प्रसिद्ध श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णरूपध्वनिसमूह एव शब्द इत्यर्थ । तत्पदार्थबोधकताया विचारितरमणीयस्यैव लोके सिद्धा तादृशस्यैव शास्त्रेणानुशासनमिति तात्पर्यम्। तदाह—अस्ये- ति। मयहादौ तपरसूत्रे भाष्ये चेत्यर्थ। ध्वनिपदेनात्र दानवैखरी, स्फोटपदेनाभिव्यक्तक्रवादिको मध्यमावस्थ आन्तर शब्द उच्यते॥ कथमस्येति। कुर्वनि यस्य वर्तमान र्थत्वादि यर्थ ॥

(तत्त्वालोक) भाष्ये—नन्वेवमर्थप्रत्यायकतया मनोग्राह्यस्फोटस्य शब्दत्वे श्रोत्रग्राह्यगुणत्वस्य शब्दलक्षणस्यानुपपत्ते,विरहेऽयत चार्थप्र त्यायकतया वर्णानामशब्दत्वे तथा शब्दशब्दव्यवहार्यतेत्यत आह— अथवेति। पदार्थ एव पदार्थक । स्व र्थे कन्। प्रतीतशब्द पदार्थक इति व्युत्पत्ति । पदार्थकशब्दस्य पदार्थबोधके लक्षणा। अथवा प्रतीत पदार्थो यस्मादिति विग्रह । लक्षणाकरणलाघवात्। ध्वनि —कादि वर्णात्मक । एवमग्रेऽपि। अनुभवादिना वर्णस्थल आवश्यकतामुपेतै ध्वनिभिरेव स्फोटाभिव्यक्तिसम्भवे तदतिरिक्तवर्णाङ्गीकारे गौरवाद् ध्वनय एव वर्णा इति भाव । उच्यते इति-अनेनात्रोक्तरे सिद्धा न्तसम्मति सूचि ।। अन्वयव्यतिरेकाभ्यां ध्वने शब्दतासाधनाय हानोपादानोपेक्षारूपत्रिविधव्यवहारे तस्य शब्दताप्रसिद्धिमुपपादयति- तद्यथेति। ध्वनिं कुर्व न्नत्येवमुच्यत इत्यन्वय । अथवा ध्वनिं कुर्वन्ने वमुच्यते इतीति योजना। वाक्ये एववाचक एवमिति। तस्माद्— लोकव्यवहारात् ।

प्रदीपे-दोष —अभेदापादनरूप । तर्हि तस्य व्यवहारस्य कोऽभि प्राय इत्यत आह—द्रव्यादय इति। प्रवृत्तप्रति प्रेरणानिषेधयो वैयर्थ्यसम्भवादाह-अप्रवृत्तेति। अस्य- वान कुर्वन्नित्यस्य। एके नान्वयसम्भवेऽपि समूहन तदसम्भवादाह—त्रिभिरिति । शब्द कुरु इत्यादित्रिवाक्यत्रयेण यर्थ ।

उद्द्योते—लोके इत्यस्यार्थमाह—व्यवहर्तृष्विति। अत्र पदार्थ शब्दलक्ष्यार्थघटकबोधे प्रतीतशब्दार्थघटकप्रसिद्धौ वा सम्बन्ध । वर्ण- रूपेति—वर्णात्मका ध्वनौ तत्समूहे च बोध्या। ननूक्तस्थितौ कथ ध्वनेरतत्समूहस्य चार्थबोधकता समवनीयत आह—तस्येति। ध्वनेस्तत्समूहस्य चेत्यर्थ । नन्वेव कथ ध्वनेस्तत्समूहस्य च शब्द त्वाङ्कीरत आह—तादृशस्येति । अविचारितरमणीयस्येत्यर्थ । एतेन तद्दस्य वैयर्थ्य सूचितम्। अत्र-कैयट। दानवैखरी—वैखरी नाद (श्रोत्रग्राह्य)। नादवैखरीति पाठो युक्त ।

(इत्यनुशासनीयशब्दनिरूपणाधिकरणम्)

(शब्दानुशासनशास्त्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुन. शब्दानुशासनस्य प्रयोजनानि ? ॥

(प्रदीप) कानि पुनरिति। किं सन्ध्योपासनादिवद्व्याकरणा ध्ययन नित्य कमाथ काम्यमिति प्रश्न ॥

(उद्द्योत) भाष्ये कानि पुन शब्दानुशासनस्येति। शब्द- ज्ञानफलकव्याकरणाध्ययनस्ये यर्थ । तदाह—किं सन्ध्येति। शब्द ज्ञानद्वारा अ ययनस्य तदज्ञानप्राप्तप्र यवायपरिहार फलमुत तदतिरि क्तमपि किंचिदिति प्रश्नाशय इ यर्थ ॥ प्रयोजनश द करणव्युत्पत्त्या प्रयोजकपरोपि।तेन व्याकरणाध्ययनस्य प्रयोजक किंचिदस्ति न वेत्यपि प्रश्नाशयो बोध्य ॥ अत एवोत्तरे आगमपदोप दानम्॥ नपुसकमन- पुसकेने येकश्च । तत्रैकवद्भावस्य वैकल्पिक व त्प्रश्ने बहुवचनमुत्तरे एकवचन बोध्यम् ॥

(तत्त्वालोक) भा ये-अथा येऽध्यानधीनेऽर्थविषयत्वात् स्वन पुरुषार्थयो सुखस्य दु खाभावस्य च साक्षात् परम्परया वा साधन तया सर्वैर मास्यायावश्यसाधनीयतया प्रश्ने व्याकरणाध्ययनेन साधुशब्दज्ञानद्वारा तज्ज्ञानद्वारा तदज्ञानत्पापक्षयात्मकादृष्टकार्यमात्र तद्द्वारादृष्टादृष्टकार्याणि सम्पाद्य स्वर्ग पुरुषार्थसाधन धर्मादि साधयतीति जिज्ञासया पृच्छति-कानीति। पुनरिति—विशेषेत्यर्थ.। सामान्येन प्रयोजनस्य साधुशब्दज्ञानस्योक्तत्वात् । अथवा पश्चात् (साधुशब्दज्ञानान्तरम्) इत्यर्थ ।

प्रदीपे—नित्यमिति—अत्र नित्यत्व न ध्वंसाप्रतियोगित्व सति प्रागभावाप्रतियोगित्वम्, कर्मत्वेन उन्ये सन्ध्यादावभावे । नापि दैनिकानुष्ठानविषयत्व तत्, तथा सति 'वसन्ते वसन्ते ज्योतिषा यजेत"ति श्रुत्या वसन्तमात्रानुष्ठानविषये ज्योतिष्टोमयागेऽव्याप्ते ।

---

१ गोचर इति-अनुभवान्तरेत्यादि । २ तदिति-अनुभवेत्यर्थ ।

माप्यनायनन्तफलत्वं तद्, एवं सति "अग्निहोत्रं जुहुयात् स्वर्गकाम" इति श्रुत्या जन्यस्वर्गफलके ग्निहोत्रेऽव्याप्ते । किन्तु अकरणे पापजनकत्वे सति करणे फलविशेषजनकत्वं नित्यत्वम् । एवं काम्यत्वमपि न कामनाविषयत्वम्, तथा सति जानाति, इच्छति, यतते इति क्रमस्य सत्त्वेन प्रवृत्तिविषयमात्रे काम्यत्वापत्तेः । किन्तु अननुष्ठाने प्रत्यवायासाधनत्वे सति अनुष्ठाने फलविशेषजनकत्वं तद् । एवम् अननुष्ठाने पापजनकत्वे सति करणे फलविशेषजनकत्वं नैमित्तिकत्वमिति बोध्यम् ।

उद्द्योत—व्याकरणस्य स्वरूपतः रक्षाद्यसाधकत्वात् प्रकृते शब्दानुशासनशब्दस्य व्याकरणात्मकरूढ्यर्थपरतायाः अनुपपत्त्या तस्य लक्ष्यार्थमाह—**शब्दज्ञानेति । तदाहेति**—लक्ष्यार्थमनुसृत्य वदतीत्यर्थः । व्याकरणाध्ययनस्य साधुशब्दज्ञानरूपसाक्षात्प्रयोजनस्योक्ततया अथ प्रश्न, तस्य पारम्पर्यप्रयोजनजिज्ञासयेत्यभिप्रेत्याह—**शब्द-ज्ञानेति । अध्ययनस्य**—व्याकरणाध्ययनस्य । **तदिति**—साधुशब्देत्यर्थः । **तदिति**—तादृशप्रत्यवायपरिहारेत्यर्थः । **अपिना** तादृशपापपरिहारस्य समुच्चयः । **किञ्चिदिति**—फलमिति शेषः । तथा च व्याकरणाध्ययनस्याद्यपक्षे नित्यता, द्वितीयपक्षे काम्यतेति फलितम् । **उत्तरे** प्रवर्त्तकागमोल्लेखानुरोधादाह—**प्रयोजनेति । करणेति**—प्रयुज्यते प्रवर्त्यतेऽनेनेत्यर्थः । कश्चित्तु प्रयोजनानीति कर्तृल्युटा बाहुलकात् कर्तृल्युडन्तस्य प्रयोजनशब्दस्य प्रवर्त्तकपरतां कथयन्ति । **अपिना** फलपर इत्यस्य समुच्चयः । अत्र प्रयोजकपरः प्रयोजनशब्दः पुंलिङ्गः । फलपरो परः स क्लीबलिङ्गः । अत एवोभयोरेकशेषं वक्ष्यति "नपुंसकमि"त्यनेन । तथा च रक्षोहलघ्वसन्देहा व्याकरणाध्ययनस्य शब्दज्ञानद्वारा फलानि, तथा आगमः तस्य प्रयोजक इति भावः । **तेन**—प्रयोजनशब्दस्य प्रवर्त्तकपरत्वेन । **प्रश्नाशय इति ।** साधुशब्दज्ञानं पारम्पर्यभिन्नमपि किञ्चिद् व्याकरणाध्ययनस्य प्रयोजकमस्ति, अथवा तदात्मकमेवास्तीति प्रश्नाशय इत्यर्थः । **अत एव**—प्रवर्त्तकविषयेऽपि प्रश्नसत्त्वादेव । **एकशेष**-प्रयोजनश्च प्रयोजनानि चेति विग्रहे प्रयोजनानान्यस्य सिद्धये क्लीबलिङ्गस्य तस्यैकशेषः । ननु प्रश्नोत्तरयोः कुतो वचनभेद इत्यत आह—**तत्रेति ।** एकदेशे इत्यर्थः । **प्रश्ने**—"कानी"ति भाष्यस्थे । **उत्तरे**—"रक्षोहे"ति भाष्यस्थे ।

(समाधानभाष्यम्)

रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ॥

(रक्षापदार्थनिरूपणभाष्यम्)

रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति ॥

(प्रदीप) पारम्पर्येण पुरुषार्थसाधनतामस्याह—**रक्षेति ।** लोके लोपादृष्ट पदे दृष्ट्वा भ्राम्येदवैयाकरण, वैयाकरणस्तु न भ्राम्यति वेदार्थं चाध्यवस्यति । तत्र **लोपागमयोरुदाहरणं देवा अदुहेति ।** दुहेर्लङो झस्यादादेशे कृते **लोपस्त आत्मनेपदेष्विति** तलोप, **बहुलं छन्दसीति** रुटि सति रूपमेतत् । **वर्णविकारो यथा—उद्ग्राभं च निग्राभं चेति । हृग्रहोर्भश्छन्दसि हस्येतिवक्तव्यमिति** हस्य भकारः । **उदि ग्रह** इत्यत **उद्ग्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातन-योरिति ।** वचनादुन्निपूर्वाद्ग्रहेर्घञ् ॥

(उद्द्योत) **पुरुषार्थो** धर्मो मोक्षश्च ॥ शिष्याचार्यसम्बन्ध एव महान् वेदरक्षाहेतुः, किं व्याकरणेनेत्यत आह—**लोके इति ॥ भ्रा-म्येदिति ।** भ्रमेण पाठान्तरं कल्पयेदित्यर्थः । न चाचार्यवचनाद् भ्रमनिवृत्तिः, अप्रामाण्यशङ्कया तेष्वविश्वासात् ॥ वेदार्थावगमद्वारापि व्याकरणं पुरुषार्थसाधनमित्याह—**वेदार्थं चेति ।** एवं च वेदार्थज्ञानपूर्वकं शुद्धतत्तन्मन्त्रैस्तद्विहितकर्मानुष्ठानेन स्वर्गसुखम्, उपनिषदर्थज्ञाने न वेदयमानारीत्या मोक्षश्च पुरुषार्थो व्याकरणाध्ययनस्य फलमिति भावः ॥ **विकार इति ।** लोपस्तु न विकार इति पृथग्गणित । भावरूप एव चादेशोऽत्र विकार ॥ **हृग्रहोर्भ इति ।** इदं च दृष्टान्तव्याचर्यमात्रपरम् । एतेन 'उद्ग्राभनिग्राभौ चेत्यनेनैव भस्यापि सिद्धत्वादेतदुपन्यासश्चिन्त्य' इति परास्तम् । अन्यार्थमावश्यकेन तेनैव भस्य सिद्धौ तदंशे निपातनाश्रयणवैयर्थ्यं तु निरूढलक्षणविषयकाभावादाह—**उद्ग्राभनिग्राभौ चेति ॥**

(तत्त्वालोकः) भाष्ये **रक्षोहेति**—व्याकरणाध्ययनप्रयोज्यसाधुशब्दज्ञानस्य रक्षादयो दृष्टप्रयोजनमित्यर्थः ।

रक्षार्थमिति—अत्रार्थशब्दः प्रयोजनवाचकः । तथा व्याकरणाध्ययनेन साधुशब्दज्ञानद्वारा रक्षायाः असम्भवाद् **वेदानामि**त्यनन्तरं व्याकरणेनाध्यापनेन स्वरूपतो वेदरक्षाया दुःसाध्यत्वादाह—**अध्ये-यमिति ।** शब्दानुशासनशब्दमुपादाय कृते प्रश्ने व्याकरणशब्दमुपादाय कृतेनोत्तरेण तयोः पर्यायता सूचिता । ननु व्याकरणस्य पाठाय पदरूपाध्ययनेन कथं वेदरक्षा स्यादित्यत आह—**लोपेति ।** अस्य प्रकृतिप्रत्ययविभागादेरप्युपलक्षणतया प्रकृते व्याकरणाध्ययनं न पाठमात्रं विवक्षितम्, किन्तु तदर्थावबोधपर्यन्तम्, तथैव हि तादृशाध्ययने अज्ञानादिनिवृत्त्या वेदरक्षा सम्भवति नान्यथा । अत एव च "ब्राह्मणेन निष्कारण" इति श्रुतौ "ज्ञेयश्चे"ति प्रत्यपादि ।

प्रदीपे—व्याकरणाध्ययनेन साधुशब्दज्ञानद्वारा तदज्ञानजपापक्षया दिरूपादृष्टानि वेदरक्षादिरूपदृष्टानि च कार्याणि सम्पाद्य स्वतः पुरुषार्थसाधनं धर्मादि साधयतीति तदर्थेनेत्यभिप्रायेणाह—**पारम्पर्येणेति । अस्य**—व्याकरणाध्ययनस्य । **भ्राम्येदिति** लोके आनन्ता, देवाः, अदुहत, उद्ग्राहमित्यादावदृष्टम् आगमम्, अनुगागमम्, लोपम्, आगमौ, आदेशम्, क्रमशो वेदे त्वनन्ता देवेषु, देवास आदुणान, अदुह, उद्ग्राभमित्यादौ विलोक्य तत्र तत्र वैदिकपाठं परित्यज्य लौकिकपाठं कल्पयेदित्यर्थः । **न भ्राम्यतीति**—प्रत्युत "मन्त्रेष्वाङ्यादेरात्मन" इत्यनेन आकारलोपं तथा "आज्जसेरसुगि"त्यादिना तत्राद्यागमादिं जानातीति भावः । **तत्र**—लोपादीनां मध्ये । लोपागमयोरुक्तयो पृथक् पृथगुदाहरणस्य सत्त्वेऽपि लाघवादेकमाह—**लोपागमयोरिति ।** केवलस्य वर्णविकारस्य गृभ्णामीत्युदाहरणसत्त्वेऽपि विशेषं दर्शयितुं घञादिप्रत्ययसंवलितस्य तस्योदाहरणमाह—**उद्ग्राभञ्चेति ।** "उद्ग्राभं चेति जुहूमुद्यच्छतीति, निग्राभं चेति उपभृतं नियच्छती"ति वचनात् जुहूपभृतोरेव ग्रहणम्, ताभ्यां न स्रुचोरिति बोध्यम् ।

उद्द्योते—**पुरुषार्थ**—स्वतः पुरुषार्थसाधनम् । **चेनार्थकामयोः** संग्रहः । अत एव "ऋत्विजस्य हि आर्त्विज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसुखसिद्धिः फलमि"ति उद्द्योते वक्ष्यति । **शिष्याचार्यसम्बन्ध**—गुरुशिष्यपरम्परा । **व्याकरणेन**—व्याकरणाध्ययनेन । नन्वस्तु भ्रमः, तेन क्षत्यभावादित्यत आह—**भ्रमेणेति । भ्रंशेति**—पाठभ्रंश इत्यर्थः । आम्नातमिति पठितव्ये प्रमादात् इमनेति पठन्त्याचार्या इति शङ्कयेति भावः । **तेषु**—आचार्येषु । **वेदार्थावगमद्वारा**—वेदार्थावगमपूर्वकवेदरक्षाद्वारा । अनेन वेदार्थावगमरक्षाऽपि व्याकरणस्य प्रयोजनं सूचितम् । **अपिना** केवलवेदरक्षाद्वारसमुच्चयः । **व्याकरण**—व्याकरणाध्ययनम् । **एवञ्च**—व्याकरणाध्ययनस्य वेदार्थनिश्चायकत्वे च । 'यतो वाचो निवर्त्तन्ते' इत्यादिश्रुत्या ब्रह्मणो वाग्विषयत्वादाह—**वक्ष्यमाणेति ।** आनुषङ्गिकप्रयोजनोपपादनावसरे इत्यादि । **चेनै**हिकसुखसमुच्चयः । ननु लोप-

स्यापि वर्णविकारत्वात्तस्य पृथगभिधानमनङ्गमित्यत आह—लोपस्त्विति। **विकार**—विकारत्वेनाभिमत । अस्य "अभावरूपत्वादि" ति शेष । **चो** हेतौ । **अनेति**—अनेनान्यत्र लोपस्य विकारत्वेऽपि क्षत्य-भाव सूचित । **आदिना** जभारेत्यस्य सग्रह । **एतेन**—"हृग्रहो" रित्यस्य तदर्थमावश्यकत्वेन । **अपिः** धनुःसमुच्चायक । **एतदिति**—"हृग्रहोर्भ" इत्यर्थ । **अन्येति**—गृभ्णामीत्यादीत्यर्थ । **तेनैव**—"हृग्रहो"रित्यनेनैव । **तदंशे**—मादेशांशे । उत्पूर्वाद् ग्रहे घञो विधायकस्य "उदि ग्रह" इति सूत्रस्य लोके सत्त्वादाह—**निपूर्वादिति**। तथा च उद्ग्राभमित्यत्र लोकसिद्धस्यैव घञोऽनेनानुवाद । निग्राभमित्यत्र तु घञो लोकासिद्धत्वादनेन विधिरिति भाव ।

(ऊहपदार्थनिरूपणभाष्यम्)

ऊहः खल्वपि—न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथ विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्॥

(प्रदीप.) ऊह खल्वपीति। इह यस्मिन् यागे इतिकर्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते सा **प्रकृति**। येनोपजीव्यते सा **विकृति**। **प्रकृतिवद्विकृति. कर्तव्येति** मामासकैर्व्यवस्थापिते न्याये प्रकृतिप्रत्ययादीनामूहं वैयाकरण सम्यग्विजानाति। तत्राग्नेर्मन्त्रोऽस्ति—**अग्नये त्वा जुष्टं निर्वपामीति**। तत्र **'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम'** इति सौर्ये चरौ मन्त्र ऊह्यते—**सूर्याय त्वा जुष्टं निर्वपामीति**। विस्तरेण भर्तृहरिणा प्रदर्शित ऊह ॥

(उद्द्योतः) भाष्ये ऊह खल्वपीत्यस्य प्रयोजनमिति शेष। खल्वपीति निपातसमुदायो निश्चयार्थ ॥ ननु यत्र प्रकरणे ये मन्त्रा पठितास्तत्र तेषां तथैव प्रयोग इष्ट इति नोहेन प्रयोजनमित्याशङ्क्य प्रकृतावूहाभावेऽपि विकृतावूह इति दर्शयितु प्रकृतिशब्दार्थमाह—**इहेति**। **यस्मिन्** आग्नेयादौ। **यागान्तरेण** सौर्यादिना। प्रकृतिविकृत्यवगमश्च द्विदेवत्यत्वैकदेवत्यत्वादिसाम्येन बोध्य ॥ अन्यत्र पठितमन्त्राणां कथमन्यत्र गमनमत आह—**प्रकृतिवदिति**। यथा सोपकारा प्रकृतिरनुष्ठीयते, तथा विकृतिरपीति तदर्थः। तदनेनोपकारातिदेशे तत्प्रभावेन पदार्था अप्यतिदिश्यन्ते, इतिकर्तव्यताया भावनाया साकाङ्क्षत्वात्॥ एतन्मूलकमेव **प्रकृतिवदिनानि** मामासकसरणि ॥ पदार्थान्तर्गता मन्त्रा । तत्र अग्निदेवत्यनिर्वापप्रकाशकमन्त्रस्थाग्निपदस्य सूर्यदेवत्यनिर्वापप्रकाशकमन्त्रस्थाग्निपदस्य सूर्यदेवत्यनिर्वापप्रकाशनासमर्थत्वात्तत्परिहाय तत्स्थाने सूर्यायेत्यूह्यमित्याह—**तत्राग्नेरिति**। **मन्त्र ऊह्यत इति**। यद्यप्यूहे न मन्त्रत्वम्, तथाप्येकदेशस्योहेऽपि अनेकपदसमुदाये मन्त्रत्वप्रत्यभिज्ञानात्तद्घटिते समुदाये मन्त्रत्वव्यवहार कर्माङ्गत्वं चेति बोध्यम्॥ सोय प्रत्यूह । अन्येऽप्यूह्या । ऊहश्च यद्यपि आर्त्विज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसुखसिद्धिः फलमिति बोध्यम्। भाष्ये लिङ्गपदं च प्रत्ययादेरुपलक्षणम्॥ **यथायथमिति**। अर्थप्रकाशनसामर्थ्यानतिलङ्घनेनेत्यर्थ ॥

(तत्त्वालोकः) भाष्ये—यथाक्रममूहमुपपादयति—**ऊह इति**। **न**, **न च** इत्यनयो निगदिता इत्यनेनान्वय । **सर्वैर्लिङ्गै**—सर्वलिङ्गबोधकपदै। **सर्वाभिर्विभक्तिभि**—सकलविभक्त्यन्तपदै । अनया "घटिता" इति शेष । **ते**—मन्त्रा । **चो** हेतौ। **विपरिणमयितव्या**—तत्तल्लिङ्गादिबोधकपदघटिततया पठितव्या। **तान्**—मन्त्रान्। यत इत्यादि।

प्रदीपे—**इह**—वेदे। **इतिकर्तव्यता**—विधानप्रकार । **सा**—स याग । **येन** सौर्यादिना। वस्तुतस्तु यत्र यागे सकलाङ्गानि समुपदिश्यन्ते सा प्रकृतिः। यत्र यागे तानि नोपदिष्टानि स विकृतिरिति बोध्यम्। लिङ्गादिग्रहणस्य प्रकृत्यादेरप्युपलक्षणत्वादाह—**प्रकृतीति**। **आदिना** लिङ्गसङ्ग्रह । **सम्यक्**—यथोचितम्। **तत्र**—प्रकृतौ। **अग्नेर्मन्त्र**—अग्निदेवत्यनिर्वापप्रकाशकमन्त्र । **तत्र**—विकृतौ। **इति सौर्ये चरौ**—इति विहिते सूर्यदेवताक चरुद्रव्यकयागे।

उद्द्योते—खल्वपिशब्दयो क्रमशो निश्चयसमुच्चयार्थयो बोधकत्वेऽपि परिगणनादेव समुच्चयस्य लाभसम्भवादाह—**खल्वपीतीति**। **मन्त्रा इति**—यत्रैवेति शेष । नन्वेवमपि केन प्रकृतिविकृतिभावबोध इत्यत आह—**प्रकृतिविकृतीति**। प्रकृतिविकृतिभावेत्यर्थ । **अन्यत्र**—प्रकृतौ। **अन्यत्र**—विकृतौ। **यथेति**—यथा प्रकृतौ पठितान्यङ्गानि येनोपकारेण प्रकृतिमुपकुर्वन्ति, तथा विकृतावूह्यानि तानि तेनैवोपकारेण विकृतिमप्युपकुर्वन्तीत्यर्थ । **विकृतिरपीति**—सोपकारा अनुष्ठीयते इत्यनुषज्यते। **तत्प्रभावेन**—उपकारानुसारित्वेन। विकृतावुपकारविधानायैवातिदेशवाक्येन प्रकृतिस्थाङ्गानां तत्रातिदेश । अत एव विकृतौ तेन सामान्यतोऽप्यतिदिष्टानां प्रकृतिस्थाङ्गानामुपकारासम्भवे क्वचित्साकल्येन निवृत्ति, क्वचिच्चांशिकत्वेन। यथा प्रकृतावुपकारकस्य "अवरक्षो दिव सपत्न वध्यासमे"त्यवघातमन्त्रस्य कृत्स्नस्य विकृतावुपकारकताया असम्भवान्निवृत्तिः। यथा च प्रकृतौ वैतुष्योपकारिणोऽवघातस्य कृष्णलेष्वपकारिताया असम्भवान्निवृत्तिरिति बोध्यम्। **साकाङ्क्षत्वादिति**—उत्पद्यमानोत्पत्त्यनुकूल उत्पादकव्यापारविशेषो भावना। सा द्विविधा। तत्रैका पुरुषप्रवृत्त्युत्पत्त्यनुकूलोत्पादकव्यापारविशेषरूपा लिङ्त्वावच्छिन्नवाच्या शाब्दी भावना। अपरा च फलेच्छाजनितक्रिया विषयव्यापारविशेषात्मिका आख्यातत्वावच्छिन्नवाच्या आर्थी भावना। उभयो भावनयो किं भावयेत्, केन भावयेत्, कथं भावयेदिति साध्यसाधनेतिकर्तव्यताऽऽकाङ्क्षात्रयी नियता। तत्र कर्ममात्रस्येतिकर्तव्यत्वाद्, इतिकर्तव्यता विना साध्यसाधनयो भावनायामन्वयस्यासम्भवाच्च भावनाया इतिकर्तव्यताया साकाङ्क्षत्वमवश्यमिति भाव । नन्वेव पदार्थातिदेशेऽपि कथं मन्त्रातिदेश इत्यत आह—**पदार्थेति**। **तत्र**—प्रकृतौ। "अग्नये त्वे"त्यादिमन्त्रस्य प्रकृतिसम्बद्धाग्निसम्बन्धनिर्वापप्रकाशनात्मकप्रकृत्युपकारकारकत्वाद् विकृतिसम्बद्धसूर्यसम्बन्धिनिर्वापप्रकाशनरूपविकृत्युपकारस्यापि तन्मन्त्रविधेयतामापन्नस्य अग्निशब्दघटितेन तेन विधातुमशक्यत्वादाह—**तदपहायेति**। अग्नये इति पदमपहायेत्यर्थ । ननु किमपराद्धमेकारेणेति चेन्न। अदन्तभिन्नप्रकृतिसन्निहितैकारेण वाच्यस्य सम्प्रदानत्वस्य अदन्तप्रकृतिसन्निहितयकारेणैव प्रायो वाच्यतया प्रकृते निमित्तापाये नैमित्तिकस्याप्यपाय इति नियमेन निवृत्तेऽग्निशब्दे एकारस्यापि निवृत्तेर्दुर्वारत्वात्। तथा चाग्निशब्दस्थाने सूर्यशब्दे समागते एकारस्थाने यशब्द आगत इति भाव । "अनाम्नाता अमन्त्रा" इत्याद्यापस्तम्बादिवचनानुसारेणाह—**न मन्त्रत्वमिति**। **अनेकेति**—अत्र शब्देत्यादि । "एकदेशविकृतमनन्यवदि"ति न्यायेनाह—**मन्त्रत्वेति**। **सोऽयम्**—अग्नये इत्यत्र सूर्यायेत्यूह । एकारस्थाने याकारूपप्रत्ययोहस्य नान्तरीयकत्वादस्य नोभयोहत्वेति भाव । **अन्ये**—प्रत्ययलिङ्गोहा। यथ "देवीराप शुद्धा स्थ" इत्यप्सु विनियुक्तस्य मन्त्रस्याज्ये ऊह "देवाज्य शुद्धमसी"ति स लिङ्गोह । यथा च "मा भैर्मा सविक्था" इति पुरोडाशावदानमन्त्रस्य धानासूह "मा भैष्ट मा संविक्थ्वमि"ति स प्रत्ययोह । **हीति**—अस्य चार्थकाया स्वर्गसुखादिसमुच्चायकस्य सिद्धिरित्युत्तरं योजना। चेन विभक्तिसमुच्चय ।

(आगमपदार्थनिरूपणभाष्यम्)

आगमः खल्वपि—"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति ॥ प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान्भवति ॥

(प्रदीपः) आगम इति । आगमः प्रयोजनं प्रवर्तको नित्यकर्मता व्याकरणाध्ययनस्य दर्शयति । प्रयोजनशब्देन च फलं प्रयोजकश्चोच्यते । **निष्कारण इति ।** दृष्टं कारणमनपेक्ष्येत्यर्थः ॥ **प्रधानं चेति ।** पदपदार्थावगमस्य व्याकरणनिमित्तत्वात्तन्मूलत्वाद्वाक्यवाक्यार्थावसायस्येति भावः ॥

(उद्द्योतः) ननु वक्ष्यमाणागमस्य न व्याकरणफलत्वमत आह—**प्रवर्तक इति ॥ नित्यकर्मतामिति ।** एतेन नित्यकाम्यता व्याकरणाध्ययनस्येति युक्तम् । नित्यत्वं चाध्येयज्ञेयपदार्थविशेषणीभूताध्ययनज्ञानयोर्बोध्यम् । अत्र **ब्राह्मणेने**त्युक्तेरन्यस्यैवमध्ययनं काम्यमेवेति सूचयतीति कश्चित् ॥ **निष्कारण इति ।** कारणशब्दः फलपरः ॥ ननु नित्यत्वेऽपि प्रत्यवायपरिहाररूपं फलमस्त्येवेत्यत आह—**दृष्टमिति ।** अध्ययनादिनिष्ठं कारणानपेक्ष्य विषये आगमेऽपि निष्कारणो वेद इति प्रयोगः । आगमपदेन श्रुतिः । श्रुतावपि जनमेजयाद्युपाख्यानवत्पौरुषेयव्याकरणस्यापि नित्यत्वं बोधनमुपपद्यते । यतः **तेन प्रोक्त**मिति सूत्रभाष्योक्त्या वेदा इव व्याकरणार्थोऽपि अनादिस्वरूपनित्यतावानिति श्रुत्या तस्य नित्यत्वबोधनमिति बोध्यम् । धर्मत्वं च वेदस्य पुरुषयत्नसाध्यतया धर्मत्वेनाभिमताध्ययनज्ञानकर्मत्वेनौपचारिकमित्याहुः ॥ **षडङ्गः ।** शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिषाङ्गसहित । **वेद** स्वशाखारूप । **अध्येय** इत्यत्र प्रेरणाविषयाध्ययनकर्मेति बोध ॥ यद्यपि **तेन प्रोक्त**मिति सूत्रे भाष्ये वक्ष्यमाणया रीत्या वेदत्व शब्दत्व दर्शयिष्यति, तथापि **ज्ञेय** इत्यस्य सम्यगर्थबोधपर्यन्तमध्ययनं कार्यमित्यर्थे तात्पर्यम् । अत एव **'समानमीहमानानामधीयानानां च केचिदर्थैर्युज्यन्ते केचिन्ने'**ति वक्ष्यति भाष्यकृत् । अध्ययनतयाज्ञानयोश्च समुच्चय । अनेनानाद्दरस्याधर्मत्वं सूचयति । श्रुत्या मिलितस्यैव धर्मत्वबोधनात् । तथा च व्यास —

"वेदार्थज्ञो जपं जप्त्वा तथैवाध्ययनं द्विजः ।
कुर्वन् स्वर्गमवाप्नोति नरकं तु विपर्यये" ॥ इति ॥

जपपद मन्त्रसाध्यकर्ममात्रोपलक्षणम् । ज्ञानतोऽथ ज्ञानानुकूलो मनःप्रणिधानविषयेन्द्रियमनोयोगमपादनादिरूपो व्यापारोऽंशस्यैवात्र विधेयत्वम् । एतेन—ज्ञानस्याविधेयत्वादिदं चिन्त्यमित्यपास्तम् ॥ ननु गुणानां परस्परसम्बन्धाभावात् षडङ्गेषु प्रधानमित्यनुपपन्नमत आह —**पदेति ।** एवं च वेदार्थज्ञाने व्याकरणं प्रधानं कारणमिति भाव ॥ भाष्ये **प्रधाने कृतो यत्न इति ।** प्रधानविषये निर्वर्तित इत्यर्थ । अन्यथा यत्नविषयकत्वेऽसम्भवादसङ्गति स्पष्टैव । भाष्ये **फलवानित्यत्र** फलपदेन वाक्यार्थावगमो विवक्षित । एतच्छास्त्रं च पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगीति बोध्यम् ॥ एवं च व्याकरणाध्ययनप्रयुक्तस्य वेदार्थाज्ञानप्रयुक्तस्य च प्रत्यवायस्य परिहारकतयाऽस्य नित्यत्वमिति बोध्यम् ॥

(तत्त्वालोकः) भाष्ये—क्रमागतमागममवतारयति—**आगमः खल्वपीति ।** प्रयोजनमिति शेष । **खल्वपीति** निपातसमूहो निश्चयार्थक । तमेवागमनाह—**ब्राह्मणेनेति ।** अस्य षडङ्गो वेदोऽध्येयो ज्ञेय श्चेत्यनेनान्वय । तथा च निष्कारणशब्दलक्ष्यफलापेक्षारहितस्य षडङ्गवेदविशेषणाध्ययनज्ञानयोरन्वयेन ब्राह्मणकर्तृकफलापेक्षारहिताध्ययनज्ञानरूपधर्मविषयीभूत षडङ्गो वेद इति बोध । **षडङ्ग इति—**षट् अङ्गानि यस्येति व्युत्पत्ति । वेदाङ्गानां व्याकरणज्यौतिषनिरुक्तशिक्षाकल्पच्छन्दसां मध्ये व्याकरणप्राधान्यं वेदयितुमिच्छुनाह तस्य ज्यौतिषादितो मुख्यत्वमाह—**प्रधानञ्चेति ।** व्याकरणाध्ययनस्य साफल्यमाह—**प्रधाने चेति ।** अस्य कचिच्चकाररहित पाठोऽस्तीति उद्द्योतप्रलोकत प्रतीयते ।

प्रदीपे—कथ प्रयोजनपदार्थ प्रवर्तकोऽपीत्यत आह—**प्रयोजनेति ।** फलापेक्षाया एवाऽपि प्रवृत्तिप्रयोजकत्वे सत्यनारायणपूजनादिरूपकाम्यतामात्रस्तत्कर्मणैव साङ्गवेदाध्ययनादावपि फलनिष्पत्त्यनन्तर प्रवृत्त्याबाल्यस्य स्यादित्यत प्रकृते नित्यताया एव प्रवृत्तिप्रयोजकता, न तु रक्षादिफलापेक्षाया इति लक्षणया सूचयतो नित्यताबोधकनिष्कारणशब्दस्य नात्र फलाभावबोधकता येनेह रक्षादिफलकथनं नोपपद्येतेत्याशयेनाह—**दृष्टं कारणमनपेक्ष्येति । व्याकरणनिमित्तत्वात्—**व्याकरणाध्ययनकारणकत्वात् । **तन्मूलत्वात्—**पदपदार्थबोधनिमित्तकत्वात् । **वाक्यवाक्यार्थावसायस्य—**वेदवेदार्थावबोधस्य ।

उद्द्योते—**वक्ष्यमाणागमस्य—**"ब्राह्मणेन निष्कारणो धर्म" इत्यादिश्रुते । प्रयोजनशब्दस्य फलपरत्वमभिप्रेत्याह—**व्याकरणफलत्वमिति ।** व्याकरणाध्ययनस्य फलत्वमित्यर्थ । ननु नित्यतामानबोधनाय नित्यकर्मताशब्दस्य प्रयोगे तत्र कर्मपदवैयर्थ्यमित्यत आह—**एतेनेति ।** (फलकामेन यत्क्रियते तत्कर्मेति व्युत्पत्ते) काम्यपरककर्मशब्दघटितकथनेनेत्यर्थ । ननु विभाजकानां मिथो विरुद्धत्वे कथ कर्मविभाजकनित्यत्वकाम्यत्वयोरेकत्रावस्थानमिति चेन्न, "एकस्य तूभयत्वे संयोगपृथक्त्वमि"ति न्यायेन प्रमाणसत्त्वे एकस्यापि विरुद्धधर्मद्वयवत्ताया बोधनात् "संज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशो धिकारश्च षड्विधं सूत्रलक्षणम्" ॥ इत्यनेन सूत्रविभाजकयोरपि विधित्वसंज्ञात्वयो स्वादिसूत्रे दर्शनात् । प्रमाणप्रमेयेति न्यायशास्त्रादिमसूत्रेण पदार्थविभाजकयोरपि प्रमाणत्वप्रमेयत्वयोरिन्द्रियेऽवलोकनाच्च एकत्रावस्थितयोरपि विभाजकताया निर्णयात् । आह च हेत्वाभासगादाधर्याम् "उपधेयसङ्करेऽपि उपाधेरसाङ्कर्यादि"ति । तथा च रक्षोहादिफलचतुष्टयात् प्राक् पश्चाद्वा पठनीयस्य प्रवर्त्तकागमस्य मध्ये पाठेन साङ्गवेदाध्ययनादे सन्ध्यादेरिवाकरणे पापजनकत्वान्नित्यता एव रक्षादिफलकत्वात्काम्यता च सूचितोपपद्यते ॥ आनुपूर्व्या अनित्यतया साङ्गवेदस्य नित्यत्वासम्भवादाह—**नित्यत्वमिति । अत्र—**प्रकृतागमे । **अन्यस्यैवमध्ययनमिति—**क्षत्रियस्य वैश्यस्य च साङ्गवेदस्याध्ययनज्ञाने चेत्यर्थ । **कश्चित्—**रत्नाकर । स्मृत्या सकलद्विजाना कृते साङ्गवेदाध्ययनादे नित्यतावगमात्, कश्चिदित्यनेन तत्रारुचेर्दर्शनाच्चात्र ब्राह्मणशब्द त्रैवर्णिकानुपलक्षयतीति प्रतीयते । केचित्तु "कलौ न क्षत्रियाः सन्ति कलौ नो वैश्यजातय । ब्राह्मणाश्चैव शूद्राश्च कलौ वर्णद्वय स्मृतम् ।" इति स्मृतिप्रतिपादितकलिकालिकक्षत्रियवैश्याभावमूलनायैवोपात्तमत्र ब्राह्मणपदं यथाश्रुतार्थकतयैवोपपद्यते इति वदन्ति, तन्न । वेदाना कलियुगपरत्वाभावात् । **फलपर इति—**कार्यतेऽनुष्ठाप्यतेऽनेनेति व्युत्पत्तिरिति शेष । तथा च कारणात्रिगत इति व्युत्पत्त्या निष्पन्नस्य निष्कारणशब्दस्य नित्यार्थकत्वे त भाव । **आदिनाश्च न—**मग्रह । केचिद् 'ब्राह्मणेने'त्यादेरुपलभ्यमानश्रुतित्वानुपलम्भात् स्मृतिता कल्पयन्त, तन्न, आगमपदस्य वाच्यवेदपरत्वेनोपपत्तिसम्भवे लक्ष्यस्मृतिपरत्वकल्पनाया अनुचितत्वात्, उपलभ्यमानस्मृतित्वानुपलम्भेन तुल्यत्वाच्चेत्यभिप्रेत्याह—**आगमपदेनेति ।** आगम्येते प्रमाप्येते हिताहितप्राप्तिपरिहारावनेनेति व्युत्पत्तिरिति शेष । ननु कथमपौरुषेयवेदेन पौरुषेयव्याकरणाध्ययनादि नित्यतया विधीयते इत्यत आह—**श्रुतावपीति ।** "धाता यथापूर्वमकल्पयदि"त्यादिश्रुते "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तय" ॥ सर्वेषां तु नामानि कर्माणि च पृथक् पृथक् ।

त्यादि। विप्रैरध्यापनयाजनरूपजीविकासञ्चालनाय साधुशब्दज्ञानस्यापेक्षिततया तस्य प्रतिपदपाठादिना दुःसाध्यत्वात् तदर्थं लघूपायज्ञानाय व्याकरणमध्येयमिति भावः।

(असंदेहपदार्थनिरूपणभाष्यम्)

असंदेहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति—स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति। तस्यां संदेहः—स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति—यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति॥

(प्रदीपः) **असंदेहार्थमिति।** संदेहस्य प्रागभावोऽत्र द्रष्टव्यो न तु प्रध्वंसाभावः। न हि वैयाकरणस्य संशय उत्पद्य विनश्यति, इतरस्यैव तदुत्पादात्॥ **स्वरत इति।** पूर्वपदप्रकृतिस्वराद्बहुव्रीह्यर्थावसाय इत्यर्थः॥

(उद्द्योतः) नन्वसंदेहः संदेहाभावः। स च नात्यन्ताभावः, तस्य नित्यत्वात्। न च ध्वंसः, तद्विषयकव्याकरणज्ञानवतः संदेहस्यैवाभावेन तदसम्भवात्। यस्य त्वधीतव्याकरणस्यापि क्वचित्संदेहः, स तद्विषयकवैयाकरणत्वाभाववानेव, वेदनार्थे हि तत्र प्रत्ययो ऽत आह—**प्रागभाव इति।** तत्परिपालनं च शास्त्राध्ययनफलम्। न तु स्वरूपं, तस्यानन्यत्वात्। तत्पालनं च प्रतियोगिजनककारणविध्वंसनं, प्रागभावस्य प्रतियोगिजन्मनाश्यत्वादिति बोध्यम्॥ भाष्ये **याज्ञिका पठन्तीति।** यज्ञकाण्डभवा वैदिका शब्दा याज्ञिकास्ते पठन्तीत्यर्थः। '**ऋषिः पठति' शृणोत ग्रावाणः'** इतिवत्प्रयोगः। तत्र ऋषिर्वेदः॥ **सन्सूत्रे** भाष्ये एष प्रयोगः॥ **ताम्।** अनड्वाहीम्। कस्तर्हि निश्चयस्तत्राह—**पूर्वपदेति॥**

(तत्त्वालोकः) भाष्ये—क्रमप्राप्तमसन्देहरूपप्रयोजनमाह—**असन्देहार्थमिति।** संशयप्रागभावपरिपालनायेत्यर्थः। ननु क्वावैयाकरणस्य संशय इत्यत आह—**याज्ञिका इति।** **अनड्वाहीम्**—गाम्। **तस्याम्**—श्रुतौ (स्थूलपृषत्याम्)। **पृषतीति**—अनेन मत्वर्थलक्षणया पृषत्वती (बिन्दुमती) गौरुच्यते। कर्मधारये गव्येव स्थौल्यान्वयाद् बिन्दूनां स्थूलत्वे तनुत्वे नोपेक्षा। **पृषन्ति**—बिन्दवः। बहुव्रीहौ पृषत्स्वेव स्थौल्यान्वयाद् गोः स्थूलत्वे कृशत्वे वाऽनादरः। ननु स्वपदार्थप्रधानत्वेन प्रबलात्कर्मधारयादन्यपदार्थप्रधानत्वेन बहुव्रीहेर्दुर्बलत्वात्कुतोऽत्र तस्य सम्भावनेति चेन्न, अन्यपदार्थप्रधानाग्निवारुणीपदसन्निधानेन तस्यापि सम्भवात्। तत्र सन्देहकारणाभावाय तां वैयाकरणः स्वरतो निश्चिनोतीति व्यतिरेकेणाह—**तामिति। अध्यवस्यतीति**—अत एव च संशेते इति भावः। न च व्याख्यानात् सोऽपि निश्चिनुयादिति वाच्यम्, सर्वत्र व्याख्यातुर्दौर्लभ्यात्। स्वरतोऽध्यवसायप्रकारमाह—**यदीति। पूर्वपदेति**—"बहुव्रीहौ प्रकृत्या पूर्वपदमि"ति सूत्रेणेत्यादि। **समासेति**—"समासस्ये"ति सूत्रेणेत्यादि। **तत्पुरुषः**—कर्मधारयरूपः।

प्रदीपे—**अत्रेति**—न तु सर्वत्रेत्याशयः। केचित्तु प्रकृते सन्देहात्यन्ताभाव एवासन्देहपदार्थः, अन्यथा शङ्कासमाधानपरभाष्यासङ्गतेरिति वदन्ति, तन्न, अवैयाकरणवैयाकरणभेदेन शङ्कासमाधानयोरुपपादनात्। **इतरस्य**—अवैयाकरणस्य। **तदिति**—संशयेन्यर्थः। **पूर्वपदप्रकृतिस्वरादिति**—पठ्यमानादित्यादि। **अवसायः**—निर्णयः। अर्थविशेषबोधकबहुव्रीहिप्रयुक्तपूर्वपदप्रकृतिस्वरस्य विधानाय स्थूलशब्दः फिट्स्वरेणान्तोदात्तः कृतः, तथा च तस्य निश्चायकता युक्तेत्याशयः। अवैयाकरणस्य तु सर्वथा अनिर्णय एव, स्वरज्ञानाभावात्तदनुकूलनिश्चयस्य, वृत्तिज्ञानाद्यभावात्प्रतिकूलनिर्णयस्य चासम्भवात्॥

उद्द्योते—**तस्य**—अत्यन्ताभावस्य **नित्यत्वात्**—प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वात्। एतेन तस्य प्रागभावप्रतियोगित्वव्याप्यफलत्वाभावः सूचितः, व्यापकाभावे व्याप्याभावस्यावश्यम्भावात्॥ ध्वंसम्प्रति प्रतियोगिनः कारणत्वादाह—**तदसम्भवादिति।** सन्देहध्वंसासम्भवादित्यर्थः। **तदिति**—सन्देहास्पदेत्यर्थः। तथा च संयोगवद् वैयाकरणत्वमव्याप्यवृत्ति (स्वाभावसमानाधिकरणम्) इति भावः। **वेदनार्थे हि तत्र प्रत्यय इति**—यतो वैयाकरणशब्दे ज्ञानार्थेऽणप्रत्यय इत्यर्थः। अनवस्थापत्त्याप्रागभावस्य प्रागभावास्वीकारात् स्वस्य न्यत्वव्याप्यफलत्वासम्भवादाह—**तत्परिपालनमिति।** सन्देहप्रागभावपरिपालनमित्यर्थः। **शास्त्रेति**—व्याकरणेत्यर्थः। **स्वरूपमिति**—संशयप्रागभावस्येत्यादि। **तस्य**—प्रागभावस्य। ननु निरवयवप्रागभावस्य पोषणाद्यसम्भवात् कथं तस्य परिपालनं सम्भवतीत्यत आह—**तत्पालनमिति।** सन्देहप्रागभावपालनमित्यर्थः। **विध्वंसनमिति**—प्रतियोगी सन्देहः, तस्य जनकं यत् निश्चयरूपप्रतिबन्धकस्याभावात्मकं कारणं, तद्विनाशनमित्यर्थः। ननु कथं तादृशस्य विध्वंसनं तत्पालनमित्यत आह—**प्रागभावस्येति।** तथा च व्याकरणाध्ययनेन निश्चयो विषयः, येन संशयप्रागभाव एव सदा तिष्ठेदित्याशयः। यज्ञपदस्य लक्ष्यार्थमाह—**यज्ञकाण्डेति।** केचित्तु यज्ञं विदन्तीति व्युत्पत्तौ उक्थादित्वात् ठकि याज्ञिका इति साधयन्ति। ननु कथं शब्दानां पाठकर्तृत्वमित्यत आह—**ऋषिरिति।** तथा चोभयत्र तच्छब्दार्थ तद्वाचकपदस्य लक्षणया प्रयोग इति भावः। तत्र पूर्ववाक्ये तत्प्रयोगं प्रमाणयितुमाह—**सन्सूत्र इति।** स्थूलपृषतीशब्दे दर्शितस्यार्थसंशयस्य स्थौल्यसन्देहद्वारा गव्येव पर्यवसानमभिप्रेत्य स्थूलपृषतीमिति विहाय व्याचष्टे—**अनड्वाहीमिति।** ननु भाष्यकृता निर्णयस्यानुक्तत्वात् सन्देह एव तिष्ठेदित्यभिप्रायेणाह—**कस्तर्हीति।**

(व्याकरणाध्ययनसाधकागमप्रतीकभाष्यम्)

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि—तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण इति॥

(प्रदीपः) मुख्यानि प्रयोजनानि प्रदर्श्यानुषङ्गिकाणि प्रदर्शयति—**इमानि चेति॥ भूय इति।** पुनरित्यर्थः॥ आनुषङ्गिकत्वाच्चैषां वर्गद्वयोपादानम्॥

(उद्द्योतः) ननु असन्देहत्वादीनां बहुत्वाद्बहूनामनुमहो न्याय्य इति प्रथमतोऽभिधानं युक्तमत आह—**मुख्यानीति।** प्राधान्यादेव तेषां प्रथमतोऽभिधानमिति भावः॥ तेषां प्राधान्यं च पदपदार्थज्ञानाधीनत्वेनान्तरङ्गत्वात्। वक्ष्यमाणानां च बहिरङ्गशब्दापशब्दप्रयोगविधिनिषेधविषयत्वादानुषङ्गिकत्वं बोध्यम्॥ ननु **भूय** इत्येकवचनमनुपपन्नं **प्रयोजनानी**त्यनेन सामानाधिकरण्यादत आह—**पुनरीति॥ इमानि चेति।** चः समुच्चये॥ भाष्ये **प्रयोजनानीति।** प्रवर्तकानि फलानि चेत्यर्थः। तत्र वक्ष्यमाणवाक्यानि प्रवर्तकानि, तद्बोध्यानि फलानीति विवेकः॥ ननु रक्षादिभिः सहैवैतानि कुतो न पठितानि? इत्यत आह—**आनुषङ्गिकत्वादिति।** एषामानुषङ्गिकत्वं तेषां प्रधानत्वं बोधयितुं तथोक्तिरिति भावः॥

(तत्त्वालोकः) भाष्ये—**इमानि च**—वक्ष्यमाणानि च। बोध्या

नोति शेषः। व्याख्येयप्रयोजनानामियत्ताया बोधनाय यथासम्भवं तेषामादिभागं प्रतीकीकृत्य तानि गणयितुमाह—**तेऽसुरा इति।** **विभक्तिं कुर्वन्तीति**—एतत् तद्वाक्यार्थकथनम्। **सारस्वतीमिति**—इदं तद्वाक्यमध्यस्थपदम्।

उद्योते—**इति**-इति न्यायेन। **तेषां**-रक्षोहादीनाम्। **ज्ञाने ति**-ज्ञानमात्रेत्यर्थः। **वक्ष्यमाणानां**-तेऽसुरा इत्यादीनाम्। **विषयत्वादिति**-बहिरङ्गौ यौ शब्दापशब्दप्रयोगयोर्विधिनिषेधौ तद्विषयत्वादित्यर्थः। प्रकृते ज्ञात्रोपस्थितिकत्वमन्तरङ्गत्वम्, तथा विलम्बोपस्थितिकत्वं बहिरङ्गत्वमिति भावः। **पुनरितीति**-भूय इत्यस्य पुनः (पश्चाद्) इत्यर्थकाव्ययतया साधुनेति भावः। **भाष्ये इति**-अस्य देहलीदीपन्यायेन पूर्वेणोत्तरत्र चान्वयः। प्रयोजनशब्दस्योत्कटरीत्या प्रकृतेऽप्यर्थद्वयमाह-**प्रवर्त्तकानीति।** **तत्र**-तयोर्मध्ये। **वक्ष्यमाणवाक्यानि**-तेऽसुरा इत्यादीनि। **तद्बोध्यानि**-अम्लेच्छत्वादीनि। **एषाम्**-अम्लेच्छत्वादीनाम्। **तेषां**-रक्षोहादीनाम्। कैयटस्थचकारस्य हेतुबोधकतया यत एषामानुषङ्गिकत्वम्, अतस्तेषां प्रधानत्वमित्यायर्थो बोध्यः। **तया**-पार्थक्येन।

(भाष्यम्)

तेऽसुराः—

"तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः" ॥

म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्। तेऽसुराः ॥

(प्रदीपः) तेऽसुरा इति निन्दार्थवादेन **न म्लेच्छितवा** इति म्लेच्छनं निषिध्यते। तत्र केचिदाहुः **'हैहेप्रयोगे हैहयोः'** इति प्लुते प्रकृतिभावे च कर्तव्ये तदकरणं म्लेच्छनमिति। पदद्विर्वचने कार्ये वाक्यद्विर्वचनं लत्वं च म्लेच्छनमित्यपरे। **न म्लेच्छितवा** इत्यस्य पर्यायो **नापभाषितवा** इति। **कृत्यार्थे** इति तवैप्रत्ययः। म्लेच्छ इति कर्मणि घञ् ॥

(उ०) ननु पराबभूवुस्तस्माद्ब्राह्मणेनेति श्रुतौ पराभवस्यापशब्दभाषणफलत्वावगते 'पराभूता मा भूमेत्यध्येयम्' इति वक्तुमुचितमत आह—**निन्दार्थवादेनेति।** **द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति** (पू० मी० ४।३।१) न्यायेन **यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती**त्यादावपापश्लोकश्रवणस्य प्राशस्त्यमात्रपरत्ववदस्य निन्दामात्रपरत्वादिति भावः ॥ प्रकरणाच्च क्रत्वङ्गोऽयं निषेधः। **केचिदाहुरिति।** अत्रारुचिबीजं तु 'सर्वः प्लुतः साहसमनिच्छता विभाषा कर्तव्य' इति॥ **पदेति।** **'सर्वस्य द्वे'** इत्यत्र पदग्रहणस्य वार्तिककृतोक्तत्वादिति भावः ॥ ननु नेदं द्वित्वम्, किं त्वैच्छिकः पुनः प्रयोगोऽत आह—**लत्वं चेति।** **न म्लेच्छितवै** इत्येन म्लेच्छभाषाविषयमिति भ्रमनिवृत्त्यर्थं तद्विवरणं **नापभाषितवै इति।** **ह वै** इति प्रसिद्धौ। अपशब्दत्वं व्याकरणानुगततच्छब्दस्यैपरिज्ञान एव प्रसिद्धमिति भावः ॥ ननु म्लेच्छो नाम पुरुषविशेषो देशविशेषो वा स कथमपशब्दोऽत आह—**घञिति।** निन्दावचनान्म्लेच्छनैरिति भावः। निन्दा च शास्त्रबोधितविपरीतोच्चारणेन पापसाधनत्वात्। एवञ्च म्लेच्छा इत्यस्य निन्द्या इत्यर्थ इति दिक् ॥

(तत्त्वालोकः) भाष्ये—आनुनिर्दिष्टान्यन्यानि प्रयोजनपराणि वाक्यानि उद्देशक्रमेणोपस्थापयितुं प्रथमं वर्णापराधे दोषबोधकं ब्राह्मणभागस्थवाक्यमाह—**तेऽसुरा इति।** **हेलयो हेलय इति**-हे अरयो हे अरय इति वक्तव्ये इत्यादि। **कुर्वन्तः**-प्रयुञ्जानाः। निषेधस्य सविषयानुष्ठातृनिन्दाया अपेक्षिततया पराबभूवुरित्यनेन प्रयोक्तृनिन्दां कथयन् विषयस्य निन्दामाह-**म्लेच्छो ह वेति।** यद् यस्माद् एषोऽपशब्दो म्लेच्छो म्लेच्छत्वेन प्रसिद्धः, तस्मात् तेऽसुरा देवान्प्रति अपशब्दं प्रयुञ्जानाः पराभवमापुः, तस्माद् (अत एव) ब्राह्मणेनापशब्दभाषणं सर्वथा त्याज्यमित्यर्थः। उक्तवाक्येनापशब्दाभाषणस्याम्लेच्छतापलकत्वाद् व्याकरणाध्ययनस्याम्लेच्छत्वफलकत्वं सिद्धमिति स्वयमुपसंहरति-**म्लेच्छा मेति।** एवमग्रेऽपि सर्वत्र। उपसंहृतस्य मध्यवर्तितया दृढीकरणार्थम् "एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयती"ति न्यायेन समस्तस्य तत्स्मारणाय प्रतीकमेव कथयति-**तेऽसुरा इति।** एवमग्रेऽपि सर्वत्र।

प्रदीपे—**म्लेच्छितवा इति**—म्लेच्छितव्यमित्यनेन। **म्लेच्छन**मपशब्दभाषणम्। ननु तेषां पराभवकारणं म्लेच्छनं प्रकृते कीदृशमित्यत आह-**तत्रेति।** श्रुतावित्यर्थः। **प्रकृतिभावे**-"प्लुतप्रगृह्या अचि नित्यमि"त्यनेन प्लुतप्रयुक्ते प्रकृतिभावे। **तदिति**-प्लुतप्रकृतिभावेत्यर्थः। **कृत्यार्थे इतीति**-(शब्दद्वये) कृत्यार्थे तवैकेन्केन्यत्वन" इति सूत्रेणेत्यर्थः। **कर्मणीति**-म्लेच्छ्यते इतीति व्युत्पत्तावित्यर्थः। तत्र कर्मणि करणे वा घञित्यपरे।

उद्योते—**निन्दार्थवादेन**—निन्दार्थवादपूर्वकम्। तथा च "म्लेच्छो ह"ति बोधितं म्लेच्छत्वमेवापशब्दभाषणफलमिति भावः। ननु रात्रिसत्रन्यायेन "तेऽसुरा" इत्यस्यार्थवादिकफलनिर्देशकत्वं कुतो नेत्यत आह—**द्रव्यसंस्कारेति।** **अपापश्लोकश्रवणस्य**-पापश्लोकश्रवणाभावस्य। उभयत्र **मात्रशब्देन** स्वार्थपरतानिरासः। **अस्य**-तेऽसुरा इत्यर्थवादस्य। नन्वपशब्दभाषणनिषेधस्य द्रव्याद्यन्यतमत्वाभावात् क्रत्वङ्गतया कथमत्र "द्रव्यसंस्कारे"ति न्यायप्रवृत्तिरित्यत आह-**प्रकरणादिति।** भाष्यकारोऽपि "यर्वाणस्तर्वाणो नामे"त्यादावुत्तरग्रन्थे निषेधस्यास्य क्रत्वङ्गतां स्पष्टीकरिष्यति। **च**-तु। **क्रत्वङ्ग इति**-अङ्गशब्दस्य "अङ्गं शरीरावयवः" इत्यादिकोशतो नित्यक्लीबलिङ्गतया क्रत्वङ्गमिति पाठः। अथवा अङ्गशब्दादर्श आद्यचि क्रतुरङ्गो यस्येति बहुव्रीहौ, अथवा क्रत्वङ्गत्वपरात् क्रत्वङ्गशब्दादर्श आद्यचि प्रकृतपाठ एव साधुः। **सर्वस्य द्वे इति**-अत्र केचित् "पदस्ये"त्यस्याधिकारमेव कथयन्ति। **इदं**—हेलयो हेलय इति। **प्रयोग इति**-तात्पर्यद्योतनायेति शेषः "अनावृत्तिः शब्दादनावृत्तिः शब्दादि"ति व्याससूत्रवदित्याशयः। नचैवं तत्राम्रेडितस्वरानुपपत्तिः, तत्तत्स्वररहितस्यैव तस्य पाठाभ्युपगमादित्यभिप्रेत्याह-**लत्वमिति।** हेलयो हेलय इति माध्यन्दिनानां शतपथब्राह्मणस्य पाठे लत्वस्यापि म्लेच्छनता। **म्लेच्छभाषेति**—म्लेच्छ (यवनादि) भाषा (निषेध्यत्वेन) विषयो यस्येति व्युत्पत्तिः। "न म्लेच्छभाषां शिक्षेदि"त्यस्य सत्त्वादाह—**भ्रमेति।** **ह वै इति**-समुदायो द्वौ वा। प्रकृतनिषेधस्य न वैदिकशब्दमात्रापभाषणविषयता, किन्तु साधुशब्दसामान्यापभाषणविषयतेति सूचनायाह—**अपशब्दत्वमिति।** **एवो** व्युत्क्रम्य शब्दस्येत्यनेनान्वेति। म्लेच्छपुरुषाश्रयत्वाद्देशस्य म्लेच्छता, अथवा म्लेच्छदेशस्थितत्वात्पुरुषस्य म्लेच्छतेत्यत्र विनिगमनाविरहादाह—**देशेति।** धातूनामनेकार्थत्वादाह—**निन्देति।** **शास्त्रेति**—शास्त्रबोधिताद्विपरीतस्योच्चारणविषयत्वादित्यर्थः. **एवञ्च**—म्लेच्छनेनिन्दार्थकत्वे च। तथा चापशब्दस्य तादृशोच्चारणविषयत्वेन पापसाधनत्वात् निन्द्यता, एवमपशब्दभाषिणु तादृशोच्चारणकर्तृतया पापकारित्वात् म्लेच्छता। अत एव म्लेच्छतापरिहारार्थं ब्राह्मणत्वोपलक्षितद्विजेनापशब्दभाषणपरित्यागाय व्याकरणमध्येयमिति भावः।

(भाष्यम्)

दुष्टः शब्दः

"दुष्टः शब्दः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥" इति ॥

दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् ॥

दुष्टः शब्दः ॥

(प्रदीप) दुष्ट शब्द इति । स्वरेण स्वरत । आद्यादित्वात्तसि **मिथ्याप्रयुक्त इति ।** यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तर स्वरवर्णदोषात्प्रतिपादयन्नाभिमतमर्थमाहेत्यर्थ । वागेव वज्रो हिंसकत्वात् । यथेन्द्रशत्रुशब्द स्वरदोषाद्यजमान हिंसितवानित्यर्थ । इन्द्रस्याभिचारो वृत्रेणारब्धस्तत्रेन्द्रशत्रुर्वर्धस्वेति मन्त्र ऊहित । तत्रेन्द्रस्य शातयिता शमयिता भवेति क्रियाशब्दोऽत्र शत्रुशब्द आश्रितो न तु रूढिशब्द , तदाश्रयणे हि बहुव्रीहितत्पुरुषयोरर्थाभेद । तत्रेन्द्राभिमतत्वे सिद्धे सतीन्द्रस्य शत्रुर्भवेत्ययमर्थे प्रतिपाद्येऽन्तोदात्ते प्रयोक्तव्य आद्युदात्त ऋत्विजा प्रयुक्त इत्यर्थान्तराभिधानादिन्द्र एव वृत्रस्य शातयिता सम्पन्न । इन्द्रशत्रुत्वस्य च विधेयत्वात्सम्बोधनविभक्तेरनुवाद्यविषयत्वादिहाभाव । यथा—राजा भव युध्यस्वेति ॥ ऊह्यमानस्य चामन्त्रत्वाद्यज्ञकर्मणीति जपादिपर्युदासेन मन्त्राणामेकश्रुतिर्विधीयमानेह न भवति ॥

(उद्द्योत) असर्वनामत्वात्तसोऽप्राप्तेराह—**स्वरेणेति आद्यादित्वादिति** च । तमित्यस्य यच्छब्दापेक्षित्वादाह—**यदर्थेति ॥ मिथ्याप्रयुक्त** इत्यस्य विवरण—**ततोऽर्थान्तरमिति ॥** न केवल तदर्थं नाहेत्येतावत् , किंतु प्रत्यवायोत्पादनद्वारा हिंसकोऽपीत्याह—**वागेवेति ।** यथाध्वर्युकृताद्धोमाद्यजमाने धर्मोत्पत्ति , एव तद्दुष्टशब्दप्रयोगात्तस्मिन् प्रत्यवाय इत्याशय ॥ तत्र दृष्टान्तमाह—**यथेति । वृत्रेणेति ।** हेतौ तृतीया। फलमपीह हेतु ॥ **मन्त्र इति ।** न चोहितस्य कथ मन्त्रत्वमिति वाच्यम् । मन्त्रशब्दस्य बोधकपरत्वात् । अत एव **'मन्त्रो हीन स्वरत '** इति प्रसिद्धमपि शिक्षापाठ विहाय भाष्ये—**दुष्ट शब्द इति** पठित तत्रत्यमन्त्रशब्दस्य शब्दमात्रपरतेति सूचयितुम् ॥ शत्रुशब्दस्याभिन्नपर्यायत्वे **बहुव्रीहितत्पुरुषयोरविशेषोऽत** आह—**तत्रेन्द्रस्येति ।** शदेर्ण्यन्तादौणादिक क्रुन् । प्रज्ञादिगणे निपातनाद्ध्रस्वत्वम् । शमेस्तु त वम् ॥ सम्बोधनविभक्त्यभावायाह—**इन्द्रशत्रुत्वस्येति ।** न चात्र **यज्ञकर्मणी**त्येकश्रुतौ प्राप्ताया पूर्वपदप्रकृतिस्वरकरण स्वरापराध इति वक्तु युक्तम् । न च तथैवास्तु । शतपथब्राह्मणतद्भाष्यविरोधात् । तत्र हि आद्युदात्तत्वकरणमेव स्वरापराध उक्त इत्यादि स्पष्टमसमक्तैकश्रुत्यादेऽत आह-**ऊह्यमानस्य चेति ।** तदुक्तम्— **अनाम्नातेष्वमन्त्रत्वम्** (पू० मी० २।१।३४)—' इति । नचास्यामन्त्रत्वे लौकिकशब्देन क्रियमाणस्य कर्मण कथ फलजनकत्वमिति वाच्यम् । स्वाहा त्वेत्यादेर्लौकिकघटितस्य ऊहविधायकशास्त्रबलेन फलजनकत्वस्योपपत्तेरित्याहु ॥

(तत्त्वालोक) भाष्ये—क्रमागत स्वरापराध दोषबोधक शिक्षावाक्यमाह-**दुष्ट शब्द इति । दुष्ट**-अन्यथाभूत । **तम्**-अभिमतम् । **स**-स्वरादिदुष्ट शब्द । **वाग्वज्र**-ऋत्विग्वचनरूपवज्र । **हिनस्ति**-हिंस्यात् । लिङर्थे वैदिकलट् । **अपराधादिति**-हिंसितवानिति शेष । **अध्येयमिति**-ऋत्विग्वचने स्वरादिदोषाद् यजमानो नश्यतीति जानन् यजमानोऽवैयाकरण कथमपि ऋत्विक्त्वेन न वृणुयादिति ऋत्विग्वृत्त्या द्रव्यार्जयितु व्याकरणमध्येयमिति भाव ।

प्रदीपे—**तसिरिति**-अयम् "इतराभ्योऽपि दृश्यन्ते" इति वचनात्तृतीयार्थे तात एव वर्गेत इत्यत्रापि । **प्रतिपादयन्निति**—अस्ति, अत एवेति शेष । तत्तत्स्वरवर्णानुपूर्वीकमेव पदादि तत्तदर्थकमिति तत्तथैव प्रयुक्त सत् त तमर्थं बोधयति नान्यथेत्याशय । **स्वरदोषादिति**—ननु स्वरस्य छन्दोमात्रविषयतया कथ लौकिकेऽपि इन्द्रशत्रुशब्दे स्वरवैगुण्यप्रयुक्तदोष इति चेन्न, स्वरविधौ छन्दोऽनधिकारात् । भेदस्तु वेदे नियतत्वैकतया नियमत समाश्रयेण, लोके त्वैच्छिकवैकल्पिकत्वेनेत्येव बोध्य । **यजमानमिति**-नन्वत्र यजमानपुत्रस्य नाशमरत्वे यजमाननाश कथ कथित इति चेन्न, पितृपुत्रयोर्नादात्म्या यासममिप्रेत्य तथाऽभिधानात् ॥ पुरा किल त्वष्टा इन्द्रेण विश्वरूपनामके पुत्र हते कुपित इन्द्रहन्तुरुत्पिपादयिषया आभिचारिकयाग इत्थ विदधत् मन्त्रममुमुच्चारितवान् ' स्वाहेन्द्रशत्रुर्वर्धस्वे"ति । तस्याय विपश्चितोऽर्थ —हे अग्ने तुभ्यमिद स्वाहुत पुनरिन्द्रस्य शातयिता (हिंसक) कश्चित्पुरुषो भूत्वा वर्धस्वेति । सोऽग्निर्यावता कालेनोर्ध्वज्वालारूपो भूत्वा पराभूतमिन्द्र कर्तुं विध्याम'स्तुयतो' भवति, तावति काले मन्त्रगतस्वरापराधेन वह्नि स्वयमेव विरतोऽभूज्ज्वाला शान्तेति वैदिककथा नुसारेणाह-**इन्द्रस्येति । तत्र तत्र**—आभिचारिके यागे । विनिगमनाविरहादाह-**शमयितेति** । **अत्र**-ऊहिते मन्त्र । **तदिति**-रूढिशब्देत्यर्थ । **हि**-यत । **अर्थाभेद इति**-स्वरभेदेऽपि अर्थभेदो न भवेदित्यर्थः। यौगिकशब्दाश्रयणे तु अर्थभेद इत्याह-**तत्रेति**-ऊहितवाक्ये इत्यर्थ । ऋस्य प्रयोक्त यादान्वय । नन्विन्द्रवैरित्वमेव कथ न विधेयमित्यत आह-**सिद्धे इति ।** अत एवेन्द्रस्य शातयितेत्यर्थस्य प्रतिपाद्यत्वेति भाव । **शत्रुः**-शातयिता। **अन्तोदात्त इति**-तत्पुरुषसमासनिमित्तके "समासस्ये"ति सूत्रेण विहिते इत्यादि । **आद्युदात्त इति**-इन्देरौणादिके "ऋज्रेन्द्राग्रे"त्यादिना रन्प्रत्यये कृते निष्पन्नस्येन्द्रशब्दस्य नित्त्वादाद्युदात्तत्व तस्य "बहुव्रीहौ प्रकृत्या पूर्वपदमि"ति पूर्वपदप्रकृतिस्वरेण बहुव्रीहिद्योतक स इति भाव । **अर्थान्तरेति**-इन्द्र शातयिता यस्येतीत्यादि **अनुवाद्येति**-सिद्धेत्यर्थ । **इह-इन्द्रशत्रुशब्दे । युद्ध्यस्वेतीति** अत्र राजत्वस्य विधेयतया राजशब्दात्सम्बोधनविभक्तेरनुपपत्त , तस्यानुवाद्यत्वे तु राजन् ' युद्ध्यस्वेत्यत्र सा भवत्येवेति भाव ।

उद्द्योते—**तस**—"पञ्चम्यास्तसिलि"ति तसिल् । यत्तदोर्नित्यसम्बन्धमभिप्रेत्याह-**यच्छब्देति ।** अ याहाराकरणनिमित्तत्वाशये नाह-**विवरणमिति ।** प्रतिपादयन्नित्यन्तमिति शेष । **तदर्थमिति**-अत्र कर्मधारय । **प्रत्यवायेति**-यजमानस्येत्यादि । नन्वपराधदण्डयो सामानाधिकरण्यनियमात् कथमृत्विगपराधेन यजमाननाश इत्यत आह-**यथेति । तदिति**-अध्वर्य्वित्यर्थ । **तस्मिन्**-यजमाने । **तत्र**-हिंसायाम् । नन्विन्द्रहिंसकवृत्रासुरोत्पादरूपफलाय त्वष्टुराभिचारिकयागकर्तृतया कथ वृत्रेणेत्यत्र तृतीयेत्यत आह—**हेताविति । ननु** कथ (याग) नियतपूर्ववर्तित्वघटितहेतुता पि तत्रेत्यत आह—**फलमिति ।** तथा चाभिचारिकयागफलत्वरूपहेतुत्वेनैव वृत्रेणेत्यत्र तृतीयेति भाव । "अनाम्नाता अमन्त्रा" इत्यापस्तम्बोक्त्यनुसारेणाह—**ऊहितस्येति ।** सकलस्येति शेष । ' एकदेशविकृतमनन्यवदि' त्यादिन्यायेन मन्त्राशाधिक्यविनाशाभ्या मन्त्र वाव्याघातादिति भाव । **अत एव**-ऊहितस्यामन्त्रत्वादेव । **पठितमिति**—व्यक्तमपीति शेष । अन्यथन्द्रशत्रुशब्दरूपदुष्टत्वासङ्गतिरेव स्यादित्याशय । **तत्रत्येति**—शिक्षापाठस्थेत्यर्थ । **शब्देति**—बोधकेत्यर्थ । **अभिन्नेति**—सपत्नेत्यर्थ । सपत्नत्वस्य समानरूपेणोभयनिष्ठतया अर्थभेदासम्भवादाह—**अविशेष इति ।** शत्रुशब्दसाधनप्रक्रियाया विषयविशेषमाह—**शदेरिति । ह्रस्वमिति**-प्रज्ञादिगण निपातनादित्यनुषज्यते। **अत्र-इन्द्रशत्रुर्वर्धस्वेति**

मन्त्रे । **शतपथेति**—'अथ यदब्रवीत्-इन्द्रशत्रुर्वर्धस्वेति तस्मादु हैनमिन्द्र एव जघान। अथ यद्ध शश्वदवक्ष्यत्—इन्द्रस्य शत्रुर्वर्धस्वेति शश्वदु ह स इन्द्रमेवाहनिष्यत्'' ॥ इति शतपथे १ का० ५ प्र० २ ब्राह्मणम्। "स त्वष्टा अहप्रचारसमये इन्द्रशत्रुरिति पूर्वपदाद्युदात्ततया इन्द्र शत्रुर्यस्येति बहुव्रीहिसमासं कृत्वा मन्त्रं प्रयुक्तवानत स्तमिन्द्रो जघान। यद्यसौ अन्तोदात्ततया तत्पुरुषसमासेन वा इन्द्रस्य शत्रुरिति व्यस्तनिर्देशेन वा ब्रूयात्तदा निश्चितमेव स इन्द्रं हन्यात्'' इति शतपथब्राह्मणसायणभाष्यम्। **आद्युदात्तत्वेति**—अन्तोदात्तत्वे कर्तव्ये इत्यादि । **तदुक्तमिति**—जैमिनिना भेदलक्षणे ऊह्यमानस्य मन्त्रत्वमुत नेति सन्दिह्य मन्त्रैकवाक्यतया मध्यनिवेशान्मन्त्रत्वमिति पूर्वपक्षे इति शेष । **अमन्त्रत्वमिति**—कथितेष्वेवाभियुक्तप्रसिद्ध्या मन्त्रता ज्ञायते, न चापि मन्त्रैकवाक्यतयेति भाव । **अस्य**—इन्द्रशत्रुर्वर्धस्वेत्यस्य। अग्नये त्वा जुष्टं निर्वपामीति मन्त्रे अग्नये इत्यत्र सूर्यायेत्यस्योह इत्याशयेनाह—**सूर्यायेति**। **लौकिकेति**—ऊहितावैदिक (सूर्यायेति) इत्यर्थ ।

(भाष्यम्)

यदधीतम्—

"यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥''

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् ॥ यदधीतम् ॥

(प्रदीपः) अविज्ञातमिति । अविदितस्वरादिसंस्कारत्वादर्थापरिज्ञानाद्वा ॥ **निगदेनेति ।** पाठमात्रेण । **न तज्ज्वलतीति ।** निष्फलं भवति ॥ **अनर्थकमिति ।** निष्प्रयोजनम् ॥

(उद्द्योतः) नन्वधीतमविज्ञातमिति विरुद्धमत आह—**अविदितेति । शुष्कैध इति** मातङ्गीवैध शब्देनादन्तपुलिङ्गेन वा निर्वाह्यम् ॥ निरुक्ते तु **यद्गृहीतमविज्ञातमिति** पठ्यते। तत्र **गृहीतं** शब्दत । **अविज्ञातमर्थत** इति बोध्यम् ॥ भाष्ये—**तस्मादनर्थकमिति** अनेन निन्दार्थवादेन निष्प्रयोजनाध्ययनेऽनौचित्येन निष्प्रयोजनं नाध्येयमिति निषेधकल्पनादिति भाव । अतो निषिद्धमध्ययनं मा भूदिति व्याकरणमध्येयमिति तात्पर्यम् ॥

(तत्त्वालोकः) भाष्ये—यथाक्रममाह—**यदधीतमिति ।** एवं सर्वत्र बोध्यम्। **शब्द्यते**—भूयोभूय उच्चार्यते। भेर्येव ध्वनिमात्रमेवाभिव्यज्यते तत्रेति भाव । **अनग्नाविति**—न अग्निर्यत्रेति बहुव्रीहौ भस्मनीत्यर्थ । न अग्निरिति तत्पुरुषे नञो विरोधार्थकतया जले, तथा पर्युदासार्थकतया भस्मनीत्यर्थ । प्रक्षिप्तमिति शेष । **ज्वलति**-दीप्यते (प्रकाशते)। **अध्येयमिति**—स्वरार्थादिज्ञानपूर्वकवेदपाठस्यैव सफलतया तज्ज्ञानाय व्याकरणमध्येयमिति भाव ।

प्रदीपे-**अविदितेति**—अविदित स्वरादिसंस्कारो यत्रेति व्युत्पत्ति। 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥ इति श्रुत्यानुसारेणार्थज्ञानस्य प्राधान्यमभिप्रेत्याह—**अर्थेति ।** तस्य भावार्थमाह—**निष्फलमिति ।** वाच्यार्थसत्त्वाद्, दृष्टान्तानुरोधाच्च तस्यार्थमाह—निष्प्रयोजनमिति।

उद्द्योते—अधीतस्य स्वरूपतो विज्ञानत्वादाह-**अधीतमिति ।** विनिगमनाभावादाह—**अदन्तेति । पठ्यते इति**—भाष्यदृष्टा मन्त्रोक्तानं इत्यत्र दुष्टः शब्दः इतिवद् गृहीतमित्यत्राधीतमित्यनुमतं ज्ञायते

१ दग्—ध्व। म एवेति भाव ।

धात्वोरर्थभेदसूचनायेति भाव । पाठभेदेऽपि नार्थभेद इत्याह—**तत्रेति ।** तत्रापीत्यर्थ । पूर्वत्र परत्र चानुक्तस्यात्रोक्तस्य तस्मादित्यस्यार्थमाह—**अनेनेति ।** यदधीतमित्यादिनेत्यर्थः ।

(भाष्यम्)

यस्तु प्रयुङ्क्ते—

"यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान्यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः ॥''

कः ? ॥

वाग्योगविदेव ॥

कुत एतत् ? ॥

यो हि शब्दाञ् जानात्यपशब्दानप्यसौ जानाति । यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः । अथ वा भूयानधर्मः प्राप्नोति । भूयांसोऽपशब्दाः, अल्पीयांसः शब्दा इति । एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्यादयो बहवोऽपभ्रंशाः । अथ योऽवाग्योगविद् , अज्ञानं तस्य शरणम् ॥

(प्रदीपः) यस्तु प्रयुङ्क्ते इति । अनेनाभ्युदयहेतुत्वं व्याकरणाध्ययनस्य दर्शयति ॥ **विशेष इति ।** स एव शब्दः कश्चिदर्थे केनचिन्निमित्तेन प्रयुक्त साधुरन्यथाऽसाधु । यथाऽश्वेऽश्वशब्दो धनाभाववन्निमित्तक साधुर्जातिनिमित्तकोऽसाधु । गवि च गोणीशब्दः साधर्म्यात्प्रयुक्त साधुर्जातिप्रयुक्तस्त्वसाधु ॥ **क इति ।** वाग्योगविदः श्रुतत्वाद्दोषदर्शनाच्च प्रश्न ॥ एवैव परमतमाशङ्क्याह-**वाग्योगविदेवेति ॥ एवमपशब्दज्ञानेऽपीति ।** यथा श्लैष्मिकद्रव्यसेवया श्लैष्मिको व्याधिर्भवति तद्विपरीतसेवया त्वारोग्यं तथात्रापि यथोक्तं न्याय्यमिति भाव ॥ **भूयासोऽल्पीयांस इति ।** परमतापेक्षया प्रकर्षे प्रत्यय । यदि मन्यसे बहव शब्दा अल्पेऽपशब्दा अङ्गभूयस्त्वाच्च फलभूयस्त्वमिति । तन्न। यस्माद्भूयासोऽपशब्दा अल्पीयास शब्दा ॥ **अज्ञानमिति ।** यथा च निरर्थो ब्रह्महत्यादिफलाभाव ॥

(उ०) एकः पूर्वपरयोरित्यत्र भाष्यपठितैक शब्द इत्यादिश्रुतिमूलकमाह-भाष्ये—**यस्त्विति ।** अभ्युदयहेतुत्वमदृष्टद्वारा पुरुषार्थसाधनत्वम्। **कुशलोऽधीतव्याकरण ।** लक्षणस्मरणपूर्वकं य प्रयुङ्क्ते इति फलति ॥ **विशेष इति ।** अर्थविशेष इत्यर्थ । तदाह-**स एवेति ॥ साधर्म्याद्** साधर्म्यमूलकाद्भेदारोपात् ॥ भाष्ये—**यथावद्** अस्खलनादिदोषरहितम् ॥ वाचो योग प्रकृतिप्रत्ययविभागेनार्थविशेषस्त्वं तद्वेत्तीति वाग्योगविद् ॥ **श्रुतत्वादिति ।** एवं च जयासिद्धोषदोषश्रवणेन समुच्चयप्रतिपादनाच्चेत्यपि बोध्यम् ॥ **दोषदर्शनादिति ।** शास्त्रस्याधर्महेतुत्वं दोष इत्यर्थ । वादिप्रतिवादिपूर्वपक्षोत्तरपक्षतया व्याख्यानं सामञ्जस्य मत्वाह—**एवैवेति ॥** भाष्ये—**कुत एतदिति ।** वाग्योगविदो दोष कुत इत्यर्थ ॥ ननु साधुज्ञानस्य यथा धर्मजनकता शास्त्रोक्ता न तथाऽसाधुज्ञानस्याधर्मजनकता शास्त्रोक्तेत्यत आह—**यथेति ।** एवञ्चापशब्दज्ञानमधर्मसाधनं धर्महेतुशब्दज्ञानविरोधित्वात्, यद्यद्विरोधि तत्तद्विरोधिफलकं यथा श्लैष्मिकद्रव्यमित्यनुमानं प्रमाणमिति भाव । एवं च शास्त्रस्याधर्महेतुतया तत्र प्रवृत्तिर्न स्यादिति नेदं

वचो व्याकरणाध्ययनानुष्ठापकं स्यादिति तात्पर्यम् ॥ नन्वस्त्वधर्मोऽपि, तथापि धर्माधिक्यायाध्येयं व्याकरणमत आह—भाष्ये-अथवेति । अङ्गभूयस्त्वादिति । अङ्गाना धर्मजनकानां भूय—स्त्वादित्यर्थः । एवं च यज्ञादेः पापजनकत्वेऽप्यधिकधर्मजनकत्वाद्यथा तत्र प्रवृत्तिस्तथा प्रकृतेऽपीति भावः ॥ अल्पीयांसः शब्दा इति । एवं च अङ्गनिरीक्षित क्षीरवदनुपादेय तद्विज्ञानमिति भावः ॥ नन्वेवं सामर्थ्यादवाग्योगवि देव दुष्यतीत्यत्र कर्ताऽस्त्वत आह—भाष्ये-अथ योऽवाग्योगविदिति॥

(तत्त्वालोकः) भाष्ये—शब्दान्–साधुशब्दान् । एवं सर्वत्र । यथावदिति—अत्र योग्यतार्थकयथाशब्दाननुप्रत्ययः । अनन्त मिति–अत्रानन्त्यं चैहिकापेक्षयात्यधिककालव्यापिता, नाविनाशिता, जन्मभावस्य सन्तानानियमात् । नन्वेवं कथं सङ्गच्छते "अपाम सोमममृता अभूमेति," "आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते" इत्यादिसत्त्वात् । जयम्–विशिष्टोत्कर्षम् । परत्र–परलोके । दुष्यति– अपकर्षं प्राप्नोति । यो हि शब्दान् जानाति, अपशब्दानप्यसौ जानात्येवेति न नियमः, किन्तु सम्भव इत्याशयेनाह–यो हीति । अप्यधर्म इति–अधर्मोऽपीत्यन्वयः । इति–इति हेतौ । ननु साधारणजने व्यवहाराय सकलविज्ञानासम्भवदानां कथं साधुशब्दापेक्षया भूयस्त्वमित्यत आह–एकैकस्येति । बहव इति–देशकालपुरुषतदवस्थादीनां भेदादित्यादि । अथशब्दः प्रश्नवाचकः । एवमग्रेऽपि । विधिनिषेधादीन् जानतामेव सर्वत्राधिकारदर्शनादाह–अज्ञानमिति । निषेध शास्त्राज्ञानमित्यर्थः । तथा च विधिनिषेधशास्त्रं जानतां विदुषामेवासाधुशब्दज्ञानजनितपुण्यापेक्षया अधिकापशब्दज्ञानजनितपापाधिकता, न मूर्खाणां निषेधशास्त्राज्ञानादिति स्थितौ व्याकरणाध्ययनस्य नित्यतयैव विधेयता युक्ता, न पुण्यजनकसाधुशब्दज्ञानजनकतया तस्यापि बहुपापजनकतया एव सम्भवन् बहुपापजनकाल्पपुण्यजनकानां प्रेक्षावद्भिरग्राह्यत्वात् प्रवर्त्तनस्थाने निषेध एव प्रसज्येतेत्याशयः समाधातुरेकदेशिनः ॥

प्रदीपे–अनेन–यस्तु प्रयुङ्क्ते इति पद्येन । अस्वे–दरिद्रे । जातीति– अश्वत्वेत्यर्थः । जातीति–गोत्वेत्यर्थः । असाधुरिति–तथा च एकार्थे निमित्तविशेषे शब्दसाधुत्वासाधुत्वज्ञानं व्याकरणैकसाध्यमिति तदर्थं तदध्येयमिति फलति । आह च हरिः–"अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् । तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥" इति ॥ द्रव्येति–दध्यादीत्यर्थः । व्याधिः–कासश्वासादिरोगः । तद्विपरीतेति– श्लेष्मघ्नशुण्ठीपिप्पल्यादीत्यर्थः । प्रत्ययः–ईयसुन् । पूर्वपक्षिणो विवक्षितस्य साधुशब्दानां बहुत्वस्यासाधुशब्दानां न्यूनत्वस्य च खण्डनपरेऽत्रैकदेशिमते परमतापेक्षया प्रकर्षस्य तात्पर्यविषयत्वादिति भावः । केचित्तु प्रकृते स्वार्थे ईयसुन्, अश्वात्तरमित्यत्र तरबिवेति वदन्ति । तन्न, तस्यागतिकगतित्वात् ॥ निषेधशास्त्रमजानतः कर्मजनितदोषाभावे दृष्टान्तमाह–यथेति ।

उद्द्योते—एक इति–निषेधविधिविषयफलानि प्रतिपाद्य शास्त्र विधिविषयं फलमुपपादयन्नित्यादि । इत्यादीति–आदिना 'सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवती"त्यस्य सङ्ग्रहः । पूर्वापरसङ्गतये वदति–अहष्टेति । अर्थविशेषे–शब्दयद्वयद्योत्यावच्छिन्नस्वरूपे । सामञ्जस्यायाह–साधर्म्यमूलकेति । वाचः–शब्दस्य । केचित्तु वाचो योगं (घटनां) वेत्तीति वाग्योगविदिति व्युत्पत्तिं कथयन्ति । मध्ये द्वितीयतया हेत्वन्तरमाह–एकत्रेति । प्रथमेनानेन च हेतुना वाग्योगविद एव कर्तृत्वेनोपस्थितत्वादुत्तरभाष्ये एवकारप्रयोगः । प्रश्नकारस्याशयात्र कोटिद्वयोपस्थितेरावश्यकतायामुक्तरीत्यैककोटेरुपस्थितत्वात् तृतीयहेतौ कोट्यन्तरोपस्थापनसमर्थमर्थमाह–शास्त्रस्येति । दोष इति–प्रसज्येत वाग्योगविदः कर्तृत्व इति शेषः । अतोऽनेन हेतुना अवाग्योगविद एव कर्तृत्वेनोपस्थितिः । दोषदर्शनादिति । कैयटस्य वाग्योगविदोऽपशब्दज्ञानप्रयुक्तदोषदर्शनादित्यर्थो न युक्तः, तस्य तादृशार्थकत्वे हेतुतयैव वाग्योगविद एव कर्तृत्वेनोपस्थितेः कोट्यन्तरानुपस्थितौ तदर्थमग्राह्य प्रश्नानुपपत्तेः । मध्ये एकत्रेति हेतुपूरणस्य वैयर्थ्यापाताच्चेति भावः । उत्तरस्य दुष्टत्वेनासिद्धान्तत्वादाह–असामञ्जस्यमिति । दोष इति–वाग्योगविदः कर्तृत्वे शास्त्रस्याधर्महेतुत्वरूपदोष आपद्यत तथा च कुतः (कथं) तद्वत् (तस्य कर्तृत्वं) सङ्गच्छत इत्यर्थः । अतोऽवाग्योगविद एव कर्तृता युक्तेति भावः । न तथेति–तथा च यथैवेत्यादिभाष्यासङ्गतिरिति भावः । एवञ्च–दृष्टान्तसत्त्वे च । विरुपन्यासत्वमाह– यथादिति । एवञ्च–अनुमानमानसत्त्वे च । इदं–यस्तु प्रयुङ्क्ते इत्यपीति–विदुष एवेति शेषः । साधुशब्दज्ञानाय शास्त्राध्ययनेन विधायमानेन तान्तरीयकतया जनितादसाधुशब्दज्ञानाद्योऽधर्मः, तस्य कूपखानकन्यायेन साधुशब्दज्ञानजनितधर्मांशेनैव नाशः स्यादित्यभिप्रेत्याह– धर्मेति । धर्मांशेत्यर्थः । उपकारकत्वनप्यङ्गत्वमित्याशयेनाह–धर्मजनकानामिति । साधुशब्दज्ञानामिति शेषः । एवञ्च–उक्तन्यायस्वीकारे च । पापेनेति–पश्वादिहिंसाजनितेत्यादि । तत्र–यज्ञादौ । प्रकृते–व्याकरणाध्ययने । एवञ्च–अधिकाधर्मजनकत्वे च । क्षीरविशेषस्य कुक्कुरचर्मपात्रान्तर्गतत्ववत् साधुशब्दस्य अपशब्दव्याप्तत्वाद् दृष्टान्तमाह– दृतीति । श्वचर्मपात्रेत्यर्थः । तदिति–साधुशब्देत्यर्थः । एवम्–उक्तरीत्या वाग्योगविदोऽधिकाधर्मप्रसक्तौ । यस्तु प्रयुङ्क्ते इत्यस्य व्याकरणाध्ययनाप्रवर्तकत्वापत्तौ । कर्त्तेति–तस्य बहुधर्मसम्भवेऽवाग्योगविदो गणितधर्मसम्भावनेति भावः ।

(बाधकभाष्यम्)

विषम उपन्यासः । नात्यन्तायाज्ञानं शरणं भवितुमर्हति । यो ह्यजानन् वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सोऽपि मन्ये पतितः स्यात् ॥

(प्रदीपः) नात्यन्तायेति । पुरुषाणां विधिनिषेधयोरधिकारात्तत्परिज्ञाने प्रयत्नस्य न्याय्यत्वात् ।

(उ०) अत्यन्तमित्यर्थे त्यन्तायेति । अव्ययम् । पुरुषाणामिति । मनुष्याणामित्यर्थः । तिरश्चामत्यन्तायोग्यत्वाद्दत्तज्ञानं शरणं मनुष्याणां तु योग्यत्वात्तैर्निषिद्धानुष्ठानवर्जनार्थमवश्यं शास्त्रं विज्ञेयम् । अतोऽवाग्योगविदो महाननर्थ इति भावः ॥ अत्र नात्यन्तायेत्यनेन शास्त्राज्ञानं नैव शरणं दोषद्वयभञ्जनात् । किं तु वध्यादेर्ब्राह्मणत्वाज्ञानमेव पापाभावे प्रयोजकमिति ध्वनितम् ॥ भाष्ये–यो ह्यजानन्निति । निषेधशास्त्रमजानन् ब्राह्मणत्वाद्यज्ञानपूर्वकं तद्वधादि कुर्वन्सोऽपि पतित एवेत्यर्थः ॥

(तत्त्वालोकः) भाष्ये विषम–असङ्गतः । उपन्यासः–हेतूपादानम् । अवाग्योगविदो न निषेधशास्त्राज्ञानमात्रेणापशब्दभाषणजनितपापान्मुक्तिः, पापजनकताया निषेधेनापेक्षितस्याधिकारस्य तत्रापि सत्त्वादित्याशयेनाह–नात्यन्तायेति । हि–यतः । मन्ये–निश्चिनोमि ।

प्रदीपे—पश्वादीनां निषेधाद्यधिकाराभावादेव निषिद्धाद्यनुष्ठानजनितफलाभावो, न निषेधशास्त्राज्ञानादित्यभिप्रायेणाह–पुरुषाणामिति । तदिति–विधिनिषेधेत्यर्थः ।

उद्द्योते—अत्यन्तं–सर्वथा । अव्ययम्–विभक्तिप्रतिरूपकमव्ययम् । विधिनिषेधयोः मनुष्यमात्राधिकारस्य शास्त्रेण निश्चिततया न्यूनतानिराकरणायाह—मनुष्येति । मनुष्यपदिनो भेदमाह—तिरश्चामिति । तैः–मनुष्यैः । शास्त्रम्–निषेधशास्त्रम् । अनर्थः–प्रत्यवाय

एव । ननु "अयन्याये"ति पद विना पि निर्वाहसम्भवे कथ तदुक्तमित्यत आह-**तत्रेति**। भाष्ये इत्यर्थ । **शास्त्रेति**-निषेधयादि । **दोषद्वयेति**-शास्त्राज्ञाननिषिद्धानुष्ठानेनद्वयजनितेत्यादि । **किन्त्विति**-अज्ञान किञ्चिद् शरणमपि यथति शत्र । **वध्यादेरिति**-अस्य ब्राह्मणस्यादौ सम्बन्ध । प्रकान्तनया निषधशास्त्रस्यैवाज्ञानन्नित्यत्रान्वयो न तु ब्राह्मणस्येत्याह-**निषेधेति**।

(सिद्धान्तव्याख्याभाष्यम्)

एव तर्हि—

सोऽनन्तमाप्नोति जय परत्र
वाग्योगविद् दुष्यति चापशब्दै ॥
क ? ॥

अवाग्योगविदेव । अथ यो वाग्योगविद्, विज्ञान तस्य शरणम् ॥

(प्रदीप) प्रकरणात्सामर्थ्यं वलीय इत्याह—**अवाग्योगविदिति**। वाग्योगविस्तूभयज्ञोपि शब्दा प्रयुङ्क्ते नापशब्दानिति ज्ञानपूर्वकप्रयोगादभ्युदयभाग्भवति ॥

(उद्योत) **प्रकरणादिति**। सन्निधेरित्यर्थ ॥ नन्वेव वाग्योगविदो पशब्दज्ञानादधर्म स्यादत आह—**वाग्योगेति**। एवचापशब्दप्रयोग एवाधर्महेतुर्न ज्ञानमात्रमिति न दोष इति भाव ॥

(तत्त्वालोक) भाष्ये **एवम्**-अवाग्योगविदोऽन्यथा गत्यभावाद् दोषित्वस्यावश्यवाच्य त्वे। सिद्धान्ती सम्यगुत्तर वक्तुमनुवदति-**सोऽनन्तमिति** । **विज्ञानमिति**- बहुव्रीहिणा लक्षणया वा) लक्षणस्मरणपूर्वकमर्थविशेषे साधुशब्दप्रयोगरूपमित्यर्थ ।

प्रदीप—इत्याह-इत्यभिप्रायेण सिद्धान्ती वदति। **उभयज्ञ**-साध्वसाधुशब्दज्ञ ।

उद्योत उभयाकाङ्क्षारूपप्रकरणस्यासम्भवादाह - **सन्निधेरिति**। अ धनराकाङ्क्षारूपात् स्थानाद्यप्रमाणादित्यर्थ । **एवम्**-अवाग्योगविदो दोषकर्तृत्वस्वीकारे। **वाग्योगविद्** -वाग्योगविदोऽपि। **एवञ्च**-वाग्योगविदोऽपशब्दज्ञानेनोक्तत्वे च। **ज्ञानेति**-अपशब्दस्येत्यादि । **दोष इति**-वाग्योगविद इत्यादि । "यस्तु प्रयुङ्क्ते" "एक शब्द" इत्यादिना साधुशब्दस्य प्रयोग धर्मो न तु ज्ञानमात्र इति सूचितेन अपशब्दस्य प्रयोगो धर्मो न तु ज्ञानमात्रे इति फलति । तथा च वाग्योगवित् साध्वसाधुशब्दज्ञत्वाद् अपशब्द विहाय साधुशब्दप्रयोगकरणात् धर्म वाप्नोति, अवाग्योगवित्तु अपशब्दप्रयोगकरणादधर्ममेवाप्नोतीति भाव ।

(आक्षेपभाष्यम्)

क पुनरिद पठितम् ? ॥

(प्रदीप) श्लोकस्यापरिज्ञानात्पृच्छति—**क पुनरिति**। प्रातिपदिकार्थप्रश्न एवात्र तात्पर्यम्—कि तदस्ति यत्रेद पठितमित्यर्थ । अत एव श्लोका इति प्रथमा तेनोत्तरम् । अन्यथा श्लोकेष्विति वक्तव्य स्यात् ॥

(तत्त्वालोक) भाष्ये-**इद**— 'यस्तु प्रयुङ्क्ते इति पद्यम्।

प्रदीप—**श्लोकस्येति**- (लक्षणया) इत्यादि इत्यर्थ । **प्रातिपदिकेति**-विभक्त्यर्थप्रकारके नेति । अ य शाब्दबोधाविषयत्वादाह—**तात्पर्यमिति** । अत आह—**किन्तदिति**। **अर्थ** -कल्पितार्थ । **अत एव**-उत्तरे तात्पर्यादेव।

(समाधानभाष्यम्)

भ्राजा नाम श्लोका ॥

(उद्योत) भ्राजा नाम कात्यायनप्रणीता श्लोका इत्याहु ॥

(तत्त्वालोक) भाष्ये—आधारभूतश्लोकपरिचायकमाह—**भ्राजेति**।

(आक्षेपभाष्यम्)

किञ्च भो श्लोका अपि प्रमाणम् ? ॥

कि चात ? ॥

यदि श्लोका अपि प्रमाणम्, अयमपि श्लोक प्रमाण भवितुमर्हति—

'यदुदुम्बरवर्णाना घटीना मण्डल महत् ॥
पीत न गमयेत्स्वर्ग कि तत् क्रतुगत नयेत्''इति॥

(प्रदीप) आप्तोक्तत्वापरिज्ञानादाह—**किञ्च भो इति** ॥ **यदुदुम्बरेति**। अय श्लोक सौत्रामणियागे सुरापानस्य दुष्टत्वमुद्भावयति।

(उद्योत) भाष्ये **कि चात इति**। अत प्रमाणे कि विवक्षितमित्यर्थ ॥ **उदुम्बर** ताम्रम् ॥ **दुष्टत्वमिति** । इदमुपलक्षणम् । अन्यत्राप्यदुष्टत्वस्य ॥

(तत्त्वालोक) **प्रमाणमिति**—अस्य विभक्तिप्रतिरूपकाव्ययतया, प्रमाणत्वे एकत्वान्वयेन वा प्रकृते सामानाधिकरण्योपपत्ति । तथा "धर्माधर्मयो"रित्यादि । **यदुदुम्बरेति**-उदुम्बरवर्णाना, रक्तवर्णानाम्, घटीना कलशीनाम्, महत् विशालम्, मण्डलम् (मण्डलस्य स्वरूपतोऽपेयत्वाल्लक्षणया) मण्डलस्थम्, (मद्य) पीत (सत्) यद् यदि (पातार) स्वर्ग न गमयेत्, तत् तर्हि क्रतुगतु सौत्रामण्याद्यपात्रस्थ (स्वल्प मद्य) पीत (सत् पातार) कि (स्वर्ग) नयेत्, अपि तु नयेदिति शब्दार्थ । भावार्थस्तु यदि क्रतौ स्वल्पमपि मद्य पीत सत् पातार स्वर्ग नयेत्, तर्हि पानागारे पर्याप्त मद्य पीत सदवश्यमेव पातार स्वर्ग नयेदिति हेतो यज्ञापेक्षया पानागार एव मद्यपान श्रेयस्करमिति । अथ यदि पानागारे मद्य न पेयत दोषसम्भवात्, तर्हि यज्ञे तु स्वल्पमपि मद्य न पेय दोषसम्भवात् तेन मद्यपानप्रसक्तौ निषिद्धत्वे मद्यपानविधायको वेद तद्बोध्ययज्ञादिश्च सर्वथा हेय एवेति पर्यवसितार्थ ।

प्रदीपे—**आप्तोक्तत्वेति**-भ्राजाख्यश्लोकानामित्यादि । शब्दार्थपर्यवसितार्थाभिप्रायेणाह-**दुष्टत्वमिति** ।

उद्योत—**अत इति**—केचित्तु किञ्चात इति निपातसमुदाय किमित्यर्थक, तथा च श्लोकप्रामाण्ये किमनिष्टमित्यर्थं इति वदन्ति। भावार्थमभिप्रेत्याह-**इदमिति**। **अन्यत्र**-यागातिरिक्ते पानागारादौ। **अपिना**। यागस्य समुच्चय । **अदुष्टत्वस्य**-मद्यपानादुष्टत्वस्य।

(समाधानभाष्यम्)

प्रमत्तगीत एष तत्रभवत । यस्त्वप्रमत्तगीतस्तत्प्रमाणम् ॥ यस्तु प्रयुङ्क्ते ॥

(प्रदीप) **प्रमत्तगीत इति**। प्रमादेन विप्रतिपन्नत्वेन गीत इत्यर्थ । कात्यायनोपनिबद्धभ्राजाख्यश्लोकमध्यपठितस्य तस्य श्लोकस्य श्रुतिरनुग्राहिकास्ति—"एक शब्द सम्यग् ज्ञात शास्त्रान्वित सुप्रयुक्त स्वर्गे लोके कामधुग्भवती"ति ॥

(उद्योत) ननु कर्तरि क्त अप्रमत्तशब्दस्य गतार्थेन समास अनुपपन्न, तत्रभवत इत्यनेन साकाङ्क्षत्वादत आह-**प्रमादेनेति**। भावे क्त इति भाव ॥ **विप्रतिपन्नत्वेन** वेदविषयविप्रतिपत्त्याश्रयत्वेन। तत्र स्वस्मिन्नारोप्य दैत्यनाशाय पूज्यस्यापि भगवत इत्यस्य

तथोक्तिरिति स न प्रमाणमिति भाव ॥ भाष्ये यस्त्वप्रमादेन गोनी यस्य कस्यापि तत्प्रमाणमिति प्रतिनिर्दिशलिङ्गम् ॥ ननु कथं ज्ञानम्–'अयमप्रमत्तगीत' इत्यत आह–**श्रुतिरनुग्राहिकेति** ।

(तत्त्वालोक) भाष्ये–एतन्निरसितुमाह–**प्रमत्तेति** । तत्रभवत पूर्वयुद्धस्य एव "यद्दुम्बरैनि" श्लोक प्रमत्तगान इति योजना ननु "यस्तु प्रयुङ्क्ते" इत्यस्यैव "यद्दुम्बरे"त्यस्यापि कथन्न प्रामाण्य मित्यत आह–**यस्त्विति** ।

प्रदीपे–**अस्य**–"यस्तु प्रयुङ्क्ते" इत्यस्य । **इतीति**–अत्र साधुशब्दे ष्वपि अविवसूत्रसिद्धाना प्रयोगे फलविशेषबाधिका 'नाकमिष्टसुख यान्ति सुयुक्तैर्वाग्रथैः' । अथ पत्काषिणो यान्ति येऽच्चाकमताभाषिण ॥ इत्यादय स्मृतयोऽपि बोध्या ।

उद्द्योते–**कर्त्तरि**–प्रमाद्यतीति प्रमत्त इति व्युत्पत्तौ । **साकाङ्क्षत्वा दिति**–साकाङ्क्षत्वात् 'सापेक्षमसमर्थ'मिति न्यायेनासामर्थ्यादित्या शय । **क्रान्त इति**–प्रमत्तशब्द इति शेष । **विप्रतिपत्तीति**–विरुद्धा प्रतिपत्ति (मति) विप्रतिपत्तिरिति व्युत्पत्ति । ननु कोऽय तत्र भवान् ? यदि भगवान्, तर्हि कथन्तत्र विप्रतिपत्ति । यदि तदन्य, तर्हि कथन्तत्र पूज्यतादोषमसम्भवादित्यत आह–**तत्त्वमिति** । श्रुतिविषय-कविप्रतिपत्तिरवमित्यर्थः । आरोपकारणमाह–**दैत्येति** । ननु वदमि दा द्वारा अधर्मभात्रप्रचारकस्य बुद्धस्य कथमाश्वरता, भगवतो हि "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मान सृजाम्यहम् ॥ परित्राणाय साधूना विनाशाय च दुष्कृताम् । धर्मसंस्था पनार्थाय सम्भवामि युगे युगे" ॥ इत्यादिगीतादिना धर्मसंस्थाप कत्वादिति चेन्न, अधिकारिणा कर्मप्रवर्त्तनस्येवानधिकारिणा कर्मनिव र्त्तनस्यापि धर्मसंस्थापनान्तर्गततया तस्मिन्समये वैदिककर्मसु प्रवर्त्तमा नानधिकारिणो वेदनिन्दाद्वारा तेभ्यो निवर्त्य बुद्धेन धर्मसंस्थापनस्यैव कृतत्वादित्याशयेनाह–**भगवत इति** । "सर्वज्ञता तृप्तिरनादिबोध स्वतन्त्रता नित्यमलुप्तशक्ति । अचिन्त्यशक्तिश्च विभोर्विधिज्ञा षडा हुरङ्गानि महेश्वरस्य ॥" इत्याद्युक्तिषड्विधैश्वर्यवत इत्यर्थः । **ईश्वरस्य**–नियामकस्य । **तथा**–वेदविरुद्धा । प्रमत्तपदस्य भावक्तान्तताभिप्राये णाह–**अप्रमादेनेति** । तत्रभवत इत्यस्याप्रमत्तगीत इत्यत्रासम्बन्धमुच नायाह–**यस्य कस्यापीति** । **लिङ्गमिति**–तदित्यत्र विधेयप्रमाणलि ङ्गतया क्लीबलिङ्गमित्यर्थ । **अयम्**–"यस्तु प्रयुङ्क्ते" इति श्लोकः ।

(भाष्यम्)

अविद्वांसः—

"अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥"
अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ॥
अविद्वांसः ॥

(प्रदीप.) स्त्रीष्विवेति । प्रत्यभिवादे हि गुरुणा प्लुत कार्य । यस्तु प्लुत कर्तुं न जानाति स स्त्रीवद्वक्तव्योऽयमहमिति, न 'अभि वादये देवदत्तोऽहम्' इत्यादिना सस्कृतवाक्येनेत्यर्थ ॥

(उद्द्योत) भाष्ये **(अविद्वांस इति)** । अत्र योग्य वद्वयाकर ण कर्मबोध्यम् ॥ **प्रत्यभिवादे** अभिवादानन्तरप्रयोज्ये वचने **नाम्नोऽ** भिवादकनाम्नो प्लुतिं कर्तुं ये न जानन्ति **तेषु कामं** नि शङ्क **विप्रोष्य** प्रवासादेत्य । यद्वा कामं विदन्त्वनुसारमन्तरेणेत्यर्थ ॥ अयमहमित्यनुकर णत्वानितिपरत्वेऽपि द्वन्द्वयोगाभावान्निवाभावेन वदेरित्यतिङन्तत्वेन च समासाभाव इत्याहु ॥ अत्र क्वचिद् 'अयमहमिति वदेत्। अनुक रणं चानितिपरमिति गतित्वात्समास 'इति पाठो दृश्यते सोऽपपाठ ॥

भाष्ये—**स्त्रीवदिति** । तद्वत्करणेन शास्त्रादानि वक्तुं नामप्रयुक्तद समानो मा भूमेति भाव ॥

(तत्त्वालोक) भाष्ये **काम**–यथेष्टम् । **तेषु**–अवैयाकरणेषु । तुनोक्तवैलक्षण्य सूच्यते । **अयमिति**–नामगोत्रादिरहितम् । 'अयमहमभिवादये' इत वदन् प्रणाममात्रेनैव विहिता रलिपुरुष्य हृदयदेशा नयनादभिवादनप्रमोत्पादनेनावैयाकरणान् प्रीणयन् । अथवा नमा मीत्यादिरहितम् "अयमह ममानस्तव दर्शनाये"त्येव कथयन्नुक्त रीत्या तान् प्रसादयेत, न तु "अभिवादये शाण्डिल्यगोत्रो देवचन्द्र-शमाऽहमा" इति वदन् तेषा पादौ गृहीत्वादित्यर्थ । **अध्येयमिति**–व्याकरणाध्ययनेन प्लुतज्ञाने सति अभिवादानन्तरप्रयोज्याशीर्वाद वाक्योपात्ताभिवादकनामटः प्लुतकरणात् स्त्रीणामिवाभिवादना न भव तीति स्त्रीसाम्याभावलाय व्याकरणमध्येयम्, अन्यथा स्त्रीसाम्य दुव रमेवेति भाव ।

प्रदीपे–यथाविधि अभिवादनप्रत्यभिवादनयो कृतयो अभिवाद्या भिवादकौ पुण्य प्राप्नुतो नान्यथेति हेतो विध्यनभिज्ञ नाभिवाद्य इत्याह येनाह–**प्रत्यभिवादे इति** । **गुरुणा**—प्रणम्येन । "आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने । अकारश्चास्य नाम्नोऽन्ते वाच्य पूर्वाक्षर प्लुत ॥" इत मनुवचनानुसारेणाह—**प्लुत कार्यं इति** । **देवदत्तोऽहमिति**—ननु "अभिवादात्पर विप्रो ज्यायासम भिवादयन् । असौनामाहमस्मीति स्व नाम परिकीर्तयेत ॥" इति स्मृत्या नामोच्चारणस्य तत्र विहिततया, "आत्मनाम गुरोर्नाम नामा तिकृपणस्य च । श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयो ॥" इति स्मृत्या नामोच्चारणस्य निषिद्धतया च षोडशिग्रहणाग्रहणे इव पाक्षि कतया नामग्रहणाग्रहणे स्यातामिति चेन्न "निर्दिशेद्यजमान स्व नाम साव्यवहारिकम् । नाक्षत्र च यथा कृष्णशर्मा रौहिण इत्यपि ॥" इत्याश्वलायनश्रौतकारिकोक्त्या, "अमुष्य सर्वविति पतिनाम गृह्ही यादात्मनश्च"त्यादिगृह्यवाक्यालोचनेन "तस्मा तु नामाहमस्मि मत्यकामो नाम स्यमिति" इति वेदवाक्येन च निषेधस्मृते विहिता-तिरिक्तस्थलविषयताकल्पनात् ॥ **सस्कृतेति**–यथाविधिप्रयुक्तेत्यर्थ ।

उद्द्योते–यथाश्रुतानुपपत्त्या देरित्यादिशेष पूरयन् व्याचष्टुमाह–**वचने इति** । आशीर्वादवाक्ये इत्यर्थ । तथा "प्रयुक्तस्ये"ति शेष । फलितार्थमाह–**निःशङ्कमिति** । **आहुरिति**–सिद्धान्तविद इति शेष । **अत्र**–कैयट (वाक्येनेत्यर्थ इत्यतोऽग्रे) । उक्तहेतुद्वयेन समासासम्भ वादाह–**सोऽपपाठ इति** । तेन समासाभावादेव "अत्र गतिसमासेऽपि अस्य वामायमित्यादावनुकरणत्वाद् विभक्तेर्न लुगि"ति कैया द्विदुक्तिरप्यपास्ता । **तद्वत्करणेन**–स्त्रीवदिति कथनेन । नच स्त्रीमात्रः प्लुत इत्यादि लोकप्रसिद्धैव प्लुतज्ञानसम्भवात्तदर्थ व्याकरणाध्ययन प्रवर्त्तकमिति वाच्यम्, तादृशलोकप्रसिद्धेरपि व्याकरणशास्त्रमूलकत्वात् ॥

(भाष्यम्)

विभक्तिं कुर्वन्ति—

याज्ञिकाः पठन्ति—"प्रयाजाः सविभक्तिकाः कार्याः" इति । नचान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् ॥ विभक्तिं कुर्वन्ति ॥

(प्रदीप) **प्रयाजा इति** । प्रयाजमन्त्रा ऊह्यमानाग्निशब्दप्रकृ-तिकविभक्तियुक्ता इत्यर्थ । यथा **समिध समिधोऽग्न आज्यस्य व्यन्तु अग्ने प्र"** इति ।

(उद्द्योतः) ननु प्रकृतौ प्रयाजमन्त्रा सविभक्तिका एव पठ्यन्ते तत्किमनेन वचनेनेत्यत आह—**प्रयाजेति** । ऊ ह्यमाना याज्ञि

शब्दप्रकृतिकविभक्तिसंयुक्ता इत्यर्थः ॥ न त्वग्निशब्दप्रकृतिकैत्यसङ्गतम्। अपूर्वविभक्तिमात्रविधाने न केवलः प्रत्यय इति निषेधात् यत्किंचित्प्रातिपदिकप्रकृतिका सर्वा विभक्तयः प्रयोक्तव्या इति प्राप्नोतीति चेत्। त्वमग्ने प्रयाजानुयाजाना पुरस्ताच्च पश्चादिति मन्त्रवर्णेनाग्निशब्दप्रकृतिका एव ता इत्यायाताः। तत्राग्नेर्देवताया एकत्वादेकवचनमेव। विभक्तयश्च प्रथमाद्वितीयातृतीयाषष्ठीसप्तम्य एवेति श्रौतसम्प्रदायः ॥

(तत्त्वालोक) भाष्ये-कुर्वन्तीति-विभक्त्यन्तं कुर्युरित्यर्थः। लिङर्थे लेड्विधानात्। कुत्रेति जिज्ञासायामाह-याज्ञिका इति। किमागमनमेतावतेत्यत आह- नचेति। च-यतः। व्याकरणम्-व्याकरणाध्ययनम्। कर्तुमिति-अध्येतव्यं व्याकरणमिति शेषः।

प्रदीपे-यागस्य सविभक्तिकत्वासम्भवेन प्रयाजपदस्य मन्त्रपरत्वादाह-प्रयाजमन्त्रा इति। दिग्दर्शनायाश्वलायनाद्युक्तं प्रयाजमन्त्रप्रयोगस्वरूपमाह-यथा समिध इति।

उद्द्योते-आधानोत्तरं यजमानस्य विपद्ग्रस्तत्वे नैमित्तिकत्वेन विहिताया पुनराधेयेष्टौ समाम्नातं "प्रयाजाः सविभक्तिकाः" इति अभिप्रेत्याह-प्रयाजेतीति। प्रथमदोषमाह-नन्वग्नीति। अपूर्वेति-यत इत्यादि। द्वितीयदोषं बोधयन्नाह-सर्वा इति। प्रथमं समाधत्ते-त्वमग्ने इति। प्रयाजानां पुरस्तादनुयाजानां पश्चादिति क्रमेणान्वयः। मन्त्रवर्णेनेति। कश्चित्तु निरुक्ते दैवतकाण्डे-अथ "किं देवताः प्रयाजानुयाजाः" इति प्रश्ने "आग्नेया इति तु स्थितिः" इत्युपसंहारेणेति वदन्ति। ताः-प्रयाजानुयाजाः। द्वितीयं समाधातुमाह-तत्रेति। सकलविभक्तीनामपि मध्ये इत्यर्थः। अथ "अग्नेऽग्नेऽग्नावग्नेऽग्निनाऽग्नेऽग्निमग्ने" इति चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्ददाति इत्यापस्तम्बोक्त्या अग्निशब्दप्रकृतिकसम्बुद्धिसप्तमीतृतीयाद्वितीयैकवचनानि आदिक्रमेण याज्याने पूर्वमग्निशब्दात्पूर्वं वा प्रयोज्यानीति निर्णयः। अथवा "द्व्यक्षरा सन्तो द्वित्वेनाभ्यस्या चतुरक्षरा भवन्ती"ति वचनाद् यद्विभक्त्यन्तानां द्वित्वे कृते चतुरक्षरत्वं, तद्विभक्त्यन्तानामेव प्रयोगस्य विहिततया सम्बुद्धितृतीयाचतुर्थ्यन्तं ना कृतेऽपि द्वित्वे कृते चतुरक्षरत्वाभावात् "नशब्दनामि पठेत्। शब्दनामि हि तद्भवति यत्पञ्चम्यन्तम्" इति वचनेन पञ्चम्या निषेधाच्च प्रथमाद्वितीयाषष्ठीसप्तम्येकवचनान्तानामेव प्रयोगो विधेय इति सिद्धान्तः। तदेतन्मतद्वयमभिप्रेत्याह-विभक्तयश्चेति।

(भाष्यम्)

यो वा इमाम्—

"यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति" आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम् ॥ यो वा इमाम् ॥

(प्रदीप) पदश इति। पदं पदमिति संख्यैकवचनाच्च वीप्सायामिति शस्॥ स्वरश इति। स्वर उदात्तादि ॥ अक्षरश इति। अक्षरं व्यञ्जनसहितोऽच्॥ आर्त्विजीन इति। ऋत्विजमर्हत्यार्त्विजीनो यजमानः। ऋत्विक्कर्मार्हतीति यार्जकोऽप्यार्त्विजीनः। यज्ञर्त्विग्भ्यां घखञाविति यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानमिति वार्तिकेन च खञ्॥ विद्वान्यजेत विद्वान्याजयेदिति द्वयोरपि विदुषोरधिकारः॥

(उद्द्योतः) व्यञ्जनसहित इति। यथा "ये यजामहे" इति पञ्चाक्षरमिति पर्ण बाहुः पूर्वसूत्र इति भाष्यात् वर्णमात्रमित्यन्ते॥ उद्गात्रप्रधार्त्विजीनशब्दस्योभयपरत्वे युक्तिमाह—विद्वानिति। वेदार्थज्ञ इत्यर्थः ॥

(तत्त्वालोक) भाष्ये-यो वा इति—यो वै निश्चयेनेमां सन्निहितां प्रत्यक्षां वाचं श्रुतिरूपां वाणीं पदशः पदं पदं स्वरशः स्वरं स्वरम् अक्षरशः अक्षरम् अक्षरम् विदधाति संस्करोति स आर्त्विजीनो यजमानो याजको वा भवतीत्यर्थः। तत्र यजमानस्याप्रत्यक्षं स्वर्गादिफलम्भवति, याजकस्य तु प्रत्यक्षमेव धनलाभादि फलम्भवति। ननु प्रकृते किमागमनमेतावतेत्यत आह-आर्त्विजीना इति। यजनयाजनयोर्विद्वन्मात्रस्याधिकारादुभयस्य सिद्धये व्याकरणमध्येयमिति भावः।

प्रदीपे-शसिति-एवं स्वरशोऽक्षरशः इत्यनयोरपि बोध्यम्। अक्षरशब्दस्य पृथगुक्तिसामर्थ्यान्नात्र स्वरपदेनाचां ग्रहणमिति सूचनायाह—उदात्तेति। अक्षरमहत्त्वाच्छ्रव्यावृत्तये आह-व्यञ्जनेति। व्यञ्जनस्याप्रधानत्वाद्वच्सहितं व्यञ्जनमिति न प्रत्यपादि। वार्तिकेन-वार्तिकेनैव। इति-इति श्रुतेः। द्वयो-यजनयाजनयोः।

उद्द्योते-व्यञ्जनसहिताचोऽक्षरपदग्राह्यताया मानमाह-यथेति। भाष्यात्—उत्तराह्निकस्थात्। वर्णमात्रम्—व्यञ्जनसहितोऽच्, वा अजेव।

(भाष्यम्)

चत्वारि—

"चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आविवेश" इति॥

चत्वारि शृङ्गाणि। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च॥ त्रयो अस्य पादाः। त्रयः कालाः भूतभविष्यद्वर्तमानाः॥ द्वे शीर्षे। द्वौ शब्दात्मानौ नित्यः कार्यश्च॥ सप्त हस्तासो अस्य। सप्त विभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसीति॥ वृषभो वर्षणात्॥ रोरवीति शब्दं करोति॥ कुत एतद्?।

रौतिः शब्दकर्मा॥ महोदेवो मर्त्यां आविवेशेति। महान्देवः शब्दः॥ मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश। महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्॥

(प्रदीप) चत्वारीति। शब्दस्य वृषभत्वेन निरूपणम्॥ त्रय कला इति। लडादिविषयाः॥ नित्य कार्यश्चेति। व्यङ्ग्यव्यञ्जकभेदेन। सप्त विभक्तय इति। सुप् इत्यर्थः॥ केचित्तु निगमपरिग्रहप्रसङ्गात्सह शेषेण सप्त कारकाणि विभक्तिशब्दाभिधेयानीति व्याचक्षते॥ वर्षणादिति। कामानां दानपूर्वकानुष्ठानफलत्वात्॥ महतेति। परेण ब्रह्मणेत्यर्थः॥

(उद्द्योत) चत्वारीति॥ ऋङ्मन्त्र॥ शब्दस्येति। शब्दशास्त्रप्रतिपाद्यस्येत्यर्थः। वृषभाकारः शब्दशास्त्रप्रतिपाद्यः शब्दो रोरवीति महान् देवोऽन्तर्यामिरूपः शब्दो मर्त्यानाविवेश स्वात्मैक्यमापि कृतवानिति मन्त्रतात्पर्यम्। महतो देवस्य शब्दब्रह्मणो व्याकरणज्ञाप्यतया व्याकरणस्तदादिष्टः भवतीति यावत्॥ भाष्ये पदजातानि परापरपश्यन्तीमध्यमावैखरीरूपाणि। अत्र च नामे निपाताश्चेति चकारः सङ्गच्छते॥ नामाख्यातेति। नामशब्देन सुबन्तं, नमयत्यख्यातार्थं प्रति विशेषणीभवतीति व्युत्पत्तेः। आख्यातं तिङन्तम्। उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन॥ व्यङ्ग्य आन्तरः।

व्यञ्जको वैखरीरूप ॥ तिङ्विभक्तीना षट्त्वादाह—सुप इति ॥ सह शेषेणेति। शेष षष्ठ्यर्थ। तन्महितकारकाभिधायकत्वेन श्रुति ओरमयोरपि सग्रह इति भाव ॥ भाष्ये—उरसीत्यादि।

'हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्।
औरस्य त विजानीयात्।' 'स्युर्मूर्धन्या ऋटुरषा'

इत्युक्तेर्मूर्धैव शिर ॥ कण्ठ इत्यनेन मुखान्तर्गतकण्ठादिस्थान मुपलक्ष्यते॥ ननु वर्षति सूत्रेण भूमिं सिञ्चतीति वृषभ इत्युच्यते तत्कथ शब्द एवमित्यत आह—कामानामिति। येन वदकमित्येकचतुःशृङ्गत्वादिगुणवैशिष्ट्येन ज्ञानपूर्वक प्रयोगेण कामान् दाना दित्यर्थ। द्विशृङ्गादिसादृश्यककण्ठनालबद्धलौकिकवृषभादस्य व्यतिरेक ॥ किं रोरवीति, तत्राह—भाष्ये महान् देव इत्यादि। महान् परमब्रह्मस्वरूपो देवोऽन्तर्यामिरूप शब्दो मर्त्येष्वाविश इत्यर्थ ॥ तदा वेद्यफलमाह—महता देवेनेति। साम्य सायुज्यम्। तदुक्त हरिणा—

अपि प्रयोक्तुरात्मान शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभ येन सायुज्यमिष्यते ॥

आह च—चत्वारि शृङ्गा त्रयो अस्य पादा इत्यादि ऋगन्त्य। इह द्वौ शब्दात्मानौ कार्यो नित्यश्च। तत्रास्य सर्वेश्वर सर्वशक्तिर्महान् शब्दवृषभस्तस्मिन् खलु वाग्योगवित् शास्त्रजशब्दज्ञानपूर्वक प्रयोगेण क्षीणपाप पुरुषो विच्छिन्नाहङ्कारग्रन्थिरत्यन्त सम्पद्यते इति तदथ वद्व्याख्यातार ॥

(तत्त्वालोकः) भाष्ये-व्याकरणाध्ययनस्य नि श्रेयससाधनत्वमाह—चत्वारीति। शृङ्गेति-अत्र शृङ्गाणीत्यत्र "शश्छन्दसि बहुलम्"इत्यनेन शिलोपे नलोपे च कृते सिद्धि। अथवा 'सुपा सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजाल' इत्यनेन शेडादेशे निष्पत्ति। "प्रकृत्यान्त पादमव्यपरे" इत्यत्र प्रकृतिभावे "एङ पदान्तादति" इत्यनेन पूर्वरूपाभावमवादाह—त्रयो अस्येति। "उत्तमाङ्ग शिर शीर्ष मूर्धा ना मस्तकोऽस्त्रियाम्' इति कोशाद् अकारान्तत्वेन शीर्षशब्दस्तस्य रूपमाह—शीर्षे इति। हस्ता इत्यत्र "आज्जसेरसुगि"त्यनेनासुकि वैदिक रूपमाह—हस्तास इति। पूजार्थकमहधातो कर्मणि (मह्यन्त इतीति व्युत्पत्ती) "धनर्थे कविधानमि"त्यनेन कप्रत्यये सति रूपमाह—मह इति। महानित्यर्थ। शब्दे चतुःशृङ्गादिमद्वृषभरूपता बाधाद्यासम्भवात्तया बोधो न स्यादतो गौण्या वृत्त्या सम्भविनमर्थं वक्तुमाह—चत्वारीति। अत एव "शब्दस्य वृषभत्वेन निरूपणमि'ति कैयट। शृङ्गाणि। शृङ्गस्थानीयानि। एवमग्रेऽपि। त्रिभि प्रकारैर्बद्ध इत्र वाच्यार्थ दर्शयन्नाह—त्रिधेति। बद्ध—ध्वनिकध्वन्यनुत्पादेऽनभिव्यक्तरूपत स्थित। वृषभानोरौगादिकऽभचि तस्य कित्त्व च निपात्य रूपमाह—वृषभ इति। सकलफलवर्षक इत्यर्थ। वर्षणात्—ज्ञानपूर्वकप्रयोगेण कामाना वर्षणात्। कुत एतदिति—कस्माद् रोरवीति यत्ल शब्द करोतीत्यर्थ इत्यर्थ। अस्योत्तरमाह—रौतीरीति। ध्वनतीत्यर्थ। किं रोरवीतीत्यत आह—महोदेवो इति। तदर्थमाह—महानिति। तान्—मनुष्यान् (विदुष)। देवेन—शब्दब्रह्मणा। अध्येयमिति "ब्रह्मविद् ब्रह्मैव भवती"ति श्रुत्या ब्रह्मत्वाविर्भावकतया शब्दब्रह्मज्ञाने सत्यादितर्थ व्याकरणमध्येयमिति भाव।

प्रदीपे—ननु अमूर्तकालस्य कथ पादरूपत्वमित्यत आह—लडादीति। तथा च लडादीना दशत्वात् त्रित्वाभावेऽपि लडाद्यर्थप्रसिद्धकालाना त्रित्वात् तादृशकालत्रये विहिततया दशत्वात्मकानपि लडादीन् त्रेधा विभज्य भूतादिकालत्रयद्योतकास्त्रिविधा लडादय पादा इत्यर्थ। व्यञ्जयेति। केचित्तु शब्दात्मानावित्यत्रात्मशब्द प्रधानवाचिना सत्त्वन प्रधानभूतो शब्दो स्फोटनादौ तावितिवदन्ति। अपरे तु ध्वनिना प्रधानभूतार्थो गतिव्यक्त्या शब्दस्यात्मनाविति कथयन्ति सुप—प्रथमादिसप्तम्यन्तत्र्यादित्रिकरूपा। सुप्तिङौ विभक्तित्वेऽपि सुपामेव त्रिकाणा सत्त्वात् सप्तदशहस्तिविभक्तित्वेन तेषामेव बोध इत्याशयेनाह—तिङामिति। अत्र कामा इत्यनेन त्रिवर्ग सग्रहात् कश्चिदनेनापवर्गोऽपि दर्शित कामानाम् स्वर्गापवर्गादीनाम्। अनुष्ठानेति—साधुशब्दप्रयोगेत्यर्थ।

उद्द्योते-ऋगिति—ऋग्वेदेत्यर्थ। शृङ्गशब्दस्य तत्तद्रूपत्वसम्भवादाह—शब्दशास्त्रेति। शब्दानुशासनमिति भाव। शब्दब्रह्मस्वरूप। स्थानेष्विति—तेष्विति शेष। ननु शृङ्गे कियता ह्यतेनैषेत्यत आह—महत इति। शास्त्रतया—शास्त्रविषयतया। प्राक्प्रसङ्ग विना तत्र विशेषाभावमवादाह—इवेति। पञ्चात्र पदस्य नामादित्वाभावात्तदर्थमृक्शास्त्रे न च तत्त्वतस्तथा चैवेत्यत आह—परेति। तत्र मननादि—अत एवेति। परान्तरेण पदपद्यन्तादीना ग्रहणे दैवे यर्थ। च पराश्यन्त्यादिसङ्कीर्णका आख्यातार्थप्रति विशेष्यतया स्वार्थद्वारा शक्तस्यैव सत्त्वादाह—आख्यातार्थमिति। आख्यातम्—आख्या तत्प्रतिपादकम्, तिङन्तपदमेवेतत्सामान्यस्यापि बोधसम्भवादाह—उपसर्गेति। न्यायेनेति—अत्र मालादिवशितन्त्यापेक्षयमनुचितम् "निपातास्तु द्योतकाश्चनेववाचका प्रायेण"त्येकशेषप्रकरणोक्तन्यायात् गौरवादर्थान्तराभावादानर्थक्यमुक्तत्वात्। एवञ्चोपसर्गपदेन धात्वर्थद्योतकत्वानियमादुपसर्गाणा तथा निपातपदेन धात्वर्थद्योतकत्ववाचकत्वोभयत्रानुसरणातिरिक्तनिपाताना ग्रहणमिति भेद। आन्तर—नित्यो मनःस्थानस्थ। वैखरीरूप—कार्यं श्रोत्रग्राह्य। तिङ्विभक्तीनामिति-त्रिकाणामिति शेष। षष्ठ्यर्थं—स्वस्वान्तर्भावितत्वसम्बन्ध। ननूरस कण्ठादिवन्मूर्ध्नो स्थानत्वं न प्रसिद्धमित्यत आह—हकारमिति। पञ्चमै—ङकारादिभि। अन्तःस्थाभि—यवरलै। मूर्धैवेति—एवेन नासिकादिव्यावृत्ति। तेन 'शिरःपदेन नासिकाया स्थान ग्राह्यमि"ति कैयटोक्तिकथनमप्रामाणिकमिति सूचितम्। न्यूनतानिराकरणायाह—कण्ठादीति। उच्यते इति—लोकैरिति शेष। एवम्—वृषभ इत्युच्यते। इवेति—अत्र शब्दरूपे वृषभ सकलान् कामान् वर्षतीति शेष। अथ हेतुत्वात् "कामानामि"ति कैयटार्थमाह—उक्तेति। प्रयोगेणेति—साधुशब्दप्रयोगेत्यादि। शब्दरूपवृषभस्य लौकिकवृषभाद् विशृङ्गत्वादिनैव भेद इव विलक्षणत्वेनापि भेद इत्याह— द्विशृङ्गेति। अभिमानादयो कल्पविवक्षया दिशादेरुक्त। अस्य शब्दरूपवृषभस्य। व्यतिरेक—भेद। तत्राह—तदर्थमाह। फलमाह—फल सूचयन्नेतद्वाक्यस्य फलितमाह। सायुज्यम्—ऐक्यम्। अत्र मानमाह—तदुक्तमिति। आह—तदर्थमाह। अस्य ऋङ्मन्त्र इत्यनेनान्वय। इह—ऋङ्मन्त्रे। प्रतिपाद्याविति शेष। कार्य—ककारादिवर्णरूप। नित्य—स्फोटरूप। तत्र—तयोर्मध्ये। तस्मिन्निति—अस्य सम्पद्यते इत्यनेन सम्बन्ध। वाग्योगवित्—वाक्यवैयाकरण। तदिति—हरिकारिकेत्यर्थ। ननु कथ शब्दस्य शब्दकर्तृत्वमिति चेन्न, शब्द स्फोटरूप शब्द व्यञ्जक करोति अपेक्षते इत्यर्थात्, परापश्यन्त्यादिषु पूर्वस्या परकर्तृत्वसत्त्वाच्च तदुपपत्ते। 'चत्वारि शृङ्गेति मन्त्र केचित्प्रकारान्तरेण व्याचक्षते—तथाहि, अस्य यज्ञस्य, चत्वारि ऋग्यजुःसामाथर्ववेदाख्यानि, शृङ्गा शृङ्गस्थानीयानि (एवमग्रे) त्रय कर्मोपासनाज्ञानरूपा पादा, द्वे पत्नीयजमानरूपे शीर्षे सप्त भूर्भुवस्वर्महर्जनतपःसत्यरूपा लोकाश्च उत्तमतलातलसुतलरसातलमहातलपातालरूपा अधस्था सप्त हस्तास करद्वयस्थानीया, त्रिधा रजःसत्त्वतमोगुणै बद्ध, वृषभ वृषभस्य, द्विज कल्याणस्य, रोरवीति कथयति, शेष प्राग्वत्।

(भाष्यम्)

अपर आह—

"चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥"

'चत्वारि वाक्परिमिता पदानि।' चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च॥ 'तानि विदुर्ब्राह्मणा ये मनीषिणः।' मनस ईषिणो मनीषिणः। 'गुहा त्रीणि निहिता नेङ्गयन्ति।' गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते। न निमिषन्तीत्यर्थः॥ 'तुरीयं वाचो मनुष्या वदन्ति।' तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः॥ चत्वारि॥

(प्रदीप) चत्वारीत्यनेनैकदेशेन सदृशेन वाक्यान्तरमपि सूच्यत इत्याह—अपर आहेति। परिमितानीति प्राप्ते शेश्छन्दसि बहुलमिति शेर्लोपे परिमितेति भवति। परिमितानि परिच्छिन्नान्येतावन्त्येवेत्यर्थः॥ मनीषिशब्दः पृषोदरादित्वात्साधुः। कथं मनीषिण एव विदन्तीत्याह—गुहेति। अज्ञानमेव गुहा तस्यामित्यर्थः। सुपां सुलुगिति। सप्तम्या लुक्। व्याकरणप्रदीपेन तु तानि प्रकाशन्ते। तत्र चतुर्णां पदजातानामेकैकस्य चतुर्थं भागं मनुष्या अवैयाकरणा वदन्ति नेङ्गयन्तीत्यस्यैव व्याख्यानं न चेष्टन्ते, न निमिषन्तीति॥

(उद्द्योत) एतावन्त्येवेति। वाक्परिमितानीति षष्ठीतत्पुरुष॥ पदजातानि। परापश्यन्तीमध्यमावैखर्यः। नामादीनि च। नामादिमध्ये च एकैकं चतुष्पादम्॥ भाष्ये—मनस ईषिण। चित्तशुद्धिक्रमेण वशीकर्तारो विषयान्तरेभ्यो व्यावृत्त्या हिंसका वा। ते च वैयाकरणाः। अन्येषां तदज्ञाने हेतुमाह—गुहेति। एकैकस्य नामादिरूपस्य चतुर्थं भागम्। एकैकस्य चतुरंशत्वात्॥ परादीनां वा त्रयोंऽशा मध्यमान्ताः। गुहा अज्ञानं हृदयादिरूपा च। वैयाकरणास्तु शास्त्रज्ञानेन तल्लब्धयोगेन च गुहान्धकारं विदार्य सर्वं जानन्तीति भावः॥ न निमिषन्तीति। ज्ञानसामान्यविषयत्वाभाव उच्यते॥ भाष्ये यन्मनुष्येषु वर्तत इति। ज्ञानविषयतया तद्वाचश्चतुर्थमित्यन्वयः। तस्मात्सकलपदज्ञानाय मनीषित्वाय चाध्येयं व्याकरणमिति तत्त्व।

हरिरप्याह—वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्॥

तत्र श्रोत्रविषया वैखरी। मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहारकारणम्। पश्यन्ती तु लोकव्यवहारातीता। योगिनां तु तत्रापि प्रकृतिप्रत्ययविभागावगतिरस्ति। परायां तु नेति तस्या इत्युक्तम्—

स्वरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥

इत्युक्ते। अनेकतीर्थभेदाया नानारूपा। दिव्यादेर्मृदङ्गशब्दादिरूपानेकभेदाया। अत एवापि चत्वारि वाक्परिमिता पदानीति ऋङ्मन्त्र इति तदनुव्याख्यानम्॥

(सरलालोक) भाष्ये—प्रतिपादकभेदात् प्रतिपादके भेदेन व्यवहार इत्यभिप्रेत्याह—अपर आहेति। अथवा व्याख्यातमन्त्रैकदेशेनचिन्द्रादिना प्रतिपादितविषयत्वे कथिते शिष्यान्तरेणोक्तसन्दिग्धवाग्विषयमन्त्रं व्याख्यातुमाह—अपर आहेति वाक्परिमितेति—वाच शब्दस्य परिमितानि चत्वारि (एव) पदानि नामादीनि च पदानि सन्ति, तानि सर्वाणि विदन्ति त एव, ये ब्राह्मणा मनीषिणश्चेत्यर्थः। ब्राह्मणा इति—ब्रह्म साङ्गोपाङ्गवेदं विदन्तीति ब्राह्मणाः। छान्दसत्वाद् "ब्राह्मोऽजाता"विति टिलोपाभाव इति भाव। पदजातानि—पदसमूहानि। पदशब्दो नात्र सुप्तिङन्तपरः, किन्तु बोधकमात्रपरः। मनःशब्दस्य जातिवाचकतया "सुप्यजातौ णिनिस्ताच्छील्ये" इति सूत्रस्याप्राप्तेः मन ईषन्तीति मनीषिण इति न सम्भवति। किन्तु मनस इति कर्मणि षष्ठी, कर्तरि औणादिकणिनिविधानेन ईषन्तीति ईषिण इति निष्पत्ते। तथा च शकन्ध्वादित्वात्पररूपे मनीषिण इत्यस्य सिद्धिरित्याशयेनाह—मनस ईषिण इति। निहितेति—अस्य निहितानीति प्राप्ते 'शेश्छन्दसि बहुलमि'ति शेर्लोपे निष्पत्ति। तथा च यतो गुहायाम् अज्ञानान्धकारे त्रीणि परापश्यन्तीमध्यमाख्यानि, त्रिभिरेभिः परादिभिः युतानि नामाख्यातोपसर्गनिपाताख्यानि च पदानि निहितानि सन्ति, अतो व्याकरणप्रदीपमन्तरा तानि न निमिषन्ति प्रकाशन्ते इति भाव। नन्वेवं कथमवैयाकरणाः शब्देन व्यवहरन्तीत्यत आह—तुरीयमिति। वाच परादेस्तुरीयं तथा नामादेः प्रत्येकस्य चतुर्थभागं वैखरीरूपं मनुष्या अवैयाकरणा वदन्तीत्यर्थ। वै इति निश्चये।

प्रदीपे—एकदेशेनेति—प्रकृतमन्त्रयोरित्यादि। तथा "इमानि च भूय" इत्यादि भाष्योक्तप्रतीकसमुदायमध्योक्तेनेति शेष। वाक्यान्तरसूचनकारणमाह—सदृशेनेति। परिच्छिन्नानि—परिगणितानि। एतावन्ति—चत्वारि। मनीषिन्शब्दस्य शकन्ध्वादिगणान्तर्गतत्वकल्पनेऽपि "तच्च टे" इत्यस्य भाष्येऽदर्शनात् सकारलोपार्थं पृषोदरादित्वस्यावश्यकल्पनीयतया सर्वथा तेनैव निर्वाहसम्भवे शकन्ध्वादिगणान्तर्गतता न कल्पनीया गौरवादित्याशयेनाह—पृषोदरादित्वादिति। इत्याह—इत्यतोऽन्येषां तदवेदने हेतुमाह। अज्ञानमेव—व्याकरणशास्त्राज्ञानमपि। अत एव "हृदयादिरूपा चे"त्युद्द्योतोक्तिः सङ्गच्छते। गुहायामिति प्राप्ते आह—सुपामिति। मनीषिणां परादित्रयज्ञाने हेतुमाह—व्याकरणेति। तानि—परापश्यन्तीमध्यमाख्यानि। तत्र—तेषाम्। चतुर्णां—नामादीनाम्। चतुर्थभागं—वैखरीरूपम्। व्याख्यानमिति—तदुपपत्तये इति शेष।

उद्द्योते—तत्पुरुष इति—अनेन वागित्यस्य "सुपां सुलुगि"ति लुप्तषष्ठ्यन्तताकल्पनाया अयुक्तता सूचिता। पदजातपदस्य नामादिमात्रपरता कथयतां कैयटादीनां न्यूनतानिरासाय निपाताश्चेति चकारसमुच्चितानामपि पदजातपदार्थत्वमाह—परेति। विशेषकथनाय भाष्योक्तपदजातपदार्थमनुवदति नामेति। तुरीयमिति चरमपादानुरोधेनाह—नामादिमध्ये चेति। चतुष्पादमिति—परापश्यन्त्यादिभिरेवेत्यादि। तथा च नामाख्यातोपसर्गनिपातानां मध्ये प्रत्येकं परापश्यन्तीमध्यमावैखरीभेदेन चतुर्विधमिति भाव। ईषिण इत्यस्यार्थमाह—चित्तेति। धातूनामनेकार्थत्वाद् वशीकरणार्थता। अत्र "ईश उञ्छे" इत्यस्य "ईश ऐश्वर्ये" इत्यस्य वा पृषोदरादित्वात्सान्तताम् अपतो रूपमीषिण इतीत्याशयेनाह—वशीति। ईष गतिहिंसादर्शनेषु' इत्यस्य रूपमित्यभिप्रायेणाह—हिंसका इति। मनसो विषयान्तरव्यावृत्तिरेव हिंसा, न तु मुख्या, असम्भवादित्याशयः। अन्येषाम् अवैयाकरणानाम्। तदिति—परादित्रयेत्यर्थ। परादित्रये आह—परेति। मध्यमान्ता इति—गुहानिहिता, अतस्तेषां चतुर्थं हि वैखरीरूपम् अवैयाकरणा वदन्तीति शेष। हृदयादीति—आदिना नाभिमूलाधारचक्रे सङ्ग्रहः। "परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता। हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥" इति स्मृते। व्याकरणेति

कैयटाशयमाह–**वैयाकरण इति**। नामोपसर्गादिकल्पे आह–**शास्त्रेति**। व्याकरणशास्त्रेत्यर्थः। परापश्यन्त्यादिकल्पे आह–**तद्बलेति**। शास्त्रबलेत्यर्थः। **गुहान्धकारम्**–अज्ञानान्धकारं, हृदयाद्यन्धकारञ्च। **सर्व**–परादिचतुष्टयम्। धातूनामनेकार्थतामभिप्रेत्याह–**ज्ञानेति**। अत एव "न निमिषति"त्यस्य "न प्रकाशते" इत्यर्थः सङ्गच्छते। आकाशवृत्तिशब्दस्य मनुष्यवृत्तित्वासम्भवेन यथाश्रुतानुपपत्तेराह–**ज्ञानेति**। भाष्यकृतो न्यूनतां निराकरोति–**तस्मादिति**। नामादिपक्षे आह–**सकलेति**। परादिपक्षे आह–**मनीषित्वायेति**। **वा**–च। **शेष इति**–चतुर्थमित्यर्थ इति भाष्यस्येत्यादि। परादेर्व्याकरणबोध्यत्वे मानमाह–**हरिरिति**। **अनेकेति**–अनेके तीर्थतः शास्त्रतो भेदा यस्या इत्यर्थः। **तस्याः**–परायाः। तया च तस्या वाचः, एतद् व्याकरणम्, अद्भुतं (अन्यतो) विलक्षणं, परं श्रेष्ठं, पदं स्थानमस्तीत्यर्थः। तद्व्याख्यानमाह–**तत्रेति**। तासां मध्ये इत्यर्थः। **श्रोत्रेति**–श्रोत्रं विषयः (ग्राहकं) यस्या इति व्युत्पत्तिः। मध्यमा वागेवास्यपर्यन्तमागच्छता वायुना कण्ठदेशमागत्य मूर्धानमाहत्य परावृत्य कण्ठताल्वाद्यभिघातेन स्थानविशेषेष्वभिव्यक्ता श्रोत्रग्राह्या सती **वैखरी**-पदाभिधेया। पश्यन्ती वागेव हृदयपर्यन्तमागच्छता वायुना हृदयदेशमागत्याभिव्यक्ता अर्थशब्दविशेषोल्लेखिबुद्धिविषयीभूता सूक्ष्मा कथञ्चित् स्वश्रुतिगोचरा सती **मध्यमा**शब्दवाच्या। परा वागेव नाभिपर्यन्तमागच्छता वायुना तत्राभिव्यक्ता मनोमात्रग्राह्या सूक्ष्मतरा योगिनां समाधौ सविकल्पकज्ञानविषयीभूता सती **पश्यन्ती**शब्दवाच्या। मूलाधारचक्रे संस्कारवद्वायुचलनेनाभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निःस्पन्दं सूक्ष्मतमं योगिनां समाधौ निर्विकल्पकज्ञानविषयः **परा वाक्**॥ उक्तञ्च–'वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा। आन्तरार्था[1] च पश्यन्ती सूक्ष्मा[2] वागनपायिनी ॥' इति। **तत्रापि**–पश्यन्त्यामपि। परायां वाचि प्रकृतिप्रत्ययविभागज्ञानविषयत्वाभावे हेतुमाह–**स्वरूपेति**। **अनपायिनी**–नित्या। **तस्याः**–परायाम्। **दृष्टस्वरूपायां**–साक्षात्कृतायाम्। **अधिकारः**–लौकिकाधिकारः। **आख्यातादीति**–आदिना उपसर्गनिपातयोः संग्रहः। **शब्दादीति**–आदिना भेरीशब्दापभ्रंशादिसंग्रहः। **तदिति**–हरिकारिकेत्यर्थः।

(भाष्यम्)

उत त्व —

"उत त्वः पश्यन्न ददर्श वाच-
मुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे
जायेव पत्य उशती सुवासाः."

'उत त्वः' अपि खल्वेकः पश्यन्नपि न पश्यति वाचम्। अपि खल्वेकः शृण्वन्नपि न शृणोत्येनामिति। अविद्वांसमाहार्धम् ॥ उतो त्वस्मै तन्वं विसस्रे तनुं विवृणुते ॥ जायेव पत्य उशती सुवासाः। तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाग् वाग्विदे स्वात्मानं विवृणुते ॥ वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणम् ॥ उत त्वः ॥

(प्रदीप) उत त्व इति। त्वशब्दोऽन्यवाची। उतशब्दोऽपिशब्दस्यार्थे। स च भिन्नक्रमः। प्रयत्नेन शब्दस्वरूपमुपलभमानोऽप्यर्थापरिज्ञानान्न पश्यतीत्यर्थः। **उतो इति**। उत उ इति निपातसमाहारः ॥ **अविद्वांसमाहार्धमिति**। अविद्वल्लक्षणमर्थमर्धर्चं आहेत्यर्थः ॥

(उद्द्योत) **उतत्व इति**। उतशब्दोऽप्यर्थे ॥ बहूनामपि समानपृष्ठोदरपाणिपादानामध्ययनमधीयानानामेकः कश्चित्पश्यन्नपि स्वभ्यस्ताध्ययनोऽपि तीक्ष्णबुद्धिरपि सन्न पश्यति अर्थानभिज्ञत्वात्। अर्थपरिज्ञानफला हि वागित्यभिप्रायः। एवमेकः शृण्वन्नपि न शृणोत्येनां वाचम्। य एव ह्यर्थं सम्यगवबुध्यते तेनैव सा सम्यक् श्रुता भवति ॥ एवमर्धेनाविद्वांसं निन्दित्वाऽर्धान्तरेण विद्वांसं स्तौति–**उतो त्वस्मै**। अप्येकस्मै कस्मैचिद्वैयाकरणाय तन्वं शरीरं विसस्रे विवृणोति प्रकाशयति। सम्यक् ज्ञानं हि प्रकाशनमर्थस्य। अर्थो हि वाचः शरीरम् ॥ अथोपमायुक्तयोत्तमया वाचा प्रसादेन तमेव स्तौति–यथा जाया विवृतसर्वाङ्गावयवाभूत्वोशती कामयमाना भर्त्रे प्रेम्णा दर्शयत्यात्मानम्। कस्मिन् काले? यदा सुवासा निर्णिक्तवासा नीरजस्का ऋतुकालेषु। यदा क्षमितमा स्त्री पुरुषं प्रार्थयते। यथा तत्पुरुषस्तां यथावत्पश्यति शृणोति च तद्वचनार्थं, नान्यदा घनपटप्रावृतशरीराम्। एवं स एनां वाचं पश्यन् प्रकृतिप्रत्ययविभागेन विवृतार्थमस्याः पश्यति शृणोति चेत्यर्थः। अयमर्थो निरुक्तनद्भाष्ययोः (१ अ० १९ ख०) स्पष्टः। भाष्ये—**वाग्विदे** वैयाकरणाय ॥

(तत्त्वालोक) भाष्ये सरस्वतीप्रसादसाधनञ्च व्याकरणाध्ययनमित्याह–**उतत्व इति**। अपि **खल्विति** वाक्यालङ्कारे। **एकः**–(वैयाकरणेभ्यः) अन्यः। **ददर्श विसस्रे** इत्यनयोः, दृश सृधातुभ्यां "छन्दसि लुङ्लङ्लिटः" इति सूत्रेण वर्तमाने लिट् विहित इत्याशयेनाह–**पश्यतीति**। वक्ष्यति च **विवृणुते** इति। **एनाम्**—वाचम्। **इति** श्लोकार्धार्थसमाप्तौ। अत उपसंहरति—**अविद्वांसमिति**। अनेन विद्वांसमाहोत्तरार्धमिति सूचितम्। **अस्मै**–वैयाकरणाय। "असि पूर्वं" इत्यत्र "वा छन्दसी"त्यनुवृत्ते यण विधायाह–**तन्वमिति**। अस्यैव व्याख्यानं तनुमिति स्वमात्मानमिति, स्वात्मानमिति च। सर्वेषां स्वसकलस्वरूपमित्यर्थः। **विवृणुते इति** वागिति शेषः। प्रकाशयतीत्यर्थः। धातूनामनेकार्थत्वात्। उक्तदृष्टान्तमुपपादयति–**तद्यथेति**। वश कान्ताविति धातोः शतृसम्प्रसारणादौ सति निष्पन्नस्योशतीपदस्यार्थमाह–**कामयमानेति**। **वागिति** व्याकरणाध्ययनप्रयोजनेत्यादि। सकलफलितमाह–**वागिति**। **नः**–अस्मभ्यम्।

प्रदीपे–**सः**–उतशब्दः। **भिन्नक्रमः**–पश्यन्नित्युत्तरमन्वितः। पश्यन्नपीत्यादेरर्थमाह–**प्रयत्नेनेति**। **समाहार इति**–अप्यर्थक इति शेषः। **अविद्वल्लक्षणमर्थमिति**–अवैयाकरणरूपमर्थमित्यर्थः। उद्दिश्येति शेषः। **अर्धर्च इति**–ऋचोऽर्धमिति व्युत्पत्तिः। "अर्धर्चाः पुंसि च"ेति पुंलिङ्गता। **आहेति**–निन्दामित्यादि।

उद्द्योते—अप्यर्थे इति विहाय अपिशब्दस्यार्थे इति कथनेन कैयटस्याशयविशेषं न सूचनायैवेत्याह–**उतशब्द इति**। लोकव्यवहारानुसारेणाह–**अध्ययनमिति**। अध्ययनविषयमित्यर्थः। यथाश्रुतानुपपत्त्या लक्षणाश्रयणात्। **एकः**–(अर्थविद्भ्यः) अन्यः। **पश्यन्नपीति**–स्वरूपतो वाचमित्यादि। **न पश्यति**–न (सकलं) जानाति। **हि**–यतः। **अभिप्राय इति**–अर्थज्ञानाभावे शब्दाभ्यसनमकिञ्चित्करमेवेत्याशयः। **एवमिति**–तेषां मध्ये इति शेषः। **शृण्वन्नपीति**–स्वरूपत इत्यादि। **न शृणोति**–न सम्यक् शृणोति। **हि**—यतः। **सा**–वाक्। **भवतीति**–अर्थज्ञानासत्त्वे शब्दश्रवणं निष्फलमेवेति भावः। **हि**–यतः। ननु तथापि कथं शरीरं प्रकाशयतीत्यत आह—**अर्थ इति**। **हि**–यतः। **वाचा**–'जायेवे'त्यादिरूपया। **तमेव**–वैयाकरणमेव। **अङ्गेति**–(यथाश्रुतानुपपत्त्या लक्षणया) शरीरेत्यर्थः।

१ आन्तरेति—स्वरूपज्योतिरित्यर्थः। २ सूक्ष्मा—सूक्ष्मतमा

निर्णिक्तवासा—सुधौतसूक्ष्मतमवस्त्रा । नीरजस्का—ऋतुस्नाता । तत्पुरुष—तस्या पुरुष । तद्वचनार्थम्—तद्वचनरूपमर्थम् । अथवा तस्या वचनेन अर्थम् (प्रयोजनम्) । घनेति—निविडेत्यर्थ । स—वैयाकरण । अस्या—वाच । पश्यति—जानाति । शृणोति चेति—शब्दद्वारेति शेष । अत्र मानमाह—अयमिति ।

(भाष्यम्)

सक्तुमिव—

"सक्तुमिव तितउना पुनन्तो
यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते
भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥"

सक्तुः—सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति । तितउ-परिपवनं भवति—ततवद्वा तुन्नवद्वा । धीरा ध्यानवन्तः । मनसा प्रज्ञानेन । वाचमक्रत वाचमकृषत ।

अत्रा सखायः सख्यानि जानते । अत्र सखायः सन्तः सख्यानि जानते ।

क्व ?

य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः ॥

के पुनस्ते ? ।

वैयाकरणाः ॥

कुत एतत् ? ।

'भद्रैषा लक्ष्मीर्निहिताधिवाचि ।'

एषां वाचि भद्रा लक्ष्मीर्निहिता भवति । लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति । सक्तुमिव ॥

(प्रदीप) सचतेरिति । षच सेचन इत्यस्य । दुर्धाव इति । दु शोध । यथा तितउना सक्तोस्तुषाद्यपनीयते तथा व्याकरणेन वाचोऽपशब्दा इत्यर्थ ॥ कसतेरिति । पृषोदरादित्वाद्वर्णव्यत्यय ॥ ततवदिति । विस्तारयुक्तमित्यर्थ । तुन्नवदिति । बहुच्छिद्रम् ॥ धीरा इति । वैयाकरणा ॥ वाचमक्रतेति । अपशब्देभ्यो विविक्ता कृतवन्त । मन्त्रे घसेति । लौकिके सत्यक्रतेति रूपम् ॥ अत्रासखाय इति । ऋचि तुनुघेति दीर्घ । सखाय समानख्यानयो भेदग्रहस्य निवृत्त्या सर्वमेक मति मन्यन्ते ॥ सख्यानीति । सायुज्यानीत्यर्थ ॥ एकगम्य इति । ज्ञानेनैव प्राप्य ॥ वाचीति । वेदाख्ये ब्रह्माण य। लक्ष्मीर्वेदान्तेषु परमार्थसंविल्लक्षणोक्ता सैषा निहितेत्यर्थ ॥

(उद्योत) भाष्ये (सक्तुमिवेति) । ये यत्र व्याकरणे धीरा ध्यानवन्त सक्तुमिव ध्यानयुक्तमनसा तत्करणकज्ञानेन वाचमक्रत अकृषत असाधुभ्यो विविक्तां कृतवन्तस्ते तत्करणेन शुद्धचित्ता अत्र ब्रह्मप्रतिपादकशब्दे शब्दार्थयोरभेदबुद्ध्या सखाय समानख्याय समानज्ञाना । शब्दब्रह्मैकत्वज्ञानवन्तस्तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मनिरूपितभेदज्ञानवन्त सख्यानि सायुज्यानि जानते प्राप्नुवन्तीत्यर्थ । यत्र एषां वाचि भद्रा लक्ष्मी स्वप्रकाशब्रह्मरूपा अधि अधिक निहिता स्थिता भवतीति वाक्यार्थ ॥ सचतेर्दुर्धाव इति । षच सचतस्तो दुःखधावनप्रतिपादको भवतीत्यर्थ ॥ तितउशब्द इह एव भाष्ये सक्तुसक् । चालनी तितउः पुमानिति कोशानुशिष्टोऽपि ॥ विस्तारेति । तनोतेर्डउ सन्वच्चेति व्युत्पत्तेरिति भाव ॥ तुन्नेति । तुदधातो कर्मणि डउः सन्वच्चेति भाव ॥ ध्यानं ज्ञानार्थभावनम् ॥ मनसेति व्यापारपर, तदाह—प्रज्ञानेनेति ॥ भाष्ये क्वेति । 'किं तद्, यत्र सायुज्यानि प्राप्नुवन्ति' इति प्रश्न । उत्तरयति—य एष इति । दुर्गमार्गप्राप्यत्वाद्दुर्गमार्गत्वोपचार ॥ दुर्गत्वमेवाह—एकेति ॥ ज्ञानेनैवेति । निर्विकल्पकज्ञानेनैवेत्यर्थ । अत एव दुर्गत्व 'नान्यः पन्था' इति श्रुतेरिति भाव ॥ भाष्ये वाग्विषय इति च्छेद । अत एव श्रवणोपपत्ति ॥ वाग् वेदरूपात्र ॥ वेदान्तेष्विति । सत्यं ज्ञानमित्यादिषु । परमार्थसंविल्लक्षणा परमार्थब्रह्ममात्रविषयज्ञानविषयाऽखण्डार्थरूपा सैषा वाचि निहितेत्यर्थ । सर्वोऽपि वेदस्तेषां ब्रह्मपरो वेदैश्च सर्वैरहमेव वेद्य इत्युक्तेरिति भाव ॥ अय भाव —ये शास्त्रत प्रकृतिप्रत्ययविभागेन साधून् ज्ञात्वा शास्त्रार्थध्यानवन्तो मानसज्ञानेन वाचमसाधुभ्य पृथक् कृतवन्तस्ते तज्ज्ञानपूर्वकसाधुशब्दप्रयोगैर्लब्धान्तःकरणशुद्धयोऽत्र य एष दुर्गो मार्गो ब्रह्मरूपस्तत्रात्मना सह समानख्यातारस्तत्कृतभेदभ्रान्त्या सख्यानि सायुज्यानि प्राप्नुवन्ते । यत एषां वाचि वेदाख्ये ब्रह्मणि या भद्रा लक्ष्मी सर्वभासकब्रह्मरूपा सा अधि अधिकं निहिता भवति । एतच्छास्त्रसाध्यप्रयोगशब्दब्रह्मस्य ध्वनिरूपवैखरीरूपरूषितस्यैव नैर्वाचकत्वस्वीकारेण तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचित एव बोधकतया तैर्ग्रहात् । एव सर्वबोधकेषु ब्रह्मबुद्धौ जाताया तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मबुद्धिर्वैयाकरणानामिति ॥ यत्तु पदपदार्थवाक्यार्थमर्यादया सत्यमित्यादितस्तेषां तद्बोधात्सा तेषां वाचि निहितेति ॥ तन्न, यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्या ब्रह्मणस्तन्मर्यादया शब्दाबोध्यत्वोक्ते । तत्र ह्यप्राप्येत्यस्य सवन्धदानेऽविषयीभूयाबोध्य चेत्यर्थ । आद्य शब्दे, अन्त्य मनसि ॥ शुद्धचित्तस्य तूभयमपि बोधकमखण्डविषयस्य—दृश्यते त्वग्र्यया बुद्धयेति श्रुत्यन्तरात् । न तु पदपदार्थमर्यादयेति बोध्यम् ॥ लक्षणादित्यस्य व्याख्या भासनादिति ॥ परिवृढा अज्ञाननिवर्तने प्रभ्वी ॥ एते च मन्त्रा सर्वानुक्रमभाष्येऽन्यत्र विनियुक्ता अपि भाष्यप्रामाण्यादेतत्तात्पर्यका अपीति बोध्यम् ॥ चत्वारीत्यादि ऋक्चतुष्टय व्याकरणस्य मोक्षजनकत्व प्रतिपादयति ॥

(तत्त्वालोक) भाष्ये—क्रमप्राप्त व्याकरणाध्ययनस्य ब्रह्मसायुज्यावाप्तिसाधनताया सूचकमन्यदप्याह—सक्तुमिवेति । सक्तुरिति—(यत) सक्तु सक्तुशब्द सचते षच सेचने, षच समवाये इत्यनयोरन्यतरस्मात् कर्मणि औणादिके तुनि कृते च निष्पन्न, अत) दुर्धाव दुर्धावार्थबोधको भवतीत्यर्थ । दुर्धाव इत्यत्र दु खेन धावयितु योग्य इति व्युत्पत्तौ दु पूर्वाद्धावे "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्" इति सूत्रेण कर्मणि खल् । विनिगमकाभावादाह—कसतेरिति । अथवा यत (सक्तुशब्द) कसते कसगतावित्यस्माद् विपरीतात् पृषोदरादितया कृतवर्णव्यत्ययात् । कर्मणि तादृशे तुनि निष्पन्न, अत) विकसित विकसितार्थबोधको भवतीत्यर्थ । धातूनामनेकार्थत्वादिति भाव । तितउ इति—अत्र "तनोतेर्डउ सन्वच्च" इत्यौणादिकेन डउ । विरामोच्चारणसामर्थ्यादसन्धिः । परित पूयतेऽनेनेति व्युत्पत्तौ करणे ल्युटि निष्पन्नमाह—परिपवनमिति । परिशोधनकरणत्वस्यान्यत्रापि सत्त्वात् तितउशब्दव्युत्पत्तिमाह—ततवदिति । तादृशस्याप्यतिप्रसक्त वाऽऽह—तुन्नवदिति । धीरा इति—धाधातो रौणादिके क्रनि 'घुमास्थेनो' इति साधु । धातूनामनेकार्थत्वादाह—ध्यानेति । व्याकरणविषयकेत्यादि । वाचमकृषत—वाचं शुद्धा कृतवन्त, अत्रा सखाय इत्यत्र ननमात्रवचनायाह—अत्र सखाय इति । जानते—प्राप्नुवन्ति । एकगम्य—एकेनैव गम्य । तत्र विशेषतः कर्तॄननुक्त्वाऽऽह—के पुनस्ते इति । ते सायुज्यप्राप्तिकर्तार पुन

के इत्यर्थः । **एतत्**-वैयाकरणानामेव सायुज्यप्राप्तिकर्तृत्वम्। उत्तर यति-**भद्रैषामिति**। यत इत्यादि । तदर्थमाह-**एषामिति**। वैयाकरणानामित्यर्थः । लक्ष्मीशब्दार्थमाह-**लक्ष्मीरिति** । अस्य लक्ष दर्शनाङ्कनयोरित्यस्मात् "लक्षेर्मुट् च"इत्यनेनौणादिके मुगागमे च निष्पत्तिः ।

प्रदीपे-**दुःशोध इति**-अत्र (तुषाद्याक्रान्ततया) दुःखेन शोधयितुं शक्य इति व्युत्पत्तौ पूर्ववत् खल्। **अपशब्दा इति**-अपतन्त्यन्ते इति शेषः । ततः विस्तृतमस्यास्तीति व्युत्पत्तौ मतुब्विवक्षयाशयेनाह—**विस्तारेति**।तुन्नानि छिद्राणि सन्त्यस्येति व्युत्पत्तौ भूम्नि मतुब्विवक्षयाशयेनाह-**बहिरिति**। अत्र बहुव्रीहिः । **एषामिति**—वाचीति शेषः । अथवा वाचीत्यस्यावृत्त्योभयत्रान्वयः ।

उद्द्योते-**व्याकरणे**—व्याकरणविषये । **सक्तुमिव**—सक्तु पुनन्त इव । शुद्धो सव्यापारमनस कारणत्वादाह—**तस्करणेति** । **तस्करणेन**-वाक्शुद्धतासम्पादनेन। **ब्रह्मप्रतिपादकशब्दे**-व्याकरणप्रतिपाद्ये। **तच्छब्दे**-ब्रह्मप्रतिपादकशब्दे। कुत एतदित्यत आह—**यत इति**। **एषाम्**-वैयाकरणानाम्। **भवतीति**-अत इति शेषः । **सचतेरिति**-रूपमिति शेषः । **इत एव**-इतोऽपि। तस्य "स्याद्वाग्दु हिद्रुतितउ"इति त्रिकाण्डशेषेणापि क्लीबलिङ्गता सूचनात्। **नपुंसक**—नपुंसकलिङ्गः । नन्वेवममरकोशासङ्गतिरित्यत आह—**चालनीति**। अत्र पुमानिति पदं पुंल्लिङ्गत्वायोगमात्रस्य व्यवच्छेदकं न त्वन्ययोगस्यापीति सकलसामञ्जस्यमिति भावः । प्रश्नोत्तरयोः सामानाधिकरण्यायास्य प्रातिपदिकार्थमात्रपरतामाह—**किं तदिति**। **दुर्गेति**-ब्रह्मण इत्यादि । **दुर्गत्वमिति**—ब्रह्मप्रापकमार्गे इत्यादि । सविकल्पकव्यावृत्तये आह-**निर्विकल्पकेति**। **अत एव**-तत्प्रापकमार्गस्यातियत्नसाध्यनिर्विकल्पकज्ञानमात्रत्वादेव। तत्र मानमाह **नान्यः पन्था इति**। विद्यतेऽयनायेति शेषः । **छेद इति**-कश्चित्तु "यतो वाचो निवर्त्तन्ते" इति श्रुतिमनुरुध्य "अवागविषय" इति छेदं विदधति। **अत एव**-ब्रह्मणो वागविषयत्वादेव। ननु कीदृशवाग्विषयता तस्येत्यत आह-**वेदेति**। **ज्ञानमिति**-अनन्तं ब्रह्मेति शेषः । नन्वेव कथन्तस्या लक्ष्म्याः सकलवेदवृत्तिनेत्यत आह-**सर्वोपीति**। **तेषां**—वैयाकरणानाम्। **ब्रह्मपर**-ब्रह्मतात्पर्यकः । उपक्रमादिषड्विधलिङ्गैर्वेदाना ब्रह्मतात्पर्यकतानिश्चयात् । आह च-"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥" इति। तत्र मानमाह-**वेदैश्चेति**। **शास्त्रत**-व्याकरणतः । **साधून्**-साधुशब्दान्। **वाचम्**-शुद्धां वाचम्। **असाधुभ्य**—असाधुशब्देभ्यः । **तदिति**-प्रकृतिप्रत्ययविभागेत्यर्थः । **ध्वनिरूपेति**-ध्वनिरूपा या वैखरी तस्या रूपेण रूषितस्य (आश्लिष्टस्य) इत्यर्थः । **तैः**—वैयाकरणैः । एवमग्रेऽपि। **तस्य**—व्यङ्ग्यस्य। **चित**-ब्रह्मणः । **सत्यमित्यादित**-सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेः । **तेषां**—वैयाकरणानाम् । **तदिति**-ब्रह्माभेदेत्यर्थः । **सा**-स्वप्रकाशब्रह्मरूपा लक्ष्मीः । **तन्मर्यादया**-पदपदार्थादिमर्यादया। अप्राप्येत्यस्योभयत्रान्वयायाह—**तत्रेति** । **उभयम्**—वाङ्मनसरूपम् । **एते**—चत्वारीत्यादयः । **अन्यत्र**-अग्न्याध्यानादौ । **एतत्तात्पर्यका**—व्याकरणाध्ययनस्य मोक्षादिसाधनत्वपरका ।

(भाष्यम्)

सारस्वतीम्—

याज्ञिकाः पठन्ति—"आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेद्" इति ॥

प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् ॥ सारस्वतीम् ।

(प्रदीप) **प्रायश्चित्तीयामिति**। भवार्थे वृद्धाच्छः ॥ **प्रायश्चित्तीया इति** । प्रायश्चित्ताय पापशोधनाय श्रुतिस्मृतिविहिताय कर्मणे हितास्तन्निमित्तोत्पादना मा भूमेत्यर्थः ॥

(उद्द्योत) **भवार्थे इति**। प्रायश्चित्तसाधनत्वेन तद्भवत्वम् ॥

(तत्त्वालोक) भाष्ये-अग्निमादधानेन व्याकरणमवश्यमध्येयमित्याह—**सारस्वतीमिति** । अन्यस्यापशब्दप्रयोगे दोषो नेति सूचनायाह—**आहिताग्निरिति**। यज्ञमध्ये इति शेषः । ननु अनारभ्याधीतेन "नानृतं वदेदि"ति सामान्यनिषेधेन अथानृतस्येव शब्दानृतस्यापि त्याज्यत्वात् सर्वथा रजतस्थाने रङ्गदानेनेव साधुशब्दस्थाने अपशब्दप्रयोगेण दोषसम्भवात् कथन्तत् सूचितमिति चेन्न, याग प्रकरणपठितेन तादृशवाक्येन यज्ञेऽपशब्दप्रयोगे क्रतुपुरुषोभयस्य दोषोऽन्यत्र पुरुषमात्रस्येति सूचनायैव आहिताग्निपदोपादानात्। **सारस्वतीं**-सरस्वतीदेवताकाम्। **प्रायश्चित्तीया इति**-प्रायश्चित्ताय हिता इति व्युत्पत्तौ "वृद्धाच्छ" इति छः ।

प्रदीपे-**भवार्थे**—प्रायश्चित्ते भवेति व्युत्पत्तौ । चर्मणि द्वीपिनं हन्तीत्यत्रेवात्र निमित्तार्थे सप्तमी । **तन्निमित्तोत्पादना**—तस्य तादृशकर्मरूपप्रायश्चित्तस्य निमित्तं यज्ञकर्मण्यपशब्दप्रयोगः तस्योत्पादना कर्त्तारः ।

उद्द्योते—ननु पापनाशकश्रुतिस्मृतिविहितकर्मणः प्रायश्चित्ततया कथन्तद्रूपाधिकरणे इष्टे भवत्वमित्यत आह-**प्रायश्चित्तेति** । तथा चात्र प्रायश्चित्तपदस्यान्तःकरणशुद्धिपरतया तत्र (तदर्थम्) इष्टे भवत्वसम्भवादिति भावः । **तदिति**-प्रायश्चित्तेत्यर्थः ।

(भाष्यम्)

दशम्यां पुत्रस्य—

याज्ञिकाः पठन्ति—"दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्" इति ॥

नचान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम् ॥ दशम्यां पुत्रस्य ॥

(प्रदीप) **दशम्युत्तरकालमिति**। दशम्या उत्तर इति पञ्चमीति। योगविभागात्समासः । ततः कालशब्देन बहुव्रीहिः। क्रियाविशेषणं चैतत्। दश दिनान्यशौचं भवतीति दशम्युत्तरकालमित्युक्तम्। ये पि गृह्यकाराः पठन्ति **दशम्यां पुत्रस्येति**, तैरपि दशम्यामिति सामीपिकमधिकरणं व्याख्येयम् ॥ **घोषवदादीति**। घोषवन्तो ये वर्णा शिक्षायां प्रदर्शितास्तदादि ॥ **अन्तरन्तःस्थमिति**। मध्ये यरलवा यस्य तदित्यर्थः ॥ **त्रिपुरुषानूकमिति**। नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषास्ताननुकायत्यभिधत्त इति त्रिपुरुषानूकम्। **अन्येषामपि दृश्यते** इति दीर्घः ॥

(उद्द्योत) **पञ्चमीति योगविभागादिति** । सुप्सुपेति तु युक्तम्॥ ननु दशम्यां पुत्रस्येति प्रयोजनस्वरूपगणने भाष्ये उक्तम्। गृह्येपि तथैव पठ्यतेऽतो दशम्युत्तरकालमित्ययुक्तमत आह—**तैरपीति** ॥ **शिक्षायामिति**। ते च हशः ॥ अन्तरन्तःस्था यस्येत्यर्थः । **त्रिपुरुषा**-

नूकम् । त्रिपुरुषशब्दे द्विगु । मूलविभुजादित्वात्क ॥ भाष्ये-अनरीति । अमनुष्येऽरिमित्रे इति वार्थ ॥

(तत्त्वालोकः) भाष्ये-व्याकरणाध्ययनस्य नामकरणेऽप्युपयोगमाह-दशम्यामिति । याज्ञिकाः-यज्ञकाण्डमवा वैदिकशब्दा । ऋषि (वेद.) पठतीतिवत् प्रयोग । कूले गाङ्कुलमित्यत्रेव दशम्यामित्यत्रौपश्लेषिकेऽधिकरणे सप्तमीत्यभिप्रायेणाह-दशम्युत्तरेति । अवृद्धं-वृद्धमङ्कमित्रम् । हि-यत । कृतं-कृदन्तम् । नियमपालनजनितपुण्यानिच्छया तद्धितान्तनामकरणेऽपि प्रवृत्ति. स्यादित्यन्तस्त निषेधति-न तद्धितमिति । न तद्धितान्तमित्यर्थ । तथा च तद्धितान्तनामकरणे न केवल पुण्याप्राप्ति , किन्तु पापावाप्तिरपीति भाव । नन्वेतावता किं फलितमित्याह-नचेति । नहीत्यर्थ । व्याकरण-व्याकरणाध्ययनम् । विज्ञातुमिति-अतोऽध्येय व्याकरण मिति शेष ।

प्रदीपे-पञ्चमीतीति-"पञ्चमी भयेने'ति सूत्रे इत्यादि । बहुव्रीहि-दशम्युत्तर काले यस्मिन् (कर्मणि) इति व्युत्पत्तौ । सामीपिकम्-औपश्लेषिकम् । व्याख्येयमिति-अनेनैवाशयेन "दशम्या पुत्रस्ये"ति प्रतीकं दशम्युत्तरकालमिति वृद्धवचनानुसारेण व्याख्यात भाष्यकृता, अन्यथा असङ्गतिर्दुर्वारेति भाव । घोषवन्तः-घोषप्रयत्नवन्त । त्रयः पुरुषाः-पितृपितामहप्रपितामहा । तानिति-तेषामन्यतममिति फलितार्थ । दीर्घ इति-अनुकरणत्वान्नोरुकारस्येति शेष ।

उद्योते—योगविभागस्य भाष्ये इष्टतया प्रामाणिकत्वादाह-सुप्सुपेतीति । द्विगुः-समाहारद्विगु । पात्रादित्वात् "अकारान्तोत्तरपदो द्विगु स्त्रियामिष्ट" इति स्त्रीत्व न । कः-'कै शब्दे' इति धातो कप्रत्यय । केचित्तु प्रथम कर्मरूपोपपदाविवक्षायाम् "आतश्चोपसर्गे" इति कप्रत्ययेनानुकपद व्युत्पाद्य पश्चात् कर्तृसम्बन्धे कर्मषष्ठ्यन्तेन षष्ठीतत्पुरुषं समाश्रित्य त्रिपुरुषानूकमिति साधयन्ति । अमनुष्ये इति-देवगरादाविति फलितार्थ । अरिमित्रे इति-मित्रादाविति फलितार्थं ।

(भाष्यम्)

सुदेवो असि—

'सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनु क्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥'

सुदेवो असि वरुण सत्यदेवोऽसि । यस्य ते सप्त सिन्धव सप्त विभक्तयः । अनुक्षरन्ति काकुदम् । काकुद तालु । काकुर्जिह्वा, साऽस्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा—शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयस्तालन्वनुक्षरन्ति । तेनासि सत्यदेवः ॥ सत्यदेवाः स्यामेत्यध्येय व्याकरणम् ॥ सुदेवो असि ॥

(प्रदीप) सुदेवो असीति । वरुणस्येय स्तुति । यतो हेतोर्व्याकरणज्ञानाद्वत्तमान सत्यदेवोऽसि ततो हेतोरन्येऽपि सत्यदेवा भवन्त्वित्यर्थ ॥ सिन्धव इति । नद्य इव विभक्तय इत्यर्थ । अनुक्षरन्तीति । तालन्वनुसृत्य प्रकाशन्त इत्यर्थ ॥ साऽस्मिन्नुद्यत इति । अनेकार्थत्वाद्धातूनामुद्गिरणार्थस्य वदेः ॥ सूर्म्यमिति । सूर्मीमिति प्राप्ते आमि पूर्वत्वस्य छान्दसीयमुच्चारणा भाष्ये ॥

(उद्द्योत) सत्यदेव इति । वरुणे यथा सत्येन द्यन्तीति द्योतन्त इति दीव्यतेर्यन्ते पचाद्यच्यर्थ ॥ यस्येति । पञ्चम्यास्थाने षष्ठी । यस्मात्ते काकुद तालु प्राप्य सिन्धव सप्त समुद्ररूपा ॥ सप्तविभक्तयोऽनुक्षरन्ति प्रकाशन्त इत्यर्थ ॥ अनेकार्थत्वादिति । वदेरधिकरणे घनर्थे इति क । इकन्नुवत्परकरूप पृषोदरादित्वादेकस्येकारस्य लोपः । उदेवाधिकरणे क । पृषोदरादित्वादनुलोप ॥ सूर्मीं शोभनामग्नि प्रतिमाम् , सुषिराम् , ऊपसुषीति रप्रत्ययेन सच्छिद्रा प्रविश्य वर्णयथा तत्रत्य मल भस्मीकृत्य प्रतिमा शुद्धा करोति एव तालुदेशे प्रकाश प्राप्य विभक्त्यो विभज्यन्ता शब्दा शरीर पापम पाकुर्वन्तीत्यर्थ ॥ अनेन स्वर्गप्राप्ति फलमित्युक्तम् ॥

(तत्त्वालोकः) भाष्ये क्रमप्राप्त व्याकरणाध्ययनस्य सत्यदेवत्वाप्तिफलकत्वमुपवर्णयन् ऋग्वेदमन्त्रमाह-सुदेवो असीति । अत्र "प्रकृत्यान्त पादमव्यपरे" इति सूत्रेण प्रकृतिभावात् 'एङ पदान्तादती"ति सूत्रेण पूर्वरूपापत्ति । हे वरुण ! त्व "सुदेवो असि" अस्य व्याख्या सत्यदेवोऽसीति । तत्र सत्यदेवत्वसाधनाय हेतुमाह-यस्येति । तालुरूपार्थे काकुपद न रूढ, किन्तु यौगिकमित्युपपादयति-काकुरिति । तत्र दृष्टान्तमाह-सूर्म्यमिति । तमुपपादयति-शोभनामिति । अनेनोर्मिशब्द एवाय प्रतिमावाचक , न सूर्मिशब्द इति सूचितम् । उपनयमाह-एवमिति । निगमनमाह-तेनासीति । फलितमाह—सत्येति ।

प्रदीपे-वरुणस्येति—बार्हस्पत्ये प्रगाथे इत्यादि । सम्पूर्णमन्त्रभावार्थमाह-यत इति । व्याकरणज्ञानाद्धेतो हेतो प्रकृतिप्रत्ययविभागज्ञानपूर्वक साधुशब्दप्रयोगादित्यर्थ । अन्ये-वैयाकरणाः । नद्य इति-(यथाश्रुतानुपपत्त्ते लक्षणया) सागरा इत्यर्थ । इवेन मन्त्रे लुप्तोपमा सूचिता । अध्याहृत्याह-अनुप्राप्येति । तन्नुद्योतेऽपि । "सूर्मी स्थूणाऽय प्रतिमे"त्यमरकोशादितो दीर्घान्तसूर्मिशब्दस्याभिप्रेत्याह-सूर्मीमिति ।

उद्द्योते-सत्येन-साधुशब्दमात्रप्रयोगाख्येन । अयं शब्द-मन्य देवशब्द । अन्येषु-वैयाकरणेषु । षष्ठीति-व्यत्ययेनेत्यादि । सप्त विभक्तय-प्रथमादिसप्तत्रिकरूपा विभक्तय । प्रकारान्ते इति-मूर्तिमत्य इत्यादि । अत्र इत्यन्तस्थ । धातूनामनेकार्थत्वमभिप्रेत्याह-वदेरिति । उत्क्षेपणादिति शेष । घनर्थे इति-'घनर्थे कविधान'मिति वार्तिकेन । शकन्ध्वादिति-तत्र सम्प्रसारणपूर्वरूपयो काकोदमिति विग्रहे षष्ठसमासे चेत्यादि । विनिगमनाविरहादाह-पृषोदरादित्वाद्वेति । सम्प्रसारणाद्यकरणेन लाघवमभिप्रेत्याह-उदेवेति । पृषोदरादित्वादिति-काकोर्नुदमिति व्युत्पत्तौ षष्ठीतत्पुरुषे इत्यादि । वस्तुतस्तु "साऽस्मिन्नुद्यत" इति भाष्य फलितार्थकथनपरमेवेति भाव । अयःप्रतिमाम्-लोहमयीं मूर्तिम् । ऊपसुषीति-"ऊपसुषिमुष्कमधोर" इति मत्वर्थीयसूत्रेण । भाष्योक्त सामर्थ्यलभ्यमर्थं विवृण्वन्नाह-प्रविश्येति । अन्त इत्यादि । तालिष्विति-वरुणस्येति शेष । पापम्-पापरूप मलम् । लोके यथाग्निर्विनष्टमलाना वस्तूना शोधनमिव साधुशब्दप्रयोगेण विनष्टपापमलस्य वरुणस्य वैयाकरणस्य च शोधनमिति तयो सत्यदेवत्वमिति भाव । अनेन-वैयाकरणे सत्यदेवत्वेन वरुणसादृश्यप्रतिपादनेन । वरुणस्येव वैयाकरणस्यापि स्वर्गावाप्तिः भवतीति व्याकरणाध्ययनस्येति शेषः ।

(उक्तप्रयोजनमन्योपदर्शनप्रकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते, न पुनरन्यदपि किंचित् ? ॐ इत्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान्पठन्ति ? ॥

(प्रदीपः) किं पुनरिति । ननु कानि पुनरस्येति येन पृष्टं, स एव कथं पृच्छति-**किं पुनरिति ।** एवं तर्हि भाष्यकारः प्रयोजनान्वाख्यानस्य विषयविभागं दर्शयति । **पुरा** वेदाध्ययनात्पूर्वं व्याकरणमधीयते ते चाल्पायुष्मत्समर्था इति न प्रयोजनमन्वाख्येयम् । अद्यत्वे तु स्वल्पायुष्ट्वात्पूर्वमेव वेदः प्रधानमधीयते तत्र प्रभुं समर्थत्वात् व्याकरणाध्ययनस्य प्रयोजनं पृच्छन्तीत्यवश्या वक्तव्येव प्रयोजनम् ॥ **न पुनरन्यदिति** वेदमध्येतुमिति गासमानेभ्य इत्यर्थः ॥ **ॐ मित्युक्त्वेति ।** अभ्युपगम्येत्यर्थः । **वृत्तान्तश इति ।** वृत्तान्त प्रपाठक उच्यते । वृत्तान्ते वृत्तान्ते पठन्तीत्यर्थः ॥

(उद्द्योतः) एवं तर्हीति । वेदातिरिक्तविषय एव प्रयोजनान्वाख्यानं, न तु वेदविषये' इत्येवंरूपं **विषयविभागम्** ॥ तृतीयोऽयं प्रश्न इत्यन्ये । किञ्चित्पदार्थमाह-**वेदमपीति ।** शेषपूरणमन्यत् । किं तत्किंचिदित्याशङ्क्यायमाह-**भाष्ये-ओमित्युक्त्वेति ।** पठन्तीत्यस्यानन्तरमेतेभ्योऽपीति शेषः ॥ एवं च वेदमधिजिगांसमानेभ्यो वेदाध्ययनप्रयोजनं किमिति नान्वाख्यायत इति प्रश्नः ॥ वेदाध्ययनवद् व्याकरणाध्ययनमपि प्रयोजनमन्तरैव करिष्यन्तीति प्रयोजनविचारो व्यर्थ इति तात्पर्यम् ॥ न चोमित्यधिकमत आह-**अभ्युपगम्येति ।** विनैव प्रयोजनज्ञानमिति शेषः ॥

(तत्त्वालोकः) भाष्ये—पुनरिति-अयमुभयथा ह्यर्थे वाक्यालङ्कारे वा । **इदमिति**-अस्य प्रयोजनमित्यनेन सम्बन्धः । **अन्यत्**-व्याकरणभिन्नम् । वैदिकोदाहरणे प्रथमोक्तत्वादाह-**शमित्येवमादीनीति ।** "शन्नो देवीरभिष्टये" इत्येवमादीनीत्यर्थः ।

प्रदीपे-**किं पुनरितीति**-अस्य प्रतीकम्, तथा चाक्षिप्तस्य प्रश्नाकारतेति भावः प्रयोजनानाम् अवश्यान्वाख्येयता विज्ञाय तानि पृच्छतः तदन्वाख्याने वैयर्थ्यशङ्काया असम्भवात्तस्यायं प्रश्नो न सम्भवतीत्याशयेनाह-**ननु कानीति । भाष्यकार इति**-एवेति शेषः । **दर्शयतीति**-प्रश्नपूर्वकमित्यादि । उत्तरग्रन्थे भाष्यकृता दर्शितमेव विषयविभागमवाह-**पुरेति । युगान्तरे इत्यर्थः । ते**-अध्येतारः । **प्रष्टुमिति**-व्याकरणाध्ययनस्य प्रयोजनमित्यादि । पुरा द्विजैः सहस्रायुष्ट्वात् साङ्गोपाङ्गवेदा अध्येया इति विचारयन्तो गुरवः अङ्गाध्ययनोत्तरमङ्गिनोऽध्यापनेन विशेषलाभो भवेदित्याशयेन वेदात्प्राग्व्याकरणं चैवाध्यापयन्ति स्म । सम्प्रति तु शतनोऽप्यल्पायुष्ट्वात् "अनन्तशास्त्रं बहुला च विद्या अल्पश्च कालो बहुविघ्नता च । यत्सारभूतं तदुपासनीयं हंसैर्यथा क्षीरमिवाम्बुमध्यात् ॥" इत्यादि समालोचयन्तो गुरवः प्रधानतया परमावश्यकं वेदमेवादावितः प्राक् पाठयन्तीति भावः । वीप्सायां शमित्यभिप्रेत्याह-**वृत्तान्तमिति ।**

उद्द्योते—भिन्न भिन्न विषयमित्येवंरूपं विषयविभागमिति भ्रमनिरासायाह-**वेदेति ।** प्रकारान्तरेणापि प्रकृतभाष्यस्य सामञ्जस्यं सम्भवतीति बोधनायाह-**तृतीयस्येति ।** प्रयोजनप्रष्टृवक्तृभिन्नस्येत्यर्थः । **शेषेति**-अनुषङ्गेणेत्यादि । प्रदीपोक्तकिञ्चित्पदार्थस्य भाष्यैकपाठ्यत्वादाह-**किं तदिति । आह**-विशिष्याह । अत एव सामञ्जस्यायाह-**एतेभ्योऽपीति ।** प्रयोजनमन्वाख्यायते इत्यस्यानुषङ्गः । ननु किमक्षिप्तमेतावतेत्यत आह-**एवञ्चेति ।** व्याकरणाध्ययनप्रयोजनान्वाख्याने चेत्यर्थः । **वेदेति**-वेदाध्ययनप्रयोजनान्वाख्यानेऽकृते चेत्यादि । **प्रयोजनमिति**-प्रयोजनज्ञानमित्यर्थः । अधीष्वेत्याचार्यवचनादित्यादि । **प्रयोजनमिति**-प्रयोजनज्ञानमित्यर्थः । अधीष्वेत्याचार्यवचनादित्यादि । **ओमित्यधिकम्**-ओमित्युक्त्वेत्यधिकम् । **अत इति**-विशिष्टस्यार्थमिति शेषः । **अभ्युपेति**-आचार्येण अधीष्वेत्युक्ते तदाज्ञामित्यादिः ।

(समाधानभाष्यम्)

पुराकल्प एतदासीत्—संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते । तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते ॥ तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति—

'वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः, अनर्थकं व्याकरणम्' इति । तेभ्य एव विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद् भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे—इमानि प्रयोजनान्यध्येयं व्याकरणम्—इति ॥

(प्रदीपः) अद्यत्वे इति । अद्यत्वेशब्दो निपातो भिन्न् काल इत्यत्रार्थे वर्तते ॥ **त्वरिता इति ।** विवाहादौ ॥

(उद्द्योतः) भाष्ये उत्तरमाह-**पुराकल्पे इति ।** युगान्तर इत्यर्थः ॥ **संस्कार** उपनयनम् ॥ **करणम्** आभ्यन्तरप्रयत्नः ॥ **अनुप्रदानं** नादादिबाह्यप्रयत्नः । तत्तदीतव्याकरणशिक्षेभ्य इत्यर्थः । ते तदानीमपि कर्मानुष्ठानफलकत्वं वेदस्य जानन्तो नित्यत्वं वा तदध्ययनस्य जानन्तो न तदध्ययनप्रयोजनं पृच्छन्तीति न कदाचिदपि वेदाध्ययनप्रयोजनोपदेश इति तात्पर्यम् ॥ **न तथेति ।** किं तु विपरीतमित्यर्थः ॥ भाष्ये **आचार्यपदेन** शास्त्रप्रणायको भाष्यकृदेव विवक्षितः ॥ **इदं शास्त्रमिति ।** प्रयोजनान्वाख्यानमित्यर्थः ॥

(तत्त्वालोकः) भाष्ये-**एतदिति**-अस्यैव क्रियाविशेषणस्यार्थं । संस्कारेत्यादिरूपं दिश्यन्ते इत्यन्तं **ब्राह्मणा**-द्विजाः । **तेभ्य**-वैयाकरणेभ्यः । **स्थान**-कण्ठादि । **नाद**पदेन विवारादय उपलक्ष्यन्ते । **दिश्यन्ते इति**-स्मेति शेषः । **वक्तार इति**-अस्य "वेदान्नित्यादि, इतीत्यन्तं" कर्म । **न**-अस्माकम् । कर्तुः शेषत्वविवक्षणात् षष्ठी । **लोकाच्च**-लोकव्यवहाराच्च । **विप्रतिपन्नेति**-विप्रतिपन्ना विरुद्धार्थविषयिणी बुद्धिर्येषां मिति व्युत्पत्तिः । **अन्वाचष्टे**-करोति । विशिष्टवाचकपदानां सति विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वमिति न्यायात् । यथा 'सकीचकैर्मारुतपूर्णरन्ध्रै'रित्यत्र कीचकपदस्य वंशमात्रपरता ॥ कुत इत्यत आह-**इमानीति ।** इमानि प्रयोजनानि सन्तीत्यतोऽध्येयं व्याकरणमिति कथयितुमित्यर्थः ।

प्रदीपे—त्वच्छब्दमार्थक्यबोधनायाह-**अद्यत्वे इति ।** शेषं कथयति-**विवाहादाविति ।** तदोत्सुकाः सन्त इत्यर्थः ।

उद्द्योते—केचित्तु किञ्चिदित्यन्तः पूर्वपक्षः, ओमित्यादिरुत्तरपक्ष इति वदन्ति, तदयुक्ततां सूचयन्नाह-**उत्तरमिति ।** "अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीते"ति श्रुतिम्, "उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ॥" इति स्मृतिञ्चानुसन्धायाह-**उपेति ।** प्रकृतिप्रत्ययादिविभागेन शब्दार्थकथनप्रकारस्य, स्थानादेर्वर्णोच्चारणरीतेश्च व्याकरणशिक्षयोः सत्त्वादाह-**अधीतेति ।** ननु व्याकरणशिक्षाध्ययनोत्तरं वेदं पिपठिषूणां प्रौढतया वेदाध्ययनप्रयोजनप्रश्नकरणसामर्थ्यात् कथं न कृतो वेदाध्ययनप्रयोजनोपदेशोऽतस्तदर्थमेवेत्यत आह-**ते तदानीमपीति ।** अधीतव्याकरणशिक्षा (वेदाध्ययनकाले) प्रौढतायामपीत्यर्थः । **फलकत्वम्**-स्वरूपार्थबोधनद्वारा । **तदिति**-वेदेत्यर्थः । **इति**-इति हेतौ । (कदाचित्पदप्रयोगेण सूचितात्) बालास्तु सामर्थ्याभावादेव न तत्पृच्छन्तीति हेतोश्च । **विपरीतम्**-(अल्पायुष्ट्वात्) वेदाध्ययनोत्तरं व्याकरणाद्यध्ययनम् । व्याकरणान्वाख्यानस्यानुपदत्वाद्, इदं शास्त्रमित्यनेन तत्परामर्शासम्भवाद्, उत्तरग्रन्थानुरोधाच्च तदर्थमाह-**प्रयोजनेति ।**

(अनुबन्धचतुष्टयोपसंहारभाष्यम्)

उक्तः शब्दः। स्वरूपमप्युक्तम्। प्रयोजनान्यप्युक्तानि ॥

(उद्द्योतः) भाष्ये (**उक्तः शब्द इति**)। **लौकिकानां वैदिकानां** चेत्यनेन विषयभूत शब्द उक्त इत्यर्थ ॥ **स्वरूपमपीति। अथगौरित्यादिना** ॥ अयमुपसहारो ग्रन्थस्य, विषयप्रयोजननिरूपण मेनावता कृतमिति बोधयितुम्। तेनैव सबन्धाधिकारिणावुक्ताविति नो पृथग्नोक्तौ ॥

(तत्त्वालोकः) भाष्ये-वक्ष्यमाणप्रविवेकाय शिष्यसौलभ्याय लोक सगृह्णाति-**उक्त इति। स्वरूपम्**-शब्दस्वरूपम्। **प्रयोजनानीति**-कानि पुनरित्यादिना, उक्त शब्द इत्यत प्राक्तनग्रन्थेनेत्यादिः।

उद्द्योते-**विषयभूतः**-व्याकरणशास्त्रविषयभूत। **थादिनेति**-ध्वनिः शब्द इत्य-तेनेति शेष। ननु किमर्थमय सग्रह इत्यत आह-**अयमिति। ग्रन्थस्य**-प्रागुक्तस्य। इदं मध्यमणि न्यायेन पूर्वत्रोत्तरत्र चान्वेति। **विषयेति**-"अथ शब्दानुशासनमि"ति प्रथमवाक्यसूचित मित्यादि। **तेनैव**-विषयप्रयोजनयोरभिधानेनैव। **उक्तौ**-उक्तप्रायौ। **तौ**-सम्बन्धाधिकारिणौ **पृथक्**-साक्षात्।

(इत्यनुबन्धचतुष्टयनिरूपणम् ॥)

(अथ शास्त्रनिर्माणरीतिनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

शब्दानुशासनमिदानीं कर्तव्यम्। तत्कथं कर्तव्यम्। किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति? ॥

(प्रदीपः) **उभयोपदेश इति।** हेयोपादेयोपदेशे स्पष्टा प्रतिपत्तिर्भवतीत्युभयोपदेश उद्भावित ॥

(तत्त्वालोकः) भाष्ये-शब्दानुशासनविधानप्रकारनिरूपणायाह-**शब्देति। इदानीम्**। अनुबन्धचतुष्टयनिर्णयसमये। **कर्तव्यमिति**-इति सिद्धमिति शेषः। साध्वसाधुशब्दान्यतरोपदेशे अकृतार्थता, तयोरुभयोपदेशे गौरव सम्भाव्य शब्दानुशासनस्य दुष्करता विभावयन् सामान्यतस्तावत् पृच्छति-**तत्कथमिति। तत्**-शब्दानुशासनम्। अथ विशिष्य पृच्छति-**किमिति। आहोस्विद्**-अथवा। **उभयेति**-शब्दापशब्देत्यादिः।

प्रदीपे-ननु गौरवादुभयोपदेशो न सम्भवतीति स कथमुद्भावित इत्यत आह-**हेयेति। इति**-इति हेतोः।

(समाधानभाष्यम्)

अन्यतरोपदेशेन कृतं स्यात्। तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतद्—अतोऽन्येऽभक्ष्या इति ॥ अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः। तद्यथा 'अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते गम्यत एतद्—आरण्यो भक्ष्य-इति ॥ एवमिहापि। यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद्—गाव्यादयोऽपशब्दा इति। अथाप्यपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यत एतद्—गौरित्येष शब्द-इति ॥

(प्रदीपः) यद्यपि प्रतिपत्ति स्पष्टा, गौरवं तु भवतीत्याह-**अन्यतरेति।** शब्दापशब्दयोरित्यर्थ। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्धारणे वर्तेते ॥ **पञ्चेति।** अर्थित्वाद्भक्षणं प्राप्तं पञ्चसु पञ्चनखेषु नियम्यमानं सामर्थ्यादन्येभ्यो निवर्तते। न त्वयं विधि, अप्राप्तेरभावात् ॥

(उद्द्योतः) कियच्छब्दोऽन्यत्र इतराभावादाह—**अन्यतरान्येति।** तत्र सुशब्दोपदेश प्रयोगविध्यर्थोऽनुवाद। अपशब्दोपदेशस्तु प्रयोगप्रतिषेधार्थ ॥ **पञ्च पञ्चनखा** इत्यस्य नियमत्वं दर्शयति—**अर्थित्वादिति। नियम्यमानं** पुन शब्देन बोध्यमानमित्यर्थ ॥ ननु अस्य परिसङ्ख्यात्वात्कथ नियमत्वेन व्यवहार। अस्ति च नियमपरिसङ्ख्ययोर्भेद पाक्षिकाप्राप्तिकाप्राप्तांशपरिपूरणफलो नियमः अन्यनिवृत्तिफला च **परिसंख्येति** चेन्न। नियमेऽप्यप्राप्तांशपरिपूरणरूपफलबोधनद्वारार्थान्यनिवृत्ते सत्त्वेन अभेदमाश्रित्योक्ते ॥ **विधिरिति।** अपूर्वविधिरित्यर्थः ॥ ये तु पञ्चपदस्य तदतिरिक्ते लक्षणा भक्ष्यपदस्य चाभक्ष्ये सेति वदन्ति तेषा पदद्वये लक्षणागौरवम्। अस्यैव नियमत्वेन **भक्ष्यनियमेनाऽभक्ष्यप्रतिषेधो गम्यत** इति भाष्यविरोधश्च। नियमपदस्य तद्बोधके लक्षणाया सैव दोष। अक्षरास्वारस्य च। नियम्यमान भक्षण सामर्थ्यादन्येभ्यो निवर्तत इति कैयटासगतिश्च। दृष्टान्तदार्ष्टान्तिकयोरत्य तवैषम्यापत्तिश्च। अन्यनिवृत्तिफला परिसङ्ख्येति अभियुक्तोक्ति विरोधश्च। सिद्धस्य पुनर्विधानात्प्रापकप्रमाणस्य तदितराविषयत्वरूपसङ्कोचकल्पनम्। तेनान्येषा भक्षणाभावस्तद्भक्षणे प्रायश्चित्त च सिध्यति। एवसमभिव्याहारे सोऽपि स्फुटमस्यार्थस्यैव द्योतक। अन्ययोगव्यवच्छेद एवकारार्थ इति तु सामान्यप्रमाणसकोचफलितमर्थमादाय नेयम् ॥ **भक्ष्यनियम इति।** भक्ष्यानुमतिरूप उपदेश इत्यर्थ ॥

(तत्त्वालोकः) भाष्ये-विनिगमनाविरहेणैकाश्रयणासम्भवादाह-**अन्यतरेति। कृतं**-कृतकृत्यता। अस्योपपादनायोदाहरणमेवाह-**तद्यथेति**। यथेत्यर्थः। अथवा तद् अन्यतरोपदेशेनेष्टसाधकं यथेत्यर्थ.। **भक्ष्यनियमेन**-रागत प्राप्तस्य भक्ष्यस्य पुनः शब्दतो विधानेन। **गम्यते**-अर्थापत्त्या ज्ञायते। एवमग्रेऽपि। "पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव। शशकः शल्लकी गोधा खड्गी कूर्मोऽथ पञ्चम ॥" इति स्मृतेरंशमाह-**पञ्चेति।** एव शास्त्रनियमेनार्थादप्राप्तनिषेधावगतौ दृष्टान्तमुपपाद्य हेयनियमेनार्थादुपादेयप्रतीतावुदाहरणमाह-**अभक्ष्येति।** अभक्ष्यप्रतिषेधोपदेशेनेत्यर्थ। दार्ष्टान्तिकमुपपादयति-**एवमिति।** गौरित्यादेः साधुत्वोक्तावर्थाद् गाव्यादीनामसाधुत्वज्ञानमित्युक्त्वा गाव्यादेरसाधुत्वोक्तावर्थाद् गौरित्यादीनां साधुत्वज्ञानमित्याह-**अथेति।** ननु कीदृशी कतिविधा च साधुता असाधुता च शास्त्रकाराभिमतेति चेद्, अत्रोच्यते, 'अनपभ्रष्टताऽनादित्वं वाऽभ्युदययोग्यता। व्याक्रिया व्यञ्जनीया वा जाति कापीह साधुता ॥" इति स्मृतिसमीक्षया-१ अनपभ्रष्टता-अन्यथाऽनुच्चारितता, २ अनादि-अनादिता (मानप्रधाननिर्देशात्), ३ अभ्युदययोग्यता, ४ व्याक्रिया व्यञ्जनीया कापि जाति-शास्त्रतत्त्वविद्गम्यो जातिविशेषो वा। इति चतुर्विधा साधुता तथा एतद्विपरीता-१ 'अपभ्रष्टता, २ सादिता, ३ प्रत्यवाययोग्यता, ४ तदवच्छेदकजातिविशेषो वा' इति चतुर्धा असाधुता शास्त्रकारसम्मतेति ॥

प्रदीपे-**यद्यपीति**—उभयोपदेशे इति शेष.। **गौरवमिति**—तथापि तत्रेत्यादि। **इत्याह**—इत्यत सिद्धान्त्येकदेश्याह। **इत्यर्थ**—इत्यादि। **स्वभावात्**—शब्दशक्तिस्वाभाव्यात्। **द्विबह्विति**—अत्र

यथासङ्ख्यमन्वयः । अर्थित्वात्—रागित्वात् । भक्षणमिति—युगपत् सर्वेषामित्यादि । अत एवाह—सामर्थ्यादिति । "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥" इति स्मृत्यनुसारेणाह—न त्विति । अयं—पञ्च पञ्चनखा भक्ष्या इत्ययम् । अप्राप्तेरिति—पञ्चपञ्चनखभक्षणस्येत्यादि ।

उद्योते—"कियत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्" इति सूत्रेण कियत्तदन्य एव डतरचो विधानमित्याशयेनाह—कियत्तदन्य इति । तत्र—शब्दापशब्दोपदेशे । प्रयोगेति—तद्देत्यादि । प्रयोगेति—तत्र देत्यादि । नियमस्याप्राप्तांशपरिपूरणफलकत्वेन विधिरूपेण प्रवृत्तेः, कैयटे पुनरत्यन्तापदेशेऽप्याह—पुनरिति । नानासाधनसाध्यक्रियायामेकसाधनप्राप्तिपक्षे अप्राप्तसाधनस्य प्रापको विधिर्नियमविधिः । यथा व्रीहीनवहन्तीत्यादि । व्रीहीणामवघातेन नखविदलनादिना नानासाधनसाध्यवितुषीकरणक्रियायां नखविदलनप्राप्तिपक्षे अप्राप्तावघातस्य प्रापकत्वादस्य नियमविधिता । उभयोश्च युगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्याविधिः । यथा पञ्च पञ्चनखा भक्ष्या इति । पञ्चनखभक्षणापञ्चनखभक्षणयोः युगपत्प्राप्तावपञ्चनखभक्षणनिवृत्तिपरकत्वादस्य परिसंख्याविधित्वमित्याशयेनाह—नन्वस्येति । पञ्च पञ्चनखा भक्ष्या इत्यस्येत्यर्थः । च—यतः । भेदमेवाह—पाक्षिकेति । पाक्षिकी अप्राप्तिर्यस्य स पाक्षिकाप्राप्तिकः, स चासौ अप्राप्तांशः पाक्षिकाप्राप्तिकाप्राप्तांशः, तस्य परिपूरणं पाक्षिकाप्राप्तिकाप्राप्तांशपरिपूरणं तत् फलं यस्येति व्युत्पत्तिः । अन्येति—अन्यस्य निवृत्तिरन्यनिवृत्तिः, सा फलं यस्या इति व्युत्पत्तिः । च—तु । अपिना परिसंख्यासमुच्चयः । आर्थान्यनिवृत्तेरिति—आर्थी चेयमन्यनिवृत्तिरिति व्युत्पत्तिः । यथा व्रीहीनवहन्तीत्यनेनावघातविधिना अर्थान्नखविदलननिवृत्तिः । अभेदमिति—नियमपरिसंख्ययोरित्यादि । उक्तेः—(अस्य) नियमत्वोक्तेः । तदर्थत्वेन प्रमाणान्तरेणाप्राप्तस्य तदर्थत्वेन प्रापको यो विधिः सोऽपूर्वविधिः । यथा यजेत स्वर्गकाम इति । स्वर्गार्थकत्वेन प्रमाणान्तरेणाप्राप्तस्य यागस्य तदर्थत्वेन विधायकत्वादस्यापूर्वविधिता । प्रकृते तु नियमविधिरित्याशयेनाह—अपूर्वेति । ननु परिसंख्यायां शाब्दान्यनिवृत्तिसम्भवे कथमार्थान्यनिवृत्तिरुक्तेत्यत आह—ये त्विति । पञ्च पञ्चनखा भक्ष्या इत्यत्रेति शेषः । पञ्चनखपदस्य तात्पर्यग्राहकताममिप्रेत्याह—तदिति । पञ्चपञ्चनखेत्यर्थः । सा—लक्षणा । तथा च पञ्चपञ्चनखातिरिक्ता भक्ष्यत्वाभाववन्त इति बोधात् तदन्यनिवृत्तेः शाब्दता फलितेति भावः । तेषां—तेषाम्मते । ननु फलमुखगौरवं न दोषायेत्यत आह—अस्यैवेति । तदतिरिक्ता अभक्ष्या इत्युक्तार्थस्यैवेत्यर्थः । ननु अर्थतो भक्ष्यनियमबोधकेन शब्दतोऽभक्ष्यनिवृत्तिर्ज्ञायते इति भाष्यार्थकरणान्न विरोध इत्यत आह—नियमेति । तदिति नियमेत्यर्थः । सैव—लक्षणैव । तथा सति अभक्ष्यप्रतिषेधार्थकत्वपूर्वक"गम्यते" इति पदस्वारस्यहानिश्चेत्याशयेनाह—अक्षरेति । तस्याः शाब्दत्वे कैयटासाङ्गत्यमपीत्याह—सामर्थ्यादिति । अर्थतः न तु शब्दत इति भावः । अन्येभ्यः—अभक्ष्येभ्यः । तत्र मते दृष्टान्तेऽन्यनिवृत्तेः शाब्दता, दार्ष्टान्तिकेऽन्यनिवृत्तेरार्थत्वमित्यभिप्रायेणाह—दृष्टान्तेति । तेषां मतेऽन्यनिवृत्तेः शाब्दत्वेन फलत्वोक्तिरयुक्तेत्याशयेनाह—विरोधश्चेति । ननु पञ्चेति वाक्यस्य पञ्चपञ्चनखभक्षणबोधकत्वे तदतिरिक्तानामभक्ष्यता न ज्ञायेत, तथा च तद्भक्षणे प्रायश्चित्तविधानवैयर्थ्यमापद्येतेत्यत स्वमते सामञ्जस्यमाह—सिद्धस्येति । (रागतः) प्राप्तस्य (पञ्चपञ्चनखभक्षणस्य) इत्यर्थः । पञ्चेति वाक्येनेति शेषः । प्रमाणस्य—रागरूपस्य । तदिति—पञ्चपञ्चनखेत्यर्थः । तेन—तत्कल्पनेन । अन्येषां—पञ्चपञ्चनखभिन्नानाम् । तदिति—अन्येत्यर्थः । एवं समभिव्याहारेऽपि अन्यनिवृत्तेरार्थत्वमुपपादयितुमाह—एवेति । सोऽपि—एवकारश्च । अस्य—रागप्राप्तपञ्चपञ्चनखेतराविषयोऽस्तु इत्याकारकसङ्कोचश्च । विरोधं निराकरोति—अन्ययोगेति । इति तु—इति प्रामाणिकवाक्यं तु । सामान्येति—सामान्यरागरूपप्रमाणस्य यः पञ्चपञ्चनखेतराविषयत्वरूपसङ्कोचः, तस्य फलितम् "एतदन्ये अभक्ष्याः" इत्यर्थमादायेत्यर्थः । नैव—भक्षणनैयम्यम् । तत्र नियमत्वाभावादाह—भक्ष्यानुमतीति—केचित्तु पञ्चत्वादावधारणविषयबुद्धिस्थपञ्चत्वम् इत्याहुः, पञ्चपदस्य लक्षणा । अवधारणञ्चात्र स्वान्यतरव्यावृत्तिकरणान्वयि सत्तभिन्नाज्ञातप्रकारकज्ञानरूपम्, तेन "अन्ये भक्ष्याः" इति फलतीति सिद्धान्तिमतं वर्णयन्ति ॥

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ? ॥

(प्रदीपः) किं पुनरिति । उभयोपदेशाद् गुरोर्द्वावपि प्रत्यन्यौ तयोः को ज्यायानित्यर्थः ।

(तत्त्वालोकः) भाष्ये—साधुशब्दोपदेशे विवेचनायाः स्पष्टीकरणाय पृच्छति—किं पुनरिति । ज्यायः—अतिशयेन प्रशस्यम् ।

प्रदीपे—उभयेति—शब्दापशब्देत्यर्थः । द्वावपि—शब्दोपदेशापशब्दोपदेशयोः प्रत्येकमपि । तयोः—शब्दोपदेशापशब्दोपदेशयोः मध्ये ।

(समाधानभाष्यम्)

लघुत्वाच्छब्दोपदेशः ।

लघीयाञ्छब्दोपदेशः । गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा—गौरित्यस्य शब्दस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः । इष्टान्वाख्यानं खल्वपि भवति ॥

(प्रदीपः) इष्टेति । साधुशब्दप्रयोगाद्धर्मावाप्तेरित्यर्थः । अथवा उपादेयोपदेशात्तस्य झटिति प्रतिपत्तिर्भवतीति भावः ॥

(तत्त्वालोकः) भाष्ये—शब्दोपदेश इति । ज्यायानिति शेषः । लघीयान्—अतिशयेन लघुः । गरीयान्—अतिशयेन गुरुः । शब्दोपदेशकल्पे लाघवे तानभूतामपशब्दापेक्षया शब्दानामल्पतामुपपादयति—एकैकस्येति । शब्दोपदेशे न लाघवमेव, अपि तु तेनोपदिष्टशब्दैः धर्ममपि प्राप्नोति, तथा श्रोता स्वयं शब्दावबोधमप्यवाप्नोतीत्याशयेनाह—इष्टेति । इष्टस्येदमन्वाख्यानमिति व्युत्पत्तिः । इष्टजनकमपि शब्दान्वाख्यानं निश्चयेन भवतीत्यर्थः । इष्टान्वाख्यानपदयोर्लक्षणायाः, खलुपदस्य निश्चयार्थकतायाः, अपेर्भिन्नक्रमस्य च स्वीकारात् ।

प्रदीपे—उपदेशकाभिप्रायेणाह—साधुशब्देति । श्रोत्रभिप्रायेणाह—अथवेति । उपादेयेति—ग्राह्यसाधुशब्देत्यर्थः ।

(आक्षेपभाष्यम्)

अथैतस्मिञ्छब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः । गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः ? ॥

(उद्द्योतः) भाष्ये—प्रतिपत्तावित्यस्योपायभूत इति शेषः ॥

(तत्त्वालोकः) भाष्ये—एवं शब्दोपदेशे कार्यत्वेन निश्चितेऽपि तत्र प्रकारविशेषजिज्ञासया पृच्छति—अथेति । अनन्तरमित्यर्थः । एतस्मिन्—लघुभूते, इष्टसाधके च । शब्दोपदेशे इति—विधेयत्वेन व्यवस्थापिते इति शेषः । किमिति प्रश्ने । प्रतिपदेति—पदं पदं प्रति प्रतिपदं, तस्य पाठः प्रतिपदपाठः । पदस्य पदस्य पाठ इत्यर्थः । एतदेव प्रतिपदपाठस्वरूपमाह—गौरिति ।

उद्द्योते-प्रतिपत्तावित्यत्र निमित्तार्थे सप्तमीमभिप्रेत्य समुचितान्वयायाह-उपायेति ।

(समाधानभाष्यम्)

नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः ॥ एवं हि श्रूयते—"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम" ॥ बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो, न चान्तं जगाम, किं पुनरद्यत्वे । यः सर्वथा चिरं जीवति वर्षशतं जीवति । चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति । तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः ॥

(प्रदीपः) बृहस्पतिरिन्द्रायेति । प्रतिपदपाठस्याशक्यत्वं प्रतिपादयितुमयमर्थवादः ॥ **शब्दानामिति** । शब्दपारायणशब्दो योगरूढः शास्त्रविशेषस्य, तत्र प्रतिपदोक्तानामिति विशेषणाभिधानाय गम्यमानार्थस्यापि शब्दानामित्यस्य प्रयोगः ॥ एकदेशोपयोगादपि लोके उपयुक्तमित्युच्यते, यथौषधसंस्कृतघृतमात्रैकदेशोपयोगे उपयुक्तं घृतमिति व्यवहारः, तथेह नेति प्रतिपादयति-**चतुर्भिरिति । आगमकालो** ग्रहणकालः । **स्वाध्यायकालो**ऽभ्यासकालः । **प्रवचनकालो**ऽध्यापनकालः । **व्यवहारो** याज्ञे कर्मणि ॥

(उद्द्योतः) अनभ्युपाय इति ॥ तत्त्व चाशक्यत्वेन कृत्स्नाभिमतानभ्युपायत्वात् । तत्रार्थवादमाह—**बृहस्पतिरिति** ॥ ननु शब्दानामिति पुनरुक्तमत आह—**योगरूढ इति** । अर्थेनैकत्वमाशङ्क्य निराकरोति—**तत्रेति** ॥ ननु यावदेवाऽध्येष्यते तावदेवाभ्युपयुक्तं स्यात् । अत आह—भाष्ये **चतुर्भिरिति** ॥ उक्तमेव तदाशयमाह—**एकदेशेत्यादि** । विद्योपयोगाधारभूतानां कालानां विद्यां प्रत्यप्याधारत्वात् तस्य च करणत्वविवक्षा बोध्या । चतुर्षु कालेषु विद्योपयुज्यते इति फलितोऽर्थः । तत्राद्ययोर्विद्याध्येय बुद्धिमानित्यादरपूर्वकस्वत्वज्ञानादिलाभरूप उपयोगः । तृतीये प्रतिष्ठा सन्निध्यलाभद्वारार्थप्राप्तिः सत्कारविशेषश्च । चतुर्थे यज्ञाद्यनुष्ठानकालेऽपशब्दप्रयोगप्रयुक्तप्रायश्चित्ताभावः कर्मैनाङ्गता दक्षिणालाभः प्रतिष्ठा चेत्युपयोगः । तादृशश्चोपयोगः सर्वाध्ययन एव ॥ भाष्ये **पर्युपयुक्तमिति** । समाप्तमित्यर्थः । पर्यवसन्नमिति पाठान्तरम् । न चेगमदि । विद्योच्छेदापत्तेः । कर्मसु प्रायश्चित्तविधिवैयर्थ्यापत्तेश्च ॥

(तत्त्वालोकः) भाष्ये-तदस्य उत्तरमनुवदति-**नेत्याहेति** । न (शब्दज्ञानाय प्रतिपदपाठः कर्तव्यः) इति (सिद्धान्ती) वदतीत्यर्थः । कुत एवमित्यत आह-**अनभ्युपाय इति** । एव इत्यादि । **एष**-गौरव इत्यादि । प्रतिपदपाठस्य शब्दज्ञानानुपायतां साधयितुमाह-**एवमिति । हि**-यत । **श्रूयते**-श्रुतिः । मनुष्याणामेकवर्षं देवानामेकाहोरात्रं इति मानकालमभिप्रेत्याह-**दिव्यमिति** । "कालाध्वनोरत्यन्तसंयोगे" इति सूत्रेण द्वितीया । **शब्दानामिति**-बोधकमिति शेषः । **शब्दपारायण**-शब्दपारायणरूपशास्त्रविशेषम् । **अन्तं**-पारमन्तम् । **जगाम**-जगामेति । उक्ते परिशार्थमाह-**बृहस्पति श्चेति** । चकारो बृहस्पतीन्द्रयो साधनसम्पन्नतां सूचयन्तौ भागुनिकाध्यापकाध्येत्रोलक्षणादिन्द्र बोधयतः । न च-नैव । पुरा सर्वथा सम्पन्नानां बृहस्पतीन्द्रसम्पन्नानां समवधानेऽपि यदि प्रतिपदपाठेन शब्दसमाप्तिर्न जाता, तर्हि का सम्भावना सम्प्रति सर्वथा हीनानां वक्त्रादीनां समवधाने प्रतिपदपाठेन शब्दसमाप्तेरित्याशयेनाह-**किं पुनरिति** । अस्मिन् समये प्रतिपदपाठेन शब्दानामन्तं गमिष्यतीति किं पुनर्वाच्यमित्यर्थः । **अद्यत्वे इति**-अस्य देहलीदीपन्यायेन पूर्वं श्लोत्तरत्र च सम्बन्धः । **सर्वथा**-अत्यन्तम् । **वर्षशत**-वर्षाणां शतम् । "कालाध्वनो"रित्यनेन द्वितीया । प्रक्रियते व्यवच्छिद्यतेऽनेनेति व्युत्पत्तौ धर्ममभिप्रेत्याह-**प्रकारैरिति** । सामान्यव्यावर्तकैः विशेषैरित्यर्थः । **विद्या**-विद्यते ज्ञायतेऽनयेति विद्या । **उपयुक्ता**-सफला । चतुरः प्रकारानेव स्पष्टयति-**आगमेति** । ननु किमागममेवावर्तेत्यत आह-**तत्रेति** । चतुर्णां कालानां मध्ये इत्यर्थः । **अस्य**-अध्येतुः । **कृत्स्न**-सकलम् । **तस्मात्**-प्रतिपदपाठेन सर्वशब्दज्ञानासम्भवात् ।

प्रदीपे-ननु प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः । स च लक्षणया विधेयनिषेध्ययोः प्राशस्त्यनिन्दितत्वे प्रतिपादयतीति सिद्धान्तः । तथा च कथमनेनार्थवादेन प्रतिपदपाठस्य शब्दप्रतिपत्त्यनभ्युपायत्वं बोध्यते इत्यत आह-**प्रतिपदेति** । शब्दाः प्रतिपदपाठेन ज्ञातुमशक्या आनन्त्यादिति बोधनद्वारा अर्थवादेन प्रतिपदपाठस्य तदनभ्युपायत्वबोधनसम्भवादिति भावः । **प्रतिपादयितुं**-प्रतिपादयितुम् । **अयम्**-बृहस्पतिरित्यादि । **योगरूढ इति**-शब्दानां पारमन्तमयते गच्छति येनेति व्युत्पत्तौ निष्पन्नस्य "शब्दपारायण"शब्दस्य प्रतिपदोक्तशब्दप्रतिपादकशास्त्रविशेषे रूढतया न तद्घटकशब्दशब्दस्य व्यर्थतेति भावः । **तत्र**-श्रुतौ । **प्रयोग इति**-शब्दपारायणशब्दस्य योगरूढतया तेन ज्ञातेऽपि शब्दे "पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेने"ति नियमेन प्रतिपदोक्तानामित्यस्यान्वयासम्भवात् तत्र तदन्वयाय शब्दानामिति प्रयुक्तमित्याशयः । **अपिना** समुदायसंग्रहः । **औषधेति**-औषधेन औषधसम्बन्धिसारभागादिना संस्कृतं परिच्छिन्नं या घृतस्य मात्रा परिमितिः तदेकदेशस्योपयोगे सेवनेऽपि इत्यर्थः । **इह**-शास्त्रे । व्यवहार इत्यस्यानुषङ्गः । **ग्रहणेति**-अध्ययनेत्यर्थः । **अभ्यासेति**-मननेत्यर्थः । व्यवहारशब्दस्य यागपुरश्चरणार्थकर्मादौ यथायोग्यमुपयोग इत्यर्थमभिप्रेत्याह-**याज्ञे इति** । प्रवचनस्य व्यवहारत्वेऽपि पुरुषमात्रार्थत्वेनोभयार्थत्वात् पृथगुक्तिः ।

उद्द्योते—ननु लक्षणेन प्रत्याहारसंज्ञादिज्ञानपूर्वकशब्दज्ञानापेक्षया प्रतिपदपाठेन साक्षाच्छब्दज्ञानस्य लघुतया कथं प्रतिपदपाठस्य शब्दज्ञानानुपायत्वं भाष्यकृतोक्तमित्यत आह-**तत्त्वञ्चेति** । (तस्य तत्र) अनभ्युपायत्वञ्चेत्यर्थः । शब्दानामानन्त्यात् प्रतिपदपाठेन तदन्तगमनस्येति शेषः । **कृत्स्नेति**-इष्टसकलशब्दप्रतिपत्त्यनभ्युपायत्वादित्यर्थः । प्रतिपदपाठस्येत्यादि । **तत्र**-अनभ्युपायत्वे । **शब्दानामितीति**-शब्दपारायणघटकशब्दपदमित्यर्थः । न चैवमपि शब्दपारायणपदस्य योगरूढतया तेनैव शब्दानां पारायणविषयत्वावगतिः स्यादिति शब्दानामित्युपादाने अर्थपुनरुक्तिरस्त्येवेत्याशयेनाह-**अर्थेति । आशङ्क्य**-तदाशङ्कां हृदये निधाय । **अभ्युपयुक्तम्**-अभीष्टसाधकम् । **स्यादिति**-तथा च किं समाप्स्येति शेषः । भाष्याशयात्के मदाशयो न भिन्न इत्याह-**उक्तमेवेति** । मदुक्तमेवेत्यर्थः । **तदाशय मिति**-"चतुर्भिरि"ति भाष्याशयमित्यर्थः । स्पष्टमन्यमिति शेषः । ननु कालानां विद्योपयोगाधारत्वेऽपि विद्यानाधारत्वात् कथं "चतुर्भिश्च प्रकारैरि"त्यादि "व्यवहारकालेने"त्यन्तभाष्ये तेषां विद्यां प्रति प्रकारता समर्थितेत्यत आह-**विद्योपयोगेति । कालानामिति**-परम्परयेति शेषः । **आधारत्वादिति**-तां प्रति प्रकारत्वाऽश्रयणमिति शेषः । ननु कालानां विद्याधारत्वे कथं तत्र तत्र तृतीयोपपत्तिरित्यत आह—**तस्य चेति** । आधारस्य चेत्यर्थः । **तत्र**-चतुर्णां मध्ये ।

आद्ययो·-आगमस्वाध्यायकालयो । पूर्वंकमिति-परैर्दानादिनि शेष । उपयोग इति-विद्याया इत्यादि. । तृतीये-अध्यापनकाले । विशेषश्चेति-धर्मविशेषोऽपि बोध्य । विद्याया उपयोग इत्यस्यानुषङ्ग । चतुर्थे-व्यवहारकाले । उपयोग इति-विद्याया इत्यस्यानुषक्तस्य मध्यमणिन्यायेन पूर्वत्रोत्तरत्र चान्वय । पर्यन्तस्तमिति पाठान्तरानुरोधेन "आगमकालेने"ति तृतीयान्तपाठानुसारेण चाह-समासमिति । केचित्तु "आगमकाले" इति सप्तम्यन्तपाठमभ्युपगम्य तेषां कालाना मध्ये आगमकालादारभ्य समाप्तिपर्यन्तम् अत्राधुनिकस्य सकलमायु नैव पर्युपयुक्त पर्याप्त स्यादित्यर्थं वदन्ति । प्रतिपदपाठेन शब्दोपदेशे अध्येतुरागमकालेनैव सकलायुष समाप्ति स्यादित्याशयाविष्टता निराकरोति-न चेति । विधेति-तथा सति फलाभावादित्यादि । अध्ययनकालेनैव सर्वायुष समाप्ततया कर्मानुष्ठानासम्भवात् कर्मसु कृतानामपराधाना निवर्त्तनाय यत्तत् प्रायश्चित्त विहित तस्य तस्य वैयर्थ्यमापद्येतेत्य शयेनाह-कर्मस्विति ।

(आक्षेपभाष्यम्)

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ? ॥

(समाधानभाष्यम्)

किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् ॥

किं पुनस्तत् ? ।

उत्सर्गापवादौ । कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः ॥

(प्रदीप.) किंचिदिति । सामान्यविशेषौ यस्मिंस्तत्सामान्यविशेषवत् । कर्मण्यण्, आतोऽनुपसर्गे क इत्यादि ॥

(उद्द्योत·) ननु तदात्मकत्वाल्लक्षणस्य मनोरनुपपत्तिरत आह—सामान्यविशेषाविति । लक्षणं शास्त्रमित्यर्थः ॥

(तत्त्वालोकः) भाष्ये—ये शब्दा स्वरूपत उपदेशेनापि ज्ञातु परिगणितुञ्च न शक्या, कथन्ते शास्त्रेण बोद्धुमनुगन्तुञ्च योग्या इत्याशयेन पृच्छति-कथमिति । इमे-प्रतिपदपाठेन दुर्ज्ञेया । उत्तरयति सिद्धान्ती—किञ्चिदिति । लघुभूतमित्यर्थ । तदित्यादि । ननु किं स्यात्तेन प्रवर्तितेनेत्यत आह-येनेति । शास्त्रेणेति शेष । यत्नेन-आयासेन । महतो महत इति-अस्य शब्दौघविशेषणस्य वीप्सायां "नित्यवीप्सयोरि"ति सूत्रेण द्वित्वम् । अथवा तयो प्रथम पञ्चम्यन्त, चरमस्तद्विशेषणम् । तथा च विशालादपि विशालान् शब्दसमुदायानित्यर्थः । शास्त्रीयसामान्यविशेषौ कीदृशावित्याशयेन पृच्छति-किं पुनरिति । तत्-सामान्यविशेषयो· स्वरूपम् । उत्तरयति-उत्सर्गेति । फलितमाह-कश्चिदिति । शास्त्रे योग इत्यादि । अपवाद इति-कर्तव्य इत्यस्यानुषङ्ग ।

प्रदीपे—सामान्यविशेषवदित्यत्र सामान्यविशेषशब्दे समासान्तरस्य, सादृश्यार्थे वतुपश्च भ्रमो मा भूदित्याशयेनाह-सामान्येति । सामान्यविशेषयो· स्वरूपे क्रमश भाष्योक्ते एवाह-कर्मणीति । आदिना-'कर्तरि शप्, दिवादिभ्य श्यन्' इत्यादिसङ्ग्रह ।

उद्द्योते—तदात्मकत्वात्-सामान्यविशेषस्वरूपकत्वात् । मतोः-सामान्यविशेषशब्द·घटकमतुप । नन्वेव लक्षणपदप्रयोगो न युज्यते इत्यत आह-शास्त्रमिति । पाणिनीय व्याकरणमित्यर्थ ।

(आक्षेपभाष्यम्)

कथंजातीयकः पुनरुत्सर्गः कर्तव्यः, कथंजातीयकोऽपवादः ? ॥

(उद्द्योतः) भाष्ये कथंजातीयक इति । केन प्रकारेणेत्यर्थ । एतेनैवजातीयकेन शास्त्रेण सुशब्दोपदेशप्रवृत्ति पाणिनरचितेति सूचितम् ॥

(तत्त्वालोकः) भाष्ये—सामान्यविशेषयोरुदाहरणे ज्ञातु विशेषेण पृच्छति-कथमिति । ननूकार्थानामप्रयोग इति नियमसत्त्वात् कथं प्रश्ने एकस्मिन्नेव प्रकाररूपार्थे थमुजातीयर्प्रत्ययौ विगमिति चेन्न, एतादृशभाष्यकृत्प्रयोगोक्तनियमस्यानित्यतासूचनात् । अथवा प्रकारमात्रे थमु, प्रकारवति जातीयरित्यर्थभेदाश्रयणात् । न चैकेनैव सम्भवति निर्वाहे कथमुभयमाश्रितमिति वाच्यम्, स्वतन्त्रेच्छस्य मुने पर्यनुयोगानर्हत्वात्, शिंशपा वृक्ष इतिवदुपपत्तेश्च ।

उद्द्योते-एवंजातीयकेन—उत्सर्गापवादजातीयकेन । शास्त्रेण-अष्टाध्यायीरूपेण ।

(समाधानभाष्यम्)

सामान्येनोत्सर्गः कर्तव्यः । तद्यथा—"कर्मण्यण्" । तस्य विशेषेणापवादः । तद्यथा—"आतोऽनुपसर्गे कः" ॥

(तत्त्वालोकः) भाष्ये-प्रकृतसामान्यविशेषशब्दयो स्वपरता सूचयन् तयो क्रमश उदाहरणे आह—सामान्येनेति । तस्य-उत्सर्गस्य ।

(जातिव्यक्तिपदार्थनिर्णयाधिकरणम् ।)

(आक्षेपभाष्यम्)

किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम् ? ॥

(समाधानभाष्यम्)

उभयमित्याह ॥

कथं ज्ञायते ? ।

उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा—"जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्" इत्युच्यते । द्रव्यं पदार्थं मत्वा "सरूपाणाम्—" इत्येकशेष आरभ्यते ॥

(प्रदीप·) सकलशास्त्रव्यवस्थैकतरपक्षाश्रयणे न सिध्यतीति पक्षद्वयाश्रयण प्रश्नपूर्वकं करोति-किं पुनरिति । आकृतिपक्षे केवल आश्रीयमाणे सकृद्गतौ विप्रतिषेध इत्यादि नोपपद्यते, केवलेऽपि व्यक्तिपक्षे पुन·प्रसङ्गविज्ञानादित्यादि न घटते । तस्माल्लक्ष्यसिद्धये क्वचित्प्रदेशे कश्चित्पक्ष परिगृह्यते । तत्र जातिवादिन आहु —जातिरेव शब्देन प्रतिपाद्यते, व्यक्तीनामानन्त्यात्संबन्धग्रहणासम्भवात् । सा च जाति सर्वव्यक्तिष्वेकाकारप्रत्ययदर्शनादस्तीत्यवसीयते । तत्र गवादय शब्दा भिन्नद्रव्यसमवेता जातिमभिदधति । तस्या प्रतीतायां तदावेशात्तदवच्छिन्न द्रव्य प्रतीयते । शुक्लादय· शब्दास्तु गुणसमवेता जातिमाचक्षते । गुणे तु तत्सम्बन्धात्प्रत्यय, द्रव्ये संबन्धिसम्बन्धात् । सञ्ज्ञाशब्दानामप्युत्पत्तिप्रभृत्याविनाशात् पिण्डस्य कौमारयौवनाद्यवस्थाभेदेऽपि स एवायमित्यभिन्नप्रत्ययनिमित्ता डित्थत्वादिका जातिर्वाच्या । क्रियास्वपि जातिर्विद्यते सैव धातुवाच्या । पठति पठत·

पठन्तीत्यादेरस्मिन्नर्थे प्रत्ययस्य सद्भावात्तन्निमित्तत्वमभ्युपगम्यम् ॥ व्यक्तिवादिनस्त्वाहुः—शब्दस्य व्यक्तिरेव वाच्या, जातेरुपलक्षणभावे नाश्रयणादानन्त्यादिदोषानवकाश ॥

(उद्योत) आकृतिपक्षे इति । तत्र उद्देश्यतावच्छेदकजात्याक्रान्ते कचिच्चरितार्थयोर्द्वयोः सत्प्रतिपक्षन्यायेन विरोधस्थले उभयोरप्यप्राप्तौ विप्रतिषेधे परमिति विध्यर्थम्, न तु नियमार्थमिति सकृद्गतौ विप्रतिषेधे न सिध्यति । व्यक्तौ तु तत्तद्व्यक्तिविषययोरपि शास्त्रयोश्चरितार्थत्वस्याभावेनोभयप्राप्तौ नियमार्थं तदिति पुनःप्रसङ्गेत्यादि न सिध्यतीत्यर्थः । इदं च विप्रतिषेधसूत्रे निरूपयिष्यते ॥ भाष्ये सात्याख्यायामिति । व्यक्तौ पदार्थे सपन्ना माष इति व्यक्तिबहुत्वाद्बहुवचनं सिद्धमेवातः किमर्थं तदित्याशयः इति भावः । सरूपाणामिति । आकृतेरेकत्वादेवैकशब्दप्रयोगापत्तौ तदुक्तिसम्भवो व्यक्तिपक्ष एवेति भावः । न चाकृतिपक्षेऽपि अक्षाः पादा इत्याद्यर्थं स आवश्यक इति वाच्यम् । तावत्सु काचिदेका जातिः स्वीकृत्य तस्या एव शब्दवाच्यत्वपरम्परयाऽऽश्रयव्यक्तिप्रत्यय इति सरूपसूत्रे कैयटेनैव वक्ष्यमाणत्वात् । जातौ न जातिरिति परेषां दर्शनं नास्माकमिति च तत्रोक्तम् ॥ तस्यां प्रतीतायामिति । शब्दवाच्यत्वेन गृहीतायामित्यर्थः । एवम् भिद्यतीत्यस्याभिधाविषयत्वेन गृह्णन्तीत्यर्थः ॥ तदावेशात् तत्समवायात् ॥ प्रतीयत इति । अविनाभावाच्छब्दजन्यबोधविषयो भवतीत्यर्थः ॥ प्रत्ययो ज्ञानम् । उपलक्षणभावेनेति । शक्यतावच्छेदकत्वेनेत्यर्थः तत्र तु न शक्तिरिति मञ्जूषायां प्रतिपादितम् ॥

(तत्त्वालोक) भाष्ये—अर्थसामान्यविशेषशब्दयोः सूत्रपरतां सूचयन् तयोः क्रमश उदाहरणे आह—सामान्येनेति । तस्य—उत्सर्गस्य उत्सर्गापवादसूत्रघटकपदानामर्थः क इति जिज्ञासया पृच्छति—किं पुनरिति । आकृतिः—जातिः । आक्रियते व्यवच्छिद्यते स्वाश्रयोऽन्येभ्योऽनयेति व्युत्पत्तिः । द्रव्यम्—व्यक्तिः । पदार्थ इत्यस्यानुषङ्गः ।

उत्तरमनुवदति तत्र—उभयमिति । उभयं (जातिव्यक्ती पदार्थौ) इति वदामः (मन्यामहे) इत्यर्थः । लक्ष्यानुरोधात् क्वचिज्जातिं क्वचिद्व्यक्तिं च पदार्थमाश्रित्याष्टाध्यायी रचिता पाणिनिनेति उत्सर्गापवादसूत्रघटकशब्दानां क्वचिज्जातिः क्वचिद्व्यक्तिरर्थ इति भावः । सूत्रकृता जातिं व्यक्तिं वा पदार्थमाश्रित्य शास्त्रं प्रणीतमित्यत्र किं प्रमाणमिति जिज्ञासया सिद्धान्तिवचनमात्रेणाभिज्ञो लक्षणैकचक्षुष्कः पृच्छति—कथमिति । ज्ञायते इति—उभयं पदार्थ इतीति शेषः । उत्तरयत्येकदेशी—उभयथेति । जातिपदार्थत्वव्यक्तिपदार्थत्वाश्रयणरूपप्रकारद्वयेनेत्यर्थः । हि—यतः । आचार्येण—पाणिनिना । ननु सूत्रद्वयस्याशयार्थतया कथं सूत्राणि बहुवचनान्तं सङ्गच्छत इति चेन्न, अर्थवाद् अन्येषामपि उदाहरणोदाहरणसम्भवाच्च । उभयथेत्यादि व्याख्यानं करोति—आकृतिमित्यादिना । यदि सर्वत्र व्यक्तिरेव पदार्थः स्यात्तर्हि गवः पूर्णा इत्यादौ व्यक्तिबहुत्वादेव बहुवचनस्य सिद्धत्वात् "जात्याख्यायामि"ति सूत्रं नारभेत, तदारम्भसामर्थ्यात्तो निश्चीयते जातिरपि पदार्थ इति भावः । इतीति—मत्वेति शेषः । आचार्येणेत्यस्यानुषङ्गः । इति—इत्यादि । एकशेष—एकशेषविधायक । योग इति शेषः । आचार्येणेत्यस्यानुषङ्गः । यदि सर्वत्र जातिरेव पदार्थः स्यात्तर्हि जातेरेकत्वात् सर्वत्रैकशब्दप्रयोगादेव निर्वाहेण एकदा तत्समानेकशब्दानामप्रसक्त्या "सरूपाणामि"ति सूत्रं नारभेत, यत आरम्भतोऽतो निश्चीयते व्यक्तिरपि पदार्थ इति भावः ।

प्रकारे—थाविति—अव्ययादाल्प्रत्यय इत्यर्थः । आश्रयणे इति—सतीति शेषः । इति—इत्यादौ । इत्यस्यानुषङ्गोऽत्र । करोतीति—सिद्धान्तीत्यादि । अन्यतरपक्षाश्रयणे सकलशास्त्रव्यवस्थाया असिद्धिमुपपादयितुमुपलक्षणतयाऽऽह—आकृतीति । व्यक्तिपक्षव्यावर्तनायाह—केवले इति । परिभाषामाह—सकृदिति । आदिना "यद्बाधितं तद्बाधितमेवे"त्यस्य सङ्ग्रहः । जातिपक्षव्यवच्छेदायाह—केवलेऽपीति । केवले व्यक्तिपक्षेऽपीत्यन्वयः । आश्रीयमाणे इत्यस्यानुषङ्गः । परिभाषामाह—पुनरिति । आदिना "सिद्धमि"त्यस्य सङ्ग्रहः । उक्तार्थं कथयन्नुपसंहरति—तस्मादिति । सकलशास्त्रव्यवस्थाया एकतरपक्षाश्रयणेऽसिद्धत्वादित्यर्थः । व्यक्तिपक्षेऽपि यत्र वने अन्यबहुवृक्षसत्त्वेऽपि आम्रव्यक्तिरेकैव तत्र लक्षणया जातिपरत्वे इह आम्रा सन्तीति प्रयोगस्य साधनाय "जात्याख्यायामि"ति सूत्रस्य, तथा जातिपक्षेऽपि इमे इत्यादौ नानार्थानुरोधात् "सरूपाणामि"ति सूत्रस्य चावश्यकत्वादुभयथेत्युत्तरस्यायुक्ततां सूचयन्नाह—लक्ष्येति । लक्ष्यानुरोध एव स्थलभेदेन जातिव्यक्त्योः पदार्थताऽऽश्रयणे कारणमित्याशयः । कश्चिदिति—यथायोग्यं जातिपक्षो व्यक्तिपक्षो वा । प्रसङ्गाज्जातिव्यक्ती क्रमेणोपपादयितुमाह—तत्रेति । जातिव्यक्तिपक्षयोर्मध्ये इत्यर्थः । शब्दानां व्यक्तौ शक्तिरिति पक्षे "नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते" इति न्यायेन जातावपि शक्तेर्वाच्यत्वाद् गौरवमिति लघवात् जातावेव शक्तिर्वाच्या, आह च—"विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इतीत्याशयेनाह—जातिरिति । किञ्च यत्किञ्चिद्व्यक्तौ शक्तिः ? सकल-व्यक्तिषु वा ? इति विकल्पे आद्यस्य शक्तिज्ञानाभावेऽपि यत्किञ्चिद्‌ शक्त्यनाश्रयव्यक्तौ शाब्दबोधोदयेन व्यतिरेकव्यभिचाराद् दूषितत्वया द्वितीयं निराकरोति—व्यक्तीनामिति । सम्बन्धग्रहणेति—शक्तिज्ञानेत्यर्थः । जातिसत्त्वे मानमाह—सा चेति । एकाकारप्रत्ययेति—अयं गौरयं गौरित्याद्यनुगताकारप्रतीतीत्यर्थः । जातिपक्षं सामान्येनोपपाद्य विशेषतयोपपादयति तत्रेति । द्रव्यगुणक्रियाशब्दानां मध्ये इत्यर्थः । भिन्नेति—नाना(गवादौ)त्यर्थः । तस्याः— गोत्वादि) जातौ । विशिष्टबुद्धिम्प्रति विशेषणज्ञानस्य कारणत्वादाह—प्रतीतायामिति । तदिति—जातीत्यर्थः । गुणेति—शुक्लादौ इत्यादि । तदिति— शुक्लत्वादि) जातीत्यर्थः । द्रव्ये—शुक्लादिगुणवत्पटादौ । सम्बन्धिसम्बन्धात्—शुक्लत्वादिजातिसमवायिशुक्लादिगुणसमवायात् । प्रत्यय इत्यस्यानुषङ्गः । ननु प्रयोजनाभावाद् एकमात्रवृत्तिधर्मस्य न जातित्वेति निर्णयात् सञ्ज्ञाशब्दस्थले सत्ति पिण्डस्यैकत्वात् तद्वृत्तिधर्मस्य जातित्वाभावेन सञ्ज्ञाशब्दस्य जातिवाचकत्वासम्भवात् कथं तत्र निर्वाहोऽस्मिन् मते इत्यत आह—सञ्ज्ञाशब्दानामपीति । अस्य जातिवाच्येत्यत्रान्वयः । अत्र क्रमप्रतिपादने तात्पर्याभावादेव गुणानन्तरं क्रियां विहाय सञ्ज्ञा समुपपादितेति भावः । अभिन्नेति—अभिन्नप्रत्ययो निमित्तं यस्या इति व्युत्पत्तिः । डित्थेति—"डित्थः काष्ठमयो हस्ती डविस्थस्तन्मयो मृगः" इत्यादिकोशात् डित्थादयः सञ्ज्ञाशब्दाः । सैव—जातिरेव । चेति शेषः । ननु क्रियासु जातिसत्त्वे किं मानमित्यत आह—पठतीति । तन्निमित्तजातीति—अभिन्नप्रत्ययनिमित्तपठनत्वादिजातीत्यर्थः । गवादिशब्दानां गोत्वादिजातौ शक्तिरिति पक्षे अनन्तगवादिव्यक्तिघटितस्य गवानयनेत्यादिवाक्यजन्यशाब्दबोधस्य गोत्वादिरूपस्य गोत्वत्वादेः शक्यतावच्छेदकतायाः, गवादिविशेष्यकगोत्वादिप्रकारकशाब्दबोधप्रयोजक गोत्वादिविषयकज्ञानस्य कारणत्वेन कारणतावच्छेदकशक्यताश्रयत्वेनाशक्यत्वादाह—शब्दस्येति । आदिना व्यतिरेकव्यभिचारगौरवयोः सङ्ग्रहः ।

उद्योत—तत्र—जातिपक्षे । क्वचिदिति—व्यक्तिवचनं परस्परपरिहारमिति शेषः । द्वयोरिति—विध्योरिति शेषः । सत्प्रतिपक्षन्यायेन—सम्भवाभावसम्भवान् द्वयोः समविशेषः । यत्र शब्दो नित्यः कार्यो वा शब्दश्रवणानि वादिनः निर्णयवदादायभावस्तत्वान् शब्द इति

परामर्श, तथा शब्दोऽनित्य कार्यत्वाद् घटवदिति प्रतिवादिन अनित्यत्वव्याप्यकार्यत्ववान् शब्द इति परामर्श, तत्र कचित्परामर्शे ऽप्रामाण्यज्ञान तु परस्परप्रतिबन्धान कथमनुमितिर्भवतीति न्यायेन। विरोधस्थले इति-कचिदेकत्रेत्यादि । प्रमत परस्परप्रतिबन्ध इति शेष । नियमार्थमिति-उभये प्रतावत्वास्य नियमार्थत्वादि न भाव । व्यक्तौ-व्यक्तिरूपे । तुरक्तवैलक्षण्यसूचक । तत्तद्व्यक्तिविषययो - सकलव्यक्त्युद्देश्यकयो । अस्य हेतुभविशेषणता शास्त्रयोरिति- व्यक्त्यन्तरे इति शेष । तत्-"विप्रतिषेधे पर कार्यम्" इति सूत्रम्। व्रीहय इति-व्रीहय इत्यत्र । तत्-"नासाध्यासा नि सूत्रम् तदिति-सरूपसूत्रेत्यर्थ । स-"सरूपाणामेकशेष एकविभक्तौ" तावतीषु- विभिन्नाश्च व्यक्तिषु । एकामिति-अश्व व्यक्तिरूपामिति शेष तस्या-शक्तया । वाच्यत्वमिति-च कथमिति शेष न वेद मन्त्राश्च यथाश्रयनानाश्च व्यादिनाविदेऽपि व्यक्तिरव धानुरूपादिति त्यत आह-परम्परयेति । लक्षणयापि नामध्येनेत्यर्थ । न वतस्य पानाज्ञाती न जातिरिति निर्णयाद् कथ स्वोक्तश्च न नच्यत्वा दिजनावत्वत्वादिनानिरियत आह-जाताविति । परेषा-वैशेषिका णाम्। दर्शन-मतम्। तत्र-सरूपसूत्रे । कैयटनैवेति शेष । तत्र तन्वेनैव निवाहसभवाद् कैयटनैवेत्यनेन सूचिता । प्रत नाया मित्यनेनाभिहितवर्तिस्यैवकथनात् -हायलोकनमायेनाह-एवमि ति । एवमप्रेऽपि । नवच्छिन्नमित्यनेन तदंशिनि दृश्यत्वमेव विशिष्ट तत्वदनेनापि तदर्थस्यैव कथने तेन पुनरुक्ति स्यादिति हेतोरयमन्य रमाह-तत्समेति । अन एवारे तत्समानभावित्ति कैयटो वदति । लक्षणाश्रयणकारणायाह-अविनाभावादिति । व्यक्तिं विना जातिमा नस्यासम्भवादिति भाव । शक्यत्वाज्ञानस्य गृहीत इत्यादिस्थलेऽव्यका कादिनिष्ठेऽप्रत्वश्चस्तद्भ्रमनिराकरणायाह-शक्यतेति । नवेय तर पि शक्यतावच्छेदिति चेत्, अकार्येऽपि शक्यतावच्छेदकत्वमभ वात्। अन एव लक्षणावच्छेदक न लक्ष्यमिति नैयायिकनिर्णय । इत्या शयेनाह-तत्रेति । शक्यतावच्छेदके इत्यर्थ ।

(शब्दनित्यत्वानित्यत्वविचारभाष्यम्)

(आक्षेपभाष्यम्)

किं पुनर्नित्य शब्दः, आहोस्वित्कार्य ? ॥

(प्रदीप) किं पुनरिति । विप्रतिपत्त्या सशय । केचिद्ध्वन व्यङ्ग्य वर्णात्मक नित्य शब्दमाहु । अन्ये वर्णव्यतिरिक्त पदस्फोट मिच्छन्ति । वाक्यस्फोटमपरे मन्यन्ते । अन्ये तु ध्वनिरेव शब्द स च कार्यस्तदतिरेकेणान्यस्यानुपलम्भादित्याचक्षते ॥

(उद्द्योत) विप्रतिपत्त्येति । शब्दाना नित्यत्वे व्यर्थ व्याकर णशास्त्रमिति भ्रमनाशाय ॥ **केचित्।** मीमांसका ॥ **वर्णात्मकमिति।** पदवाक्ये च वर्णसमूहरूपे एवेति तदाशय । अत्र मते एक एव पदमि त्यानुपचाराह-अन्ये वैयाकरणा ॥ **अपरे** त एव मुख्या । पदे वर्णानामिव वाक्ये पदाना कल्पितत्वात् । तेषामर्थवत्त्वमपि काल्पनि कमिति वाक्यस्यैव शब्दत्वमिति तद्भाव ॥ **अन्ये त्विति ।** वैशेषि कादय ॥ **ध्वनिरिति ।** स च वर्णाविभागात्मकत्वेन द्विविध । एव च कण्ठादवच्छाल्पमपि तस्य कारणमित्याशय ॥

(तत्त्वालोक) प्रदीपे-विप्रतिपत्त्या-विरुद्धानेककोट्युपस्थित्या। अस्य "भव" इत्यादि । किमिदमित्याकारकमिष्कोकिज्ञानस्यापि स शयत्वमिति भव । **सशय**-निश्चयाकारणाभूवज्ञानम्। विप्रतिपत्ति मेवोपपादयन्नाह-केचिदित्यादि । **ध्वनिव्यङ्ग्य**-ककारादिध्वनि व्यङ्ग्यम्। पाश्चात्ययो वर्णातिरिक्तत्व चेत्याशयेनाह-**वर्णात्मक मिति ।** स्फोटमिति शेष । असत्यवर्णविभागकस्य पदस्यैव शब्दत्वमि

त्याशयेनाह-अन्ये त्विति । पदस्फोटमिति-अत्र नित्य शब्दमित्यनु षज्यते । ननूक्तमतद्वये धर्मावत्वेनैक वाक्यमिति प्रतीतिव्यवहारयोर नुपपत्तिरित्यत आह-वाक्यस्फोटमिति । अत्र तु नित्य शब्दमस्य वर्णव्यतिरिक्तमित्यस्य चानुषङ्ग । मन्यन्ते-प्रतिपादयन्ति कार्य - प्रागभावप्रतियोगी । तृतीयाध्वनावृत्तिमत्त्वसमुपदिष्टोऽपि तस्य बोध्या। तद्व्यतिरेकेणान्यस्य-ध्वनिभिन्नतया स्फोटस्य ।

उद्द्योते-तद्भ्रमनाशाय -भ्रमाशनाशाय । अत्र मते-मीमांसकमते । आहेति-प्रतीतिव्यवह इति शेष । अन्ये इति-अस्य "इति" इति शेष वैयाकरणा इति-अस्य 'इत्यर्थ' इति शेष । त एव-वैया करणा एव । तेषा-पदानाम् । वाक्यस्यैवेति-प्रमत्वमद वयामानत्ये त्यादि । तद्भाव -तुरूपवैयाकरणाशय स-ध्वान । अत्र मते व्याकरणशास्त्रानावश्यकमित्याशयेनाह-एवञ्चेति । ध्वन इ वध्ये चेत्यर्थ । तस्य-वर्णात्मकत्वे

(समाधानभाष्यम्)

सग्रह एतत्प्राधान्येन परीक्षितम्—नित्यो वा स्या त्कार्यो वेति । तत्रोक्ता दोषा, प्रयोजनान्यप्युक्तानि । तत्र त्वेष निर्णय —यद्येव नित्य', अथापि कार्य', उभ- यथापि लक्षण प्रवर्त्यमिति ॥

(प्रदीप) सग्रह इति । ग्रन्थविशेषे ॥

(उद्द्योत) सग्रहो व्याडिकृतो लक्षश्लोकसख्यो ग्रन्थ इत प्रसिद्ध ॥ भाष्ये **उभयथापीति ।** एव च निष्फलोऽय विचार इति भाव ॥ साधुत्वज्ञानाय उभयथापि शास्त्रमावश्यकमिति तात्पर्यम् ॥

(तत्त्वालोक) भाष्ये-प्रश्ने प्रसङ्गप्राप्ते शब्दनित्यत्वानित्यत्वे यदि विवेचिते अपि स्याता तर्हि गौणतयैव शब्दानुशासनव्याख्यानस्य प्राधान्यात्, सग्रहे तु ते मुख्यतया बहुना विवेचिते न्योऽय तत्र निर्णयानुसारेणैवात्र कार्य विनेय, न पुन तयोर्विचारे समयो यापनीय इत्याशयेनोत्तरयति सिद्धान्ती-**सग्रहे इति ।** एतत्तदर्थमाह-**नित्यो वेति ।** तत्र-उभयत्र । दोषा -शब्दस्य नित्यत्वे नित्यस्य । विकारा सम्भवादादेशाद्यनुपपत्ति । अनित्यत्वे तु पूर्वशब्दनाशेन पूर्वरूप न उत्तरोत्तरमहिनाया उत्तरशब्देऽसम्भवात् सन्ध्यनुपपत्तिरित्यादिदोषा । **प्रयोजनानि-**शब्दस्य नित्यत्वे "इको यणचि" इत्यादिना साधुत्वमा त्रसम्पादनम्। अनित्यत्वे तु नित्यस्फोटस्य यत्नकार्यनिर्वर्तनमान्य स्थानमित्यादिप्रयोजनानि । ननूभयत्र दोषप्रयोजनयोरुक्त्या शब्द नित्यत्वानित्यत्वयोरन्यतरस्यानिश्चयाद् व्यर्थैव तत्र तयो परीक्षा विचारस्य निर्णयफलकत्वादित्यत आह-**तत्र त्विति ।** सग्रहे एवे त्यर्थ । **यद्येव-**यद्यपि । शब्दस्य नित्यत्वानित्यत्वाभ्यामपक्षेऽपि दोष निरास इत्याशयेनाह-**उभयथाऽपीति ।** पक्षद्वयेऽपीत्यर्थ । **लक्षण-** व्याकरणशास्त्रम् ।

उद्द्योते-**एवञ्च-**सग्रहे उभयथा व्याकरणशास्त्रप्रवर्त्तनस्यावश्य कत्वे निर्णीते च । **अय-**शब्द नित्योऽनित्यो वेत्ययम्। **ननु** कथ तत्र प्रथम तदावश्यकत्वनिर्णयोक्तिरित्यत आह **साधुत्वेति । शास्त्र-** व्याकरणशास्त्रम् । **तात्पर्यमिति-**भाष्यस्येति शेष ।

(नित्यशब्दवादेऽपि शास्त्रस्य धर्मजनकताधिकरणम्)

(आक्षेपभाष्यम्)

कथ पुनरिद भगवत पाणिनेराचार्यस्य लक्षण प्रवृत्तम्—

(१ आक्षेपसाधकवार्तिकप्रथमखण्डम् ॥ १ ॥)

॥ ॥ सिद्धे शब्दार्थसंबन्धे ॥ ॥

(व्याख्याभाष्यम्)

सिद्धे शब्देऽर्थे संबन्धे चेति ॥

(प्रदीप) **कथं पुनरिति** । किमाचार्य एव स्रष्टा शब्दार्थसंबन्धानाम्, अथ स्मर्तेति प्रश्न ॥ **सिद्ध इति** । तत्र नित्य शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा । कार्यशब्दिकानामपि मते प्रवाहनित्यतया । अर्थस्यापि जातिलक्षणस्य नित्यत्वम् । द्रव्यपक्षेऽपि सर्वशब्दानामसत्योपाध्यवच्छिन्न ब्रह्मतत्त्व वाच्यमिति नित्यता प्रवाहनित्यतया वा । संबन्धस्यापि व्यवहारपरम्परयानादित्वान्नित्यता ॥

(उद्द्योत.) अथ पाणिनिसूत्रव्याख्यानभूत वार्तिकमवतारयति—**कथ पुनरिति** । अत एवात्रैव पाणिनिनामग्रहणम् । इत पूर्व तु सवार्तिकशास्त्रान्वाख्यानप्रयोजनविषयप्रदर्शनपरो भाष्यकारस्यैव ग्रन्थ इति बोध्यम् ॥ **शब्दार्थसंबन्धानामिति** । शब्दाश्चार्थाश्च सबन्धाश्चेति द्वन्द्व । एव च किमपूर्वशब्दनिष्पादनद्वारार्थविशेषसबन्धनिष्पादकत्व शास्त्रस्य, किं वा सिद्धशब्दार्थसबन्धबोधकत्वमिति प्रश्नार्थ इति तात्पर्यम् ॥ **सिद्धे शब्दार्थसबन्धे** इति वार्तिके समाहारद्वन्द्वसप्तमी । संबन्धश्च प्रत्यासत्त्या शब्दार्थयोरेव । त्रयाणामात्यन्तिकाविश्लेषप्रदर्शनाय समाहारनिर्देश इति बोध्यम् ॥ **व्यक्तिस्फोटेति** । सा पदवाक्यरूपा नित्यैवेति तद्भाव । एतच्चोपपादित प्राक् ॥ **कार्यशब्दिकानामिति** । कार्यशाब्दिकानामिति त्वपपाठ । उत्तरपदवृद्धेर्दुर्लभत्वात् ॥ **असत्योपाधीति** । जातिरूपेत्यर्थ । जातिर्हि तन्मते काल्पनिको धर्मविशेष । यद्वा सर्वेषां धर्माणा सद्रूपद्रव्यस्यतरेण शुक्तिरजतादिज्ञाने शुक्त्यादीना विशेष्यत्ववत् सर्वाधिष्ठानभूत ब्रह्मैव विशेष्यम् । विशेष्यमेव च द्रव्यमिति भाव ॥ शब्दार्थयोर्नित्यत्वपक्षे तत्संबन्धस्य नित्यत्वेऽप्यनित्यत्वपक्षे कथ संबन्धस्य नित्यत्वमत आह—**संबन्धस्येति** । प्रवाहनित्यतया तयोरिव तस्यापि नित्यत्वमिति भाव ॥ शब्दार्थयो संबन्धश्च शक्तिरूप तादात्म्यमेवेत्यन्यत्र प्रपञ्चितम् ॥

(तत्त्वालोकः) भाष्ये-शब्दार्थसम्बन्धाना नित्यत्वमनित्यत्व वाऽभिप्रेत्य पाणिनिरष्टाध्यायीं रचितवानित्याशयेन पृच्छति-**कथमिति** । इदम्—अष्टाध्यायारम्भ सूत्रवार्तिकयो विरोधविभास्यमान सूत्रमनर्थकवार्तिकयोर्गतयो युक्तत्वाय समपेक्षिता वार्तिककृदपेक्षया सूत्रकृत्यधिकश्रद्धां सूचयन्नाह-**भगवत इति** । **छन्दो—**व्याकरण स्य शास्त्र यथप्रयोजनस्य वार्तिककृता "शब्दार्थसम्बन्धे सिद्धे (नित्ये सति) शब्दप्रयोगे (च) लोकतोऽर्थप्रयुक्ते (अर्थज्ञापनाय प्राप्ते सति) शास्त्रेण धर्मनियम (क्रियते) यथा लौकिकवैदिकेषु' इत्यर्थकम् "सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु" इत्येक वाक्यरूप पठित प्रदर्शितम् । तथापि तत्र "लोकत" इति वाक्याभिगोलकत्वायैतेनोभवतत्त्वयर् यन्न्या वार्तिक व्याख्यातुकाम स्तवमनवगच्छन्नाह-**सिद्धे इति** । **सम्बन्धे चेति**—ग्रन्थ प्रवृत्तमिति शेष । शब्दार्थसम्बन्धा नित्याश्च मत्वा पाणिनिरष्टाध्यायी प्रणीतवानिति भाव ।

प्रदीपे-**आचार्य**.-पाणिनि.। अथ-अथवा । शब्दार्थसम्बन्धेषु सिद्धता (नित्यता) क्रमत उपपादयितुमाह-**तत्रेति** । शब्दार्थसम्बन्धानां मध्ये **शब्द** । यद्यपि वर्णनित्यतावादिमतेऽपि ककारादिवर्णप्रपञ्चो नित्य उत्पादविनाशरहितश्चाविशिष्टादेनाह-नित्य इति । स किंरूप इत्याकाङ्क्षाया वैयाकरणादिमतेनाह-**जातिस्फोटलक्षण इति** । जातिस्फोटाः (वर्णजातिस्फोट-पदजातिस्फोट-वाक्यजातिस्फोटा) लक्षणानि (स्वरूपाणि) यस्येति व्युत्पत्ति । **व्यक्तिस्फोटलक्षण इति**-व्यक्तिस्फोटौ (पदव्यक्तिस्फोट—वाक्यव्यक्तिस्फोटौ) लक्षणे (स्वरूपे) यस्येति व्युत्पत्ति । अनित्यवर्णव्यक्तिस्फोटासंग्रहसूचनायैव जातिव्यक्तिस्फोटयो पार्थक्येनोक्ति । **वाशब्देन** अखण्डपदस्फोटाखण्डवाक्यस्फोटयो समुच्चय । नन्वेवमपि वैशेषिकादीनां मते शब्दस्यानित्यत्वान्नैतदुत्तर सर्वसम्मतमित्यत आह-**कार्यशब्दिकानामिति** । अपिना मीमांसकादिसमुच्चायकेन तन्मतेऽप्यय प्रकार सम्भवतीति सूचितम् । महाप्रलयास्वीकर्तृमतेनाह-**प्रवाहनित्यतयेति** । अनाद्यनन्तसृष्टिसंहारप्रलयप्रवाहान्तर्गततयेत्यर्थ । नित्य शब्द इत्यनुषज्यते । जातिरूपत्वाद् वाच्यस्य नित्यतेति जातिपक्षवादिमीमांसकमतेनाह-**अर्थस्येति** । अभिधेयस्येत्यर्थ । अपिना शब्दसंग्रह । **जातिलक्षणस्य**-गोत्वादिजातिरूपस्य । जगतो ब्रह्मविवर्तताया मिथ्याभूतगोत्वादिजातिरूपोपाध्यवच्छिन्नगवादिरूपब्रह्मतत्त्वस्यैव निखिलगवादिशब्दवाच्यतया वाच्यस्यैव चार्थत्वादर्थो नित्य इत्याशयेनाह-**द्रव्यपक्षे इति** । व्यक्तिपक्षे इत्यर्थ । **अपिना** जातिपक्षसंग्रह । **इति**-इति हेतौ । अर्थस्येत्यनुषज्यते । ननु व्यक्तिपक्षवादिनोऽपि ये जगतो ब्रह्मविवर्तता नाभ्युपगच्छन्ति तन्मते का गतिरित्यत आह-**प्रवाहेति** । अर्थस्य नित्यतेति शेष । **सम्बन्धस्य**-शब्दार्थसम्बन्धस्य । अपिना-शब्दार्थयो संग्रह ।

उद्द्योते-**अथ**-विषयप्रयोजनादिनिरूपणानन्तरम् । **पाणिनिसूत्रव्याख्यानभूत**-पाणिनिरचिताष्टाध्यायीरूपव्याकरणशास्त्रस्य धर्मनियमार्थताप्रतिपादकम् प्रथममिति शेष । **अत एव**-अस्य [illegible]प्रथमवार्तिकत्वादेव । **एवेन** पूर्वव्यावृत्ति । अत आह-**इत इति** । इ. [illegible]ति-अष्टाध्यायीरूपशब्दानुशासनशास्त्रेत्यर्थं । **एवेन**-वार्तिककारव्यावृत्ति । केचित्तु "तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्तिके दर्शित –"रक्षोहागमलघ्वसन्देहा प्रयोजनमि"ति । एतानि रक्षादिप्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्वीकृतानि' इति ऋक्संहिताभाष्योपोद्घातस्थसायणाचार्यवचनेन 'अथ शब्दानुशासनम्, रक्षोहागमलघ्वसन्देहा प्रयोजनम्" इत्यादि वाक्यानि वार्तिककारस्यैव, वाक्यान्तराणि भाष्यकारस्य सन्तीति वदन्ति, तन्न, तथा सति ' सिद्धे शब्दार्थसम्बन्धे" इति प्रथमवार्तिकस्थसिद्धशब्दस्य मङ्गलार्थत्वोपपादनप्रसङ्गे "माङ्गलिक आचार्यो महत शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादित प्रयुङ्क्ते" इति भाष्योक्तस्य "सिद्धशब्दमादित" इत्यस्यानुपपत्ते । "अथ शब्दानुशासनमि"ति प्रथमवाक्यस्याथशब्दस्य मङ्गलार्थं वक्ष्यमाणेन भाष्यकृतो न्यूनतापत्तेश्च । तत्र "प्रयोजनविशेषो वररुचिना वार्तिके दर्शित " इत्येतावन्मात्रस्य प्रक्षिप्तपाठत्वकल्पनेन सर्वसामञ्जस्याच्च । तथा च सकल प्राक्तनग्रन्थो भाष्यकारस्यैवेति निर्णय ॥ ननु महाभाष्ये नियामके कथ शब्दार्थसम्बन्धयात्मकबद्धाङ्गसंग्रहत्वमित्यत आह-**एवञ्चेति** । शब्दमात्रस्य शास्त्रद्वारा पाणिनिनिष्पादनमभिप्रेत्याह-**किमपूर्वेति** । शब्दार्थसम्बन्धानां नित्यत्वं मत्वाऽऽह-**किं वेति** । **तात्पर्य**-कैयटाशयम् । **समाहारद्वन्द्वात्**-समाहारद्वन्द्वनिष्पन्नात् (शब्दार्थसम्बन्धशब्दात्) । **त्रयाणाम्**-शब्दार्थसम्बन्धानाम् । **सा**-व्यक्ति । पदवाक्यरूपा-पदवाक्यरूपेण । [illegible] भिन्नक्रम [illegible] । **एवेन**-वर्णव्यक्तिव्यावृत्ति । तद्भाव -स्फोटनित्यभाव । **एतच्च**-पदवाक्यव्यक्तिस्फोटयो नित्यत्वं । **प्राक्**-स्फोटस्य शब्दत्वव्यवस्थापनावसरे । **उत्तरपदेति**-कार्यशब्दिकादीनि व्युत्पत्तौ "ह्रस्वादि माङ्गलिकादिभ्य उत्तरपदस्य" इति वार्तिकेन ठकि निष्पन्ने कार्यशब्दिकशब्दे

इत्यादि । अनुशतिकादिषु तस्यापाठादुभयपदवृद्धि न सम्भवतो त्यभिप्रत्याह-**दुर्लभत्वादिति । तन्मते**-व्यक्तिपक्षवादिवेदान्तिमते । शिष्यबुद्धिवैशद्याय प्रकारान्तरेणाह-**यद्वेति । धर्माणां**-वृत्तिमताम् । **शुक्तिरजतादिज्ञाने**-शुक्त्यध्यस्तरजतादिज्ञाने (इदं रजतमित्याकारके भ्रमे)। अधिष्ठानभूतानामिति शेषः । **सर्वत्र**-सर्वत्र ज्ञाने **द्रव्यम्**-व्यक्ति । तथा च व्यक्तेरर्थस्य ब्रह्माभिन्नतया नित्यतेति भावः । **तद्विति**-शब्दार्थेत्यर्थः । **अनित्यत्वेति**-तयोरित्यादि । **सम्बन्धस्य**-शब्दार्थसम्बन्धस्य । **अन्यत्र**-मञ्जूषायाम् ॥

(वार्तिकघटकसिद्धशब्दार्थनिरूपणभाष्यम्)

(आक्षेपभाष्यम्)

अथ सिद्धशब्दस्य कः पदार्थः ? ॥

(प्रदीपः) सिद्धशब्दस्य नित्यानित्ययोर्दर्शनात्पृच्छति—**अथेति** ॥

(उद्द्योतः) भाष्ये **सिद्धशब्दस्य कः पदार्थ** इति । अत्र पदार्थशब्दो रूढः । सिद्धशब्दसम्बन्धी कः पदार्थ इत्यर्थः ॥

(तत्त्वालोकः) भाष्ये-**पदार्थः**-अर्थः (नित्योऽनित्यो वा)। अत्रार्थशब्दो न प्रयोजनपरः किन्तु वाच्यपर इति सूचनाय पदपदमिति परे।

प्रदीपे-**दर्शनादिति**-प्रयोगदर्शनादित्यर्थः । वस्तुनोरित्यादि । संशयोदये इति शेषः ।

उद्द्योते-**रूढः**-अर्थे रूढः । **सिद्धशब्दसम्बन्धी**-सिद्धशब्दनिरूपितशक्तिमान् ।

(समाधानभाष्यम्)

नित्यपर्यायवाची सिद्धशब्दः ॥ कथं ज्ञायते ? ॥ यत्कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा-सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति ॥

(प्रदीपः) **नित्येति** । नित्यलक्षणस्यार्थस्य पर्यायेण वाचकस्तमेवार्थं कदाचिन्नित्यशब्द आह कदाचित्सिद्धशब्द इत्यर्थः ॥ **कूटस्थेष्विति** । अविनाशिषु ॥ **अविचालिष्विति** । देशान्तरप्राप्तिरहितेषु ॥

(उद्द्योतः) **कूटस्थेष्विति** । कूटमयोघनस्तद्वत्तिष्ठन्ति ये तेषु, मत्सर्गनाशेऽपि स्वयमनष्टेष्वित्यर्थः ॥ नन्वयोघनस्यापि नहि नित्यत्वं स्यादत आह—**अविचालिष्विति** । भाष्ये द्यावापृथिव्योरपि व्यावहारिकनित्यत्वाभिप्रायेण दृष्टान्तितम् । आकाशस्यापि व्यावहारिकनित्यत्वमेवाचार्याभिमतम् । एवं च तत्र रूढत्वान्नित्यवाचकस्यैव ग्रहणमिति भावः ॥

(तत्त्वालोकः) भाष्ये-अथ सिद्धशब्दस्य कः पदार्थ इति प्रश्नस्य सिद्धशब्दस्य नित्यः पदार्थ इत्युत्तरं विशेष्यविशेषणभावव्यत्यासेनार्थतो बोधयितुमाह-**नित्येति** । नित्यपर्यायवाची सिद्धशब्द इति केन प्रकारेण ज्ञायते इत्याशयेन पृच्छति-**कथमिति** । उत्तरयति-**यदिति**-यस्मादित्यर्थः । दृष्टान्तमाह-**तद्यथेति** ।

प्रदीपे-**नित्यलक्षणस्य**-नित्यस्वरूपस्य । **वाचक इति**-सिद्धशब्द इति शेषः । अस्य नित्यवाचकता योगबाधिकया अवयवार्थानपेक्षरूढ्येति भावः । सिद्धशब्दस्य पर्यायेण तद्वाचकतामुपपादयति-**तमेवेति** । नित्यमेवेत्यर्थः । **सिद्धशब्द इति**-आहेत्यनुषज्यते ।

उद्द्योते-**अयोघनः**-लोहकारेण लोहं संस्थाप्य येन लोहमुद्गरेण ताड्यते स लोहमुद्गरोऽयोघनः । अयोघनः सुवर्णादिनाशेऽप्यनष्ट एव तिष्ठतीत्यत आह-**तद्वदिति** । **अपिना**-मत्सर्गनाशसंग्रहः । वैशेषिकादिमते आकाशस्य पारमार्थिकनित्यता, न द्यावापृथिव्योरित्यभिप्रेत्य पार्थक्येनाह-**आकाशस्येति** । **एवञ्च**-सिद्धशब्दस्य नित्यवाचकत्वे च । योगाद्रूढिर्बलीयसीति न्यायेनाह-**तत्रेति** । नित्ये इत्यर्थः । **वाचकस्येति**-सिद्धशब्दस्येति शेषः । एतेन योगात्कार्यवाचकस्य सिद्धशब्दस्य व्युदासः ।

(आक्षेपभाष्यम्)

ननु च भोः कार्येष्वपि वर्तते । तद्यथा—सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति । यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति ? ॥

(प्रदीपः) **ननु चेति** । सिद्धशब्दात्क्रियानिष्पन्नोऽप्यर्थोऽवगम्यत इत्यर्थः ॥

(तत्त्वालोकः) भाष्ये-**कार्येष्विति**-अत्रानित्येष्विति वक्तव्ये कार्येष्वित्युक्तिः कार्यत्वहेतुकानित्यत्वज्ञापनाय । अत एव वक्ष्यति कैयटः क्रियानिष्पन्न इति । **अपिना** नित्यसंग्रहः । **वर्तते**-प्रयुज्यते । सिद्धशब्द इत्यनुषज्यते । दृष्टान्तमाह-**तद्यथेति** । **यावता**-यतः । **तत्रेति**-प्रकृतवार्तिके इत्यर्थः । अत इत्यादि । **एतन्नित्यपर्यायवाचिनः**-एतेषु (नित्यकार्यवाचिषु) नित्यपर्यायवाचिनः । सिद्धशब्दस्येति शेषः । **कार्ये इति**-प्रयुज्यमान इति शेषः । **शब्द इति**-तस्य ग्रहणमिति शेषः । **इति**-समाप्तौ ।

(समाधानभाष्यम्)

संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति । इहापि तदेव ॥

(प्रदीपः) **संग्रहे तावदिति** । तत्र हि 'किं कार्यः शब्दोऽथ सिद्धः' इति पक्षद्वयविचारः कृतः । तत्र कार्यप्रतिपक्षार्थाभिधायी सामर्थ्यात्सिद्धशब्द इति स्थितम् । तत्समानतन्त्रत्वादिहापि तथैव युक्तमित्यर्थः ॥

(तत्त्वालोकः) भाष्ये-प्रकृतनिश्चायकमाह-**संग्रहे इति** । **तावदिति** वाक्यालङ्कारे सिद्धशब्दस्येति शेषः । **कार्यप्रतिद्वन्द्विभावात्**-कार्यप्रतिपक्षिभावेनोपादानात् । **वाचिन इति**-तस्येति शेषः । **इति**-इति हेतौ । **इहापि**-प्रकृतवार्तिकेऽपि । **तदेव**-नित्यपर्यायवाचिनो ग्रहणमेव ।

प्रदीपे-**तत्र**-संग्रहे । **हि**-यतः । **इति**-इति विप्रतिपत्तिवाक्येन । **पक्षद्वयेति**-शब्दनित्यत्वानित्यत्वोभयकल्पेत्यर्थः । **कृतः**-उपस्थापितः । **तत्र**-तस्मिन् वाक्ये । **अर्थेति**-नित्येत्यर्थः । अन्यस्यासम्भवादाह-**सामर्थ्यादिति** । **तत्समानतन्त्रत्वात्**-संग्रहसदृशशास्त्रघटकत्वात् । साहृश्यञ्च शब्दानुशासनत्वेनेति भावः । **तथैव**-नित्यवाचिसिद्धशब्दस्य ग्रहणमेव ।

(समाधानान्तरभाष्यम्)

अथवा सन्त्येकपदान्यप्यवधारणानि । तद्यथा—अब्भक्षो वायुभक्ष इति—अप एव भक्षयति, वायुमेव भक्षयतीति गम्यते । एवमिहापि सिद्ध एव, न साध्य इति ॥

(प्रदीपः) **अथवेति** । एवशब्दप्रयोगे द्विपदमवधारणं, द्योतकत्वेनैव शब्दस्यापेक्षणात् । यदा तु द्योतकमन्तरेण सामर्थ्यादवधारणं गम्यते तदा तदेकपदमित्युच्यते । तत्र सर्वं एवापो भक्षयतीत्यभक्षश्रुति

सामर्थ्यान्नियमभवगमयत्यप एव भक्षयन्तीति । इहापि नित्यानित्यव्यतिरेकेण शब्दान्तराभावात्सिद्धशब्दोपादानान्नियमोऽवगम्यते सिद्ध एवेति । कार्याणां तु पदार्थानां प्रागभावप्रध्वंसाभावयोरपि सत्त्वात् सिद्धता नास्तीति न ते सिद्धा एव ॥

(उद्द्योत) ग्रन्थान्तरानालोचनेऽपि नियामकमाह—भाष्ये अथवेति । एतेन तत्समानतन्त्रत्वाद् यत्त्वेकपदार्थत्वाद्दोऽपि तत्र स्यादित्यपास्तम् ॥ ननु एकपदानीत्युक्त्वा भक्ष इत्यस्य पदद्वयात्मकस्योदाहरणमसङ्गतमत आह—एवशब्देति । भाष्ये अप एवेति गम्यते इति । वाक्ये इव समासेऽपि सामर्थ्यात् तदतिरिक्तभक्षणाभावो गम्यत इत्यर्थः ॥ नियमप्रत्यायकसामर्थ्यं दर्शयति—इहापीति । कार्यवाचिन एव ग्रहणाभावे मूलमाह—कार्याणामिति । प्राक्प्रध्वंसाभावयोरिति पाठः ॥

(तत्त्वालोक) भाष्ये—एकपदानीति—एकं पदं येष्विति व्युत्पत्तिः । उदाहरणमाह—तद्यथेति । इति इत्यनेन । इतीति—अवधारणमिति शेषः । एवबोध्यमाह—न साध्य इतीति—गम्यते इत्यनुषज्यते ।

प्रदीपे—सुप्तिङन्तं पदमित्यनुसारेणाह—एवेति । अब्भक्ष एवेत्यादावित्यादि । द्योतकत्वेन—अवधारणद्योतकत्वेन । यदा त्विति—अब्भक्ष इत्यादाविति शेषः । द्योतकम्—एवशब्दम् । सामर्थ्यात्—अब्भक्ष इत्याद्युपादानसामर्थ्यात् । अवधारणम्—अप एव भक्षयति (न तदतिरिक्तम्) इत्यादिरूपम् । तत्—अवधारणम् । समासे प्रदर्श्य वाक्ये दर्शयति—तत्रेति । नियमाकारमेवाह—अप एवेति । शब्दान्तराभावात्—कल्पान्तरासम्भवात् । नियममेवाह—सिद्ध एवेतीति । अपिना अन्यतमाभावात्सिद्धसंग्रहः । सिद्धता—सिद्धतैव । इति—इति हेतौ । ते—कार्यपदार्थाः ।

उद्द्योते—ग्रन्थेति—संग्रहरूपेत्यादि । नियामकम्—सिद्धशब्दस्यैवात्र ग्रहणमिति नियमबोधकम् । एतेन—अथवाकल्पानुसारेण । तदिति—संग्रहेत्यर्थः । अपिना नित्यवाचकसिद्धशब्दग्रहणस्य संग्रहः । तत्र—भाष्ये । शक्तं पदमित्यनुसारेणाह—पदद्वयेति । अप एवेति गम्यते इति—अप एवेत्यादि गम्यते इत्यन्तमिति । वाक्ये—अपो भक्षयन्तीत्यादौ । समासे—अब्भक्ष इत्यादौ । तदिति—भक्षादीत्यर्थः । नियमेति—सिद्धस्यैवात्र ग्रहणमिति नियमेत्यर्थः । प्राक्प्रध्वंसाभावयोरिति क्वाचित्कपाठो न युक्तोऽनन्वयापत्तिरित्याशयेनाह—प्रागिति ।

(समाधानान्तरभाष्यम्)

अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः—अत्यन्तसिद्धः सिद्ध इति । तद्यथा—देवदत्तो दत्तः, सत्यभामा भामेति ।

(प्रदीप) अथवेति । कथं पुनर्देवदत्तशब्दे सङ्केतेन विनियुक्ते एकदेशः प्रयुज्यते । न ह्यसौ संज्ञात्वेन विनियुक्तः । नचैकदेशात्स्मर्यमाणस्य समुदायस्य वाचकत्वमुपपद्यते । प्रतीयमानस्य प्रत्यायकत्वासम्भवादुच्चार्यमाणस्यैव वाचकत्वात् । एवं तर्ह्यनुनिष्पादिन्योऽवयवसरूपाः संज्ञा विनियोगकाले विनियुक्ता एव । लोपस्तु वर्णानां साधुत्वमात्रं भूदित्यन्वाख्यायते । इहापि नित्यानित्ययोर्भिन्नत्वाद्विशेषणसिद्धशब्दश्रुतिः स्वरूपं गमयति—अत्यन्तसिद्ध इति ॥

(उद्द्योत) अथवेति । समुदायशक्तस्यैकदेशस्य वाच्यार्थानात्यन्तसिद्धत्वमिति भावः ॥ प्रतीयमानस्येति । एतदनुद्दिश्यैव उपपाद्यते ॥ एवं तर्हीति । एतेनैव घटपदं कलशपर्याय इत्यादिप्रयोगाः । अन्यथा पर्यायवाचीति प्रयोगः स्यात् ॥ विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोप इति लोपविधायकं तर्हि किमर्थमत आह—लोपस्त्विति । वर्णानाम् देवादीनाम् । तत्रापि क्वचित्पूर्वपदस्यैव क्वचिदुत्तरपदस्यैव क्वचिदुभयोरिति लोकव्यवहारेण निर्णेयम् । एवं वर्णानां शक्त्यभावोऽपि तत एव निर्णेय इति तत्त्वम् ॥ निष्पन्नत्वेति । विद्यमानकालसम्बन्धो निष्पन्नत्वम् ॥

(तत्त्वालोक) भाष्ये—नन्वेवम् आकाशादिषु चिरकालावस्थायित्वातिशयेन नित्यसिद्धशब्दप्रयोगसम्भवेऽपि वास्तवसिद्धत्वाभावात् "तद्यथा सिद्धमाकाशमित्यादिदृष्टान्तो नोपपद्येतेत्यत आह—अथवेति । "विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः" इति वार्तिकेनेति शेषः । अत्र पदार्थमाह—अत्यन्तेति । दृष्टान्तमाह—तद्यथेति ।

प्रदीपे—ननु यस्य देवदत्तशब्दो नाम, न तु दत्तादिशब्दः, तस्य बोधनाय कथं दत्तादिशब्दः प्रयुज्यते इत्याशयेन पृच्छति—कथमिति । संज्ञात्वेन—सञ्ज्ञिवाचकत्वेन । विनियुक्ते—सङ्केतिते । एकदेशः—दत्तादिशब्दः । हि—यतः । असौ—एकदेशः । एकदेशात्—दत्तादिशब्दात् । एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीति न्यायेनेति शेषः । समुदायस्य—देवदत्तशब्दरूपस्य । वाचकत्वम्—सञ्ज्ञिवाचकत्वम् । प्रतीयमानस्य—स्मर्यमाणस्य । शब्दस्येति शेषः । प्रत्यायकत्वासम्भवात्—अर्थोपस्थापकत्वासम्भवात् । उत्तरयति—एवमिति । यदि उक्तयुक्त्या उच्चार्यमाणस्यैव वाचकतेत्यर्थः । अनुनिष्पादिन्यः—देवदत्त इति संज्ञाविधानानन्तरं सम्भिन्नप्रयोज्याः । अवयवसरूपाः—देवदत्तशब्दैकदेशदत्तादिसदृशा दत्तादिशब्दाः । संज्ञाः—सञ्ज्ञाबोधिकाः । विनियोगकाले—(पित्रादिना) देवदत्त इति नामकरणकाले । सङ्केतेन सञ्ज्ञिनीति शेषः । विनियुक्ताः—विनियोजिताः । अन्तर्भावितण्यर्थत्वात् । एव—एवेत्यभ्युपेयते । लोपस्तु—लोपविधायकवार्तिकं तु । भूदिति—अपि तु तत्र दत्तादीनामपि साधुत्वं भवत्विति शेषः । इति—इति हेतौ । अन्वाख्यायते—वार्तिककृता प्रवर्त्यते । इहापि—प्रकृतवार्तिकेऽपि । सिद्धश्रुति—सिद्धशब्दश्रवणम् ।

उद्द्योते—एतत्—प्रतीयमानस्यार्थप्रत्यायकत्वम् । एवमेव—समुदायवाच्यस्य एकदेशेनापि वाच्यत्वादेव । घटपदं कलशपदप्रतिपाद्यार्थप्रतिपादकमित्यर्थे घटपदं कलशपदपर्यायवाचीति प्रयोज्यमिति शेषः । कलशपर्यायः—कलशपदपर्यायः । अन्यथा—समुदायेन वाच्यस्य एकदेशवाच्यत्वे । पर्यायवाचीति—कलशपदपर्यायवाचि । समुदायैकदेशयोः समानार्थवाचकत्वादेव पर्यायवाचिशब्दस्थाने पर्यायशब्देन निर्वाहो भवति नान्यथेति भावः । तत्रापि—देवदत्त इत्यत्रापि । पूर्वपदस्यैवेति—साधुत्वमिति शेषः । एवमग्रिमयोरपि । तत एव—लोकव्यवहारादेव ।

(समाधानान्तरभाष्यम्)

अथवा "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्" इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः ॥

(प्रदीप) व्याख्यया नित्यत्व शब्दादीनां सिद्धमित्याह—अथवेति । नहि संदेहमात्रादलक्षणता भवति, पुनः प्रमाणान्तरेण निश्चयोत्पादात् ॥

(उद्द्योत) ननु निर्युक्तिकं व्याख्यानमनुचितं विपरीतस्यापि सम्भवात आह—व्याख्यानेति । वृद्धव्यवहारादेव पदार्थैकान्नित्यत्व सम्प्रदायो सिद्धमिति व्याख्यानं सिद्धशब्देन तदेवोपलक्ष्यते ।

(तत्त्वालोक) भाष्ये—हि—यतः । इति—इति परिभाषानुसा

रेण । वाचिन इति-सिद्धशब्दस्य प्रकृते इति शेष । व्याख्यास्याम-व्याख्यानेन व्यवस्थापयिष्याम ।

प्रदीपे-न्यायात्-वृद्धव्यवहारात् । आदिना अर्थमन्वये सङ्ग्रह । स्थितम्-स्थापितम् । इत्याह-इति व्याख्यानमेव प्रकृते निर्णायकमिति बोधनाय । उक्तपरिमाणार्थकात्-नहीति । अल-क्षणता-अबोधकता । सामान्येनाख्यानानन्तर विशेषेणाख्यान भव तीत्याशयेनाह-पुनरिति । उत्पादादिति-व्याख्यानेन विशेष बोधादिति शेष ।

उद्द्योते-अयुक्तमिति-अप्रामाणिकमित्यर्थ । नुनुत्समर्पयादि । कुत इत्यत आह-विपरीतस्यापीति । निर्युक्तिकव्याख्यानस्येति शेष । अत आह-इत्यनेनात्र व्याख्याने सयुक्तिता बोधयितुमाह । पदार्थसम्बन्धानामिति-पदानि चार्थाश्च सम्बन्धाश्चेति द्वन्द्व । तदेव-नित्यत्वमेव । प्रकृते शब्दार्थसम्बन्धानामिति शेष ।

(आक्षेपभाष्यम्)

किं पुनरनेन वर्ण्येन । किं न महता कण्ठेन नित्य-शब्द एवोपात्त यस्मिन्नुपादीयमानेऽसन्देहः स्यात् ? ॥

(प्रदीप) वर्ण्येनेति । प्रयत्नव्याख्यानेनेत्यर्थ ॥

(तत्त्वालोक) भाष्ये-किं पुनरिति-नियतत्वोपन्यासस्य प्रयोजन सम्पादमिति शेष । अनेन-सिद्धशब्देन । वर्ण्येनेति-सन्दे हनिराकरणायेत्यादि । उपादीयमाननेति शेष । किं नेति-कुतो नेत्यर्थ । यदि तेन नित्यत्वमेव बोध्यं नहींयादि । सदोष वाक्य मयाऽनुपादीयते, निर्दोषन्तु मयामानुत्त्वैरिति लोकव्यवहारानुसारेण नित्यशब्दस्य सन्देहजनकतारूपदोषाभावसूचनायाह-महता कण्ठेनेति । उच्चै शब्देनेत्यर्थ । एवेन सिद्धशब्द व्यावृत्त । उपादीय माने-उपादीयमानमात्रे । असन्देह-सन्देहप्रागभाव । परिपालित इति शेष ।

(समाधानभाष्यम्)

मङ्गलार्थम् ॥

माङ्गलिक आचार्यो महत शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादित. प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ॥

(प्रदीप) माङ्गलिक इति । अभिहितामीष्टार्थसिद्धिर्मङ्गल तत्प्रयोजन आचार्यो माङ्गलिक ॥ प्रथन्त इति । अध्ययनस्य विच्छेदात् ॥ वीरपुरुषाणीति । श्रोतॄणां परम्पराया वादः ॥ आयुष्मत्पुरुषाणीति । शास्त्रानुष्ठाने धर्मोपचयादायुर्वर्धनात् ॥ सिद्धार्था इति । अध्ययननिर्वृत्तिरेव तथा सिद्धि ॥

(उद्द्योत) सिद्धिर्मङ्गलमिति । तस्या मङ्गलत्व च कार्ये कारणरूपोपचारादिति बोध्यम् ॥ तत्प्रयोजनमस्येति प्रागुक्तम् ॥ अत्र मङ्गलानुष्ठानप्रयोजनमाह-भाष्ये मङ्गलादीनीत्यादिना ॥ भाष्ये तन्निबन्धनस्य फलमाह अध्येतारश्चेत्यादिना । आनुषङ्गिकम फलमन्यत्यैर्थ ॥ अध्ययननिर्वृत्ति नसमाप्ति ॥ सिद्धिः सिद्धिविषयोऽर्थ ॥ मङ्गलार्थमित्यनेन प्रवर्तकप्रवृत्ति सूचिता ॥

(तत्त्वालोक) भाष्ये-मङ्गलार्थमिति-अत्रार्थशब्द प्रयोजन वाचक । मङ्गलार्थमिति पाठ । तत्र चैन नित्यत्वबोधनमन्तद । तथा च स्वरूपतो मङ्गलार्थम्, अर्थतो नित्यत्वबोधनार्थं सिद्धशब्द प्रयुक्त इति फलितार्थ । अत एव "सकृदुच्चरित शब्द सकृदेवार्थं गमयति" श्रुतपरिविरोधो नापद्यते ॥ यदर्थमेव भाष्यमुक्त्वा व्याख्यान माष्यमाह-माङ्गलिक इति । आचार्य-"आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि । स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥" इत्याचार्यलक्षणलक्षितो वररुचि । शास्त्रौघस्य-शास्त्राणां वार्तिकानामोघ समूहरूपग्रन्थस्तस्य । अथवा शास्त्रमेव वार्तिकमूलकत्वात् तस्य । अस्य 'आदित' इत्यनेनापि सम्बन्ध । मङ्गलार्थं-निर्विघ्नसमाप्ति प्रचारादिसाधकमङ्गलार्थम् । आदित-आदौ । प्रयुङ्क्ते-प्रयुक्त । वर्तमानसामीप्ये वर्तमानवद्वेति सूत्रेण भूते लट् । कुत एव मत्यत आह-मङ्गलादीनीति । हि-यत । प्रथन्ते-चिर प्रचारयन्ते । वीरपुरुषाणीति-वीरा सामर्थ्यवन्तवन्त पुरुषा अध्येतारो भवन्ति येभ्य इति सुपत्ति । एवमग्रेऽपि आयुष्मत्पुरुषाणि चेति-भवन्त्यत्तु पठ्यते स्युरिति- या मङ्गलसम्पादकानि च भवन्तीति शेष इति- इत्यादि । आदिना सम्पूर्णानि च भवन्तीत्यादि सङ्ग्रह । अनुमीयते इति शेष ।

प्रदीपे-अभिहितेति-अभिहिता निर्विघ्ना चेत्तम् मन्यार्थ ग्रन्थ समाप्तिप्रचारादि) सिद्धिरिति स्युपत्ति या न धर्मद्वारा स्वर्गं इव मङ्गलस्य प्रतिबन्धकाविघ्नध्वसद्वारा समाप्त्यादि साध्य इति भाव । तत्प्रयोजन इति-तद् मङ्गल प्रयोजनम् येन युक्त च । प्रथने हेतुमाह-अध्ययनस्येति । वीरत्वाने हेतुमाह-श्रोतॄणामिति । आयुष्मत्ताया हेतुमाह-शास्त्रेति । शास्त्रानुष्ठानमित्यर्थ । तेषाम्-अध्येतॄणाम् ।

उद्द्योते-ननु मङ्गलत्वस्यादृशसिद्धे कथमुक्त मङ्गलत्वमित्यत आह-तस्या इति । तादृशसिद्धेरित्यर्थ । कार्य इति-'आयुर्वै घृतमि'त्यत्रायुषा घृतत्वाभ्यत्वादि । तत्-मङ्गलम् । इति-इति तुल्यो तत्र-आदौ । तन्निबन्धनस्य-मङ्गलजनकस्य । तदिति-अध्ययनेत्यर्थ । इत-सिद्ध शब्दार्थसम्बन्धे इत्यस्मात् ॥ तत्र मङ्गल (कल्याणजनक) त्रिविधं कायिकवाचिकमानसकभेदात् । तत्र कायिकं-मङ्गलागारगमनादि । वाचिकं-गोपालगीतपाठादि । मानसिकं-भगवद्ध्यानादि । एव मङ्गल सफलम् अविगीतशिष्टाचार विषयत्वादित्यनुमानेन तस्य सफलत्वे सिद्धे-प्राचाना उपस्थितत्वाद् विघ्नध्वंसद्वारा समाप्ति मङ्गलफलम् । इत्यत्र तज्जन्यत्वे सति तज्जन्यजनकत्वम् । स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्तासम्बन्धेन समाप्ति प्रति स्वयविघ्नध्वंसवत्तासम्बन्धेन मङ्गल कारणमिति च समाप्तिमङ्गलयो कार्यकारणभाव । अत्र विघ्नध्वंसवत्ता स्वरूप सम्बन्धेन । समाप्तिश्च चरमवर्णध्वंसरूपा । इति वदन्ति । नवीनास्तु भोगेनापि विघ्नध्वंस समाप्तेर्जननात् वा प्रतिमङ्गलस्यान्यथा सिद्धत्वाद् विघ्नध्वंस एव मङ्गलफलम् । स्वरूपसम्बन्धेन विघ्नध्वंसं प्रति स्वाव्यवहितपूर्ववृत्तित्वसम्बन्धेन मङ्गलकारणमिति च मङ्गलविघ्नध्वंसयो कार्यकारणभाव इति वदन्ति । विस्तरस्तु अस्मत्कृतमञ्जूषायास्तत्त्वालोके द्रष्टव्य ।

(समाधानभाष्यशेषभाष्यम्)

अयं खलु नित्यशब्दो नावश्य कूटस्थेष्वविचालिषु भावेषु वर्तते ॥

किं तर्हि ? ॥

आभीक्ष्ण्येपि वर्तते । तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति । यावताभीक्ष्ण्येऽपि वर्तते तत्राप्यनेनैवार्थः स्यात्—' व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्दे

ह्यादलक्षणम्" इति। पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः॥

(प्रदीप) नावश्यमिति। तात्स्थ्यादीर्ध्येन ये शब्दा प्रयुज्यन्ते अगोपालाद्यदनं तेषामेवान्वाख्यानं स्याद् न विरलप्रयोगाणाम्। विनापि च क्रियावद्वचनो गाम दृष्टवृत्तिर्नित्यशब्द प्रयुज्यते। यथा आश्चर्यमनित्ये नित्यवीप्सयोरिति॥

(उद्द्योतः) अनन्दिग्धो नित्यशब्द किं न प्रयुक्त इत्युक्तम्। तथापि सन्देहमाह-भाष्ये अथ खल्विति॥ आभीक्ष्ण्येन दृढुल्येन। अगोपालादिति पठेऽप्यत्रैव॥ प्रयुज्यन्त इति। साक्षाच्छब्दे आभाद्यासमवायप्रयोगाद्यात् ...। एवं च नित्यशब्दोपादानेऽपि सप्रयोजनकोऽस्त्वसम्भवेन तथापि सन्देह एवेति भाव॥ नित्ये शब्दार्थसंबन्धे इत्यत्र शब्दार्थसम्बन्धे ज्ञाते सति नित्ये नित्यप्रयोगविषये शब्दे शास्त्रं प्रवृत्तमित्यर्थं स्यादिति तात्पर्यम्॥ नन्वाभीक्ष्ण्यवाचिनो नित्य क्रियावदसाकाङ्क्षतया कथं केवलस्य प्रयोगोऽत आह—विनापि चेति॥

(तत्त्वालोक) भाष्ये-खलु-अपि। तथा च अथ नित्यशब्दोऽ... । अवश्य-नैवम्। तर्हि नित्यो... क स वर्तते इत्याशयेन पृच्छति-किमिति। वर्तते-स वर्तते। उदाहरणमाह-तद्यथेति। यावता-यत्। तत्रापि-नित्यशब्दोपादानेऽपि। अत्र "अत" इत्यादि। अर्थ-निर्णय। यन्नेनेत्यनेन निर्देशमाह—व्याख्यानत इति। "वर्तमानसामीप्ये वर्तमानवद्वेति सूत्रेण भूते ... निष्पन्नमाह-पश्यतीति। अविचारयदित्यर्थः। यत इत्यादि। च-अपि। तथा च सिद्धशब्द एवादित प्रयुक्तो मङ्गलार्थोऽपि भविष्यतीत्यर्थ। एवेन नित्यशब्दव्यावृत्ति। एन-सिद्धशब्दम्।

प्रदीपे—नन्वत्राभीक्ष्ण्यवाचिन एव नित्यशब्दस्येह प्रयोग ... भवादित्यत आह—तत्रेति। आभाद्यार्थक नित्यशब्दप्रयोगेत्यर्थ। आगोपालाद्यदनमिति-गोपपर्यन्तमित्यर्थः। आसामरमिति भाव। एवमर्थावृत्तमाह-विरलप्रयोगाणामिति। यावि... प्रयोगविषयाणां शब्दानामित्यर्थ। विरलानामप्रयोगाद्यान्वाख्यानमिति भाव। अन्वाख्यान स्यादित्यनुषज्यते। आभीक्ष्ण्यवृत्तिः-आभी... वाचक। दृष्टान्तमाह-यथेति।

उद्द्योते—असन्दिग्ध—सन्देहमात्रभावात् सप्रयोजनं। अत्र "यत" इत्यादि। प्रयुक्त इति वाक्यशेष इति शेष। उक्तमिति-पूर्वग्रन्थेन, अत इति शेष। तथापि नित्यशब्दोपादानेऽपि। अयमेव-वाक्यशेषेणैव। तद्-आभाद्य। एवञ्च-नित्यशब्दे आभीक्ष्ण्यवाचि मतेऽपि च। सप्रयोजनकोऽस्त्वसम्भवेनेति-सप्रयोजन... दिक्वकारूढित्वकोटेरर्थं। तथापि-नित्यशब्दोपादानेऽपि। सन्देह-अयं नित्यशब्दः आभीक्ष्ण्यवाच्य वा कूटस्थनित्यवाचि वेत्याकारक संशय। भाव इति-भाष्य ... इति शेष। नन्वभाभीक्ष्ण्यवाचित्वनिश्चयेनोपादाने वाक्यशेषे को... स्यादित्यत आह-नित्ये इति। तात्पर्यमिति-भाष्यस्येति वाक्यशेष। शब्दोपादाने सेयं दर्शत... इति शेष। वाचिन इति-नित्य-शब्दस्येति शेष। केवलस्य-क्रियापदरहितस्य। अस्य "नित्यशब्दस्येति" शेष।

(नित्यतासाधकपक्षनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे शब्देऽर्थे सबन्धे चेति?॥

(समाधानभाष्यम्)

आकृतिमित्याह॥

कुत एतत्?॥

आकृतिर्हि नित्या द्रव्यमनित्यम्॥

(आक्षेपभाष्यम्)

अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः?॥

(समाधानभाष्यम्)

सिद्धे शब्दे अर्थसबन्धे चेति। नित्यो ह्यर्थवतामर्थैरभिसंबन्धः॥

(प्रदीप) अर्थसबन्धे चेति। द्रव्यपक्षे द्रव्यस्यानित्यत्वादर्थ ग्रहण मवश्यविशेषणार्थमुपात्तम्॥ अनित्येऽर्थे कथ सबन्ध नित्य इति चेद्, योग्यतालक्षणत्वात्सम्बन्धस्य। तथाच शब्दाश्रयत्वाच्छब्दस्य च नित्यत्वाददोष॥

(उद्द्योत) नन्वेवमर्थग्रहणं व्यर्थमत आह—द्रव्यपक्षे इति। योग्यता बोधजनकत्वयोग्यता तादात्म्यम्। तदुक्त भाष्ये नित्यो ह्यर्थवतामिति। शब्दानामित्यर्थ॥ ननु नानान्तरस्य सम्बन्धे कथ तस्य नित्यत्वमिति चेद्। न्यूनाधिकसत्त्वेऽपि शब्देन बोध्यबोधकभावेन तस्य तादात्म्य नित्यमित्याशयात्। शब्दस्येषितत्वेऽर्थस्य धर्मभेद-भावस्य तादात्म्यत्वेनादोषश्च॥ शब्दस्य च नित्यत्वादिति। अवकाशवत्त्वाश्रित शब्दोऽपि नित्य। नष्टकाभावात् न सर्वोपपत्तिम् इति भाव॥

(तत्त्वालोकः) भाष्ये—जातिव्यक्तिपदार्थयो प्राक् प्रक्रान्ततया मध्योरन्यतर पृच्छति-अथेति। जातिव्यक्तिपदार्थयोर्मध्ये इति शेष। एष इत्यनेन निर्दिशति-सिद्धे इति। उत्तरमनुवदति तदेव-आकृतिमित्याहेति। आकृति जाति (पदार्थं मत्वा एष विग्रह क्रियते) इति वदति (सिद्धान्ती) इत्यर्थं। ननु कुतो जातिरेव विग्रह क्रियते न तु व्यक्तिरिति इत्याशयेन पृच्छति-कुत इति। यत शब्दार्थसम्बन्धाना मध्ये प्रत्येकस्मिन् सिद्धत्वेन नित्यतया अन्वय जातिरेव सम्भवति न तु व्यक्तिरिति अत इत्यभिप्रायेणोत्तर-यति-आकृतिरिति। नाशिरहितार्थ। हि-यत। द्रव्यं-व्यक्ति। एवमेवेऽपि। कथ-किमाकारक। चेतीति-आकारको विग्रहो विधेयो व्यक्तिपक्षे इति शेष। नन्वत्र पक्षे सम्बन्धे कथं नित्यतया अन्वय इत्यत आह-नित्य इति। हि-यत। अर्थवतामिति-अर्थं (वाच्यतया) सन्तीति (शब्दानाम्) इति व्युत्पत्ति।

प्रदीपे—द्रव्यस्य—द्रव्यपक्षेऽव्यस्य ... इत्यर्थं। अनित्यत्वादिति-नाश सिद्धत्वेन अन्वयेऽपि इति शेष। विशेषणार्थं-सिद्धेत्यस्य। उपात्तम्-इष्टम्। अन्यथा न स्यादिति भाव। अस्य अनित्यो अनित्यप्रतिपत्तिर्दुर्निर्णयत्वादेन इत्याह-अनित्ये इति। (सा०भावे) अर्थे सत्यर्थे (नाशि) इत्यर्थ। कथमिति-... इति शेष। उत्तरमाह-योग्यतेति। लक्षणत्व-योग्यताश्रयत्वादित्यर्थं। तथा-योग्यतया। शब्दाश्रयेति-शब्द आश्रयो यस्या इति व्युत्पत्ति। अन्यत्र पार्थक्यं ... भावनया

भावात् तस्यानित्यत्वेऽपि सम्बन्धस्यानित्यता नास्यते इति भावः ।

(उद्द्योते) एवम्—अर्थे सिद्धतायां समन्वये । तादात्म्यस्येति-शब्दार्थयोरिति शेषः । सम्बन्धस्ये इति-सम्बन्धस्य द्वित्वात्, तादात्म्यस्यानुयोगिप्रतियोगिरूपं शब्दे अर्थे चानित्यत्वे इति शेषः । तस्य-सम्बन्धस्य । बौद्धार्थेन-बुद्धिस्थार्थेन (नित्येन) सह । तस्य-शब्दस्य । बौद्धार्थनिरूपितं भाष्याद्-शब्दवृत्तिधर्मस्येति । घटादिशब्दवृत्तिरन्यदित्यर्थस्येत्यर्थः अर्थवृत्तिधर्माभेदम्-घटादिवृत्तिनित्यधर्माभेदम् । तथा च शब्दार्थवृत्तिधर्मयोस्तादात्म्यादेव शब्दार्थरूपधर्मिणोस्तादात्म्यमित्याशयः । नहीति-प्रामाण्यमिति अपिना परिमाणादिसंग्रहः । ननु शब्दस्य नित्यत्वे कथमत्र सर्वदोपलब्धिरित्यत आह-व्यञ्जकेति । नित्यस्यापि शब्दस्येत्यादि । तु-एव ।

(द्रव्यपदार्थाभ्युपगमभाष्यम्)

अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति । द्रव्यं हि नित्यमाकृतिरनित्या ॥

कथं ज्ञायते ? ।

एवं हि दृश्यते लोके मृत्कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते । तथा सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः । आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव । आकृत्युपमर्देन द्रव्यमेवावशिष्यते ॥

(प्रदीपः) द्रव्यं हि नित्यमिति । असत्यासत्यपरिग्रहं सत्यत्वं द्रव्यशब्दवाच्यमित्यर्थः । आकृतिरिति । संस्थानम् । ब्रह्मदर्शने च गोत्वादि जातेरप्यसत्यत्वादनित्यत्वम्, 'आत्मैवेदं सर्वम्' इति श्रुतिवचनात् ॥

(उद्द्योतः) ननु घटादिद्रव्यस्य कथं नित्यत्वमत आह—असत्येति । स च कम्बुग्रीवादिमदाकारादिरूपस्तद्व्यञ्जकत्वेनानित्यो वा । भाष्ये यदाकृतिशब्देन तद्व्यञ्जकमुच्यते तर्हि तस्यापि व्यञ्जकत्वं व्यञ्जकनियतत्वेन चानित्यमित्याह—जातेरपीति । अनेनेतरकल्पस्याकृतिशब्दस्य व्यञ्जकसंस्थानमपरत्वं सूचयति । गौतमनाप्युक्तं "जात्याकृतिव्यक्तयः पदार्थः" इति । भाष्ये खदिराङ्गारसवर्णे कुण्डले भवत इति प्रथमादन्यत्र विद्रुतं कर्तृत्वं बोध्यम् ।

(तत्त्वालोकः) भाष्ये—एवं द्रव्यस्य निर्देशमाह-सिद्धे इति । कुत एवमित्यत आह-द्रव्यमिति । हि-यतः । पृच्छति-कथमिति । केन प्रकारेणेत्यर्थः । ज्ञायते इति-द्रव्यं नित्यमाकृतिरनित्येति शेषः । उत्तरयति-एवमिति । हि-यतः । लोके एव दृश्यत इत्यन्वयः । दृश्यमाह-मृदिति । मृत्तिकेत्यर्थः । उपमृद्य-विनाश्य । अन्तर्भावितण्यर्थत्वात् । एवमग्रेऽपि । रुचककटकस्वस्तिका-भूषणविशेषाः । आवृत्त-स्वस्तिकादीनि विनाश्य कुट्टनादिना वर्तुलत्वं प्रापितः । खदिराङ्गारसवर्णे-खदिराङ्गारसमानवर्णे । रक्ते इति भावः । स्वस्तिकावयवसंयोगनाशेन पूर्वं घनावयवानन्तरं कुण्डलावयवसंयोगात् द्रव्यान्तरोत्पाद इति वैशेषिकमतानुसारेणाह-आकृतिरिति । एवमित्यादि । तदेव-मृदादेव । यथा एक एवात्मा नयनेनेदं नेकानि शरीराणि प्राप्नोति एव आत्मा नित्यः शरीराणि अनित्यानि तथा एकमेव द्रव्यं कालभेदादनेका आकृतीः (संस्थानानि) प्राप्नोति अतः द्रव्यं नित्यमाकृतिरनित्येति भावः ।

प्रदीपे—वाच्यमिति-न तु घटादिद्रव्यम्, तस्य नाशदर्शनादिति शेषः । अर्थ-भाव । वस्तुतस्तु "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुत्यभाष्यानुमोदितमृत्कार्यस्य घटादेरपेक्षया मृदो नित्यत्वाभिधानात् तत्र वाच्यत्वेन द्रव्यस्य नित्यत्वोक्तिरित्यपि । ब्रह्मदर्शने-इत्यादिवेदान्तदर्शने जातेरिति-जातेरपीति शेषः । अपिना संस्थानसंग्रहः । कुत इत्यत आह—आत्मेति । सर्वमिति—जातिव्यक्त्यादि विश्वमिति शेषः ।

उद्द्योते— घटादिद्रव्यस्येति—द्रव्यशब्दवाच्यस्येति शेषः । स च-संस्थानविशेषः । तद्व्यञ्जकजातिरूप-कम्बुग्रीवादिमदाकारादि यद्व्यञ्जकत्वादिनाभिन्नम् । तद्व्यञ्जकम्-आकृतिः (संस्थानम्) व्यञ्जकत्वेनाभिन्नम् । तदपि-जातिव्यञ्जकमपि । व्यञ्जकत्वेन-अविनाशित्वाभावेन । व्यञ्जकेति-उपादानस्य । अनेन-जातेरप्यनित्यत्वेति कथनेन । व्यञ्जकव्यञ्जकोभयेति-जातिसंस्थानोभयेत्यर्थः । एवं द्रव्यशब्दस्य व्यक्तिपरतया आकृतिशब्दस्य जातिसंस्थानोभयपरतया च तयोः व्यक्तिजातिसंस्थानानां पदार्थतायां भाष्यकैमत्यसमर्थनमाह-गौतमेनेति । तत्र भवति इत्यत्र प्रथमादौ व्यञ्जनप्रयोगे कर्तृत्वमाह-अन्यत्र विद्रुतेरिति । तथा चात्र कुण्डलयोः कर्तृत्वं भवत इत्यत्र द्विवचनोपपत्तिरिति भावः ।

(आकृतिपदार्थाभ्युपगमभाष्यम्)

आकृतावपि पदार्थ एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति ॥

(उद्द्योत) आकृतिशब्देन जातिरित्यभिप्रायेण भाष्ये आकृतावपि पदार्थ इति ॥

(तत्त्वालोकः) भाष्ये—अथवेत्यादिना द्रव्यपदार्थ स्वीकृत्य नित्यत्वात् जातिसंस्थानयोरनित्यत्वात् च द्रव्यस्य एव स विग्रह समर्थनमुक्त्वा महाभाष्यकारसम्मतां दृष्ट्वा दर्शयन्नाह-आकृतावपीति । अथवेत्यादि । अपिना द्रव्यसंग्रहः । एवं द्रव्येन निर्देशमाह-सिद्धे इति ।

उद्द्योते—जातिरिति-एवं गृह्यत इति शेषः ॥

(आक्षेपभाष्यम्)

ननु चोक्तम्-आकृतिरनित्या-इति ॥

(समाधानभाष्यम्)

नैतदस्ति । नित्याऽऽकृतिः ॥

कथम् ? ॥

न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति । द्रव्यान्तरस्था तूपलभ्यते ॥

(प्रदीप) न क्वचिदुपरतेति । सर्वत्र नष्टेत्यर्थः । अद्वैतेन लोके तदभावाद्व्यवहारानुपलब्धेः काठिन्यात् तदर्थमिदं वाक्यम् ॥

(उद्द्योत) क्वचिदुपरतेति कृत्वा न सर्वत्रोपरतेत्यन्वयः ॥ ननु तर्हि सर्वत्र मरणं विनश्यत इत्यत आह—अन्येति ॥ ननु परमार्थदृष्ट्या सर्वं नश्यत इत्यत आह—अद्वैतेनेति ।

नित्यत्वमिति । सर्वदा एकाकारपरामर्शदर्शनेन यावद्व्यवहारकाल तस्या अपि ध्रुवादित्वेन नित्यत्वमिति भाव ॥

(तत्त्वालोक) भाष्ये—प्रश्नोक्तौ पूर्वोक्त्या विरोध इत्या शयेनोक्त स्मारयति-ननु चेति । भवतेति शेष । विरोधप रि हारमाह—नैतदिति । नाकृते (जाते) अनित्यत्वमित्यर्थ । किं तर्हीत्यत आह-नित्येति । ननु कथ ज्ञायते जातिर्नित्येतीत्याशयेन पृच्छति कथमिति । उत्तरयति-नेति । आकृतिरिति शेष । द्रव्येति- तु (किन्तु) द्रव्यान्तरस्था उपलभ्यते इत्यन्वय । तथा च नष्टघटा दिव्यक्तौ अनभिव्यक्ताऽपि घटत्वादिजाति विद्यमानघटादावभिव्यज्यते वेतिहेतो व्यक्तिनाशेऽपि जातेरनाशात्तस्या नित्यत्वमिति भाव ।

प्रदीपे—अद्वैतेन-ब्रह्मणा । व्यवहाराभावादिति-जगतो व्या वहारिकी सत्ता गृह्यतेति शेष आकृते- गोत्वादि) जाते । एकाकारपरामर्शहेतुत्वात्-अय गौरय गौरित्याद्येकाकारानुगतप्रती तिहेतुत्वात् ।

उद्द्योते—उपरम -उपरते यत्रोपपूर्वकरमधात्वर्थ । चेत्- यदि । तर्हीति शेष । तत्काले-नाशकाले । सर्व-सत्तातिरिक्त सक लम् । अनित्यमिति-नहि आकृति कथ नित्येति शेष । तस्या- आकृते (जाते)। ध्रुवादित्वेन-ध्रुवकूटस्थादित्वेन ।

(समाधानसाधकनित्यलक्षणभाष्यम्)

अथवा नेदमेव नित्यलक्षणम्—ध्रुवं कूटस्थम- विचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययोगि य- त्तन्नित्यमिति । तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते ॥

किं पुनस्तत्त्वम् ? ॥

तद्भावस्तत्त्वम् ॥ आकृतावपि तत्त्वं न विहन्यते ॥

(प्रदीप) अथवेति । अन्यत्वेऽपि तत्त्वतो लोकव्यवहारा श्रयेण जाते नित्यत्व साध्यते । त्रिविधा चानित्यता, संसर्गानित्यता यथा—स्फटिकस्य लाक्षाद्युपधानेन स्वरूपतिरोधानेन पररूपभास । उपधानापगमे स्वरूपप्रतिभासात्परिणामाभाव ॥ परिणामानित्यता यथा—बदरादेर्हरितश्यामतानिरोभावे लौहित्यस्याविर्भाव ॥ प्रध्व सानित्यता । सर्वात्मना विनाश । एतत्त्रिविधानित्यताप्रतिषेधेन नित्यता प्रतिपादयितुमुक्त ध्रुवमित्यादि । तत्र ध्रुव कूटस्थमिति संसर्गानित्यता परिहृता, अविचालीति परिणामानित्यता, अनपाये त्यादिना प्रध्वसानित्यता ॥

(उद्द्योत) अथावयवसंस्थानरूपाया जातेर्व्यक्तिभिन्नाया आहु तेषां व्यवहारकाले मध्ये मध्ये उत्पत्तौ नाशे ऽपि प्रकारान्तरेण नित्यत्वमाह-भाष्ये अथवेति । नित्यलक्षण ध्रुवपदस्यैव व्याख्यान कूटस्थमिति । रूपान्तरापत्त्यविचाल्य । यथा पयसो दध्यादिरूपता । अनेन परिणामानित्यता परास्ता । उत्तरत्र सहचारदर्शनादनुत्पत्ती- त्यनेन च समवायरूपो भावविकारो निरस्तो । अवृद्धीत्यनेन तृतीयो वृद्धिलक्षण । अनुत्पन्नेति चतुर्थ परिणाम । अनपायेति पञ्चमो ऽपचय । एतद्रूपविकाररहितमिति तदर्थ ॥ अव्ययेति षष्ठो विनाश । इद च षड्विधनित्यत्व यावद्व्यवहारमेवरूपविशेषपदार्थविषय च ॥ यदनेन नित्यत्व नार्थ, प्रवाहाविच्छेदेनाहतत्वमपि नित्यत्वव्यवहारा दित्याह—भाष्ये तदपीति ॥ यस्मिंस्तत्त्वमिति । यस्मिन्विहतेऽपि तद्वृत्तिधर्मो न विहन्यते इत्यर्थ ॥ प्रवाहनित्यता च जेनोक्ता । तथा चाऽपि तद्धर्मो न नश्यति । आश्रयप्रवाहाविच्छेदादिति भाव ॥

(तत्त्वालोक) भाष्ये—नेदमेव नित्यलक्षणमिति-इदमेव, अपि तु अन्यदपि नित्यलक्षणमस्तीति शेष । इदमित्यनेन निर्दिश्यमाह- ध्रुवमिति । ननु किमन्यत् नित्यलक्षणमित्यत आह-तदपीति । यस्मिन्निति-नष्टेऽपीति शेष । तस्य-घटादे । भाव—तद्वृत्तिधर्म रूपघटत्वादि । उपसंहरति—आकृताविति । अवयवसंस्थानरूपायामा कृतावित्यर्थ । नष्टायामिति शेष । तत्त्वम्-तद्व्यक्तिगतविरूपतद्वृ त्तिधर्म । न विहन्यते इति-आश्रयप्रवाहाविच्छेदात्, अत संस्थान रूपाऽऽकृतिरपि नित्येति शेष ।

प्रदीपे—असत्यत्वे इति-अवयवसंस्थानरूपाया आकृतेरित्या दि । तथा च तादृशाकृते तत्त्वत (परमार्थत) असत्यत्वेऽपीत्य न्वय । जाते -जातिव्यञ्जकावयवसंस्थानरूपाकृते । ध्रुवमित्यादिलक्ष- णघटकविशेषणकृत्यदर्शनाय भूमिका रचयति-त्रिविधा चानित्य तेति । संसर्गानित्यतापरिणामानित्यताप्रध्वसानित्यताभेदादिति शेष । अनित्यतात्रय तत् क्रमेणोपपादयितुमाह-संसर्गेति । स्फटिकस्येति- शुक्लरूपस्यापीत्यादि । लाक्षाद्युपधाने-रक्तादिरूपलाक्षाजपाकुसुमा द्यात्मकोपाधिसन्निधाने । स्वरूपेति-निजशुक्लरूपेत्यर्थ । पररू पेति-उपाधिरक्तादिरूपेत्यर्थ । उपधानापगमे-उपाधिविगमे तु । परिणामाभाव -उपाधिरक्तादिरूपप्रतिभासाभाव । उपाधिससर्गसत्त्वे एवोपधेये रूपान्तरभासो नान्यथेति भाव । प्रतिषेधेन-निराकरणेन । परिणामानित्यतेति-परिहृतेत्यनुषज्यते । एवमग्रेऽपि ।

उद्द्योते—कैयटोक्तस्य यथाश्रुतार्थकत्वे पौनरुक्त्यमापद्येतातोऽ न्यथा व्याचष्टे-अथेति । "न क्वचिदुपरते" इत्यादिना जातिरूपाया आकृते नित्यत्वसाधनानन्तरमित्यर्थ । प्रकारान्तरेण-नित्यलक्षणा न्तरेण । अनेन-अविचालीत्यनेन । 'अनपायेत्यादिना प्रध्वसानित्यता परिहृत'ति कैयटकथन न युक्त, अव्ययेत्येतावन्मात्रेण निरसितु शक्याया प्रध्वसानित्यताया निरासाय षड्विशेषणोपादानस्य वैय र्थ्यात् । किन्तु जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यती त्येव रूपषड्भावविकारनिरसनाय अनपायेत्यादीनि षड्विशेषणानि उ पात्तानीति बोधयितु षड्भावविकारक्रमेणाह-उत्पत्तेरिति । वृद्धिल- क्षण-वृद्धिरूप । विकारो निरस्त इति शेष । एवमग्रेऽपि । अप चय-ह्रास । एतद्रूपेति-अपचयरूपेत्यर्थ । तदर्थ-अनपायश ब्दार्थ । इदञ्च-उक्तद्विविधरूपञ्च । संसर्गानित्यतादित्रिविधानित्यता शून्यत्वरूपमेकम्, तथा तादृशषड्भावविकाररहितत्वरूपमपरमिति भाव । कस्य नित्यत्वमित्यपेक्षायामाह । पदार्थेति-शब्दादिरूपेत्यादि । अयमेव-उक्तद्विविधस्वरूपवानेव । अतादृशस्यापि-उक्तद्विविधरूपाभाव वतोऽपि अवयवसंस्थानरूपाकृतेरपि । यस्मिन्-अवयवसंस्थानरूपे घटा- द्याकारे । तद्वृत्तिधर्म -घटत्वादि जातिरूप । प्रवाहनित्यता-ध्वंस प्रतियोगिसजातीयप्रवाहरूपा । अनेन-तदपीत्यनेन । तदिति-अवयव संस्थानरूपाकृतेरित्यर्थ । आश्रयेति-धर्माश्रये इत्यर्थ ।

(नित्यानित्यत्वविचारस्याप्रकृतत्वबोधकभाष्यम्)

अथवा किं न एतेन-इदं नित्यमिदमनित्यमिति । यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते—सिद्धे शब्देऽर्थे सम्बन्धे चेति ॥

(प्रदीप) यन्नित्यमिति । बुद्धिप्रतिभास शब्दार्थं यत्र यत्र शब्द व्यवहारविरहात्तदा बुद्धिरूपत्वात् इति प्रवाहनित्यता दर्शयति तदर्थ ॥

(उद्द्योत) यन्नित्यमिति । सदविच्छिन्नप्रवाहनित्यताऽर्थे इति तदर्थ ॥ ननु उदाहरणादिनिष्पत्तौ कथ नित्यत्व तेषां स्वरूप स्यैवाभावादत आह—बुद्धिप्रतिभास इति । यान् पदार्थो न

शाब्दबोधे विषयः, किन्तु बौद्धः । स च प्रवाहनित्य इति भावः ॥ इत्यन्यत्र मञ्जूषायां विस्तरेण निरूपितम् ॥

(तत्त्वालोकः) भाष्ये—शास्त्रारम्भसम्पादनाय प्रयोजनानन्तरमिति नास्ति किमपि प्रयोजनं विषयविशेषे निश्चित्य तत्त्वविवेचनमेवावशिष्यते इत्याह—अथवेति । किमिति—प्रयोजनमिति शेषः । सः—अस्माकम् एतेनेति—विचारेणेति शेषः । एतेनेत्यनेन निर्दिश्यमाह—इदमिति । एष इत्यनेन निर्दिश्यमाह—सिद्धे इति ।

प्रदीपे—बुद्धिप्रतिभासः—बौद्धार्थः । एवेति शेषः । शब्दार्थः—शब्दजन्यबोधविषयः । तत्र हेतुमाह—यदा यदेति । अर्थस्य बाह्यसत्त्वेऽसत्त्वे वेत्यर्थः । वक्तेति शेषः । शब्दः—इदन्त्वविषयकः । अर्थाकारेति—अर्थ आकारो यस्या इति व्युत्पत्तिः । इति—इति हेतौ । एतस्येति शेषः । अर्थस्य—बौद्धस्य । अर्थः—मात्र ।

उद्द्योते—पदार्थानामिति—मध्ये बाह्यानामिति शेषः । बाह्यः—बहिर्वर्तमानः । बौद्ध इति—पदार्थं इत्यनुषज्यते । स च—बौद्धपदार्थश्च एतच्च—बौद्धार्थश्च प्रवाहनित्यतया नित्य एव ।

(प्रत्याक्षेपभाष्यम्)

कथं पुनर्ज्ञायते—सिद्धः शब्दोऽर्थः सम्बन्धश्चेति ? ॥

(१ प्रत्याक्षेपसमाधानवार्तिकं द्वितीयखण्डम् ॥ २ ॥)

॥ * ॥ लोकतः ॥ * ॥

(भाष्यम्)

यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते । तद्यथा-घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह—कुरु घटं कार्यमनेन करिष्यामीति । न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह—कुरु शब्दान्प्रयोक्ष्य इति । तावत्येवार्थमुपादाय शब्दान्प्रयुञ्जते ॥

(प्रदीपः) लोकत इति । शब्दस्य कार्येषु वस्तुषु लोकव्यवहार, अन्यथा नित्येषु । शब्दस्य व्यवहारोऽनादिवृद्धव्यवहारपरम्परा व्युत्पत्तिपूर्वक इति शब्दादीनां नित्यत्वम् । घटादयस्त्वर्थक्रियार्थिभिरन्वितं ज्ञात्वा तत्पादविनाशयुक्ता उपलभ्यन्ते । नैव शब्दादय ॥ तावत्येवार्थमिति । इच्छया वस्तु निरूप्येत्यर्थः ॥

(उद्द्योतः) शब्दादीनां नित्यत्वमिति । व्याकरणानिष्पाद्यत्वमित्यर्थः ॥ तावत्येवेति । वैयाकरणकुलमगत्वैवेत्यर्थः ॥

(तत्त्वालोकः) भाष्ये—तन्वर्थसम्बन्धानां व्याकरणानिष्पाद्यत्वेन नित्यत्वनिर्णयेऽपि व्याकरणानिष्पाद्यशब्दे कुतो निश्चीयते नित्यत्वमित्याशयेन पृच्छति—कथमिति । उत्तरयति—लोकत इति । ज्ञायते इति शेषः । यत्—यत्र । अहरहः मनुष्यानुशासनेति भाष्याभिप्रायेण सम्बन्धेन तथा आवश्यकतायां इव शब्दप्रयोगकाले अर्थोपादानस्यावश्यकतायाः सूचनाय साम्याभाव—अर्थमर्थमुपादायेति । अर्थं बुद्धिविषयीकृत्यैवेत्यर्थः । नेति—किन्त्वित्यादि । एषां—शब्दानाम् । निर्वृत्तौ—निष्पत्तौ । अत्र निमित्तार्थे सप्तमी । ये इति—अपि त्वित्यादि । भावाः—पदार्थाः । तन्निष्पत्तये यत्नस्य करणम्, शब्दनिष्पत्तये तु व्याकरणाद्यारम्भो नेत्यभिप्रायेणाह—तद्यथेति । अनेन—घटेन । तद्वत्—तस्य पदार्थं कुलालकुलगमनादिवत् । प्रयोक्ष्ये इति—शब्दानित्यादि । तावतीति—किन्त्वित्यादि । समये इति शेषः । तथा च किन्तु वैयाकरणकुलगमनाभावेऽपि समये एवेत्यर्थः ।

प्रदीपे—अन्यथा—अन्यप्रकारेण । नित्येषु इति—वस्तुषु लोकव्यवहार इत्यनुषज्यते । शब्दस्य बहुत्वेन च नित्यो व्यवहार इत्युपपादयितुमाह—शब्द इति । शब्दसम्बन्धेत्यर्थः । व्यवहारः—प्रयोगः । अनादीति—अनादिर्यो वृद्धव्यवहारपरम्परा, तया या व्युत्पत्तिः (शक्तिज्ञानादिः) तत्पूर्वक इत्यर्थः इति—इति हेतौ । तुल्यत्वेनैकप्रमाणकत्वम् । अर्थक्रियार्थिभिः—जलाहरणादिकार्यार्थिभिः । अन्यतः—कुलालकुलात् इव नेति—किन्त्वित्यादि । एवं—घटादयः इत्यन्वयः ज्ञात्वा उत्पादविनाशयुक्ता उपलभ्यन्ते ।

उद्द्योते—उत्तरीत्या सिद्धेन—व्याकरणानिष्पाद्यत्वेनैव शब्दे नित्यत्वमनुमीयते, अथवा अन्यथा व्यवहारविनाशे व्यवहारविषयत्वेन शब्दे नित्यत्वेनैवात्र नित्यत्वमनुमीयते इत्याशयेनाह—व्याकरणेति ।

(आक्षेपोसंहारभाष्यम्)

यदि तर्हि लोक एषु प्रमाणम्, किं शास्त्रेण क्रियते ?

(१ समाधानभूतं तृतीयखण्डम् ॥ ३ ॥)

॥ * ॥ लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ॥ * ॥

(भाष्यम्)

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते ॥

किमिदं धर्मनियम इति ? ॥

धर्माय नियमो धर्मनियमः, धर्मार्थो वा नियमो धर्मनियमः, धर्मप्रयोजनो वा नियमो धर्मनियमः ॥

(प्रदीपः) अत्र भाष्यकारेण समस्तस्यैकवाक्यतया वार्तिकं व्यवस्थापितम् । सिद्धे शब्दार्थसंबन्धे शास्त्रप्रवृत्तिरेकं वाक्यम् । कथं ज्ञायत इति प्रश्ने लोकतो ज्ञायते इति द्वितीयम् । लोकेन ज्ञायत इत्यादि लोकतोऽर्थप्रयुक्त इत्यादि तृतीयम् ॥ शब्दप्रयोग इति प्रयोगग्रहणेन 'प्रयोगे' न तु 'ज्ञानमात्रे' इत्युक्तं भवति । अर्थेनाप्रत्याय्यमानेन प्रयुक्तेऽर्थप्रयुक्ते ॥ धर्माय नियम इति । चतुर्थ्या तादर्थ्यं प्रतिपाद्यते । समस्तमानाये तु षष्ठी विधाय समासः कर्तव्यः, चतुर्थीसमासस्य प्रकृतिविकारभाव एव विधानात् ॥ धर्मार्थ इति । धर्मार्थत्वाद्यत्न एव धर्मशब्देनाभिधीयते इति कर्मधारयः समासः ॥ धर्मप्रयोजन इति । लिङादिविधेयेन नियोगार्थेन धर्मेण प्रयुक्त इत्यर्थः ॥

(उद्द्योतः) ननु सम्बन्धनित्यत्वस्य लोकत इत्यस्य पुनरर्थप्रयुक्ते इत्यनेनान्वयः कथम् । वार्तिके चैकवाक्यतयैवान्वयप्रतीतेराह—अत्रेति । समाधिसूचेति । न्यूनतापरिहाराय चेत्यर्थः । लोकत इत्यस्य च लोकव्यवहारत इत्यर्थः ॥ भाष्ये अर्थप्रयुक्ते इति । अर्थज्ञानप्रयोजनेन हेतु इत्यर्थः । परस्य विशिष्टबोधो भवत्विति शब्दः प्रयुज्यते, प्रयोगो विभक्तशब्दज्ञानेनार्थज्ञानादिति भावः ॥ एवं प्राप्ते शब्दप्रयोगे शास्त्रेण येषां प्रकृतिप्रत्ययादिविभागज्ञानद्वारा गवादय एव प्रयुक्ता धर्मं जनयन्ति, न गव्यादय इति नियमः क्रियत इति तात्पर्यम् ॥ विधानादिति । तादर्थ्यस्य चतुर्थ्यैव बोधनाय लिङ्गं प्रयोग

इति भाव ॥ चतुर्थीति योगविभागो न भाष्यारूढ । सुप्सुपेति समास इत्यप्यगतिकगतिरित्येव व्याख्यातम् ॥ द्वितीयपक्षे तृतीये विशेषं दर्शयति—लिङादीति । प्रभाकराङ्गीकृतमनेनेदम् । तन्मते हि लिङादीनामपूर्वमात्रं कार्यं वाच्यम्। तदेव च स्वस्मिन् पुरुषं प्रयुञ्जान नियोग इत्युच्यते। स एव धर्मस्तेन प्रयुज्यते आक्षिप्यते इति कर्मल्युडन्त प्रयोजनशब्द । स चासाधुनिवृत्तिरूपो नियम । धर्मप्रयोजन इति षष्ठीसमास । एवञ्च द्वितीये धर्मफलको नियम इत्यर्थ । तृतीये धर्मप्रयोज्य इत्यर्थ इति भेद ॥ केचित्तु धर्माय नियम इत्यनेन प्रत्यवायपरिहाररूपधर्मायायं नियम ॥ असाधुप्रयोगेऽधर्मोत्पत्ते ॥ धर्मार्थो नियम इत्यनेन धर्मस्य यज्ञादेर ङ्गभूत इत्यर्थ । नानृतं वदेदिति क्रत्वङ्गवाक्येन क्रतुवैगुण्यस्य बोधनात् ॥ धर्मप्रयोजनो नियम इत्यनेनैकः शब्द इति श्रुतेर्नियमादृष्ट पुरुषार्थकर सूचितमित्याहु ॥

(तत्त्वालोक) भाष्ये - ननु शब्दस्य व्याकरणानिष्पाद्यत्वे व्याकरणशास्त्रस्य वैयर्थ्यमापद्येत, "अप्राप्तं शास्त्रमर्थवदि"ति न्यायादित्याशयेन पृच्छति-यदीति । तर्हीति-अस्य किमित्यनेनान्वय । एषु-शब्देषु ।प्रमाण-व्युत्पत्त्याधायकम् । अथ शब्दापशब्दयो प्रयुक्तयोरर्थस्मारकत्वसाम्येऽपि शास्त्रज्ञानपूर्वकोच्चार्यमाणशब्दस्यैव धर्मजनकता नापशब्दस्येति नियमविधायकतया शास्त्रस्य सार्थकत्वमाशयेनो त्तरयति-लोकत इति । धर्मनियम इत्यत्र क समास इत्याशयेन पृच्छति-किमिदमिति ।

प्रदीपे—अत्र-"सिद्धे शब्दार्थे"ति वार्तिके। एकवाक्यताम्-लोकव्यवहारेण शब्दार्थसम्बन्धे सिद्ध (नित्ये) अर्थज्ञानप्रयोजनके शब्दप्रयोग च सिद्धे शास्त्रेण धर्मनियम क्रियते इत्येकवाक्यताम् । व्यवस्थापितमिति-अत एव प्रश्नवाक्येषु क्रमश प्रवृत्तम्, शास्त्रं क्रियते इति विभिन्नक्रियोक्तिरिति भाव । ननु किन्तद् वाक्यत्रयमित्यत आह-सिद्धे इति । कथ शास्त्र प्रवृत्तमिति प्रश्ने इत्यादि । द्वितीयमिति-वाक्यमित्यनुषज्यते । एवमग्रेऽपि। लोकत इति-यदि लोकतो ज्ञायते तर्हि किं शास्त्रेण क्रियते इति प्रश्ने इत्यादि । ननु अर्थप्रयुक्तशब्दे का व्युत्पत्तिरित्यत आह-अर्थेनेति। आत्मप्रत्यायनाय-स्वरूपबोधनाय । प्रतिपाद्यते इति-कि तु न चतुर्थीसमासो विवक्षित इति शेष । तर्हि अत्र क समासो विधेय इत्यत आह-सम्बन्धेति । कथ न अत्र चतुर्थीसमास एव विवक्षित इत्यत आह-चतुर्थीति । प्रकृतीति-यूपाय दारु यूपदारु इत्यादावित्यर्थ । इति-रति हेतौ । धर्मश्चासौ नियम इति व्युत्पत्ताविति शेष । लिङादिविषयेण-लिङादिवाच्येन ।

उद्द्योते —सकृदिति—"सिद्धे' इत्यनेनेति शेष । एकवाक्यतया-उक्तरूपया । न्यूनतेति-वार्तिकघटकप्रश्नवाक्योपादानप्रयोजनाभावरूपन्यूनतेत्यर्थ । भवतीति-दोषोऽस्तीति शेष । ननु कथ शब्दप्रयोगेणावबोध इत्यत आह-प्रयोगेणेति । शब्दप्रयोगेण शब्दाभिव्यक्त्या, आविर्भूतश्च शब्द परेण श्रूयते, तच्छ्रवणेन च "एकसम्बन्धिज्ञानमपरसम्बन्धिन स्मारकम्" इति न्यायेन तदर्थस्मरण, तत शाब्दबोध इति भाव । एवम्-उक्तरीत्या । शब्दप्रयोगे-साध्वसाधुशब्दप्रयोगे । शास्त्रेणेति-अस्य नियते इत्यनेनान्वय । ननु यदि चतुर्थीसमासो न विवक्षितस्तर्हि कथ चतुर्थ्यन्तेन निर्देश इत्यत आह-तादर्थ्येति । एवं-चतुर्थ्यन्तेन । नन्वेवमपि "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरि"ति सूत्रे चतुर्थीति योगविभागेनैव तत्र समास इत्यत आह-चतुर्थीतीति । नन्वेवमपि "सुप्सुपे"त्यनेनैव तत्र समास कुतो नेत्यत आह-सुप्सुपेतीति । इत्येवम्-इति ... षष्ठीसमासस्थाने । अत्र केचिदित्यन्वेति शेष । तृतीये-पक्षान्तरे।

इदम्-विशेषोपपादनम्। तन्मते-प्रभाकरमते। हि-यत । लिङिति-स्वर्गकामो यजेतेत्यादावित्यादि । तदेव-अपूर्वमेव। प्रयुञ्जान-नियोजयत्। स एव-नियोग एव। तेन-धर्मेण। स च-धर्मप्रयोजनश्च । असाध्विति-असाधुशब्देत्यर्थ । प्रयोज्य इति-नियम इत्यनुषज्यते । अयम्-असाधुशब्दनिवृत्तिरूप । तत्र हेतुमाह-असाध्विति। शब्देति शेष । भूत इति-स नियम इति शेष । तत्र हेतुमाह-नानृतमिति । वाक्येनेति-क्रत्वङ्गशब्दप्रयोगबोधकेन इति शेष । शब्द इति-सम्यग ज्ञात सुष्ठु प्रयुक्त स्वर्गे लोके च कामधुग् भवतीति शेष । नियमादृष्ट-नियमपालनजनितपुण्य। पुरुषार्थकरं-अर्थकामादिदं।

(१ वार्तिकचतुर्थखण्डम् ॥ ४ ॥)

॥ ❀ ॥ यथा लौकिकवैदिकेषु ॥ ❀ ॥

(भाष्यम्)

प्रियतद्धिता दाक्षिणात्या:—'यथा लोके वेदे चे'ति प्रयोक्तव्ये 'यथा लौकिकवैदिके' ष्विति प्रयुञ्जते ॥ अथवा युक्त एवात्र तद्धितार्थ । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु ॥

लोके तावद् 'अभक्ष्यो ग्राम्यकुक्कुट', अभक्ष्यो ग्राम्यसूकर' इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते। शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्। तत्र नियमः क्रियते-इदं भक्ष्यमिदमभक्ष्यमिति ॥ तथा—खेदात्स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेदविगमो गम्यायां चागम्यायां च। तत्र नियमः क्रियते—इयं गम्येयमगम्येति ॥

(प्रदीप) प्रियतद्धिता इति। नायमर्थ किन्तु ये लोकवेदयोर्भवा अवयवास्ते लोकवेदशब्दाभ्यामभिधातुं शक्यन्ते। आधाराधेयभावकल्पनया तु तद्धितप्रयोग प्रियतद्धितत्वनिमित्त । यथा कश्चिद्दनस्येत्य इति प्रयुङ्क्ते कश्चिद्दानस्यत्यमिति समूहमत्यमानम् ॥ अथवेति। नात्रावयवावयविविभाग, किं तर्हि लोकवेदव्यतिरिक्त सिद्धान्तशब्दार्थोभयरूप इत्यर्थ ॥ लौकिक, स्मृत्युपनिबद्ध । वैदिक, श्रुत्युपनिबद्ध ॥ शक्य चानेनेति। शक्ये कर्मसामान्ये लिङ्गसर्वनामनपुंसकमुक्ते इत्यन्वय । तत्र पदान्तरसम्बन्धानुपलभ्यमानमपि क्लीब बहिरङ्गत्वादन्तरङ्गत्वात् न बाधत इति शक्यं क्षुदित्युक्तम्। यदा तु पूर्वमेव विशेष्यविवक्षा तदा शक्या क्षुदिति भवत्येव। यदा तु प्रतिघातस्यैव उत्कर्ष शक्येषु प्रतिघातस्तदा क्षुधं प्रतिहन्तुं शक्यमिति भवति ॥ खेदादिति। खेदजनित खेदो राग, इन्द्रियनियमासामर्थ्यं वा गद ॥

(उद्द्योतः) नन्वीदृशो धर्मनियम क्वचिद् ... आह भाष्ये—यथेति ॥ ननु लोकवेदयोरित्येव सिद्धे तद्धितनिर्देशोऽनुचित इत्यत आह-प्रियतद्धिता इति ॥ न ... स्यादत आह—नायमिति ॥ ते लोकवेदेति। अवयवे ... शब्दप्रयोग दर्शनादिति भाव: ॥ आधाराधेयकल्पनया त्विति। लोकवेदरूप समुदायस्यावयवो ... ॥ नात्रावयवावयविविभाग इति। ... विभाग ... इत्यर्थ । कृतान्तेषु । ... सिद्धान्त । ... इत्यर्थ ॥ भक्ष्यं च नाम यस्य ... ॥ शक्य ... नाम नाधिकृत्य कथ ... आह—शक्येति। तदा क्षुध-

मिति ॥ ननु प्रधानक्रियानिरूपितशक्तेरभिधाने गुणक्रियानिरूपितशक्तेरनभिहिताया अभिहितवत्प्रकाशस्य स्वादुमि णमुलित्यत्र वक्ष्यमाणत्वेन कथमेतदिति चेन्न । प्रधानतिङर्थक्रियानिरूपितशक्तेरेवाय स्वभावो यत्समानाधिकरणगुणशक्तेरभिहितवत्प्रकाश इत्यभिमानात् । वस्तुत इदमयुक्तमेवेति स्वादुमीत्यत्र निरूपयिष्यामः । खेद इति । एवं च ग्राम्यकुक्कुटपरदारादौ विशेषनिषेधस्यैकत्वात्तु शास्त्रकनया आरण्यकुक्कुटभक्षणस्वदारगमनयोर्यथा दोषाभावो यथा च ग्राम्यकुक्कुटभक्षणपरदारगमनयोरधर्मस्तथा शास्त्रज्ञानपूर्वके गवादिप्रयोगेऽपूर्वोत्पत्तिरूपं फलं शास्त्रेण बोध्यते नैवं साधुत्वबोधनात् । अर्थादपशब्दानामधर्मजनकत्वं बोध्यते एकविधिरनियमित्यनिषेधफलकत्वात् । यथैकनिषेधस्याप्यनुचारणं कर्तुमिति भव । अन्यता स्वरेण, वक्ष्यमाणवैदिकानां तु सर्वांशेनेति बोध्यम् ॥

(तत्त्वालोक) भाष्ये–प्रियतद्धिता इति–प्रियास्तद्धिता येषामिति व्युत्पत्तिः । दाक्षिणात्या इति–जना इति शेषः । प्रयुञ्जते इति–वार्त्तिककारा इति शेषः । अनेन वार्त्तिककृता निरर्थकशब्दाडम्बरकारिदाक्षिणात्यान्तर्गततया सूचनया तेषामुपहासः कृतः । अत्र–लौकिकवैदिकेष्विति नयो । तद्धितार्थ–"अप्यात्मादेशो निरूप्यते" इति वार्त्तिके विहितः ठञर्थः । एतदेवोपपन्नमर्थमाह–यथेति । कृतान्तेषु–इत्यन्तवाक्येषु । यथाक्रमं लौकिकदृष्टान्तवाक्यमाह–लोके इति । तावदिति–वाक्यालङ्कारे । ननु किं भक्ष्याभक्ष्यनियमनमित्यत आह–भक्ष्यमिति । अनेन–बुभुक्षितेन । तत्र–तन्निवृत्तिसाधनवस्तुषु । अपरमाह–तथेति । खेदादिति–खेदनिवृत्तिसाधनतानेनेति शेषः । स्त्रीष्विति–पुरुषाणामिति शेषः । तत्र–तदनिवृत्तिसाधनकामनासु ।

प्रदीपे–अयम्–'लोके वेदे चेत्यर्थं प्रयुक्तो' इति) लौकिकवैदिकेष्विति शब्दः । अपशब्द इति–किन्तु साधुशब्द एवेति शेषः । ननु तर्हि कथमुक्तं प्रियतद्धिता इतीत्यत आह–किन्त्विति । अव यवाः–दृष्टान्तत्वेनोपस्थाप्या एकदेशाः । शक्यते इति–अत लोके वेदे चेत्युभयत्रैव नियमे सम्भवत्यपि, तत्रेति शेषः । प्रियतद्धितत्व निमित्त इति–प्रियतद्धितत्वं निमित्तं यस्येति व्युत्पत्तिः । उक्तरीत्या पर्यवसानतः समानार्थे साधुशब्दतामापन्नयोः लोके वेदे चेत्यस्मिन् लौकिकवैदिकेष्वित्यस्मिन् च यथेच्छं प्रयोज्ययोरपि लघुभूतस्य लोके वेदे चेति शब्दस्य प्रयोगे "अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इत्यनेन वैयाकरणप्रियतया सूचिते लघवे सम्भवत्यपि त विहाय गुरुभूतस्य लौकिकवैदिकेष्विति शब्दस्य प्रयोगे गौरवाश्रयणे प्रियतद्धितत्वमेव निमित्तं नान्यदिति भावः । अत्र दृष्टान्तमाह–यथेति । वानस्पत्यम्–वनस्पतीनां समूहो वानस्पत्यम् । समूहेति–समूहार्थे इत्यर्थः । शब्दार्थोभयस्मिन् दृष्टान्तताप्रदर्शनायाह–शब्दार्थोभयरूप इति । समासमकृत्तद्धितार्थ इति शेषः । शक्तेरिति–शक्तिशक्ताविति समाहारेत्यर्थः । स्त्रीलिङ्गत्वपदान्वयात्पूर्वमिति शेषः । लिङ्गेति–लिङ्गेषु सर्वनाम्ना नपुंसकेन युक्ते इत्यर्थः । कृत्यप्रत्यय–"शकिसहोश्चे"ति सूत्रेण यत् प्रत्ययः । पदान्तरसम्बन्धात्–तत्पदसम्बन्धात् । शक्यपदस्य "या विशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः । तास्ता एव हि कर्तव्याः समानार्थे विशेषणे ॥" इति नियमेनेति शेषः । स्त्रीत्व–स्त्रीलिङ्गत्वम् । अत्र विलम्बोपस्थितिकत्वं बहिरङ्गत्वम्, तथा शीघ्रोपस्थितिकत्वमन्तरङ्गत्वमिति बोध्यम् । संस्कारं–सौरमादिरूपम् । इति–इति हेतौ । पूर्वमिति–कृत्यप्रत्ययादित्यादि । विशेष्येति–तत्पदान्वयेत्यर्थः । प्रतिघात इति–धर्मे यतुषज्यते । इन्द्रियनियमासामर्थ्यं–इन्द्रियनिग्रहाशक्तिजनितदुःख ।

उद्द्योते–ईदृश–भातयोरेकनियामक एकनिषेधक । इत्येव–इत्यनेनैव । नियमे इति शेषः । अन्यार्थे–लोके वेदे चेत्यर्थे । अन्यशब्द प्रयोगे–लौकिकवैदिकेष्विति शब्दप्रयोगे । लौकिकवैदिकेष्विति शब्दस्येति शेषः । अवयवे इति–एकदेशे दृष्टान्ते पदगते इत्याशयेनेत्यादि । तत्रेति–अवयवावयविनो विभागारोपे तत्र भत्र इत्यादिव्यवहारप्रयोजको नेत्यर्थः । प्रधानेतरयोर्यत्र द्रव्यस्य क्रियायोः पृथक् । शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥ प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते । यदा गुणे तदा तद्वदनुक्तापि प्रतीयते । इति हरिकारिकानुसारेणाह–ननु प्रधानक्रियेति । प्रधानक्रियेत्यर्थः । शक्ते–कर्मत्वशक्तेः । गुणक्रियेति–गौणप्रतिपादनक्रियेत्यर्थः । एतत्–ग्राममित्यत्र द्वितीयाविधानम् । गुणशक्तेः–गुणक्रियानिरूपितशक्तेः । अभिमानादिति–तथा च प्रकृते शक्यमित्यत्र इदं तत्त्वानिरूपितविषयकत्वियमानाकान्तत्वात् न ग्राममित्यत्र द्वितीयाऽनुपपत्तिरिति भावः । अभिमानपदेन तत्राऽरुचिं सूचनायाह–वस्तुत इति । इदम्–ग्राममित्यत्र द्वितीयाविधानम् । तदिति–इत्युक्तमित्यर्थः । तेषां–गवादीनाम् । लौकिकदृष्टान्ते एकनिषेधेन परान्यनुज्ञया, दार्ष्टान्तिके एकविधिनेतरनिषेधस्य सत्त्वात्तयोः सर्वथा दृष्टान्तदार्ष्टान्तिकभावासम्भवादाह–अंशेनेति । वैदिकदृष्टान्ते दार्ष्टान्तिके चैकविधिनेतरनिषेधस्य सत्त्वादाह–सर्वांशेनेति । केचित्तु लौकिकदृष्टान्ते परदारगमने अधर्मः, स्वभार्यागमने अधर्माभावः, दार्ष्टान्तिके साधुशब्दप्रयोगे धर्मः, असाधुशब्दप्रयोगे अधर्म इति दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साम्याभावादाह–अंशेनेति । वैदिकदृष्टान्ते पयसा वर्तने धर्मोऽन्यथा अधर्म इति तयोः सर्वथा साम्यसत्त्वादाह–सर्वांशेनेति । इति वदन्ति ॥

(भाष्यम्)

वेदे खल्वपि–"पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्यः" इत्युच्यते । व्रतं च नामाभ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते ।

तथा–"बैल्वः खादिरो वा यूपः स्यात्" इत्युच्यते । यूपश्च नाम पश्वनुबन्धार्थमुपादीयते । शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम् । तत्र नियमः क्रियते ।

तथा "अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते–भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम्" इति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति । तत्र च नियमः क्रियते–एवं क्रियमाणमभ्युदयकारि भवतीति ॥

(प्रदीप) पयोव्रत इति । सत्यामर्थितायां पय एव व्रतयतीति नियमो न तु विधिः, अर्थित्वाभावे कारणाभावात् ॥

(उद्द्योत.) व्रतयतीति । अभ्यवहारं देनोनयत्ये इत्यर्थः ॥ भाष्ये उच्छ्रित्यानुच्छ्रित्य वेति । मन्त्रव्यानुदय वेत्यर्थः । नियमस्य नियन्य वत्यर्थ इत्यन्ये ॥

(तत्त्वालोक) भाष्ये–खल्वपीति निपातसमुदायो निश्चयार्थक । पय इति–क्षीरेत्यर्थः । आमिक्षेति–दध्यादिसम्बन्धयुक्तनवदुग्धपरिणामभूतवस्त्वित्यर्थः । ननु किं व्रतपदाभिधेयमित्यत आह–व्रतमिति । नामेति–यद् भवति यदिति शेषः । शक्यमिति–अनेन भावार्थकप्रत्ययान्तेनान्वितस्य व्रतयितुमित्यस्य शालिमांसादीनामित्यत्रान्वयाद्व कथमनुपपत्ति, न वा स्वादुमि णमुलित्यत्रत्यसिद्धान्तविरोध इति भावः । अनेन–ब्राह्मणादिना । तत्र–अभ्यवहारनियमे

देयेषु । दृष्टान्तान्तरमाह—तथेति । ननु को यूपशब्दवाच्य इत्यत आह—यूप इति । नामेति—स भवति यदीति शेषः । शास्त्यमिति—अत्र पूर्ववत् सर्वं बोध्यम् । अनेन—यूपलक्षकेन । तत्र—काष्ठेषु । पुनः दृष्टान्तान्तरमाह—तथेति । अधिश्रित्य—प्रस्थाप्य । केन मन्त्रेणेत्यत आह—भृगूणामिति । इति—इत्यनेन मन्त्रेण । सन्तापयति—सन्तापयितुं शक्नोति । तत्र—अभिमन्त्रितानभिमन्त्रितयोः । नियमः—अभिमन्त्रितमेव सन्ताप्यमित्याकारः । कुत इत्यत आह—एवमिति । अभिमन्त्रितस्य सन्तापनमित्यर्थः ॥

प्रदीपे—अर्थितायाः—अभ्यवहारार्थितायाः । "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति" इत्यनुसारेण अभ्यवहरणक्रियासाधनत्वस्य सर्वेषामपि द्रव्याणां प्राप्तिपक्षे अप्राप्तस्य पयसः प्रापकत्वात् "पयोव्रतो ब्राह्मणः" इत्यादिविधेः नियमविधित्वं, न त्वपूर्वविधित्वं पयसः सर्वथा अप्राप्तेरभावादित्याशयेनाह—नियम इति । नियमविधिरित्यर्थः । अथ—"पयोव्रतो ब्राह्मणः" इत्यादि । विधिः—अपूर्वविधिः । ननु अभ्यवहारार्थित्वाभावे कस्यापि प्राप्तेरभावात् सर्वेषां पयस इव पयसः प्रापकस्य अस्यापूर्वविधित्वमेव कुतो नेत्यत आह—अर्थित्वाभावे इति । अभ्यवहारार्थित्वाभावे इत्यर्थः ।

उद्द्योते—सन्तर्पयाः सन्तर्पय वा—शक्यानि संस्कृत्य नष्टस्य वा । निखन्येति—भूमावित्यादि ।

(दार्ष्टान्तिक उपसंहारभाष्यम्)

एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते—शब्देनैवार्थोऽभिधेयो नापशब्देनेति ॥ एवं क्रियमाणमभ्युदयकारि भवतीति ॥

(प्रदीप) समानायामिति । यद्यपि साक्षादपभ्रंशा न वाचकास्तथापि स्मर्यमाणसाधुशब्दव्यवधानेनार्थं प्रत्याययन्ति, कैश्चित्त्वपभ्रंशाः परम्परया निरूढिमागताः साधुशब्दानस्मारयन्त एवार्थं प्रत्याययन्ति ॥ अन्ये तु मन्यन्ते—साधुशब्दवदपभ्रंशा अपि साक्षादर्थस्य वाचका इति ॥

(उद्द्योत) ननु अपभ्रंशा न वाचकाः, वाच्यप्रतीतिस्तु परम्परया कल्प्यमानशक्तेर्निरूढलक्षणयेव कल्पनात् । तदनुसारेण चापभ्रंशानां साधुस्मरणेन बोधकत्वेऽपि च समानायामित्यनुपपन्नमिति शङ्कते—यद्यपीति ॥ तथापीति । एवं च वाचकत्वाभावेऽप्यर्थप्रत्यायकत्वसाधर्म्येण समानायामित्युक्तम् ॥ निरूढिमागता इति । ते च शक्तिभ्रमेण बोधका इति भावः ॥ शक्तिभ्रमस्वरूपम्—यत्र क्वचिद् गावीति प्रयुक्ते गौरिति साधुस्मरणात् प्रयोज्यस्य बोधेऽपि तटस्थस्य गावीशब्दादेवायं बोध इति भ्रमस्तन्मूलकं तेषामपि भ्रम इति । वस्तुतो विनिगमनाविरहाद् भाषाशब्देष्वपि शक्तिरेवेति यद्—अन्ये इतीति । साधुत्वं तु शब्दानां धर्मसाधनतावच्छेदकवैजात्यमेव । यद्यपि साधूनेव भाषेतेति न श्रूयते, तथापि फलनिर्देशवाक्ये तन्निर्देशादेवेदृशविधिः कल्प्यते । तत्र च साधव एव शब्दाः प्रयोज्या इति व्याकरणेन निष्पन्नानां द्वारा शास्त्रेण धर्मनियमो विधीयत इति बोध्यम् ॥ शब्देनैवेति । साधुनैवेत्यर्थः ॥ एवं क्रियमाणमिति । शब्दज्ञानपूर्वकमुच्चार्यमाणमित्यर्थः ॥

इति शब्दस्य धर्मनियामकाधिकरणम् ॥

—।—

(तत्त्वालोक) भाष्ये—दृष्टान्तमुक्त्वा दार्ष्टान्तिके योजयति—एवमिति । समानायामिति—शब्देन चापशब्देन च समानायाम् । अर्थावगताविति—अर्थस्य ज्ञाने सत्यपीत्यर्थः । नियमाकारमाह—शब्देनेति । कुत एवमित्यत आह—एवमिति । इति—इति हेतोः ।

प्रदीपे—साक्षादिति—अपभ्रंशाः साक्षाद्वाचका नेत्यन्वयः । अपभ्रंशाः—अपभ्रंशशब्दाः । शक्ता इति शेषः । एवमग्रेऽपि । वाचकाः—अर्थबोधकाः । प्रत्याययन्ति—तथापीति । गावी अपभ्रंशशब्दा इति शेषः । परम्परया—प्रयोगपरम्परया । निरूढिम्—अर्थवाचकतया लोकप्रसिद्धिम् । आगता—प्राप्ता ।

उद्द्योते—वाच्यप्रतीतीति वाच्यार्थप्रतीतिरित्यर्थः । कल्प्यमानशक्ते—कल्प्यमानायाः शक्तेः । संस्कृतेषु—साधुशब्देषु । तदिति—शक्तिकल्पनमित्यर्थः । साधुस्मरणेन—साधुशब्दस्मारणेन । इति—इत्याशयेन । एवञ्च—शक्ते साधुशब्देष्वेव कल्पने च । अपभ्रंशशब्दानामिति शेषः । ते च—अपभ्रंशशब्दाश्च । शक्ता इति शेषः । ननु कथं शक्तिभ्रम इत्यत आह—शक्तिभ्रम इति । इत्थम्—अनेन प्रकारेण । प्रकारमेवाह—केनचिदिति । अशिक्षितेनेति शेषः । प्रयुक्ते इति—उच्चरितेनेति शेषः । साधुस्मरणात्—साधुशब्दस्मरणात् । प्रयोज्यस्येति—बुधस्येति शेषः । तटस्थस्येति—अशिक्षितस्येति शेषः । अयं भ्रम इत्यनेनान्वयः । अस्य—प्रयोज्यबुद्धस्य । तन्मूलकः—शक्तिभ्रममूलकः । भ्रान्तस्य शक्तिभ्रमयोगात् अशिक्षितानामिति शेषः । भ्रमः—शक्तिभ्रमः । भाषाशब्देषु—अपभ्रंशशब्देषु । शक्तिरेवेति—अत एव 'समानायामि'ति भाष्यस्य, साधुशब्दानामपि अश्रवणेऽर्थबोधस्य चोपपत्तिः । अन्यथा तेन तेषां साधुशब्दस्मरणासम्भवादर्थबोधो नोपपद्येतेति भावः । वैजात्यम्—धर्मकरणतावच्छेदकजातिविशेषरूपम् । श्रूयते—श्रुतिः । फलनिर्देशवाक्ये—एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवतीति वाक्ये । तन्निर्देशादेव—साधुशब्दनिर्देशादेव । ईदृशविधिः—साधून् (शब्दान्) एव भाषेतेति विधिः । तत्र—विधिवाक्ये । तद्द्वारा—साधुशब्दव्युत्पादनद्वारा । शास्त्रेण—व्याकरणशास्त्रेण । धर्मनियमः—नियमविधिः । विधीयते—उपपाद्यते । उच्चार्यमाणम्—साधुशब्दरूपम् ।

(अनुपलब्धप्रयोगसाधुशब्दसाधकशास्त्रसार्थक्याधिकरणम्)

(२ आक्षेपवार्तिकम् ॥ १ ॥)

॥ * ॥ अस्त्यप्रयुक्तः ॥ * ॥

(भाष्यम्)

सन्ति वै शब्दा अप्रयुक्ताः । तद्यथा—ऊष, तेर, चक्र, पेचेति ॥

किमतो यत्सन्त्यप्रयुक्ताः ? ॥

प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति । य इदानीमप्रयुक्ता नामी साधवः स्युः ॥

(प्रदीप) अस्त्यप्रयुक्त इति । प्रयोगमूलत्वाच्छब्दानां प्रयुक्तानामन्वाख्यानं शास्त्रस्येति भावः ॥

(उद्द्योत) अस्त्यप्रयुक्त इत्यादि प्रयोजनं शङ्कते—प्रयोगमूलत्वादिति । लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इत्युक्तं न प्रयुक्तेषु शब्देषु अप्रयुक्तानां साधुत्वबोधनेन तेषु धर्मः प्रयुक्तानामधर्म इत्यर्थकं सूचितम् । एवं चानुपलभ्यमानप्रयोगाणामनुमानं साधुत्वस्येति भावः ॥ वार्तिकेऽस्तीत्यनेन समुदायैर्लक्ष्यैरिति बोध्यम् ॥ भाष्ये किमत इति । अप्रयुक्तसत्त्वे नास्माकं किमपि, साधुत्वाभावात् व्याकरण

स्येत्यर्थः ॥ उक्तम्—प्रयोगादिति । तथा चाप्रयोगात्साधुत्वानुमानमिति भावः ॥

(तत्त्वालोक) भाष्ये—ननु यदि प्रयुक्तानामिदमन्वाख्यानं तर्हि किमर्थमप्रयुक्ता अपि ऊष, तेर, चक्र, पेचेत्यादयो येन व्युत्पाद्यन्ते इत्याशयेनाक्षिपति—अस्त्यप्रयुक्त इति । अत्र वार्तिके ... मिप्रायमेकवचनमित्याशयेन व्याचष्टे—सन्तीति । वै इति निश्चये । दिग्दर्शनाय कतिपयानप्रयुक्तशब्दानुदाहरति—तद्यथेति । अनन्तु राशय तन्मुखादेवावगन्तु तस्य शङ्कते—किमत इति । सन्त्यप्रयुक्ता (शब्दा इति) यद् (उच्यते) अतः किमेतद्वद । अप्रयुक्तशब्दसत्तया का क्षतिरिति शङ्काशयः । आक्षेपकस्याशयमाह प्रयोगादिति । तुल्यप्रयोगादित्यर्थः । हि—यतः । ये—शब्दाः ।

प्रदीपे—ननु "अस्त्यप्रयुक्त" इत्यादि "तन्नामि" इत्यन्तस्य प्रकृतानुपयोगादसम्बद्धतया कथमुक्तेऽयमित्यत आह—प्रयोगेति । प्रयोग शिष्टप्रयोग मूलं निर्माणनिदानं यस्या इति व्युत्पत्तिः अस्या—व्याकरणाख्यायाः । सकललक्ष्याणि साक्षात्कृत्य तदनुसारेण असम्भवाव्याप्त्यतिव्याप्तिदोषरहितलक्षणनिर्माता लक्ष्यैकचक्षुष्कः । तथा निजरचितस्य परनिर्मितस्य वा लक्षणस्यानुसारेण लक्ष्यव्यवस्थापक लक्षणैकचक्षुष्कः । तयोः लक्ष्यैकचक्षुष्कस्यैव श्रेष्ठताभ्युपगच्छन्ति महाजनाः । अत पाणिनेः लक्ष्यैकचक्षुष्कताबोधनाय "पाणिनिः शिष्टप्रयुक्तानि सकललक्ष्याणि स्मृत्वैव तद्दोषत्रयरहितलक्षणसमुदायात्मकं व्याकरणमरीरचदि"ति सूचयितुमेव शास्त्रस्येत्थ महाह—स्मृतेरिति । प्रामाण्यमत इति शेषः । अप्रयुक्तानामपि अप्रयुक्तशब्दानामपि । अनयेति शेषः । अप्रामाण्यमिति—अस्या निर्मूलत्वापातादित्यादि । आपद्येतेति शेषः ।

उद्द्योते—अनेन—'सिद्धे' इति वार्तिकांशेन । साध्वसाधुषु—शब्देषु । एवमग्रेऽपि । व्याकरणशास्त्रद्वारेति शेषः । तेषु—प्रयुक्तसाधुषु । धर्मं—धर्मजनकता । तथेति शेषः । अधर्मं—अधर्महेतुता । अस्तेति ज्ञायते इति शेषः । इदं—व्याकरणस्मृते प्रयोगमूलत्वम् (शिष्टप्रयोगविषयत्वाच्छेषु साधुतानुमितौ हेतुत्वं वा प्रयोजकत्वम्)। एवञ्च—व्याकरणशास्त्रस्य प्रयोगमूलत्वात् प्रामाण्ये च । अथवा शब्दानां शिष्टप्रयोगविषयत्वात् साधुत्वानुमाने च । अप्रयुक्तानाम्—अप्रयुक्तशब्दानाम् । अप्रयोगेण—प्रयोगविषयत्वाभावेन । अनेन—व्याकरणशास्त्रेण । अप्रामाण्यमिति—व्याकरणशास्त्रस्येत्यादि । लोकव्यवहारत एव शब्दार्थसम्बन्धे सिद्धे (नित्ये) अर्थज्ञानप्रयोजनकत्वे शब्दप्रयोगे च सिद्धे वैयर्थ्याद् व्याकरणशास्त्रं धर्मनियामकमिति वार्तिकहृत । तत्र यदि व्याकरणशास्त्रेणाप्रयुक्तशब्दानामप्यन्वाख्यानं क्रियते तर्हि "विधिरत्यन्तमप्राप्ता"विति नियमानुसारेण व्याकरणशास्त्रस्यापूर्वविधित्वेन वैयर्थ्यासम्भवात्तस्य धर्मनियामकता नोपपद्येतेत्याशयेनाह—वार्तिकोक्तेति । "शास्त्रेण धर्मनियम" इत्यन्तवार्तिकोक्तस्य नियमस्यानुपपत्तिरित्यर्थः । व्याकरणशास्त्रस्याप्रयुक्तशब्दान्वाख्यानकत्वे 'लौकिकानां वैदिकानाञ्चे'ति भाष्योक्तेः तस्य साधुशब्दमात्रानुशासकतापि नोपपद्येत, अप्रयुक्तशब्दानां साधुत्वादिरूपानुपलब्धत्वात् इत्यपि बोध्यम् ॥ साधुमात्रार्थत्वात्—साधुशब्दमात्रप्रतिपादनार्थत्वात् । उत्तर—तस्य प्रत्याक्षेप्तुरुत्तरम् । असाधुत्वानुमानम्—अप्रयुक्तशब्दा असाधवः प्रयोगाविषयत्वादित्यनुमानम् ॥

(आक्षेपासङ्गतिभाष्यम्)

इदं तावद्विप्रतिषिद्धम्—यदुच्यते—'सन्ति वै शब्दा अप्रयुक्ता' इति । यदि सन्ति नाप्रयुक्ता अथाप्रयुक्ता न सन्ति, सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह—सन्ति शब्दा अप्रयुक्ता इति । कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधु स्यात् ? ॥

(प्रदीप) यथा घटादीनां विनाप्यर्थक्रियया सत्त्वं गम्यते नैवं शब्दानां, ते हि सर्वदा व्यवहाराय प्रयुज्यमानाः सन्तः सन्तीत्यवसीयन्ते इत्याह—इदमिति । कश्चेदानीमिति । उपहासवचनम् ॥

(उद्द्योत) विप्रतिषिद्धत्वमुपपादयति—यथेति । एवञ्च सत्त्वे प्रयोग आवश्यक एव, अप्रयोगे च सत्त्वमेव न स्यादिति भावः ॥ ननु लक्षणबलेन सत्त्वं केनचित्प्रयोगाच्चाप्रयुक्तत्वमिति न विरोधोऽत आह भाष्ये—प्रयुञ्जान एवेति ॥ ननु मया प्रयुक्तश्चेत्, तत्र दोषं हासमाह—कश्चेदानीमिति । त्वमेव प्रयोगं कृत्वा सन्ति चाप्रयुक्ता इत्याशास्यानां शब्दानां प्रयोगे साधुयोग्यः स्यादित्यर्थः । त्वत्प्रयोगेणैव प्रयुक्तत्वात् मे प्रयुक्तत्वे इति विरुद्धेति भावः ॥

(तत्त्वालोक) भाष्ये—तन्मते पूर्वोक्तं दूषयन्नाह—इदमिति । वाक्यालङ्कारमाह—तावदिति । परस्परमिति शेषः । इदमित्यनेन निर्देश्यमाह—यदिति । विप्रतिषिद्धत्वमुपपादयति—यदीति । इतीति—इति परस्परमिति शेषः । प्रयुञ्जान इति—ऊष, तेरेत्यादिशब्दानित्यादि वचनक्रममाह—सन्तीति । भवज्जातीयक—भवत्सदृश ।

प्रदीपे—अर्थक्रियया—उदकानयनादिव्यापारेण । गम्यते—ज्ञायते । नैवं—न तथा अर्थक्रियया विनापि सत्ता ज्ञायते । कुत इत्यत्र आह—ते इति । शब्दा इत्यर्थः । हि—यत । सन्तः—सन्त एव । अवसीयन्ते—निर्णीयन्ते ।

उद्द्योते—एवञ्च—शब्दसत्तायाः शब्दप्रयोगाधीनत्वे च । निमित्तार्थकमत्र यत्नमाह—सत्त्वे इति । शब्दानामित्यादि । प्रयोग इति, अप्रयोगे इति, सत्त्वमिति च—तेषामित्यादि । लक्षणबलेन—व्युत्पादकसूत्रादिबलेन । शब्दानामिति शेषः । इति—इत शेषो । अत—इत्यत आह । यथेति—औषधादिशब्द इति शेषः । चेत् किमिति—यदि (तर्हि तेन) किम् ? का क्षतिरित्यर्थः । तत्र—तर्हि तेन किमित्यत्र । शब्दानामित्यादिभाष्यस्यार्थमाह—त्वयमेवेति ॥

(आक्षेपासङ्गतिबाधकभाष्यम्)

नैतद्विप्रतिषिद्धम् । सन्तीति तावद्ब्रूमः । यदेताञ्छास्त्रविदः शास्त्रेणानुविदधते ॥ अप्रयुक्ता इति ब्रूमः । यल्लोकेऽप्रयुक्ता इति ॥ यदप्युच्यते—कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति । न ब्रूमोऽस्माभिरप्रयुक्ता इति ॥

किं तर्हि ? ॥

लोकेऽप्रयुक्ता इति ॥

(प्रदीप) उक्त तु शास्त्रदृष्ट्या प्रकृतिप्रत्ययादिविभागानुमितसत्त्वा, व्यवहारे तु न दृश्यन्त इत्युक्तम् ॥

(तत्त्वालोक) भाष्ये—प्रश्नकर्ता स्ववाक्ये आपादितविरोधं निराकरोति—नैतदिति । न "सन्ति वै शब्दा अप्रयुक्ता" इतीदं परस्परविरुद्धमित्यर्थः । कुतो न तन्मिथो विरुद्धमित्यत आह—सन्तीति । एते शब्दा इत्यादि । तावत्—प्रथमम् । कुत सत्ता ज्ञायेत आह—यदिति । यत इत्यर्थः । एतान्—ऊषादिशब्दान् । शास्त्रविदः—वैयाकरणाः । शास्त्रेण—व्याकरणेन । अनुविदधते—व्युत्पादयन्ति । अत इति शेषः । अप्रयुक्ता इति—एतत् प्रतिजानीम इत्यादि । कथं ज्ञायते एतेऽप्रयुक्ता इत्यत

आह-यदिति। यत इत्यर्थः। लोके इति-अर्थबोधनार्थे इति शेषः। इतीति-अत इति शेषः। एवं विरोधं निरस्योपहासं परिहर्तुमनुवदति-यद्यपीति। इतीति-उपस्य किञ्चित्करत्वेनेति शेषः। कुत एवमित्यत आह-नेति। यत इत्यादि। इतीति-मम इति शेषः। मत्प्रयोगो न लोकप्रयोग इति भावः।

प्रदीपे-उत्तरन्तु-नैतदित्युत्तरन्तु। यद्यपीति शेषः। शास्त्रदृष्ट्या-व्याकरणशास्त्रदृष्ट्या। प्रकृतीति-ऊषेत्यादिष्वित्यादि। सत्त्वा इति-ऊषेत्यादय, तथापि इति शेषः। व्यवहारे तु-लोकव्यवहारे तु। ते इति शेषः। इत्युक्त-इत्याशयेनोक्तम्।

(आक्षेपभाष्यम्)

ननु च भवानप्यभ्यन्तरो लोके॥

(तत्त्वालोकः) भाष्ये-नन्वित्यादीनां लोकव्यवहाराविषयता भवदुक्ता न युक्ता, तेषां लोकान्तर्भूतभवादृशव्युत्पन्नव्यक्तिव्यवहारविषयत्वादित्याशयेन आक्षेप्तु लोकान्तर्गततामुपपादयति-नन्विति। निश्चयेनेत्यर्थः। च एव। भवान्-आक्षेपकः। अपिनाऽन्यसंग्रहः। अभ्यन्तरः-अन्तर्भूतः।

(समाधानभाष्यम्)

अभ्यन्तरोऽहं लोके, न त्वहं लोकः॥

(प्रदीपः) न त्वहं लोक इति। यथा लोकोऽर्थावगमाय शब्दान् प्रयुङ्क्ते नैवं मयैतेऽर्थे प्रयुक्ता अपि तु स्वरूपपदार्थका इत्यर्थः॥

(उद्द्योतः) ननु लोकान्तर्भूतस्य न त्वहं लोक इति वचो विरुद्धमत आह—यथेति। अर्थबोधाय शब्दान् प्रयुञ्जानो हि मम लोकत्वेनाभिमत इत्यर्थः॥

(तत्त्वालोकः) भाष्ये-उत्तरयति पूर्वपक्षी-अभ्यन्तर इति।

प्रदीपे-अर्थावगमाय-अर्थज्ञापनाय। एवं-तथा। एते-ऊषेत्यादिशब्दाः। अर्थे-अर्थबोधनाय। स्वरूपपदार्थका इति-स्वरूपं स्वरूपमात्रं पदार्थः बोध्यः येषामिति व्युत्पत्तिः। एते मया प्रयुक्ता इति शेषः।

उद्द्योते-विरुद्धमिति-लोकान्तर्भूतस्य लोकताया दुर्निवारत्वादिति शेषः। अत-इत्यत। अर्थबोधाय-अर्थज्ञापनाय। हि-यतः। अभिमत इति-अतोऽहं न लोकः, मया स्वरूपमात्रबोधनाय प्रयुक्तानामूषेत्यादीनामर्थज्ञापनायाप्रयुक्तत्वादिति शेषः। तथा च लोकशब्दस्य रूढार्थं विहाय पारिभाषिकार्थमभिप्रेत्य लोकान्तर्भूतस्यापि न त्वहं लोक इति वचनं युक्तमेवेति भावः।

(३ आक्षेपबाधकवार्तिकम् ॥ २ ॥)

॥ ❁ ॥ अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् ॥ ❁ ॥

(भाष्यम्)

अस्त्यप्रयुक्त इति चेत्। तन्न॥ किं कारणम्?॥ अर्थे शब्दप्रयोगात्। अर्थे शब्दाः प्रयुज्यन्ते। सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते॥

(प्रदीपः) अर्थे शब्दप्रयोगादिति। अर्थसद्भावः शब्दप्रयोगे लिङ्गम्। न हि विना शब्देनार्थस्य प्रत्यायनमुपपद्यते॥

(उद्द्योतः) भाष्ये अर्थे शब्दप्रयोगादिति। अर्थविषयकज्ञानाय शब्दप्रयोगादित्यर्थः। तदाशयमाह—अर्थसद्भाव इति॥

(तत्त्वालोकः) भाष्ये—"अस्त्यप्रयुक्तः" इति वार्तिकेनेत्थापिताया आशङ्काया समाधानाय वार्तिकमेवाह—अस्त्यप्रयुक्त इति। ननूभयो वार्तिकयोः 'अस्त्यप्रयुक्त' इत्यस्य पुनरुक्तिदोषप्रसङ्ग इति चेन्न, निषेधप्रति आवश्यकनिषेध्यसमर्पणाय तदंशस्य वार्तिककारेण भाष्यकारेण वोल्लिखित इत्यभ्युपगमात्। न च पूर्वोक्तेनैव गतार्थः, तस्य दूरस्थत्वात्॥ अर्थे शब्दप्रयोगादित्यस्य व्याचष्टे—अर्थ इति। अर्थबोधनायेत्यर्थः। अर्थाभावे एषां शास्त्रेणोपदेशोऽपि नोपपद्येतेत्याशयेनाह—सन्तीति। एषाम्—ऊषेत्यादीनाम्। अर्थेष्विति—बुद्धिविषयीभूतेषु इमे इति शेषः।

प्रदीपे—अर्थसद्भावः-अर्थप्रतीतिसद्भावः। शब्दप्रयोगे-शब्दप्रयोगानुमाने। लिङ्गम्-लिङ्ग्यते ज्ञायतेऽनेनेति लिङ्गम्, हेतुः। कुत एवमित्याकाङ्क्षायामन्वयव्याप्तेः सुगमतया व्यतिरेकव्याप्तिमाह-नेति। हि-यत। शब्देनेति—प्रयुक्तेन प्रत्यक्षादिमानाभावे इति शेषः। ऊषेत्यादिशब्दा लोकप्रयोगविषया तदर्थबोधजनकत्वादित्यनुमानेन तेषु प्रयुक्तत्वे सिद्धे न तेषामप्रयुक्ततेति भावः।

(४ आक्षेपसाधकवार्तिकम् ॥ ३ ॥)

॥ ❁ ॥ अप्रयोगः प्रयोगान्यत्वात् ॥ ❁ ॥

(भाष्यम्)

अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः॥ कुतः?॥ प्रयोगान्यत्वात्। यदेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा—ऊषेत्यस्य शब्दस्यार्थे—क्व यूयमुषिताः, तेरेत्यस्यार्थे-क्व यूयं तीर्णाः, चक्रेत्यस्यार्थे—क्व यूयं कृतवन्तः। पेचेत्यस्यार्थे—क्व यूयं पक्ववन्त इति॥

(प्रदीपः) इतरोऽन्यथासिद्धतामाह—अप्रयोग इति। यतोऽन्ये तेषामर्थानां सन्ति वाचकास्ततो नैषामनुमानमुपपद्यते। यद्यप्यूषेत्यस्य उषिता इति समानार्थो न भवति परोक्षार्थविशेषस्यानवगमात्तथापि तत्प्रत्यायनाय पदान्तरसहितः प्रयुज्यते॥

(उद्द्योतः) भाष्ये—प्रयोगान्यत्वादिति। प्रयुज्यत इति प्रयोगः शब्दः सोऽन्यो यस्यार्थस्यास्ति तत्त्वादित्यर्थः। सर्वनाम्नां परनिपातः पूर्वनिपातप्रकरणानित्यत्वात्॥ पदान्तरसहित इति। पदान्तरं क्व यूयमिति। तत्र क्वेत्यनेन साधनाधारोक्तिः, निष्ठया भूतत्वं कर्तृत्वं च, यूयमित्यनेन मध्यमपुरुषबोध्यमात्रमनुष्यस्य चेतनत्वं बहुत्वं च, वसेः साधारणमस्य धात्वर्थकर्मकेऽपि निष्ठायाः कर्तरि क्तः॥ न वस्यातेः क्रियाविशेषणको बोधोऽत्र च कर्तृविशेषणक इति कथं तिङन्तसमानार्थत्वमिति चेन्न। विषयत्वविशेषाना दरेण तदोक्तेः। न चास्यातेः क्रियाविशेष्यकत्वे पश्यति मृगो धावतीति भूवादिसूत्रस्थभाष्यप्रयोगविरोधः, अतो धनागमा कर्तृकस्य तदा वर्तमानत्वासङ्गतेरिति भाष्यम्। वर्तमानसामीप्ये तत्र लट् इत्याद्युक्तम्। तरति मङ्क्षु हरणे योऽधमर्णेन यजते इत्यादौ दकर्तृको धात्वर्थस्कन्धकर्तृत्वमिति बोधः। अत एव हरणे नपुंसके इति सूत्रे रमते ब्राह्मणकुलमिति क्रियाप्रधानमिति भाष्ये उक्तम्॥

(तत्त्वालोकः) भाष्ये—प्रयोग शब्दस्य व्याचष्टे—अप्रयोग इति। खल्वपीति निपातसमुदायोऽवधारणार्थकः। एषाम्—ऊषेत्यादीनाम्। न्याय्य—उचितः। प्रयोगान्यत्वादित्यस्य व्याचष्टे—यदिति। यस्मादित्यर्थः। एषाम्—ऊषेत्यादीनाम्। अर्थे—अर्थबोधनाय। एवम् येऽपि। प्रयुञ्जते इति—विद्वांसो नेमान् शब्दानित्यर्थः। ननु

क्वैव दृष्टमित्यत आह—**तद्यथेति** । **इतीति**-प्रयुज्यते इति शेष ।

प्रदीपे—**इतर इति**-तादिप्रविवाद्यन्यस्तटस्थ इत्यर्थ । ऊषेत्याद्यर्थप्रतीतेरिति शेष । **अन्यथासिद्धतामिति**-अन्येन प्रकारेण (ऊषेत्यादिशब्दातिरिक्तोषिता इत्यादिशब्दप्रयोगेण) उपपन्नतामित्यर्थ । तथा चोषेत्यादिशब्दानामर्थप्रतीतिनिमित्तभावात् प्रयोगसद्भावानुमान नोपपद्यते इति भाव । **अन्ये**-उषिता इत्यादय । **तेषाम्**-ऊषेत्यादिशब्दबोध्यानाम् । **एषाम्**-ऊषेत्यादीनाम् । प्रयोगस्येति शेष । तथा च ऊषेत्यादिशब्दा लोकप्रयोगविषयत्वाभाववन्त तदर्थबोधनप्रयोजनकप्रयोगविषयशब्दत्वावच्छिन्नप्रतियोगिताकभेदानुयोगित्वादित्यनुमानेन सत्प्रतिपक्षसत्त्वादुक्तानुमानानुपपत्तिरिति भाव ॥ कुत इत्यत आह—**परोक्षत्वादेर्विशेषस्येति** । ऊषेत्यनेनावगम्यस्य उषितेत्यनेनेति शेष । **तत्प्रत्यायनाय**-परोक्षत्वादिविशेषबोधनाय । **सहित इति**-उषिता इति भाष्यकृतेति शेष ।

उद्द्योते—**अन्य**-ऊषेत्यादितो भिन्न (उषिता इत्यादि) । बोधकतयेति शेष । **तत्त्वादिति**-तदर्थवत्त्वादित्यर्थ । ऊषेत्यादीनामित्यादि । ननु सर्वस्यैव इत्यत्रेवात्रापि "सर्वनामसंख्ययोरुपसंख्यानमि"ति वार्तिकेन सर्वनाम्न पूर्वनिपातेन अन्यप्रयोगत्वादित्युचितमित्यत आह—**सर्वनाम्नामिति** । **पूर्वनिपातेति**-"तपर"स्तत्कालस्येत्यादिनिर्देशेनेत्यादि । **तत्र**—पदान्तरसहितोषितेत्यादिघटकानां मध्ये । **साधनपारोक्ष्य**-वासाद्यधिकरणपरोक्षत्वम् । प्रयुरित्यादि । बोध्यते इति शेष । एवमग्रेऽपि । **निष्ठया**-उषितादिघटकक्तादिना । **मध्यमेति**-ऊषेत्यादिघटकेत्यादि । **आभिमुख्यमिति**-निवसिष्यदेरित्यादि । एवमग्रेऽपि । ननु वसते तरतेश्च कथ कर्तरि क्तप्रत्यय इत्यत आह—**वसेरिति** । **गत्यर्थाकर्मकेत्यत्र**-गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति सूत्रे । केचित्तु आख्यातार्थविशेष्यक एव शाब्दबोधो भवति, न तु धात्वर्थविशेष्यक इति वदन्ति, तन्न युक्तमित्याशयेनाह **नन्वाख्याते इति** । तिङन्ते ऊषेत्यादावित्यर्थ । **अत्र**-कृदन्त उषिता इत्यादौ । **च**-तु । **इति**-इति स्थितौ । **कथमिति**-पदान्तरसहितस्यापि उषिता इत्यादेरिति शेष । **लिङन्तेति**-लिङन्तोषेत्यादावित्यर्थ । **विषयताविशेषेति**-प्रकारताविशेष्यतादिरूपेत्यादि । विषयतासामान्यादरेणेति भाव । **तथोक्तेः**-तयो समानार्थत्वोक्ते । तथा च तत्समानविषयकत्व तत्समानार्थत्व, न तु तत्समानविशेष्यकत्वादिमत्त्वमिति भाव । **बोधे इति**-अभ्युपगते सतीति शेष । **सत्तायाः**-विशेष्यभूतायाः । **वर्त्तमानेति**-वर्त्तमानसामीप्ये वर्त्तमानवद्वेति सूत्रेणेत्यादि । **तत्र**-भवतीत्यत्र । आख्याते क्रियाविशेष्यकबोध एव भवतीत्यत्रोदाहरणमाह—**तरतीति** । **अत एव**-आख्याते क्रियाविशेष्यकबोधस्य स्वीकारादेव ।

(९ सिद्धान्तसमानवार्तिकम् ॥ ४ ॥)

॥ * ॥ अप्रयुक्ते दीर्घसत्रवत् ॥ * ॥

(भाष्यम्)

यद्यप्यप्रयुक्ता अवश्य दीर्घसत्रवल्लक्षणेनानुविधेया । तद्यथा दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च । न चाद्यत्वे कश्चिदप्याहरति । केवलमृषिसम्प्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ॥

(प्रदीप) सम्प्रत्यप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वादनुशासन कर्तव्यमित्याह—**अप्रयुक्त इति** ॥ **ऋषिसम्प्रदाय इति** । वेदाध्ययनमित्यर्थ ॥

(**उद्योत**) नन्वप्रयुक्तानुशासने निर्मूलत्वाच्छास्त्रस्याप्रामाण्य स्यादत आह—**सम्प्रतीति** । पाणिनेर्व्याकरणप्रणयनकाले इत्यर्थ । पूर्वप्रयोगसत्ता च व्याकरणप्रणयनादेवानुमीयत इति भाव । इदमपि यत्र भाष्यवार्तिककाराभ्यामप्रयुक्तत्व नोक्त तदभिप्रायकमनुमान बोध्यम् ॥ **वार्षशतिकानीति** । वर्षशब्दो दिवसपर । यथाश्रुत एव वा ॥ **आहरति** । साम यमावादिति भाव ॥ ननु सत्राणा बहुयजमानकानामृषिभिर्वसिष्ठादिभि सम्प्रदीयमानत्वाभावदूषिमप्रदाय इत्ययुक्तमत आह—**वेदेति** ॥ भाष्ये कृत्वेत्यनन्तरमधीयते इति शेष । याज्ञिकाश्च कल्पसूत्रेणान्वाचक्षत इत्यर्थ । अत्र सत्राणा कर्मत्वम् ॥

(**तत्त्वालोक**) भाष्ये-**यद्यपीति**-अधुना लोके ऊषेत्यादय इति शेष । **अवश्यमिति**-तथापीत्यादि । ते इति शेष । **लक्षणेन**-व्याकरणशास्त्रसूत्रेण । **अनुविधेया**-संस्कार्या । दीर्घसत्रवदिति दृष्टान्तमुपपादयति **तद्यथेति** । **सहस्रिकाणि चेति**-भवन्ति, अतो यद्यपीति शेष । **आहरति**-अनुतिष्ठति । तथापीति शेष । **शास्त्रेण**-कल्पसूत्रेण । **अनुविदधते**-अन्वाचक्षते ।

प्रदीपे—**सम्प्रतीति**-लोकैरिति शेष । **अपीति**-ऊषेत्यादिशब्दानामिति शेष । **पूर्वमिति**-तैरिति शेष । **प्रयुक्तत्वादिति**-तेषाम् व्याकरणशास्त्रेणेति शेष । **इत्याह**-इत्याशयेनाह ।

उद्द्योते—व्याकरणशास्त्रस्य प्रयोगमूलत्वादेव प्रामाण्यमित्याशयेनाह—**अप्रयुक्तानुशासने इति** । सर्वथा अप्रयुक्ताना शब्दानामनुशासने इत्यर्थ । व्याकरणशास्त्रेण कृते सतीति शेष । **निर्मूलत्वात्**-निर्मूलत्वापातात् । **शास्त्रस्य**-व्याकरणशास्त्रस्य । ननु कथ ज्ञायते ते पूर्व प्रयुक्ता इतीयत आह-**पूर्वप्रयोगेति** । विमतशब्दानामित्यादि । **व्याकरणप्रणयनात्**-दिव्यदृष्टिमहर्षिपाणिनिकर्तृकतद्विषयकव्युत्पादनकरणात् । **अनुमीयते**-विमतशब्दा शिष्टलोककृतपूर्वप्रयोगविषया तादृशपाणिनिरचितव्याकरणशास्त्रानुशिष्टत्वात् यन्नैव तन्नैव यथा अतासुशब्द इत्यनुमीयते । ननु भाष्यवार्तिककारनिर्णीताप्रयुक्तताकशब्दाना पाणिनीयव्याकरणशास्त्रेणानुशासने कृते तदप्रामाण्य दुर्वारमेव, यथोत्तर मुनीना प्रामाण्यमिति नियमादित्यत आह—**इदमिति** । **यत्रेति**-शब्दे इति शेष । **उक्त**-सिद्धान्तितम् । तथा च पक्षे भाष्यवार्तिककारानिर्णीताप्रयुक्तताकत्व विशेषणीयमिति भाव । "आदित्यो वा सर्व ऋतव , स यदैवोदेत्यथ वसन्तो, यदा सङ्गवोऽथ ग्रीष्मो, यदा मध्यन्दिनोऽथ वर्षा, यदाऽपराह्णोऽथ शरद्, यदाऽस्तमेत्यथ हेमन्तशिशिरौ" इति ब्राह्मणमूलिकाया 'समा मासा अहोरात्रास्तुल्या ब्राह्मणचोदिता" इति गृह्यसङ्ग्रहोक्तेरनुसारेणाह-**दिवस इति** । जैमिनिना "सहस्रसंवत्सरं तदायुषामसम्भवान्मनुष्येषु" इति पूर्वपक्षे 'अहानि वाऽभिसंख्यत्वादि"ति सिद्धान्तिततया वार्षसहस्रिकाणीत्यत्र वर्षशब्दस्य दिवसपरताया आवश्यकता । प्रकृते तु यथाश्रुतमपि उपपत्तु शक्नोति मनुष्याणा शताधिकायुष सम्भवादित्याशयेनाह—**यथाश्रुत इति** । **सत्राणा**-दीर्घसत्राख्ययज्ञानाम् । **अधीयते इति**-द्विजा इति शेष । चेन शेषपूर्ति विनाऽपि याज्ञिका इत्यादि भाष्यस्यार्थमाह—**याज्ञिकाश्चेति** । **अत्र**-अन्वाख्याने ।

(६ सिद्धान्तसमानवार्तिकम् ॥ ५ ॥)

॥ * ॥ सर्वे देशान्तरे ॥ * ॥

(भाष्यम्)

सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते ॥

(प्रदीप) **सर्व इति** । इदमत्र तात्पर्यम्—यस्य कस्यचिद्वचनात्प्रयोगाप्रयोगौ न व्यवतिष्ठेते, अपितु शिष्टानामेव वचनात् ॥

प्रयुज्यते, तथैकस्मिन्नेवार्थे देशभेदेन विभिन्नधातु विभिन्नशब्दश्च प्रयुज्यते, अत एव सकलशब्दप्रयोगदेशाननालोच्य ऊषेत्यादिशब्दा अप्रयुक्ता इति कथनं न युक्तमित्याशयेनाह-**एतस्मिंश्चेति**। एतद्वी पवसुमत्याद्वावित्यर्थ । **प्रयोगविषये**-प्रयोगदेशे । **नियतविषयाः**—नियतार्था । उदाहरति-**तद्यथेति**। **गतिकर्मा**-गत्यर्थक । **एत**—शवति। **सुराष्ट्रेष्विति**-भाषितो भवतीत्यनुषज्यते । एवमग्रेऽपि। **गमि**-गच्छति। गत्यर्थ इत्यादि । **प्राच्येष्विति**-भाषिता भवतीति शेष । **उदीच्येष्विति**-लवनार्थे भाषित भवतीति शेषः।

प्रदीपे—**तत्र**-तत्रार्थे।

उद्द्योते—**तत्र**-लवने । **उदीच्या इति**-प्रयुञ्जते इति शेष ।

ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते ॥ क ? ॥ वेदे । तद्यथा—"सप्तास्ये रेवतीरेवदूष, यद्वो रेवतीरेवत्या तमूष, यन्मे नरः श्रुत्य ब्रह्म चक्र, यत्रा नश्चक्रा जरसं तनूनाम्" इति॥

(तत्त्वालोकः) भाष्ये-ननु यदि मया आक्षेपकेन सकलशब्दप्रयोगदेशानालोचितुमशक्तेन भूयते, तर्हि भवतैव समाधात्रा आत्मानं सकलशब्दप्रयोगदेशालोचकम्मन्यमानेनोच्यताम् ते प्रयुक्ता अप्रयुक्ता वेतीत्यत आह—**ये चेति**। **एते**-ऊषेत्यादय । **भवतः**-आक्षेपकस्य। **दृश्यते इति**-मया समाधात्रेति शेष । पृच्छत्याक्षेप्ता-**क्वेति**। उत्तरयति समाधाता-**वेदे इति**। उदाहरति **तद्यथेति**।

इति शास्त्ररचनावद्यत्वनिरूपणम् ॥

(अथ शब्दज्ञानस्य धर्मजनकताधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनः-शब्दस्य ज्ञाने धर्मः, आहोस्वित्प्रयोगे ? ॥

(प्रदीप.) किं पुनरिति । "**एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति**" इति श्रुति तत्र किं सम्यग् ज्ञात कामधुग् भवति सुप्रयोगाच्च सम्यग्ज्ञातत्वानुमानमित्यर्थ, आहोस्वित्सुप्रयुक्त कामधुग् भवति सुप्रयुक्तत्व तु सम्यग्ज्ञानादित्यर्थ इति प्रश्न ॥

(उद्द्योत) वार्तिकोक्तो धर्मनियम श्रुतिसिद्धस्तस्यामुभयो श्रवणात्प्रश्न इत्याह—**एकः शब्द इति**। तत्र **यदैकस्मादपूर्वं तदितरत्तदर्थमिति** (पू० मी०)न्यायाद् द्वयो साम्येन फलसम्बन्धाभावाद्विकल्पायोगन्नैकस्य प्राधान्यमपरस्याङ्गत्व कल्प्यम् ॥ तत्र **प्रथम वा नियम्येतेति** (पू० मी० ११।२।४२) न्यायाश्रयेणाह-**तत्र किमिति**॥

सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते ।
पराङ्ग चात्मविज्ञानादन्यत्रेत्यवधार्यताम् ॥

इति न्यायेन ज्ञानस्य शेषशेषतया धर्महेतुत्वाभावात् प्रयोगाङ्गतया दृष्टार्थत्वाच्च प्रयोगस्य फल प्रति सन्निहितत्वाच्चाह-**आहोस्विदिति** ॥

(तत्त्वा०) भाष्ये-**आहोस्वित्**—अथवा । **प्रयोगे**-शब्दस्य प्रयोग धर्म ।

प्रदीपे—**सम्यग्ज्ञातः**-सम्यक्त्वेन प्रकृतिप्रत्ययादिविभागतोऽर्थविशेषपरतया ज्ञात । प्रकृत्यादिविभागादीना यथेच्छ कल्पनीयतया व्यवच्छेदायाह-**शास्त्रान्वित इति** । शास्त्रेण व्याकरणशास्त्राध्ययनजनितज्ञानविषयप्रकृत्यादिविभागादिना अन्वित सम्बद्ध इति व्युत्पत्ति । **सुप्रयुक्तः**—शिक्षाप्रतिपादितशब्दप्रयोगपद्धत्या यथास्थानप्रयत्नादि वर्णमुच्चारयता अर्थमनुसन्दधता विहितो य सम्भूतादिदोषरहित प्रयोगस्तद्विषय । **लोके**-लोके च । **कामधुक्**-(धर्म द्वारा) अभ्युदयप्रयोजक । **तत्र**-श्रुतौ । **सम्यग्ज्ञात इति**-शब्द इति शेष । **सुप्रयोगाच्चेति**-तस्येति शेष । **सम्यग्ज्ञातत्वानुमान**-सम्यग्ज्ञानत्वसाधक 'अयं शब्द एतेन सम्यग्ज्ञात एतेन सुष्ठुप्रयुज्यमानत्वादिति" अनुमानम् । **सुप्रयुक्त इति**-शब्द इति शेष । **सम्यग्ज्ञानादिति**-सम्यग्ज्ञानविषयत्वादित्यर्थ । तस्येत्यादि । **इति**—इति जिज्ञासया।

उद्द्योते-**वार्तिकोक्त**-"शास्त्रेण धर्मनियम" इति घटितवार्तिकोक्त । **श्रुतिसिद्ध**-एक शब्द इत्यादिश्रुतिप्रमाणित । **तस्यां**-श्रुतौ । **उभयो**-सम्यग्ज्ञानसुप्रयोगयो । **इत्याह**-इत्याशयेनाह । **तत्र**-श्रुतौ । **यदेति**-यदा (द्वयो) एकस्माद् अपूर्वं पुण्यं (जन्यते तदा) तदितरत् अपूर्वजनकभिन्नमपर तदर्थं अपूर्वजनकाङ्गं भवतीत्यर्थ । **द्वयोः**-सम्यग्ज्ञानसुप्रयोगयो । **फलेति**-कामधुक्पदार्थघटकेत्यादि । **तत्र**-एकस्य प्रधानतया अपरस्याङ्गतायाश्च कल्पने । **प्रथम वेति**-प्रधानतयेति शेष । **नियम्येत**-आश्रीयेत । **सर्वत्रेति**-**हि**-यत, आत्म (विषयक) विज्ञानात् अन्यत्र सर्वत्रैव विज्ञानं **संस्कारत्वेन** संस्कारजनकत्वेन **गम्यते** प्रतीयते (अत आत्मज्ञानातिरिक्त ज्ञान) **पराङ्ग** शेषाङ्ग च (भवति) इत्यवधार्यतामित्यर्थः । **ज्ञानस्य**-सम्यग्ज्ञानस्य । **शेषशेषतया**-शब्दाङ्गतया । नन्वेवं वैयर्थ्यापातात् शब्दसम्यग्ज्ञानमनुपादेय स्यादित्यत आह-**प्रयोगाङ्गतयेति**। शब्दप्रयोगद्वारेत्यर्थ । तस्येति शेष । **दृष्टार्थत्वात्**-श्रोतृनिष्ठबोधरूपदृष्टफलार्थत्वात् । **प्रयोगस्य**-सुप्रयुक्तशब्दघटकसुप्रयोगस्य । सम्यग्ज्ञानशब्दघटकसम्यग्ज्ञानापेक्षयेति शेष । **फलं**-कामधुक्पदार्थघटकफलम् । **सन्निहितत्वादिति**-तेनैव फलसम्बन्धस्यौचित्यादिति शेष ।

(प्रत्याक्षेपभाष्यम्)

कश्चात्र विशेषः ? ॥

(७ ज्ञानपक्षदूषणवार्त्तिकम् ॥ १ ॥)

॥*॥ ज्ञाने धर्म इति चेत्तथाऽधर्मः ॥*॥

(भाष्यम्)

ज्ञाने धर्म इति चेत्तथाऽधर्मोऽपि प्राप्नोति । यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति । यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः ॥

(प्रदीप.) ज्ञाने धर्म इति चेदिति । यथा श्लेष्मण प्रकोपन स्नेहद्रव्य रूक्ष तु वायोस्तथेहापि प्राप्तमिति भाव ॥

(उद्द्योतः) यथा श्लेष्मण इति । तथा धर्मजनकज्ञानविपरीतत्वात् तद्विपरीतजनकत्वेनापशब्दज्ञानादधर्मप्राप्तिरित्यर्थ ॥

(तत्त्वालोकः) भाष्ये-**अत्र**-शब्दज्ञाने धर्म इति शब्दप्रयोगे धर्म इति पक्षयोः । **धर्म इति**-भवतीति शेष । **इति चेद्**-इति (अभ्युपगम्यते) यदि । **तथा**-तर्हि । **प्राप्नोति**-आपद्यते । कुत इत्यत आह-**य इति**। **हि**-यत । व्याकरणशास्त्राध्ययने प्रवृत्तस्य परिनिष्ठितपचतीत्यादिज्ञानाय डुपचष्प्रभृत्यपशब्दज्ञानमावश्यकमित्याशयेनाह-**अपशब्दानिति**। किमेतावतेत्यत आह-**यथैवेति**। **धर्म इति**-भवेदिति शेष । एवमग्रेऽपि। **अप्यधर्मः**-अधर्मोऽपि । शब्दज्ञाने धर्म इति पक्षे सुप्रयुक्त इत्यस्य सम्यङ्निर्दिष्टार्थकतयोपपत्ति अयं शब्दोऽयमपशब्द इति ज्ञानस्य शब्दापशब्दस्वरूपनिर्देशमन्तरेणासम्भवादिति भाव ।

प्रदीपे-श्लेष्मण-कफस्य। प्रकोपन-वर्द्धकम्। स्नेहद्रव्य-स्निग्धद्रव्य (दध्यादि)। रूक्ष-स्निग्धद्रव्यविपरीतद्रव्य (भर्जिततण्डुलादि)। वायो-कफविपरीतवातस्य। प्रकोपनमित्यनुवर्त्यते।

उद्योते—तथेहापि प्राप्तमिति कैयटोक्तं व्याचष्टे-तथेति। अपशब्दज्ञानस्येति शेष। ज्ञानेति-शब्दज्ञानेत्यर्थः। तद्विपरीतेति-धर्मविपरीतेत्यर्थः। तथा चाधीतव्याकरणशास्त्रादेव धर्मजनकशब्दज्ञाने जायमाने नान्तरीयकतया अधर्मजनकापशब्दज्ञानस्यापि जायमानत्वात् तेन धर्मेण तस्याधर्मस्य क्षये सम्भवत्यपि "प्रक्षालनाद्धि पङ्कस्य दूराद् स्पर्शनं वरमि"ति न्यायेन व्याकरणशास्त्रमनुपादेयमेव स्यादिति भाव।

(अधर्माधिक्यभाष्यम्)

अथवा भूयानधर्मः प्राप्नोति। भूयांसो ह्यपशब्दा अल्पीयांसः शब्दा। एकैकस्य शब्दस्य बहवोऽपभ्रंशा। तद्यथा गौरित्यस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशा ॥

(तत्त्वालोक) भाष्ये-शब्दापेक्षया अपशब्दस्याधिक्येन धर्मापेक्षया अधिकाधर्मस्यैव प्रयोजकत्वात् मधुविषसम्पृक्तान्नमिव व्याकरणशास्त्रं हेयमेव स्यादित्याशयेनाह-अथवेति। अध्यापकनिर्दिष्टशब्दापशब्दस्वरूपज्ञानपूर्वके व्याकरणशास्त्राध्ययने इति शेष। कुत इत्यत आह-भूयांस इति। हि-यत। शब्दा इति-अत्र इति शेष। शब्दापेक्षया अपशब्दाधिक्यमुपपादयति-एकैकस्येति। उदाहरति-तद्यथेति।

॥ ❀ ॥ आचारे नियमः ॥ ❀ ॥

(८ ज्ञानपक्षे दूषणान्तरवार्तिकम् ॥ २ ॥)

(भाष्यम्)

आचारे पुनर्ऋषिर्नियमं वेदयते—"तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः" इति ॥

(प्रदीप) आचारे प्रयोगे ॥ ऋषिर्वेद ॥

(उद्द्योत) प्रयोग इति। एवञ्च प्रयोगादेवाधर्मवद्धर्मोऽपीति ज्ञानाद्धर्म इति वेदविरुद्धमिति भाव ॥

(तत्त्वालोक) भाष्ये-नियम-शब्द एव प्रयोक्तव्यो नापशब्द इति नियम। वेदयते-बोधयति। बोधकवेदस्वरूपमाह-तेऽसुरा इति।

उद्योते-एवञ्च-उक्तालोचने च। तुल्ययुक्त्येति शेष। प्रयोगादेवाधर्मवद्धर्मोऽपि-अपशब्दस्य प्रयोगादेवाधर्म इव शब्दस्य प्रयोगादेव धर्मोऽपि। भवतीति प्रतीयते इति शेष। इति-इति हेतौ। ज्ञानादिति-शब्दस्येत्यादि। इति-इति भवद्वचनम्।

इति ज्ञानपक्षनिराकरणम् ॥

(अथ प्रयोगपक्षाङ्गीकारभाष्यम्)

अस्तु तर्हि प्रयोगे ॥

(तत्त्वालोक) भाष्ये-यदि शब्दज्ञाने धर्म इति पक्षे उक्तरीत्या दूषणानि प्राप्नुवन्ति, तर्हि शब्दप्रयोगे धर्म इति पक्ष स्वीक्रियतामित्याशयेनाह-अस्तु तर्हि प्रयोगे इति। धर्म इति शेष।

(९ प्रयोगपक्षे दूषणवार्तिकम् ॥ ३ ॥)

॥ ❀ ॥ प्रयोगे सर्वलोकस्य ॥ ❀ ॥

(भाष्यम्)

यदि प्रयोगे धर्मः, सर्वो लोकोऽभ्युदयेन युज्येत ॥

(तत्त्वालोक) प्रयोगे इति। धर्म इति चेत्तर्हीत्यनुपज्यते। सर्वलोकस्येति-धर्मः स्यादिति शेष। प्रयोगे-शब्दस्य प्रयोगे धर्म इति-त्वयाभ्युपगम्येत तर्हीति शेष। प्रकृतपक्षे सम्यग्ज्ञातस्य सम्यक्त्वेन साधुत्वेन ज्ञात इत्यर्थ, शास्त्रान्वितं इत्यस्य च व्याकरणशास्त्रव्युत्पादितस्वरूपमनतिक्रान्त इत्यर्थमभिप्रेत्याह-सर्वो लोक इति। शब्दसाधुत्वज्ञानसाधने व्याकरणशास्त्रे कृतश्रमोऽकृतश्रमो वा सर्वोजन इत्यर्थः। शब्दप्रयोगजनितपुण्यद्वारेति शेष। व्याकरणशास्त्रस्य अन्यशास्त्रस्य वाऽध्ययनद्वारा यथा कथञ्चिद्वा ज्ञात व्याकरणशास्त्रसंस्कृतशब्द सम्यक्प्रयुक्त स्वप्रयोक्तारं सकलं वैयाकरणमवैयाकरणं वा स्वजनितधर्मद्वारा अभ्युदयेन योजयेदिति भाव।

(आक्षेपभाष्यम्)

कश्चेदानीं भवतो मत्सरो, यदि सर्वो लोकोऽभ्युदयेन युज्येत ?

(तत्त्वालोक) ननु सप्रमाणमुपादेयम् अप्रमाणं हेयमितिदिशैव च नाद्य प्रमाणेनैव वस्तु व्यवस्थापयतो वयं "सर्वे कुशलिनः सन्तु सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग् भवे"दिति निरन्तरमीश्वरं याचमाना श्रुतिप्रमाणतः शब्दप्रयोगं सकललोकाभ्युदयप्रयोजकतामवगम्य अमन्दानन्दसन्दोहमनुभवाम इदानीं, कथं तज्ज्ञानेन भवतो हृदये जागर्यमर्ष इत्याशयेनाक्षिपति-कश्चेति। भवत-प्रयोगे धर्म इति पक्षं दूषयत। मत्सर-द्वेष। इदानीं (अत्र) पदार्थमाह-यदीति।

(समाधानभाष्यम्)

न खलु कश्चिन्मत्सरः। प्रयत्नानर्थक्यं तु भवति। फलवता च नाम प्रयत्नेन भवितव्यम्। न च प्रयत्नः फलाद्व्यतिरेच्य ॥

(प्रदीप) न च प्रयत्न इति। यदि प्रयत्नेन विना फलं स्यात् प्रयत्नवैयर्थ्यमापद्येतेत्यर्थः ॥

(उद्द्योत) भाष्ये फलाद्व्यतिरेच्य इति। फलस्वस्वभावप्रतियोगी न कार्य इत्यर्थः ॥ प्रयत्नवैयर्थ्यमिति। व्याकरणाध्ययनविषयकप्रयत्नवैयर्थ्यमित्यर्थः ॥

(तत्त्वा॰) अहमपि निरन्तरपराभ्युदयकाङ्क्षी ताऽऽत्मिको भारतीयमानवत्वात् न हातुं शक्नोमीत्याशयेनोत्तरयति-नेति। खल्विति-निश्चये। मत्सर इति-मम तवेति शेष। न चेत् कथमभ्युपगम्यते शब्दप्रयोगे धर्म इति पक्ष इत्यत आह-प्रयत्नेति। व्याकरणाध्ययनविषयकप्रयत्नस्य। एवमग्रेऽपि। यदि अधीतव्याकरणं इवानधीतव्याकरणोऽपि शब्दप्रयोगेण धर्मद्वारा अभ्युदयं प्राप्नुयात्तर्हि व्याकरणाध्येतुरित्यादि। ननु कथमनुपपद्येत तस्य साफल्यमित्यत आह—फलवतेति। अभ्युदयसाधकेनेत्यर्थः। स्वसार्थक्याय हि। नामेति-निश्चये। तत्सत्त्वे तत्सत्त्वमित्यन्वय, तदभावे तदभाव इति व्यतिरेकाभ्यां सर्वत्र कार्यकारणभावो निर्णीयते, तथा तत्सत्त्वे तदभाव इत्यन्वयव्यभिचारेण तदभावे तत्सत्त्वमिति व्यतिरेकव्यभिचारेण वा सर्वत्र कार्यकारणभावाभावो निर्णीयते। एवञ्च व्याकरणाध्ययनविषयकप्रयत्नस्य अन्वयव्यतिरेकाभ्याम् अभ्युदयसाधकताया उपपत्त्यैव तस्य सार्थक्यं सम्भवति। अत एव तस्य तत्साधकताया विघटकस्य पक्ष (शब्दप्रयोगे धर्म इति पक्षस्य) स्वीकार उचित इत्याशयेनाह—न चेति।

प्रदीपे—**विनेति**—अपि अनधीतव्याकरणस्य शब्दप्रयोगेण धर्मे द्वारेति शेष । **स्यादिति**—नहि अधीतव्याकरणस्येति शेष ।

उद्द्योते—**फलवदिति**—प्रयत्न इत्यादि । तथा च फलवद्वृत्ति-योऽभावस्तत्प्रतियोगितायां प्रयत्ने समुपपादक पचो नादर्कार्य इति भाव ।

(समाधानबाधकभाष्यम्)

ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते, त एव साधीयोऽभ्युदयेन योक्ष्यन्ते ॥

(उद्योतः) साधीय इति । क्रियाविशेषणम् । शास्त्रसंस्कारवता प्रभूतशब्दप्रयोगजन्यबहुपुण्यद्वारा बहुतराभ्युदफलत्वमित्यर्थ ॥

(तत्त्वालोक:) भाष्ये—ननु शब्द प्रयोगे धर्म इति पक्षेऽपि व्याकरणाध्ययनविषयकप्रयत्नस्य बहुतराभ्युदयेनान्वयव्यतिरेकसम्भवात् तस्य तत्साधकतायां उपपत्त्या सार्थकता सम्भवत्येवेत्याशयेनाह—**ननु चेति ।**

उद्द्योते—**साधीय इति**—प्रथम साधीय इति । **क्रियेति**—प्रयोक्ष्यन्ते इत्यादि । द्वितीय साधीय इत्यभ्युदयविशेषणमिति भाव । **शास्त्रसंस्कारवता**—यत्नपूर्वकाध्ययनावाप्तव्याकरणशास्त्रज्ञानजनितसंस्कारवताम् । **बहुतरेति**—बहुतराभ्युदय फलं येषामिति व्युत्पत्ति ।

(समाधानसाधकभाष्यम्)

व्यतिरेकोऽपि वै लक्ष्यते । दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ॥

(प्रदीपः) व्यतिरेक इति । परिहास ॥

(उद्द्योतः) भाष्ये तत्र फलव्यतिरेक इति । कौशलव्यतिरेकवत् फलव्यतिरेकोऽपि स्यादिति तस्य व्याकरणाध्ययन व्यर्थमेव स्यादिति भावः ॥

(तत्त्वालोक:) भाष्ये—ननु व्याकरणशास्त्राध्ययनविषयकप्रयत्नस्य बहुतराभ्युदयसाधकतायां अपि निश्चये प्रतिबन्धकौ अन्वयव्यतिरेकव्यभिचारौ स्त एवेत्याशयेनाह—**व्यतिरेक इति ।** विपरीतः (प्रयत्नसत्त्वे बहुशब्दप्रयोगजनितबहुपुण्यद्वारा बहुतराभ्युदयस्याभाव, तथा प्रयत्नासत्त्वे तद्द्वारा बहुतराभ्युदयसत्त्वम्) इत्यर्थ । **वै** इति वाक्यालङ्कारे । कृत इत्याकांक्षायाम् केचिद्वैयाकरणा निखिलशब्दसाधुत्वा सन्तोऽपि प्रतिभाविरहितत्वया व्यवहारमत्युत्पन्नमतित्वाभावात् शब्दप्रयोगेऽकुशला भवन्ति, तथा केचिदनधीतव्याकरणा अपि यथाकथञ्चिदवगतसाधुशब्दा सन्त शब्दप्रयोगे निपुणा भवन्तीत्याशयेन वैपरीत्यमेवोपपादयितुमाह—**दृश्यन्ते इति । हि**—यत । **अप्रवीणाः**—कौशलरहिता । अस्य शब्दप्रयोगे इत्यादि । एवमग्रेऽपि । **प्रवीणा इति**—अत इति शेष । **तत्र**—अप्रवीणकृतप्रयत्नप्रवीणाकृतप्रयत्नेषु । **फलव्यतिरेकोऽपि**—फलवैपरीत्यमपि ।

उद्द्योते—**कौशलव्यतिरेकवत्**—शब्दप्रयोगनिपुणतावैपरीत्यमिव । **इति**—इति हेतौ । **तस्य**—अधीतव्याकरणशास्त्रस्य । **व्याकरणाध्ययनम्**—व्याकरणाध्ययनविषयकप्रयत्न ।

(पक्षद्वयनिराकरणोपसंहारभाष्यम्)

एवं तर्हि—नापि ज्ञान एव धर्मो नापि प्रयोग एव ॥ किं तर्हि ? ।

(तत्त्वालोकः) भाष्ये—उक्तरीत्या दूषितत्वादुक्तं पक्षद्वयं निराकुर्वन्नुपसंहरति—**एवमिति ।** यदि तत्र पक्षद्वये दोष इत्यर्थः । **नापि**—नैव । एवमग्रेऽपि । **एवेति**—धर्म इति फलतीति शेष । शब्दे केवलसम्यग्ज्ञाते केवलसुप्रयुक्ते वा न धर्म इति निर्णीतेऽपि पृच्छति—**किन्तर्हीति ।** तर्हि क धर्म इत्यर्थ ।

(१० सिद्धान्तसमाधानवार्तिकम् ॥ ४ ॥)

॥ * ॥ शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥ * ॥

(भाष्यम्)

शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते । तत्तुल्यं वेदशब्देन । वेद शब्दा अप्येवमभिवदन्ति "योऽग्निष्टोमेन यजते य उ चैनमेवं वेद" "योऽग्निं नाचिकेतं चिनुते य उ चैनमेव वेद" ॥

(प्रदीपः) तत्तुल्यमिति । वेद शब्दो यस्यार्थस्य स वेदशब्दस्तस्य यथा ज्ञात्वानुष्ठानं तथा शब्दानामपि प्रकृत्यादि विभागज्ञानपूर्वक प्रयोग इत्यर्थ ॥

(उद्द्योतः) शास्त्रपूर्वके इति । व्याकरणाध्ययनपूर्वके इत्यर्थ ॥ तत्र वेदाङ्गत्वादेतद्व्याकरणाध्ययनपूर्वकप्रयोग एव धर्म इति प्रामाणिका । **वेदः शब्द इति ।** बोधक इत्यर्थ । प्रमाणमित्यर्थो वा ॥ **तस्य यथेति ।** तस्य यथा य उ चैनमेव वेदेति ग्रन्थेन वेदतो ज्ञात्वानुष्ठानं फलायोक्तम् । तथास्यापि शास्त्रज्ञानपूर्वक प्रयोग फलायेत्येक **शब्द** इत्यादिनोक्तमित्यर्थ ॥

(तत्त्वालोकः) भाष्ये—ननु सम्भवे सति सकलोद्देश्यतावच्छेदकनिष्ठप्रयोजकता निरूपिता प्रयोज्यता विधेयवृत्ति भवतीति सिद्धान्तः । अत एव यथा पुत्रवित्तलोकत्रयवान् सुखीत्यादौ सुखवृत्तिप्रयोज्यतानिरूपितप्रयोजकता पुत्रवित्तलोकत्रयनिष्ठतयैवोपपद्यते, न तु पुत्रमात्रनिष्ठतया, न वा धनमात्रनिष्ठतया, न वा लोकमात्रनिष्ठतया, न वा पुत्रवित्तोभयनिष्ठतया, न वा पुत्रलोकोभयनिष्ठतया, न वा वित्तलोकोभयनिष्ठतया । तथा एक शब्द इत्यादिश्रुतावपि कामधुक्त्वनिष्ठप्रयोज्यतानिरूपितप्रयोजकता सम्यग्ज्ञातत्वशास्त्रान्वितत्वसुप्रयुक्तत्वत्रयनिष्ठतयैवोपपद्यते, न तु तदन्यतमनिष्ठतया, न वा तदुभयनिष्ठतयेत्याशयेन समाधातु ज्ञाने धर्म इति वार्तिके ज्ञानशब्देनाभिहिते सम्यग्ज्ञातत्वशास्त्रान्वितत्वे शास्त्रशब्देनाभिदधत् सिद्धान्तवार्तिकमुपस्थापयति **शास्त्रपूर्वके इति ।** व्याकरणशास्त्राध्ययनजनितप्रकृतिप्रत्ययविभागादिज्ञानपूर्वके इत्यर्थ । **प्रयोगे**—शब्दप्रयोगे । धर्मद्वारेति शेष । **अभ्युदयः**—फलम् । वेदशास्त्राध्ययनजनितकर्मस्वरूपफलसाधनज्ञानपूर्वक एव कर्मानुष्ठाने फल भवतीत्याशयेनाह **तदिति ।** व्याकरणशास्त्रमात्रबोध्यप्रकृतिप्रत्ययविभागादिकशब्दात्मक वस्तित्यर्थ । **वेदशब्देन**—स्वत प्रमाणभूतवेदशास्त्रमात्रबोध्यस्वरूपसाधनफलककर्मणा । **शास्त्रपूर्वकमिति**—क्रियाविशेषणम् । एवमग्रेऽपि । ननु कर्मणः तादृशज्ञानपूर्वकानुष्ठानमेव सफल भवतीत्यत्र किं प्रमाणमित्यत आह—**वेदशब्दा इति ।** वेदाना शब्दा इति, वेदाश्चामी शब्दा इति वा व्युत्पत्ति । **अपि**—एव । **एवं**—यथा मया व्याख्यातं तथा । वेदशब्दानेवाह—**योऽग्निष्टोमेनेति ।** द्वितीय **वेदेति**—इत्यादय इति शेष ।

प्रदीपे—**अर्थस्य**—अग्निष्टोमादिरूपकर्मण । **यथेति**—स्वरूपज्ञानफलानीति शेष । **अनुष्ठानमिति**—सफलमिति शेष । **प्रयोग इति**—सफल इति शेष ।

उद्द्योते-शास्त्रान्तरभ्रमनिराकरणायाह-व्याकरणेति। व्याकरणशास्त्राध्ययनजनितप्रकृतिप्रत्ययविभागादिज्ञानपूर्वके इत्यर्थः। ननु व्याकरणशब्देन नवविधव्याकरणानां मध्ये किं व्याकरणमत्र विवक्षितमित्यत आह-तत्रेति। नवविधव्याकरणानां मध्ये इत्यर्थः। एतस्य पाणिनीयव्याकरणस्येति शेषः। एतदिति-पाणिनीयव्याकरणशास्त्राध्ययनजनितप्रकृतिप्रत्ययविभागादिज्ञानपूर्वकशब्दप्रयोगे इत्यर्थः। तस्य-वेदशब्दस्य (अग्निष्टोमादिरूपकर्मणः)। वेदत इति-स्वरूपसाधनफलानीति शेषः। उक्तम्-इत्युक्तम्। अस्यापि-शब्दस्यापि। शास्त्रेति-व्याकरणशास्त्राध्ययनजनितप्रकृतिप्रत्ययविभागादिज्ञानपूर्वक इत्यर्थः। तथा च "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवती"ति वाक्यस्य फलार्थत्वाऽवगमेन शब्दप्रयोगेण स्वकर्मीभूतशब्दसंस्कारस्यापेक्षितत्वात् "सम्यग्ज्ञातः" इत्यनेन तदङ्गतया ज्ञाने विनियुक्ते, तत्राप्रामाणिकत्वशङ्कानिराकरणाय "शास्त्रान्वितः" इत्यनेन तत्र व्याकरणशास्त्रसमर्थिततया अभिधानात् व्याकरणशास्त्राध्ययनजनितप्रकृतिप्रत्ययविभागादिज्ञानपूर्वकशब्दप्रयोगेण धर्मद्वारा अभ्युदयो भवतीति फलितार्थः। ननु "य उ चैनमि"त्यत्रापि चकारात् ज्ञानानुष्ठानयोः साम्येन फलसम्बन्धो भवतु, तथा तद्दृष्टान्तेन प्रकृतेऽपि शब्दज्ञानप्रयोगयोः साम्येन फलसम्बन्धो भवत्विति चेन्न, ज्ञानेनानुष्ठाने उपकारदर्शनात् तयोः गुणप्रधानभावस्यावश्यकतया पक्षान्तराश्रयणात्। नचात्मज्ञानस्येव शब्दज्ञानस्यापि स्वातन्त्र्येण फलसाधनता भवत्विति वाच्यम्, सर्वत्रैव हि विज्ञानं संस्कारित्वेन गम्यते। पराङ्ग चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति वचनेन, "यदेव विद्यया करोति तदेव वीर्यवत्तरं भवती"ति श्रुत्या सामर्थ्येन चात्मज्ञानातिरिक्तज्ञानस्य पारार्थ्यावगमात्, अत एव तादृशीभूतात्मज्ञानस्य "तरति शोकमात्मविदि"त्यादिना बोधितायाः शोकतरणोपलक्षितात्मस्वरूपं प्रति स्वतन्त्रफलसाधनताया उपपत्तावपि अन्यत्र तस्या असम्भवात्, सर्वत्र ज्ञानमात्रेण कार्योपपत्तौ बह्वायाससाध्यानुष्ठानस्य वैयर्थ्यापत्तश्चेति भावः।

(व्याख्यान्तरभाष्यम्)

अपर आह—तत्तुल्यं वेदशब्देनेति। यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्त्येवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति॥

(प्रदीप) अपर आहेति। वेदश्चासौ शब्दश्च वेदशब्द इति कर्मधारयः॥

(तत्त्वालोकः) भाष्ये—वेदशब्दशब्देन कर्मबोधनाय लक्षणाया बहुवीहिस्वीकारे गौरवात् तस्य वेदशब्दपरत्वमेवोपपादयितुं प्रतिपाद्यभेदात् प्रतिपादकभेदेन व्यपदिशन्नाह-अपर आहेति। नियमपूर्वम्-'आहृतमप्यधीयीते'त्यादिधर्मशास्त्रबोधितब्रह्मचर्यादिनियमपूर्वकम्। फलवन्तः ज्योतिष्टोमादिकर्मस्वरूपसाधनफलबोधनेन फलवन्तः। शास्त्रपूर्वकम्-व्याकरणशास्त्राध्ययनजनितप्रकृतिप्रत्ययविभागादिज्ञानपूर्वकम्। शब्दान्-मेघाऽऽभर पठनीयादिलौकिकशब्दान्। अर्थबोधनायेति शेषः। अभ्युदयेन-व्याकरणादिजनितधर्मद्वारकाभ्युदयेन।

प्रदीपे—वेदशब्दशब्दे व्युत्पत्तिपूर्वकं समासमाह-वेदश्चेति।

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु—ज्ञान एव धर्म इति॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-ज्ञाने धर्म इति चेत्तथाऽधर्म इति॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः, शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम्॥ यच्च पुनरशिष्टाप्रतिषिद्धम्, नैव तद्दोषाय भवति, नाभ्युदयाय। तद्यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय॥

(उद्द्योत) भाष्ये प्रमाणमिति। प्रामाणिकमित्यर्थः॥ शब्दश्च शब्दज्ञाने इति। एकः शब्दः सम्यग् ज्ञात इत्यादि॥ हेलयो हेलय इत्यादि तु अपशब्दप्रयोगेऽधर्ममाह, न तु ज्ञाने इति भावः॥ यद्यपि तत्र प्रयुक्त इत्यप्युक्तं, तथाप्यवैयाकरणस्य सम्यक् प्रयोगादपि धर्माभावेन ज्ञानमेव तद्धेतुः। प्रयोगस्तु तस्य द्वारमिति भावः॥

(तत्त्वालोकः) भाष्ये—केवलस्य शब्दज्ञानस्यापि धर्मद्वारा अभ्युदयसाधकत्वोपपादने इत्याशयेन पक्षान्तरमाह-अथवेति। ज्ञान एव-शब्दज्ञानेऽपि। केवले इत्यादि। तत्र पक्षे कथितं दोषं स्मारयति-ननु चेति। परिहरति-नेति। तत्र पक्षे इति शेषः। एषः-अपशब्दज्ञानेन अधर्मप्रसक्तिरूपः। कुत इत्यत आह-शब्दप्रमाणका इति। यत् इत्यादि। शब्दः प्रमाणं येषामिति व्युत्पत्तिः। कर्मस्वरूपसाधनफलेषु सन्निकर्षाभावात् प्रत्यक्षस्य, व्याप्तिग्रहाभावात् अनुमानस्य च विषयताया असम्भवादाह-यच्छब्द इति। यद्यपि शब्दोऽपि अर्थबोधने शक्तिग्रहसापेक्षः, तथापि स्वर्गकामो यजेतेत्यादिवाक्यं गृहीतशक्तिकपदार्थं बोधयन्नलौकिकमपि सम्बन्धमाकाङ्क्षादिमहिम्ना बोधयति। अस्माकं सर्वदा परोक्षोऽपि धर्मादिर्मन्त्रादिभिः यथावेदशब्दमेव साक्षात्क्रियते, अत एव वेदानुसारितया तदीयस्मृतिरपि प्रमाणभूतेति भावः। अशिष्टश्चासौ अप्रतिषिद्धश्चेति व्युत्पत्तौ कर्मधारयसमासेन निष्पन्नमाह-अशिष्टाप्रतिषिद्धमिति। अविहितानिषिद्धमित्यर्थः। नाभ्युदयाय-नाप्यभ्युदयाय। एवमग्रेऽपि। अविहितानिषिद्धव्यवहारे पुण्यपापे नेति समुपपादयितुं दृष्टान्तमाह-तद्यथेति।

उद्द्योते—ननु "तेऽसुरा हेलयो हेलय"इत्यादिना अपशब्दज्ञानेऽपि अधर्मस्योक्तत्वात् कथमुच्यते शब्दो नापशब्दज्ञाने अधर्ममाहेति इत्यत आह-हेलयो हेलय इति। ज्ञाने-अपशब्दज्ञाने। तथा च "न म्लेच्छितवै" इत्यादि अपशब्दप्रयोगस्यैव निषेधं बोधयति न तु तत्स्वरूपज्ञानस्येति फलितार्थः। ननु व्याकरणशास्त्राध्ययने प्रवृत्तानां पचतीत्यादिशब्दज्ञानाय दुरपचमित्याद्यपशब्दानां प्रयोगोऽप्यावश्यक इति चेन्न, व्याकरणाध्येतृणां पचतीत्यादिज्ञानाय दुरपचमित्यादिज्ञानस्यैवापेक्षितत्वात्। नापि तेषां पचतीत्यादिव्युत्पादनाय दुरपचमित्यादिप्रयोगस्यावश्यकत्वेऽपि क्वाचन क्षतिः, दुरपचमित्यादीनां शब्दस्वरूपपरत्वेन अनुकरणतया साधुत्वस्योपपत्तेः। अन्यथा हेलयो हेलय इत्यादिश्रुतिपाठोऽपि प्रत्यवायं जनयेदिति भावः॥ तत्र-एकः शब्द इत्यादिश्रुतौ। तथा च एकः शब्द इत्यादिश्रुत्यैव शब्दज्ञानप्रयोगयोः धर्मद्वारा अभ्युदयसाधकताया बोधनात् "शब्दश्च शब्दज्ञाने धर्ममाहे"ति कथनं न युक्तमिति भावः। सम्यगिति-ज्ञ इत्यादि। धर्मेति-स्वर्गाभिव्यक्त्यादि। ज्ञानमिति-ज्ञ इत्यादि। तद्धेतु-स्वर्गादिसम्पादकधर्महेतुः। प्रयोगः-शब्दप्रयोगः। तस्य-शब्दज्ञानस्य।

(समाधानान्तरभाष्यम्)

अथ वाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं 'ज्ञाने धर्मः' इति ब्रुवतोऽर्थादापन्नं भवति—'अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः' इति॥

(प्रदीप) **अथवेति ।** अपशब्दज्ञाननान्तरीयकत्वाच्छब्दज्ञानस्य पृथक् फलमपशब्दज्ञानस्य नास्तीत्यर्थः ॥

(उद्द्योत:) भाष्ये **अभ्युपाय एवेति ।** अपशब्दज्ञाननान्तरीयकं शब्दज्ञानमिति शब्दज्ञानेन फले जनने ये सहकारितैवापशब्दज्ञानस्य न पृथक्फलत्वेति भावः । **अपशब्दज्ञानम्** अपशब्दत्वेन तज्ज्ञानम् ॥ एवं शब्दज्ञाने इत्यपि ॥ अपशब्दत्वेन तज्ज्ञाने हि तद्भिन्नत्वेन शब्दज्ञानं भवति ॥ **यो ह्येति** भाष्यस्य य एव अपशब्दान् जानाति असावेव शब्दान् जानातीति तज्ज्ञानसमानाधिकरणशब्दज्ञानादेव धर्म इति न ततो विपरीतफलकल्पना युक्तेति भावः ॥ तदाह—**अपशब्दज्ञाननान्तरीयकत्वा**

दिति । वह्न्यर्था हि । न हि वह्न्यानयननान्तरीयकं तत्र पात्रानयनं पृथक्फलं भवति ॥

(तत्त्वालोकः) भाष्ये—अथाभिचारया वैश्वदेव्या मिनेति वचनेन वैश्वदेव्या विनियोगस्येव आमिक्षानान्तरीयकत्वेन वाजिनस्यापि वाजिभ्यो वाजिनमिति वचनेन वाजिनस्य विनियोगस्य दर्शनात् प्रकृतेऽपि शब्दज्ञानस्य एकः शब्द इति वचनेन कामधुक्त्वे विनियोगस्येव शब्दज्ञाननान्तरीयकत्वादपशब्दज्ञानस्यापि क्वचित् साक्षाद्विनियोगाय साक्षाद्विनियोजकप्रमाणाभावेऽपि तस्य कल्पना क्रियेतेत्यत आह—**अथवेति । अभ्युपायः**—सहकारिकारणम् । हि—एव । **अप्य-सौ**—असावेव । उदाहरति—**तदेवमिति । आपन्न**—प्राप्तम् । किं प्राप्तमित्यत आह—**अपशब्देति ।**

प्रदीपे—**अपशब्देति**—अपशब्दज्ञानं नान्तरीयकं यस्येति व्युत्पत्तिः । तथा च शब्दज्ञानस्य अपशब्दज्ञाननान्तरीयकत्वात् अपशब्दज्ञानस्य (शब्दज्ञानस्य फलात्) पृथक् फलं नास्तीत्यन्वयः ।

उद्द्योते—यद्यपि शब्दापशब्दज्ञानं व्याकरणशास्त्राध्ययनजनितम्, तथापि शब्दज्ञानस्य एकः शब्द इति श्रुत्या फले विनियोगे सति अपशब्दज्ञानस्यापि क्वचित् फले साक्षाद्विनियोगाय साक्षाद्विनियोजकप्रमाणकल्पनापेक्षया तस्य परम्परया शब्दज्ञानफले विनियोगाय फलवच्छब्दज्ञानाङ्गत्वविनियोजकप्रमाणकल्पनैव युक्ता फलवत्सन्निधावफलं तदङ्गमिति न्यायात् । आमिक्षावाजिनयोस्तु तत्र तत्र विनियोजकं शास्त्रमस्तीति ततो वैषम्यमित्याशयेनाह—**अपशब्देति ।** अपशब्दज्ञानं नान्तरीयकं यस्येति व्युत्पत्तिः । **इति**—इति हेतौ । **ज्ञानस्येति**—किन्त्विति शेषः । **पृथक्फलता**—शब्दज्ञानफलपृथक्फलता । यथाकथञ्चिज्ज्ञानस्य शास्त्राच्चापशब्दज्ञानस्य शब्दज्ञानाभ्युपायत्वादाह—**अपशब्दत्वेनेति । तज्ज्ञानम्**—अपशब्दज्ञानम् । उक्तकारणादेवाह—**एवमिति ।** तदुपपादयति—**अपशब्दत्वेनेति । तज्ज्ञाने**—अपशब्दज्ञाने । सतीति शेषः । **हि**—यतः । **तद्भिन्नत्वेन**—अपशब्दभिन्नत्वेन । ननु नैष भाष्यविरोध इत्यत आह—**यो ह्येति भाष्यस्येति ।** यो हीत्यादिभाष्यस्येत्यर्थः । भाव इत्यत्रान्वयः । हेत्वपेक्षैवार्थकतामभिप्रेत्याह—**य एवेति । इति**—इति स्थितौ । **तज्ज्ञानेति**—अपशब्दज्ञानेत्यर्थः । **इति**—इति हेतौ । **ततः**—शब्दज्ञानफलात् । अपशब्दज्ञानस्येत्यादि । तदाह—शब्दापशब्दज्ञानयोः सैकानफलकत्वमाह । उदाहरति—**नहीति । वह्न्यानय-नेति**—वह्न्यानयनस्य नान्तरीयकमिति व्युत्पत्तिः । **ततः**—यतः वह्न्यानयनं ततः । **पृथक्फल**—वह्न्यानयनफलात् पृथक्फलकम् । तदुभयं समानफलकमेवेति भावः ।

(समाधानान्तरभाष्यम्)

अथ वा कूपखानकवदेतद्भविष्यति । तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति । सोऽप्सु संजातासु तत एव तं गुणमासादयति । येन च स दोषो निर्हण्यते; भूयसा चाभ्युदयेन योगो भवति ॥ एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति ॥

(प्रदीप) **दोष इति ।** उत्कृष्टधर्मफलावाप्तौ स्वल्पाधर्मफलमुत्पन्नमप्यनुत्पन्नकल्पं भवतीत्यर्थः ।

(उद्द्योतः) **तुष्यतु दुर्जन** इति न्यायेनापशब्दज्ञानस्य विपरीतत्वमात्रेणाधर्मसाधनत्वमभ्युपगम्यापि भाष्ये समाधानान्तरमाह—**अथ वा कूपेति । मृद्** आर्द्रा । **पांसुः** शुष्कः । यत्कर्मनान्तरीयकं कर्मान्यो यो विपरीतत्वमात्रेण कल्प्योऽवैधो दोषः स तत्कर्मजन्यफलनाश्यो यथा कूपखनननान्तरीयकशरीरव्यापारजन्यो मृल्लेपः स्नानादिना नाश्य इति सामान्यतो दृष्टानुमानात्तथानुमानमिति तात्पर्यम् । **उत्कृष्टधर्मेति ।** धर्मस्य विधिबोध्यत्वादुत्कृष्टत्वम् । अधर्मस्य तु वचनबोध्यत्वेन विपरीतत्वमात्रेण कल्प्यत्वात्स्वल्पत्वेन तत्फलधर्मनाश्यत्वम् ॥ यागीयहिंसायाः **न हिंस्यादि**ति वचनेन दुष्टत्वेऽप्यल्पत्वादिति त्वन्यत्र विस्तरः ॥

(तत्त्वालोक) भाष्ये—**कूपखानकवदिति**—अत्र कूपं खनतीति विग्रहे कर्मण्यणि प्रसक्ते वासरूपन्यायेन ण्वुल् । अनित्यसमासत्वात् कूपस्य खानक इति स्वपदविग्रहः । ननु "शिल्पिनि ष्वुन्" इति सूत्रेण ष्वुन् वा येनेति चेन्न, अत्र खननकर्तृत्वमात्रस्य विवक्षया शिल्पित्वस्याविवक्षणात् । कूपखानकेन तुल्यमिति तृतीयासमर्थाद्वतिः । **एतत्**—अपशब्दज्ञानम् । दृष्टान्तं कूपखानकवाक्यमुपपादयति—**तद्यथेति । अवकीर्णः**—लिप्तः । **स**—कूपखानकः । तथापीत्यादि । **तत एव**—अद्भ्य एव । **तं गुणम्**—अत्यन्तं स्नानादिरूपेष्टसाधनम् । कर्मणि गकारेण कर्तुस्तृतीयामभिप्रेत्याह—**येनेति ।** स्नानादिनेत्यर्थः । कूपखानकस्येति शेषः । **स**—कर्दमधूलिलेपरूपः । **निर्हण्यते**—निराक्रियते । **योग इति**—तस्येत्यादि । दार्ष्टान्तिकम् अपशब्दज्ञानमुपपादयति—**एवमिति । इहापि**—शब्दज्ञानस्थलेऽपि । **यद्यपीति**—व्याकरणाध्येतुरिति शेषः । **तथापीति**—तस्येति शेषः । कर्मणि णकारेण कर्तरि तृतीयामभिप्रेत्याह **तेनेति ।** शब्दज्ञानजनितधर्मेणेत्यर्थः । **स**—अपशब्दज्ञानजनितः । तस्येत्यादि । **निर्घानिष्यते**—निराकरिष्यते । **अभ्युदयेनेति**—तस्येति शेषः ।

प्रदीपे—**उत्कृष्टेति**—यथा भोजनेन उत्कृष्टतृप्त्यवाप्तौ पाकेन स्वल्पदुःखमुत्पन्नमप्यनुत्पन्नकल्पं भवति तथा शब्दज्ञानेनेत्यादि । **स्वल्पमिति**—अपशब्दज्ञानेनेत्यादि ।

उद्द्योते—**अपशब्दज्ञानेति**—शब्दज्ञाननान्तरीयकेत्यादि । **विपरीतेति**—शब्दज्ञानेत्यादि । **अधर्मेति**—शब्दज्ञानसाध्यधर्मविपरीतेत्यादि । **समाध्यन्तर**—समाधानविशेषम् । मृत्पदेन कर्दममभिप्रेत्याह—**आर्द्रेति ।** मृदिति शेषः । पांसुपदेन धूलिमभिप्रेत्याह—**शुष्केति ।** मृदिति शेषः । ननु शब्दज्ञाननान्तरीयकापशब्दज्ञानजनिताधर्मस्य शब्दज्ञानजनितधर्मनाश्यता केन प्रमाणेन ज्ञायत इत्यत आह—**यत्कर्मेति । विपरीतत्वमात्रेण कल्प्यः**—यत्कर्म स्वनान्तरीयककर्मविपरीतं तत्कर्म स्वनान्तरीयककर्मजनितफलविपरीतफलजनकं यथा कूपखनननान्तरीयकशरीरव्यापार इति व्याप्तिज्ञानजनितानुमित्योपपाद्य । **अवैध**—निषेधवचनाबोधितः । वस्तुस्थितिमाह—**दोष इति । तत्फलेति**—कूपखननफलेत्यर्थः । **तथानुमानम्**—शब्दज्ञाननान्तरीयकापशब्दज्ञानजन्याधर्मः शब्दज्ञानजन्यधर्मनाश्यः शब्दज्ञाननान्तरीयकापशब्दज्ञानजन्यत्वादित्यनुमितिः । ननु पूर्वमधर्मभूयस्त्वस्योक्ततया सम्प्रति तदल्पत्वोक्ति-

स्तुकेभ्यत आह-धर्मस्येति । विधीति-वाक्येति शेष । वचनेति—निषेधेत्यादि । तत्फलेति-शब्दज्ञानफलेत्यर्थ । नन्वेवं यागान्तरा-यत्रहिंसान्यधर्मस्यापि यागानिष्पन्नेनादृष्टेनोपपद्येतेत्यत आह—यागीयेति । अन्यत्र-शास्त्रदर्शिकादौ ।

(द्वितीयदूषणनिरासभाष्यम्)

यदप्युच्यते—*आचारे नियमः* इति ॥

याज्ञे कर्मणि स नियमोऽन्यत्रानियमः । एवं हि श्रूयते—'यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञाः विदितवेदितव्या अधिगतयाथातथ्याः ।' ते तत्रभवन्तो यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते ॥ तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम्, ततस्ते पराभूताः ॥

(प्रदीप.) प्रत्यक्षधर्माण इति । योगजप्रत्यक्षेण सर्वं विदितवन्त ॥ परापरज्ञा इति । विद्याविद्या वेदितार ॥

(उद्द्योत) भाष्येऽन्यत्रानियम इति । यद्यपि सुशब्दप्रयोगस्य धर्मोत्पादकत्वं यज्ञ एवेति नायं प्रयोगनियम । तथापि स्मरणं तु सुशब्दस्यान्यत्रापि प्रयोगनियम इति दोषोऽपि यज्ञ दोषसाध्येव । अत्र वा कर्मेतर विषये एव । श्रुतौ हेलयो हेलय इत्यसुरप्रसङ्ग एव ॥ विदितवेदितव्या इत्यनेन श्रवणमनननिदिध्यासनमप्युक्ता । अधिगतयाथातथ्या इत्यनेन साक्षात्कार उक्त । याथातथ्ये स्वरूपे ज्ञान । वेदितव्यस्य यथार्थयास्वरूप सम्य स्वरूप शुद्धचिदानन्दरूप तदधिगत प्रत्यक्षेण प्राप्त येरित्यर्थ ॥ याज्ञे पुनरिति । अनेन तत्त्वज्ञानिनामपि कर्माधिकार सूचयति ॥ प्रयुञ्जत इति वर्तमानसमीपे भूते लट् । एव नापभाषन्त इत्यपि । अत एव तर्वाणो बभूवुरित्यर्थ ॥

(तत्त्वालोक) भाष्ये—शब्दज्ञाने धर्म इति पक्षे उक्त द्वितीय दूषण निराकर्तुं स्मारयति-यदपीति । अवश्य वार्तिकस्थेति शेष । परिहरति-याज्ञे इति । एव मयोच्यते इत्यादि । स-शब्दप्रयोगविषयक । नियम इति-न म्लेच्छितवै इत्यस्य यज्ञप्रकरणे पाठादिति शेष । अन्यत्र-यागेतरस्थले । अपशब्दप्रयोगनिषेधस्य तत्राप्रामाण्यादिति शेष । अनियम इति-शब्दापशब्दप्रयोगयोरित्यर्थ । यज्ञे नियमो नान्यत्रेत्यत्र प्रमाणं दर्शयितुमाह—एवं हीति । श्रूयते-श्रुत । श्रुतिस्वरूपमाह-यर्वाण इति । याथातथ्या इति-इत्यन्त इति शेष । ते-तादृशा ऋषय । तत्रभवन्त -पूज्या । यद्वा नस्तद्वा न इति प्रयोक्तव्ये यद् वा नः तद् वा नः इति वक्तव्ये सति ... विकृतवर्णेन उक्तवन्तः ... अनयैव सर्वाणस्तर्वाणनामान अपि प्रसिद्धा इति शेष । याज्ञे इति-कर्मणीत्यादि । नापभाषन्ते-न दाम्भिकाः सन् इति भाव । किन्तु यज्ञानन्तरज्ञान इत्येव प्रयुञ्जते इति शेष । तैः-असुरैः हेलय इति शब्दिते । एवमित्यादि । अपभाषितम्—हेऽरयो हेऽरय इति वक्तव्ये हेलयो हेलय इत्यभिहितम् । ते-हेलयो हेलय इति वादिनोऽसुरा । पराभूता-नाशमापन्ना ।

प्रदीपे—योगजप्रत्यक्षेण-अलौकिकेन इन्द्रियसन्निकर्षेण प्रत्यक्षेण । विदितवन्त-ज्ञातवन्त । परा वेदितव्यं ब्रह्मविद्या, अपरा अन्यविद्येति ... विद्याविद्येति ।

उद्द्योते—यज्ञ एव शब्द इत्यादिविधेः शब्दज्ञानस्योपयुक्तपुरुषार्थत्वेन न सर्वत्र, तथा "न म्लेच्छितवै" "आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयान्" इत्यादिनिषेधस्य प्रायश्चित्तविधेश्च यज्ञप्रकरणपठितत्वात् क्रत्वर्थत्वेनैव न पुरुषार्थत्वेन, अतः शब्दज्ञाने धर्म इति पक्षे न विरोध इत्याशयेनाह-यज्ञे इति । धर्म इति-त्वनि शेष । इति-इति हेतौ । तत्रैव-यज्ञ एव । तयोः-शब्दापशब्दयोः । तदिति-तथेत्यर्थ । एवमग्रेऽपि । श्रुताविति-प्रयुक्तेति शेष । ऊह इति-मीमांसानामित्यादि । श्रवणेति-आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुतिसूचितेत्यादि । साक्षादिति-मनोवृत्त्यादि । यथा स्थितं याथातथ्यमित्याशयेनाह-याथातथ्ये इति । वेदितव्यस्येति-आत्मन इति शेष । प्राप्तं-प्राप्तेऽपि अज्ञानज्ञान निराकृतम् । अनात्मसु-स्फटिकादिष्टस्फटिकस्थले आरोपभ्रमाधिष्ठानस्फटिकवत्त्वे साक्षात्कृतेऽपि स्फटिकोऽयं रक्त इति भ्रमस्य सोपाधिकतया अनुवृत्तिरिव अन्तःकरणस्य कृतात्मसाक्षात्कारेऽपि तदध्यासाधिष्ठानात्मनि साक्षात्कृतेऽपि आत्माधिष्ठानकाध्यासस्य सोपाधिकतया अनुवृत्तिरुपपद्यते । तथा च तत्त्वज्ञानिनामपि कर्मणि प्रवृत्तिसम्भवेन यज्ञादावित्याशयेनाह-कर्माधिकारमिति । केचित्तु तत्त्वज्ञानिनां जगद्भ्रमानुवृत्तावपि जगति मिथ्यात्वनिश्चयात्तेषां कर्मणि सत्यत्वाभावान्नाद्यादिति न तेषां कर्माधिकार इति वदन्ति । एव-वर्तमान समीपे भूते लट । अत एवेति-यत एव यर्वाणस्तर्वाण इति प्रयुक्तवन्त इत्यादि । तन्नामान-यर्वाणस्तर्वाणनामका ।

इति शब्दज्ञानस्य धर्मजनकत्वनिर्णयप्रकरणम् ।

(अथ व्याकरणपदार्थनिरूपण आक्षेपभाष्यम्)

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः ॥

(प्रदीप) अथेति । उक्तमिदं न धान्तरेण व्याकरणमित्यादि । तत्र पक्षद्वयेऽपि दोषदर्शनात् पदार्थप्रश्न ॥

(उद्द्योत.) व्याकरणपदार्थविचारस्य सङ्गतिं दर्शयितुमाह—उक्तमिदमिति । आदिना तस्मादध्येयं व्याकरणमित्यादि पुनः पुनरुक्तिर्ग्रहणं ॥

(तत्त्वालोक) भाष्ये—पदार्थः-अर्थ । अत्रार्थशब्दो वाच्यपर एव न तु प्रयोजनपर इति सूचनायैव पदग्रहणमर्थ इत्यस्य पदस्यार्थ इत्यर्थ इति भाव ।

प्रदीपे—उक्तमिति-भाष्यकृतेत्यादि । इदमित्यनेन निर्देश्यमाह-न चेति । तत्र-व्याकरणपदार्थे । पक्षद्वये-सूत्रशब्दोभयत्र ।

(समाधानभाष्यम्)

सूत्रम् ॥

(११ सूत्रस्य आक्षेपवार्तिकम् ॥ १ ॥)

॥*॥ सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ॥*॥

(भाष्यम्)

सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते—'व्याकरणस्य सूत्रम्' इति ॥ किं हि तदन्यत्सूत्राद् व्याकरणम्, यस्यादः सूत्रं स्यात् ॥

(प्रदीप) षष्ठ्यर्थ इति । सम्बन्धि सम्बन्धिनोर्भेदान्निष्पत्ते सम्बन्धस्य । सामान्यविशेषभावे तु इयो षष्ठ्य-

प्रयोगो न विज्ञायते, यदा त्वष्टाध्याय्येकदेशे सूत्रशब्देनोच्यते, तदा षष्ठ्यर्थो नोपपद्यते ॥

(उद्द्योत) ननु [illegible] व्याकरणस्येव [illegible] अत आह—**द्वाभ्यामिति** । [illegible] एव [illegible] , न न सिध्येदित्यर्थः । **किं पुनः—षष्ठ्यर्थोऽनुपपन्न** इति, [illegible] आह—**सामान्यविशेषेति** । सूत्र [illegible] । [illegible] तदेकदेशे तु योगव्यवहार एव **योगे योगे उपतिष्ठत** इत्या [illegible] । यदा **रिति । सूत्राणि चाप्यधीयान** इति भाष्ये [illegible] । वस्तुत एकदेशस्य सूत्रत्व [illegible] तथापि [illegible] करणत्वाभाव [illegible] इत्यन्यत्र ॥

(तत्त्वालोक) भाष्ये—**सूत्रमिति**—व्याकरणपदार्थ इति शेषः [illegible] वार्तिककार सूत्रस्य व्याकरणपदार्थत्वे प्रथमं दूषणमाह-**सूत्रे इति । व्याकरणे**—व्याकरणपदार्थे सति [illegible] । **षष्ठ्यर्थः**—[illegible] । [illegible] आह—**व्याकरणस्येति । इति** [illegible] नन्वत्र [illegible] षष्ठ्यर्थः कथं नोपपद्यते इत्यत आह—**किमिति** । (अस्मिन् पक्षे) **हि**—यतः सूत्रादन्यत् किमपि **व्याकरणं**—व्याकरणपदार्थः (स्यात्) इत्यन्वयः । **सूत्रमिति**—इदमनादेन [illegible] व्याकरणस्य सूत्रमित्यत्र षष्ठ्यर्थ इति शेषः **स्यात्**—[illegible] । अयं भावः एवं सत्र षष्ठ्यर्थोपपादकं सूत्रभिन्नं किञ्चिदपि व्याकरण पदार्थो नास्तीति भावः ।

प्रदीपे—**शब्दाभ्यामिति**—सूत्रव्याकरणाभ्यां शब्दाभ्याम् । **अष्टाध्यायी**—पाणिनिप्रणीतसूत्रसमुदायरूपा । **व्यतिरेकाभावः**—अभेदः । [illegible] भेदेन [illegible] यथा च तत्र षष्ठ्यर्थोऽनुपपन्न एवेति भावः । **सामान्येति**—सूत्रव्याकरण शब्दयोः [illegible] । **द्वयोः**—सूत्रव्याकरणशब्दयोः । ननु [illegible] तत्र षष्ठ्यर्थः कथमुपपद्यत इत्यत आह—**यदेति । उच्यते इति**—अष्टाध्यायी च व्याकरणशब्देनोच्यते समुदाय एकदेशश्च सूत्र इति च व्यवह्रियत इति शेषः । **तदेति**—तत्रेति शेषः ।

उद्योते—**इतीति**—[illegible] प्रयुक्तत्वात् तत्र षष्ठ्यर्थ इति शेषः । **अपीति**—[illegible] । **उच्यते इति**—व्याकरण पदेन च [illegible] एव, लक्ष्यलक्षणसमुदाय एव वाच्य इति शेषः । **अयं**—व्याकरणस्य सूत्रमित्ययम् । **स इति**—सूत्रव्याकरणशब्दयोरेकार्थवाचकत्व इत्यादि । **षष्ठ्यर्थ इति**—[illegible] । **पर्यायतया**—एकार्थप्रतिपादकतया । सूत्रव्याकरणशब्दयोरिति [illegible] । **अपिना**—षष्ठ्यर्थसंग्रहः । **सूत्र**—[illegible] **व्याकरण**—[illegible] । कुत इत्यत आह—**सूत्रशब्देनेति** । यत इत्यादि । **अष्टाध्याय्येव**—[illegible] एव । व्याकरणशब्देन च विशेषाभावादेव [illegible] इति शेषः । ननु अष्टाध्याय्येकदेशस्य [illegible] शब्दस्य [illegible] इत्यत आह—**तदेकदेशे इति** । अष्टाध्याय्येकदेश इत्यर्थः । **योगव्यवहार**—[illegible] । कुत इत्यत आह—**योगे इति । इत्यादाविति**—तथा [illegible] शेषः **वस्तुतः—पञ्चेति**—सूत्रशब्देन अष्टाध्याय्येकदेशस्येत्यादि । **एकदेशस्येति**—अष्टाध्याय्या इत्यादि । **तस्यापि**—अष्टाध्याय्येकदेशस्यापि । **व्याकरणत्वात्**—व्याकरणपदार्थत्वात् । तत्रेति शेषः ।

(१२ आक्षेपान्तरवार्तिकम् ॥ २ ॥)

॥ ॐ ॥ शब्दाप्रतिपत्तिः ॥ ॐ ॥

(भाष्यम्)

शब्दानां चाप्रतिपत्तिः प्राप्नोति—'व्याकरणाच्छब्दान्प्रतिपद्यामहे' इति । नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते ॥

किं तर्हि ? ॥

व्याख्यानतश्च ॥

(प्रदीप) **शब्दाप्रतिपत्तिरिति** । [illegible] मात्रप्रतिपत्तिः [illegible] ।

(उद्द्योत) ननु [illegible] इत्यत आह—**शब्दाप्रतिपत्तिरिति** । [illegible] इत्यादि [illegible] व्याकरण [illegible] व्यवहारात् [illegible] । **व्याकरणाच्छब्दान्** [illegible] दा—**न हीति** ॥

(तत्त्वालोक) भाष्ये—वार्तिककारः [illegible] द्वितीयं दूषणमाह **शब्दे ति** । अथ [illegible] **अप्रतिपत्ति**—[illegible] अनुपपत्ति [illegible] **व्याकरणादिति** । कुत इत्यत आह **नेति । हि**—[illegible] **प्रतिपद्यन्ते इति**—[illegible] । [illegible] **किमिति** । नहि [illegible] शब्दान् प्रतिपद्यन्ते इत्यर्थः । उत्तरमाह—**व्याख्यानतश्चेति** । व्याख्यानसहितात् [illegible] सूत्रात् व्याकरणात् [illegible] शब्दान् प्रतिपद्यन्ते इत्यर्थः ।

प्रदीपे—[illegible] व्यवहार कथं [illegible] इत्यत आह **नेति । हि**—यतः । **प्रतीयन्ते इति**—[illegible] शेषः ।

उद्योते—**समुदायस्येति**—[illegible] सूत्रशब्दस्य वा [illegible] इत्यादि । **अतिरिक्तत्वेऽपीति**—एकदेशत्व इत्यादि । [illegible] षष्ठ्यर्थो [illegible] वार्तिके [illegible] पद्यते इति शेषः । **इतीति**—[illegible] । **तद्वदेवेति**—[illegible] इत्यर्थः । कुत इत्यत आह—**यत इति** । ननु व्याकरणस्य शब्दप्रतिपत्तिहेतुत्वं कथं सिद्धमत आह—**व्याकरणस्येति । हेतुत्व**—प्रयोजकत्वम् । ननु [illegible] तत् लोकसिद्धमित्यत आह—**व्याकरणादिति । व्यवहारात्**—लोक व्यवहारात् । तस्य तत् लोकसिद्धमिति शेषः । [illegible] आह **सेयमिति । प्रतिपत्तीति**—[illegible] । **तद्व्याख्या**—[illegible] साधनत्वाभावात् । [illegible] व्याख्यामन्तरा [illegible] सूत्रे इत्यादि । **तदाह**—तदाशयेनाह ।

(आक्षेपसाधकभाष्यम्)

ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति ॥

(तत्त्वालोक) भाष्ये—आक्षिपति—**नन्विति** । च [illegible] । अस्य व्याख्यानमित्यनेनान्वयः । **तदेव**—व्याकरणपदार्थभूतं [illegible] सूत्रमेव । **विगृहीतं**—विभक्तम् । **भवतीति**—[illegible] च सूत्रस्य व्याख्यानस्य [illegible] भेदविवक्षया [illegible] सूत्रेणैव शब्दप्रतिपत्तिर्भवतीति स लोकव्यवहारः [illegible] ।

(आक्षेपबाधकभाष्यम्)

न केवलानि चर्चापदानि व्याख्यानम्—'वृद्धिः', 'आत्' 'ऐच्' इति ॥

किं तर्हि ? ॥

उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति ॥

(प्रदीप) समुदितमिति । समुदायादेवार्थावसायोत्पादादित्यर्थः ॥

(उद्द्योत) भाष्ये—चर्चापदानि । चर्च्यमानानि विभज्यमानानीत्यर्थः ॥ वाक्याध्याहार इति । [illegible] वाक्याध्याहार इत्यनेन वार्तिकव्याख्यानावसरे [illegible] वाक्यैकदेशन्यायेन सूचितः ॥

(तत्त्वालोक.) भाष्ये—परिहरति—नेति । वृद्धिरादैजित्यस्य [illegible] व्याख्यानं [illegible] विभज्य [illegible]—वृद्धिरिति । पृच्छति—किमिति—व्याख्यानमिति शेषः । उत्तरयति—उदाहरणमिति ।

प्रदीपे—ननु [illegible] समुदितमेव व्याख्यानपदवाच्यमित्यत आह—समुदायादिति । उदाहरणादीनामित्यादि । अवसायेति—निश्चयेत्यर्थः ।

उद्द्योते—विभज्यमानानीति—[illegible] शेषः । वाक्येति—[illegible]र्थः । पूरणमिति—इत्यादि । यथाश्रुतार्थानुरोधेनाह—पद्धेति । न्यायेन—[illegible] वाक्यैकदेश इति न्यायेन । यथा "अनाग्नेय [illegible]" इति वार्तिकस्य "न [illegible]" इति [illegible] भावः ।

(पक्षान्तरभाष्यम्)

एवं तर्हि शब्दः ।

(उद्द्योतः) शब्द इति । लक्ष्यमित्यर्थः । [illegible] उपपद्यते । [illegible] तु [illegible] ॥

(तत्त्वालोकः) भाष्ये—[illegible] व्याकरणमित्यत्र व्याक्रियते [illegible] कर्म [illegible]—एवमिति । यदि [illegible] व्याकरणपदार्थत्वे दोष इत्यर्थः । शब्द इति—[illegible] व्याकरणपदार्थो भवतीति शेषः ।

उद्द्योते—लक्ष्यमिति—[illegible] । यथा च [illegible] न व्याकरण—[illegible] । [illegible] शब्दस्य [illegible] व्याकरणमित्युच्यते इति भावः ॥ [illegible] व्याकरणशब्दार्थत्वे आपादित दोषस्य [illegible] नापद्यते इति [illegible]—अथेति । पदार्थ इति—[illegible] । शब्देति—[illegible] । तद्धितेति—[illegible] ।

(१३ आक्षेपवार्तिकम् ॥ ३ ॥)

॥ * ॥ शब्दे ल्युडर्थः ॥ * ॥

(भाष्यम्)

यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते—व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् । नहि शब्देन किंचिद् व्याक्रियते ॥

केन तर्हि ? ॥

सूत्रेण ॥

(प्रदीप) शब्द इति । करणे ल्युड् विधीयते । शब्दश्च व्याक्रियमाणत्वात्कर्म न तु करणमिति भावः ॥

(उद्द्योत) ननु राजभोजना इतिवत् कर्मणि ल्युटि न दोषोऽत आह—करणे इति । कर्मणि स तु क्वाचित्क इति भावः ॥

(तत्त्वालोक) भाष्ये—[illegible] प्रथमं दूषणमाह—शब्दे इति । व्याकरण—व्याकरणपदार्थे । सतीति शेषः । ल्युडर्थः—करणं [illegible] । [illegible] आह—व्याक्रियन्ते इति । व्याकरणमिति—इत्यनेनेति शेषः । [illegible] पक्षे तत्र ल्युडर्थः कुतो नोपपद्यते इत्यत आह—नेति । हि—यतः । व्याक्रियते इति—[illegible] इति शेषः । पृच्छति—केनेति । तर्हि केन किंचिद्व्याक्रियते इत्यर्थः । उत्तरयति—सूत्रेणेति । किंचिद् व्याक्रियत इति शेषः ।

प्रदीपे—करणे इति—व्याकरणमित्यत्रेत्यादि । ननु तत्र कर्मण्येव ल्युट् कुतो न विधीयत इत्यत आह—शब्दश्चेति । सूत्रेणेति शेषः । कर्मेति—व्याकरणक्रियाया इत्यादि । कर्मत्वकरणत्वयोः [illegible] व्याकरणक्रियायाः कर्मणः शब्दस्य तस्याः करणत्वं न सम्भवतीत्याशयेनाह—न तु करणमिति ।

उद्द्योते—राजभोजना इति—[illegible] ([illegible]) इति भोजना, राजभोजना [illegible] इति व्युत्पत्तिः । इतिवत्—इतिघटकभोजना इत्यत्रेव । व्याकरणमित्यत्रापीति शेषः । कर्मणि ल्युटो [illegible] कर्मणि ल्युट् न विधीयते इत्याशयेनाह—कर्मणीति । स—ल्युट् ।

(१४ आक्षेपान्तरवार्तिकम् ॥ ४ ॥)

॥ * ॥ भवे च तद्धितः ॥ * ॥

(भाष्यम्)

भवे च तद्धितो नोपपद्यते—'व्याकरणे भवो योगो वैयाकरणः' इति । नहि शब्दे भवो योगः ॥

क्व तर्हि ?

सूत्रे ॥

(प्रदीपः) भवे चेति । शब्दस्याव्याख्यापकत्वेन भवो योग इति चेन्मीमांसादियोगस्यापि शब्दं प्रति विचारकत्वाद्वैयाकरणत्वप्रसङ्गः ॥

(तत्त्वालोकः) भाष्ये—[illegible] शब्दस्य व्याकरणपदार्थत्वे द्वितीयं दोषमाह—भवे चेति । भवे इति—भव [illegible] इत्यादि । अर्थे इति शेषः । च तद्धित—[illegible] आह—व्याकरणे इति । इति—[illegible] आह—नेति । हि—यतः । योग इति—[illegible] । पृच्छति क्वेति । क्व तर्हि भवो योग इत्यर्थः । उत्तरयति—सूत्रे इति । भवो योग इति शेषः ।

प्रदीपे—अव्याख्यापकत्वेन—[illegible] । योग इति—[illegible] इति शेषः । चेदिति—न, तथा सति इति [illegible] । शब्दं—[illegible] ।

(१५ आक्षेपान्तरवार्तिकम् ॥ ५ ॥)

॥ * ॥ प्रोक्तादयश्च तद्धिताः ॥ * ॥

(भाष्यम्)

प्रोक्तादयश्च तद्धिता नोपपद्यन्ते । पाणिनिना

प्रोक्तं पाणिनीयम् । आपिशलं काशकृत्स्नमिति । नहि पाणिनिना शब्दाः प्रोक्ताः ॥

कि तर्हि ? ॥

सूत्रम् ॥

(तत्त्वालोक)—वार्त्तिककारोऽत्र पक्षे तृतीयं दूषणमाह—प्रोक्तेति । प्रोक्तादयः—प्रोक्तार्थकादयः । अत्र पक्षे इत्यादिः । च तद्धिताः—तद्धिताश्च । कुतेत्यत आह—पाणिनिनेति । इति—इत्यादौ । कुत इत्यत आह—नेति । हि—यतः । प्रोक्ता इति—अत इति शेषः । पृच्छति—किमिति । तर्हि किं पाणिनिना प्रोक्तमित्यर्थः । उत्तरयति—सूत्रमिति । पाणिनिना प्रोक्तमिति शेषः ।

(आक्षेपभाष्यम्)

किमर्थमिदमुभयमुच्यते ॐभवेॐ ॐप्रोक्तादयश्च तद्धिताःॐ इति । न ॐप्रोक्तादयश्च तद्धिताःॐ इत्येव भवेऽपि तद्धितश्चोदितः स्यात् ? ॥

(तत्त्वालोकः) प्रोक्तार्थकादितद्धितमध्ये भवार्थकतद्धितस्यान्तर्भावसम्भवात्पौनरुक्त्यमापादयति—किमर्थमिति । इदमित्यनेन निर्दिश्यन्तदुभयमाह—भवे इति । भवे च तद्धित इति पाठः । नेति—किमित्यादि । इत्येव—इत्यनेनैव । चोदितः—आपादितः । अनुपपन्नतयेत्यादि ।

(परिहारभाष्यम्)

पुरस्तादिदमाचार्येण दृष्टम् ॐभवे च तद्धितॐ इति, तत्पठितम् । तत उत्तरकालमिदं दृष्टम् ॐप्रोक्तादयश्च तद्धिताःॐ इति, तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ॥

(प्रदीप.) न चेदानीमिति । लक्षणप्रपञ्चाभ्यां मूलसूत्रवद्वार्त्तिकानामुपपत्त्या दोषाभावः ॥

(उद्द्योत.) लक्षणप्रपञ्चाभ्यामिति । यथा कर्मधारयप्रकरणे अलुक्प्रकरणे च । विजिगीषुकथायां हि अभिहिताभिधानमशक्तिसूचकत्वाद्दोषाय । इह तु व्युत्पादनार्थत्वान्न दोषकृदिति भावः ॥ पूर्वं सामान्ये उक्ते पश्चाद्विशेषकथनं प्रपञ्चार्थमिति युज्यते, अत्र तु विपरीतमिति न तत्साम्यमित्यन्ये ॥

(तत्त्वालोकः) भाष्ये—आशङ्कितं तत्र पौनरुक्त्यं परिहरति—पुरस्तादिति । पूर्वकालमित्यर्थः । आचार्येण—वार्त्तिककृता । दृष्टम्—स्मृतम् । इदमित्यनेन निर्दिश्यमाह—भवे चेति । तत्—भवे च तद्धित इति । अत्र पूर्वकालमित्यादि । ततः—भवे च तद्धित इति वार्त्तिकप्रणयनात् । इदमित्यनेन निर्दिश्यमाह—प्रोक्तेति । तत्—प्रोक्तादयश्च तद्धिता इति । अत्र उत्तरकालमित्यादि । इदानीं—द्वितीयवार्त्तिकप्रणयनकाले । सूत्राणि—वार्त्तिकानि । सूत्रपदस्य यथाश्रुतार्थकत्वानुपपत्त्या वार्त्तिके लक्षणाकरणात् ।

प्रदीपे—लक्षणप्रपञ्चाभ्यां—सामान्यसूत्रत्वविशेषसूत्रत्वाभ्याम् । मूलसूत्रवत्—पाणिनीयसूत्राणामिव । सामान्यवार्त्तिकत्वविशेषवार्त्तिकत्वाभ्यामिति शेषः । उपपत्त्या—पृथगभिधानोपपत्त्या । दोषाभावः—पौनरुक्त्यदूषणानवकाशः ।

उद्द्योते—कर्मधारयप्रकरणे इति—विशेषणं विशेष्येण बहुलमिति सामान्यसूत्रस्य विशेषसूत्रभूतत्वादेव तदग्रिमसूत्राणि सङ्गतानि इति शेषः । अलुक्प्रकरणे चेति—अलुगुत्तरपदे इति लक्षणस्य प्रपञ्चभूतत्वादेव तदग्रिमसूत्राण्युपपद्यन्ते, तथा प्रकृतेऽपि एकस्य सामान्यवार्त्तिकस्य विशेषवार्त्तिकभूतत्वादेवापरं वार्त्तिकं सङ्गंस्यते इति शेषः । ननूक्तार्थानामप्रयोग इति न्यायेन तत्रात्र च कथितकथनं कथन्न दोषाधायकं भवतीत्यत आह—विजिगीषुकथायामिति । तत्रेत्यर्थः । हि—एव । अशक्तिसूचकत्वात्—अनभिहिताभिधानासामर्थ्यबोधकत्वात् । अभिधातुरित्यादि । दोषाय—अनिवार्यपुनरुक्तिदोषाय । भवतीति शेषः । इहेति—तत्त्वबुभुत्सुकथायां, तत्र चेति शेषः । व्युत्पादनार्थत्वात्—शब्दव्युत्पादनप्रयोजनत्वात् । अभिहिताभिधानमित्यादि । दोषकृत्—पुनरुक्तिदोषाधायकम् । तत्सदृशा महर्षय आचार्या यतः तत्त्वव्युत्पादनाय व्याख्येयेऽर्थे तात्पर्यवन्तो भवन्ति, अतस्ते ईदृशानेकप्रणयनं स्वोक्तं न निवर्तयन्ति, इत्येतावन्मात्रेण तथाभिधानस्य युक्तत्वेऽपि कैयटेनोक्तो दृष्टान्तद्वारा तदुपपत्तिरसङ्गतेत्याशयेनाह—पूर्वमिति । यत्र यथा कर्मधारयप्रकरणादावित्यादिः । कथनमिति—अतः तत्र विशेषकथनमिति शेषः । इति—इति वक्तुम् । विपरीतं—पूर्वं भवे च तद्धित इति विशेषे उक्ते पश्चात् प्रोक्तादयश्च तद्धिता इति सामान्यकथनम् । इति—इति हेतोः । तत्साम्यम्—तत्तत्कर्मधारयप्रकरणादिसाम्यम् ।

(प्रथमाक्षेपकबाधकभाष्यम्)

अयं तावददोषः—यदुच्यते ॐशब्दे ल्युडर्थःॐ इति । नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते ॥

किं तर्हि ? ॥

अन्येष्वपि कारकेषु—"कृत्यल्युटो बहुलम्" इति । तद्यथा प्रस्कन्दनं प्रपतनमिति ॥

(प्रदीप.) प्रस्कन्दनमिति । यद्यप्ययं भीमादिस्तथापि कृत्यल्युटो बहुलमित्यस्यैव भीमादयोऽपादान इत्ययं प्रपञ्च इति भावः ॥

(तत्त्वालोक) भाष्ये—शब्दस्य व्याकरणपदार्थत्वे उक्तं प्रथमदूषणं परिहरति—अयमिति । तावदिति—वाक्यालङ्कारे । तथा च (अत्र पक्षे) शब्दे ल्युडर्थ इति (वार्त्तिकेन) यत् (व्याकरणमित्यत्र ल्युडनुपपत्तिरूपं दूषणम्) उच्यते, अयम् अदोषः (दोषो नोपपद्यते) इत्यर्थः । ननु कथमत्र पक्षे स दोषो नोपपद्यते इत्यत आह—नावश्यमिति । यतो नेत्यर्थः । विधीयते इति—अत इति शेषः । पृच्छति—किमिति । तर्हि क्व ल्युट् विधीयते इत्यर्थः । उत्तरयति—अन्येष्विति । करणाधिकरणभिन्नेष्वित्यर्थः । अपिना करणाधिकरणयोः सङ्ग्रहः । इति—इत्यनेन । ल्युट् विधीयते इति शेषः । उदाहरति—तद्यथेति । इति—इत्यादौ । तथा च व्याकरणमित्यत्र अगत्यैव कर्मणि ल्युट् विधीयते इति नात्र पक्षे तत्र ल्युडनुपपत्तिरूपो दोष इति भावः ।

प्रदीपे—अयं-प्रस्कन्दनमित्यादि । भीमादिरिति—भीमादिगणान्तर्गततया भीमादयोऽपादाने इत्यनेन निष्पन्न इति तस्य कृत्यल्युटो बहुलमित्यस्योदाहरणतयाऽभिधानं न सङ्गच्छते इति भावः । तथापीति—अत इति शेषः । प्रपञ्च इति—अतस्तस्य कृत्यल्युटो बहुलमित्यस्योदाहरणतयाऽभिधानमुपपद्यते इत्याशयः ।

(करणल्युट्समर्थनभाष्यम्)

अथ वा शब्दैरपि शब्दा व्याक्रियन्ते । तद्यथा गौरित्युक्ते सर्वे सन्देहा निवर्तन्ते, नाश्वो न गर्दभ इति ॥

(प्रदीप.) गौरित्युक्ते इति । सास्नादिमति यदा कश्चित्प्रति

'अथ गौः' इत्युच्यते तदा तत्र वाचकान्तराणां निवृत्तिः कृता भवति एवमेकस्मिन्नुदाहरणे उपन्यस्ते सर्वाणि तत्सदृशानि शब्दान्तराणि प्रतीयन्ते ॥

(उद्द्योत.) प्रतीयन्त इति। एवं च विपरीतव्यावृत्तिः सदृशसंग्रहश्च व्याकरणादिति भावः ॥ एतेन शब्दप्रतिपत्तिरत्र पक्षे उद्धृता।

(तत्त्वालोकः) भाष्ये—ननु शब्दे ल्युडर्थ इति वार्तिकेन अत्र पक्षे व्याकरणमित्यत्र यथा निर्दिष्टकरणे ल्युटोऽनुपपत्तिर्नोक्ता, किन्तु करणार्थकल्युट इत्यत्र अत्र पक्षे तत्र करणे ल्युट उपपादनायाह—अथवेति। उदाहरति—तद्यथेति। कस्मा शासनादिमित्यर्थे अयमिति शेषः। सर्वे—गोपदवदन्यदिशार्थादिपदवाच्यत्वविषयका । श्रोतुरस्त्येवादि। कुत एवमित्यत आह—नाश्व इति। नाश्वपदवाच्य इत्यर्थः। तस्मिन् श्रुते तज्ज्ञानमिति यावत् । न गर्दभ—न गर्दभपद वाच्य । इति—इत्यादि । अयं गोपदवाच्य इत्यस्य च निश्चयस्योत्पादादिति शेष । तथा चात्र पक्षे तत्र करणेऽपि ल्युडुपपद्यते इति नात्र पक्षे स दोष इति भावः ।

प्रदीपे—शासनेति—यदा (येनचित् न्युत्पन्नेन) कश्चित् (शिष्यं) प्रति शासनादिमिति अयं) इति योजना। तत्र-शासनादिमित्यर्थे श्रोतुरित्यादि ।वाचकान्तराणाम्—अश्वादिपदानाम् वाच्यताया संशयस्येति शेष ।भवतीति—गौरयं च वाच्यताया निश्चय इतो भवतीति शेष । प्रतीयन्ते इति—तथा सर्वाणि तद्विपरीतानि शब्दान्तराणि व्यावर्त्यन्ते इति शेष । यथा शुद्धगुणस्य इत्यस्मिन्नुपन्यस्ते मध्वपास्य, दध्युपयनमित्यादीनि प्रतीयन्ते, तथा मद्रो , दैत्यारिरित्यादीनि व्यावर्त्यन्ते इति भावः ।

उद्द्योते—एवञ्च-एकशब्दोपन्यासेन तत्सदृशप्रतीते तद्विसदृशव्यावृत्तेश्चोपपत्तौ । विपरीतेति—उपन्यस्तशब्दविपरीतशब्देत्यर्थः । सदृशेति—उपन्यस्तशब्दसदृशशब्देत्यर्थः । एतेन—एकस्मिन् शब्दे उपन्यस्ते तत्सदृशशब्दान्तराणि प्रतीयन्ते इत्युपपादनेन । शब्दप्रतिपत्ति.—व्याकरणाच्छब्दान् प्रतिपद्यामहे इति व्याकरणप्रयोज्यशब्दप्रतिपत्तिविषयकव्यवहारानुपपत्तिः । अपि च व्याकरणमित्यत्र करणार्थकल्युटोऽनुपपत्तिः सङ्गृह्यते। अत्र पक्षे-शब्दो व्याकरणपदार्थ इति पक्षः।

(अनुद्धृतदोषप्रदर्शकभाष्यम्)

अयं तर्हि दोषः—⁂ भवे ⁂ ⁂ प्रोक्तादयश्च तद्धिताः' ⁂ इति ॥

(तत्त्वालोकः) अत्र पक्षे दोषान्तरमुपदर्शयति—अयमिति। तर्हि—अत्र पक्षे आरब्धानां ल्युटोऽनुपपत्त्यादीनां, व्याकरणशब्दे करणल्युडनुपपत्त्यादिदोषाणां निराकरणे सति। अत्र पक्षे इति शेषः। दोष इति—अवशिष्ट इति शेष । अदर्शितपूर्वत्वेन निर्दिश्य भवे इति। भवे च तद्धित इति पाठः। इति—इति वार्तिक दर्शितम् ।

(समाधानभाष्यम्)

एवं तर्हि—

(१६ सिद्धान्तवार्तिकम् ॥ १६ ॥)

॥ ⁂ ॥ लक्ष्यलक्षणे व्याकरणम् ॥ ⁂ ॥

(भाष्यम्)

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति ॥ किं पुनर्लक्ष्यम् , किं वा लक्षणम् ? ॥ शब्दो लक्ष्यः, सूत्रं लक्षणम् ॥

(उद्द्योतः) व्याकरणशब्दार्थं स्वरूपतो ज्ञातुमिच्छन् पृच्छति—भाष्ये किं पुनरिति ॥

(तत्त्वालोकः) भाष्ये—सिद्धान्ती समाधानायोपक्रमते—एवं तर्हीति। उक्तरीत्या सूत्रशब्दोभयस्य व्याकरणपदार्थत्वे दूषिते सतीत्यर्थः ।

वार्तिककार सिद्धान्तमुपन्यस्यन् उपसंहरति—लक्ष्यलक्षणे इति। अत्र द्विवचनेन व्याकरणस्य व्यासज्यवृत्तिता सूचिता। सा च एकत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगितारूपेति भावः । व्याकरणम्—व्याकरणपदार्थः । लक्ष्यलक्षणे इति—इति लक्ष्यलक्षणे इति शेष। एतत्समुदितमिति—द्वयोः समुदितं (रूपम्) इति व्युत्पत्तिः । व्याकरणमिति—व्याकरणशब्दस्य योगरूढ्या लक्ष्यलक्षणसमुदायपरता। अत्र पक्षे शब्दस्य शास्त्रे यथैव व्याकरणस्य सूत्रमात्रस्यापि समुदायावयवयोर्भेदविवक्षया पञ्चम्युपपत्तिः । तथा लक्ष्यलक्षणसमुदायात् शब्दप्रतिपत्तेर्जायमानतया व्याकरणाच्छब्दान् प्रतिपद्यामहे इति व्याकरणप्रयोज्यशब्दप्रतिपत्तिविषयकव्यवहारस्योपपत्तिः । एवं तादृशसमुदायस्य व्याकरणप्रक्रियाकरणतया व्याकरणमित्यत्र करणे ल्युडप्युपपन्नः । तथा समुदायस्यैकदेशाभिन्नतया भवार्थे प्रोक्तार्थे च तद्धितानामप्युपपत्तिरिति अत्र पक्षे न कश्चन प्रागुक्तो दोष इति भावः । उत्तरयति शब्द इति। लक्षणमिति—तथा च नातिव्याप्तिरिति भावः ।

(समाधानबाधकभाष्यम्)

एवमप्ययं दोषः—समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते। सूत्राणि चाप्यधीयान इष्यते—वैयाकरण इति ॥

(तत्त्वालोकः) शङ्कते—एवमपीति। शब्दसूत्रोभयसमुदायस्य व्याकरणपदार्थत्वेऽपीत्यर्थः। शङ्कामेव निर्दिशन्नाह—समुदाये इति। शब्दसूत्रसमुदाये इत्यर्थः। अवयवे—तदेकदेशे सूत्रे। ननु तेन का क्षतिरित्यत आह—सूत्राणीति। सूत्रमात्रमित्यर्थः। चाप्यधीयाने—अधीयानेऽपि च। इष्यते इति—वैयाकरण इति (प्रयोगः) इष्यते इत्यन्वयः। तथा सति तत्र तत्रत्यप्रयोगानुपपत्तिरिति भावः ।

(समाधानसाधकभाष्यम्)

नैष दोषः। समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते। तद्यथा पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम् , घृतं भुक्तम् , शुक्लो नीलः कपिलः कृष्ण इति ॥ एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेऽप्यपि वर्तते ॥

(प्रदीपः) पूर्वे पञ्चाला इति। जनपदान्तरनिवृत्तिविशेषणाद् एकदेशे समुदायरूपारोपः ॥ तैलमिति। एकीभूतस्य समुदायस्य तैलत्वेऽप्येकदेशप्रयोगः। शुक्लादिभिरेव शुक्ल इत्यादयो व्यपदेशाः सर्वत्र प्रवृत्ता इति ॥ शुक्ल इति। समुदायेऽवयवे च ... (नष्टा) रोगा यथा ॥

(उद्द्योतः) जनपदान्तरेति। ... निर्देशः ॥ तैलेति। ... एकदेशे ... सर्वः इति भावः ॥ समुदायेऽप्यवयवे इति। ... आरोपादिति ... समुदाये ... एकदेशे ...

दिति । वनैकदेशे 'पुष्पितं वनम्' इतिवदेकदेशेऽपि शुक्ले 'शुक्लः पटः' इति व्यवहार इति बोध्यम् ॥

(तत्त्वालोकः) भाष्ये—**समभक्ते-नैष इति** । अत्र पक्षे इत्यादि । कुत इत्यत आह-**समुदायेष्विति** । **हि**-यतः समुदायेषु प्रवृत्ताः शब्दा इत्यन्वयः । **अवयवेष्विति**-लक्षणयेत्यादि **वर्त्तन्ते**-प्रयुज्यन्ते । उदाहरति-**तद्यथेति** । **इति**-इत्यादि । दार्ष्टान्तिकोपपादनाय ह-**एवमिति** । एवमयं व्याकरणशब्दः समुदायेषु (शब्दसूत्रसमुदायेषु) प्रवृत्त इत्यन्वयः । **अवयवेष्विति**-तदेकदेशसूत्रेष्वित्यर्थः । लक्षणयेत्यादि । **वर्त्तते**-प्रयोक्तुं शक्यते । तथा चात्र पक्षे सकलदोषपरिहारात् मम चेतत्त्वमेवेति भावः ।

प्रदीपे—जनपदान्तरम् (देशान्तरम्) अप्यस्येति व्युत्पत्तौ जनपदान्तरशब्दार्थो आर्यावर्तदेशेनापि निष्पन्नं जनपदान्तरं स्यादिति प्रेत्याह-**जनपदान्तरेति** । पूर्वदेशविवक्षितलोकानामित्यादि । **एकदेशे**-पश्चाद्देशवर्त्तिलोकसमुदायैकदेशे पूर्वेषां विवक्षितानां केः । **समुदायरूपे इति**-पश्चाच्छब्दबोध्यपश्चाद्देशवर्त्तिलोकसमुदायत्वेनेत्यर्थः । **प्रयोग इति**-एवम् उत्तरे पश्चात् इति प्रयोगो व्युत्पाद्यः । **इदं**-तैलमुक्तं घृतमुक्तमित्यादिकम् । **आकृतीति**-तैलघृतयोराकृतिः (जातिः) वाचकत्वे तु (तयोः) सर्वत्र (समुदाये एकदेशे वा) संस्थानप्रमाणं (आकारपरिमाणं) निरपेक्षा मुख्या (गौणाभिन्ना) वृत्तिः (शक्तिः) इत्यन्वयः । **अशुक्ले इति**-अवयवान्तरस्य शौक्ल्यात् (शुक्लाशुक्लतन्तुरूपावयवसमुदायात्मकपटे शुक्लत्वस्य) आरोपात् समुदायस्य (तादृशावयवसमुदायरूपपटस्य) शुक्लत्वे सति अशुक्ले अवयवे तस्य (शुक्लत्वस्यारोपात् शुक्ल इति) प्रयोगः (उपपद्यत) इत्यन्वयः । एवं नान्य इत्यादि प्रयोगोऽप्युपपाद्य इति भावः ।

उद्द्योते—**निर्देश इति**-तथा च तस्य जनपदान्तरत्वेत्यर्थः । **परिच्छिन्नोऽस्ति**-परिमितो भागः । **तत्र**-प्रमादी । **समुदाये**-अवयवसमुदायरूपे । **प्रयोगे**-शुक्ल इति प्रयोगे । एकत्रारोपि स्यान्यत्रारोपासम्भवात् प्रकारान्तरेण भाष्ययोजनमाह-**वनैकदेशे इति** । पुष्पिते वनत्वारोपादिति शेषः । **इति वत्** इति व्यवहार इव । **एकदेशे**-पटैकदेशे । **शुक्ले**-वास्तवशुक्ले । पटत्वारोपादिति शेषः ।

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु सूत्रम् ॥

(तत्त्वालोकः)—सूत्रं व्याकरणमिति लोकव्यवहारानुरोधात् सिंहावलोकनन्यायेन सूत्रं व्याकरणपदार्थ इत्युक्तमाद्यपक्षं शुक्लमवलोक्य तं समर्थयते-**अथवेति** । **सूत्रमिति**-व्याकरणपदार्थ इति पक्ष एवेति शेषः ।

(प्रथमाक्षेपस्मारणभाष्यम्)

ननु चोक्तम् ॐसूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नःॐ इति ॥

(तत्त्वालोकः) तत्र पक्षे उक्तं प्रथमदोषं स्मारयति-**ननु चेति** ।

(प्रथमाक्षेपनिरासभाष्यम्)

नैष दोषः, व्यपदेशिवद्भावेन भविष्यति ॥

(प्रदीपः) व्यपदेशिवद्भावेनेति । यथा राहोः शिर इत्येकस्मिन्नपि वस्तुनि शब्दार्थभेदाद्भेदव्यवहारः, एवमिहापि व्याकरणशब्देन शास्त्रस्य व्युत्पत्तिक्रियायाः करणरूपत्वमुच्यते सूत्रशब्देन तु समुदायरूपतेति भेदव्यवहार उपपद्यते ॥

(उद्द्योतः) शब्दार्थभेदादिति । अनेकावस्थायुक्तः शिरोराहुशब्दार्थः यत्किञ्चिदेकावस्थायुक्तं तच्च शिरःशब्दार्थः । तादृशराहुशब्दार्थस्य तादृशशिरःपदार्थोऽवयव इति षष्ठ्यर्थोपपत्तिरिति भावः ॥ **सूत्रशब्देन तु समुदायरूपतेति** । अनेकावस्थायुक्तस्यास्य व्युत्पत्तिक्रियाकरणावस्थाविशिष्टमवयव इति तद्रूपावयवस्याय समुदाय इत्यर्थः ॥ ईदृशस्थले विकल्पात्मकं ज्ञानं वस्तुशून्यमेव । व्यपदेशिवद्भावविषये प्येवमेव "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति योगसूत्रे पतञ्जलिरुक्तमित्यर्थः ॥

(तत्त्वालोकः) भाष्ये—**परिहरति नेति** । न पक्ष इत्यादि **एष**-व्याकरणस्य सूत्रमित्यत्र षष्ठ्यर्थानुपपत्तिरूपः । कुत इत्यत आह **व्यपदेशिवद्भावेनेति** । मुख्यव्यवहारतुल्यव्यवहारेण तत्र षष्ठ्यर्थोपपत्तिर्भविष्यतीत्यर्थः ।

प्रदीपे—**इतीति**-अस्य भेदव्यवहार इत्यन्वयः । **इहापि**-व्याकरणस्य सूत्रमित्यत्रापि । **शास्त्रस्य**-सूत्रसमुदायरूपस्य । **समुदायरूपतेति**-सूत्राणामित्यादि । उच्यत इति शेषः । **इति**-इति हेतोः ।

उद्द्योते—**तत्र**-इह । **तादृशराहुशब्दार्थस्य**-अनेकावस्थायुक्तशिरोरूपराहुपदार्थस्य अवयविन इति शेषः **तादृशशिरःपदार्थ**-यत्किञ्चिदेकावस्थायुक्तशिरोरूपशिरःशब्दार्थः **इतीति**-अनेन अवयवावयविभावरूपसम्बन्धस्य विवक्षया राहोः शिर इत्यन्वयः इति शेषः । ननु एवं व्याकरणशब्दाभ्यामष्टाध्यायी प्रतिपाद्यत इति पूर्वोक्त्या सूत्रशब्देन तु समुदायरूपत्वं यत्प्रक्रान्तं तत् विरुद्धमित्यत आह-**अनेकेति** । **तस्य**-सूत्रसमुदायरूपस्य वर्यत्वेन । **विशिष्ट**-विशिष्टसूत्रसमुदायरूप । **इति**-इति हेतोः । व्याकरणस्य सूत्रमित्यस्येति शेषः । **तद्रूपावयवस्य**-व्युत्पत्तिक्रियाकरणावस्थाविशिष्टसूत्रसमुदायरूपावयवस्य । **अयम्**-अनेकावस्थायुक्तः । **समुदायः**-सूत्रसमुदायरूपावयवी । तयोः अमुख्येऽपि भेदे औपाधिकभेदस्य, अवयवावयविभावरूपसम्बन्धस्य च कल्पनाया तुल्यत्वात् दृष्टान्तदार्ष्टान्तिकभावोपपत्तिः, न तु विशेष्यादितुल्यतयेति भावः । **ईदृशस्थले**-राहोः शिरः, व्याकरणस्य सूत्रमित्यादिस्थले । **विकल्पात्मकमिति**-विकल्प आत्मा (नाम) यस्येति व्युत्पत्तिः । वस्तुशून्यं विकल्पात्मकं ज्ञानमेवेत्यन्वयः । **एवमेव**-वस्तुशून्यं विकल्पात्मकं ज्ञानमेव । ननु विकल्पात्मकज्ञानस्य किं लक्षणमित्यत आह-**शब्दज्ञानेति** ।

(द्वितीयाक्षेपस्मारणभाष्यम्)

यदप्युच्यते ॐशब्दाप्रतिपत्तिःॐ इति । नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते ॥ किं तर्हि ? ॥ व्याख्यानतश्चेति ॥ परिहृतमेतत्—तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ॥

(तत्त्वालोकः)—सूत्रं व्याकरणपदार्थ इति पक्षे उक्तं द्वितीयदोषं स्मारयति-**यदपीति** । **उच्यते**-उपपाद्यते । **चेति**-देश्यनेन । तत्रोक्तद्वितीयदोषस्य कृतमेव परिहारं स्मारयति-**परिहृतमिति** । **एतत्**-अत्रोदितं द्वितीयदूषणम् । **इति**-इत्यनेन ।

(परिहारबाधकस्मारणभाष्यम्)

ननु चोक्तम्—न केवलानि चर्चापदानि व्याख्यानम्—वृद्धिः आत् ऐजिति, ॥

किं तर्हि ? ॥

"उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति" इति ॥

(तत्त्वालोकः) तत्र पादितदित्यदूषणस्य च परिहारं स्मारित, तस्य बाधकतया मतोक्तं स्मारयति—ननु चेति।

(परिहारसाधकभाष्यम्)

अविजानत एतदेवं भवति। सूत्रत एव हि शब्दान् प्रतिपद्यन्ते॥ आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत॥

(प्रदीपः) सूत्रत एवेति। पदच्छेदादिभि सूत्रार्थस्यैवाभिव्यञ्जनात्॥ आत इति निपात। अतश्च हेतोरित्यर्थ। नाद इति। नैनदित्यर्थ॥ अथवा नादोऽर्थरहितत्वाद् घोषमात्रमेवेत्यर्थ॥

(उद्द्योतः) भाष्ये—अविजानत इति। मन्दबुद्धेरित्यर्थ॥ सूत्रत एवेति। एतन्मूलमेव पठन्ति "सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके" इति॥

(तत्त्वालोकः) भाष्ये—तत्रोक्तद्वितीयदोषस्य स्मारित परिहार समर्थयते—अविजानत इति। विचारेणेति शेष। एतत्-शब्दशासनम्। सूत्रम्-उदाहरणादिसमुदायरूप-व्याख्यानसहितसूत्रात्। कुत तादृशविचारवतो मन्दबुद्धित्वमुच्यते इत्यत आह-सूत्रत एवेति। हि-यत। प्रतिपद्यन्ते इति-अत इति शेष। अन्वयमुखेनोक्त्वा व्यतिरेकमुखेनाह-आतश्चेति। एवेति—शब्दान् प्रतिपद्यन्ते इत्यनुषज्यते। कुत इत्यत आह-य इति। हि-यत। उत्सूत्रमिति-उत् (उद्गत) सूत्र यस्मादिति व्युत्पत्ति।

प्रदीपे—सूत्रत एव शब्दान् प्रतिपद्यन्ते इत्यत्र हेतुमाह-पदच्छेदेति। आदिना उदाहरणादिसंग्रह। एतत्-उत्सूत्रकथनम्। अर्थेति-उत्सूत्रकथनस्येत्यादि।

उद्द्योते—एतन्मूलमेव-सूत्रत एव शब्दान् प्रतिपद्यन्ते इत्येतन्मूलकमेव।

(इति व्याकरणपदार्थनिरूपणम्॥)

(अथ वर्णोपदेशप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ किमर्थो वर्णानामुपदेशः?।

(प्रदीपः) किमर्थं इति। नहि वर्णोपदेशेन कस्यचिन्मातृकस्यानुशासनमिति भाव॥

(उद्द्योतः) ननु लोकप्रसिद्धमातृकापाठेनैव वर्णज्ञानसम्भवात् माहेश्वरो वर्णसमाम्नाय किमर्थ इति पृच्छति—भाष्ये किमर्थ इति। पाणिनये महादेवेन इत्यर्थ॥ ननु साधुत्वान्वाख्यान फलमत आह—महीति॥

(तत्त्वालोकः) भाष्ये—किमर्थं-किम्प्रयोजनक। वर्णानाम्-अइउ(ण्) इत्यादीनाम्।

उद्द्योते—ननु वर्णज्ञानस्यैव वर्णोपदेशप्रयोजनत्वेऽपि कथ तस्य प्रयोजनवत्त्वमित्यत आह-लोकेति। मातृकेति-"मातृका" शब्दवाच्या "अ आ इ ई" इत्यादिवर्णसमुदायरूपेत्यर्थ। माहेश्वरः-महेश्वरप्रोक्त। वर्णसमाम्नाय-अइउणित्यादिरूप। इति-वाक्यशेषेण। ननु गुरो शिष्यं प्रति ज्ञापयति स्वव्यवहारेणैव उपदेशशब्दव्यवहारदर्शनात् कथ उपदेशशब्दप्रयोगो नोपपद्यते महादेवस्य पाणिनिं प्रत्येव दित्यत आह-पाणिनये इति। एवं च पाणिनिं प्रत्युपदिष्टा महादेवेनेत्यर्थ इति शास्त्रकारतया भावनाऽऽह इति

|| ल्याचमिथ्यत्तिरूपप्रयोगे उपदेशशब्दव्यवहारो युक्त एवेति भाव। साधुत्वेति-शब्दानामित्यादि। फलमिति-वर्णोपदेशस्येत्यादिः।

(१७ समाधानवार्तिकम्॥ १॥)

॥ * ॥ वृत्तिसमवायार्थ उपदेशः ॥ * ॥

(भाष्यम्)

वृत्तिसमवायार्थो वर्णानामुपदेशः॥

किमिदं वृत्तिसमवायार्थ इति?।

वृत्तये समवायो वृत्तिसमवायः। वृत्त्यर्थो वा समवायो वृत्तिसमवायः। वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः॥

का पुनर्वृत्तिः?॥

शास्त्रप्रवृत्तिः॥

अथ कः समवायः?॥

वर्णानामानुपूर्व्येण संनिवेशः॥

अथ क उपदेशः?॥

उच्चारणम्॥

कुत एतत्?॥

दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह—उपदिष्टा इमे वर्णा इति॥

(प्रदीपः) वृत्तिसमवायार्थं इति। लाघवेन शास्त्रप्रवृत्त्यर्थं इत्यर्थ। धर्मनियमवत्समास॥ वृत्त्यर्थं इति। शास्त्रप्रवृत्तिश्च यास तस्य समवायस्य दर्शयति। इग्यण इत्यादौ हि यथासंख्यशास्त्र वर्णनिर्देशमात्रादेवावतिष्ठते॥ वृत्तिप्रयोजन इति। पारम्पर्येण शास्त्रप्रवृत्त्यावश्यकत्वम्। सति हि समवाये इत्संज्ञा। तत आदिरन्त्येनेति [प्रत्याहार।] ततो इकोऽपि इत्यादिशास्त्रप्रवृत्ति।

(उद्द्योतः) उक्तम्—वृत्तिसमवायार्थं इति। वृत्ति शास्त्रप्रवृत्तिस्तदुपयोगी समवायो वर्णानां क्रमविशेष, स बोधद्वारेणार्थं प्रयोजनं यस्य स तथोक्त। सति तत्समाम्नाये प्रत्याहारनिर्माणद्वारेण शास्त्रप्रवृत्तिरिग्यण इत्यादौ यथासंख्यप्रवृत्तिरिति भाव। अनेनास्य शास्त्रादिभूतत्व सूचितम्। अत एव मङ्गलार्थं महतः शास्त्रौघस्यादितो वृद्धिशब्द पठ्यतीति वदन्ति। अन्यकर्तृकत्वं च सूचितम्। पाणिनिशास्त्रप्रवृत्त्यर्थं उपदेश इत्युक्ते उपदेशगुरुकर्तृकतया स्वरमेव प्रमाणे, शिष्टोच्चारणेऽपि वर्णोपदेश इत्याद्युपदेशव्यवहारात्॥ अनुबन्धकरणार्थं इत्यत्र मन्त्रद्रष्टृत्वस्य सिद्धत्वात्। तत्त्वं च पदेऽशक्तकर्तृकत्वमेव प्रमाणमित्याह॥ भाष्ये-किमिदमिति। कोऽयं समास इति प्रश्न। धर्मनियमवदिति। षष्ठीसमास। पक्षत्रयमेकमुत्तरयति-शास्त्रेति। आद्यपक्षं दूषयति लाघवेन शास्त्रप्रवृत्त्यर्थं इति। ननु नेदमादौ शास्त्रसरणीस्थत्वात् लक्षणानुपदेशव्यवहारोऽत आह—भाष्ये उच्चारणमिति। दशकनिनादेनाभिव्यक्त इत्यर्थ।

(तत्त्वालोकः) भाष्ये—वर्णिकार वर्णोपदेशस्य प्रयोजनं पृच्छति-मन्तव्यमाह-पृच्छतीति। पृच्छति-किमिदमिति। समस्यत इति शेष। इति-इतिशब्दप्रयोगसमवायेन। उपदेश-वृत्तये इति। वृत्ति

परेन स्थिते शक्तिलक्षणान्यतरस्य च वाच्यतया संशयोदयात् पृच्छति-का पुनरिति । वृत्ति-वृत्तिपदार्थः । उत्तरयति शास्त्रेति । समवायशब्देन समुदायस्य समवायसम्बन्धस्य च वाच्यतया संशयोदयात् पृच्छति-अथ क इति । समवायः-समवायशब्दार्थः । उत्तरयति-वर्णानामिति । उपदेशशब्दस्य देशसमापत्तिवाचकत्वसंशयात् पृच्छति-अथ क इति । उपदेशः-उपदेशशब्दार्थः । उत्तरयति उच्चारणमिति । पृच्छति-कुत इति । एतत् उच्चारणम् । उपदेशशब्दार्थ इति शेषः । उत्तरयति दिशिरिति । दिश धातुरित्यर्थः । उच्चारणक्रिय इति-उच्चारण क्रिया यस्येति व्युत्पत्तिः । अत इति शेषः नतु कुतो दिशेरुच्चारणक्रियता प्रतीयते इत्यत आह-उच्चार्येति । हि यत । आहेति-उच्चारयतीति शेषः । इतीति-अत इति शेषः ।

प्रदीपे-वृत्तिसमवायेत्यत्र प्रथमव्युत्पत्त्यनुसारेण चतुर्थीसमासो न भवति, तस्य प्रकृतिविकृतिभाव एव विधानात् । तथा च तत्र चतुर्थ्या तादर्थ्ये प्रतिपादिते सम्बन्धसामान्ये षष्ठी विधाय (षष्ठी) समासः कर्तव्य इत्याशयेनाह लाघवेनेति । प्रत्याहारद्वारेत्यादि प्रवृत्त्यर्थ इति-समवाय इति शेषः । अयं वृत्तिसमवायेत्यस्यार्थः । तत्र द्वितीयव्युत्पत्त्या कर्मधारयसमासो विवक्षितः, वृत्त्यर्थ (समवाय) स्य वृत्तिशब्देनाभिधानादित्यभिप्रायेणाह-शास्त्रेति । प्रत्यासन्न-स्वम् उपयोगित्वम् । हि यत । तत्र तृतीयव्युत्पत्त्या अङ्गाङ्गिभावसम्बन्धे षष्ठीं विधाय (षष्ठी) समासो विधेय इति सूचितमित्याशयेनाह-पारम्पर्येणेति । प्रत्याहारद्वारेत्यर्थः । अस्य-समवायस्य । पारम्पर्यमेवोपपादयितुमाह-सतीति । हि-यत । इति-इत्यनेन ।

उद्द्योते-स तथोक्तः-वर्णोपदेशः वर्णगतक्रमविशेषेण इत्र । हि-यत । आद्यसमासफलमाह-लाघवेनेति । द्वितीयसमासफलमाह-द्व्यग इति । तृतीयसमासप्रयोजनत्वमङ्गाङ्गभावसमुच्चयायाह-चेति अनेन-उक्तार्थकवृत्तिसमवायेन वार्तिकेन । अस्य-अ इ उणित्याद्यात्मकवर्णसमाम्नायस्य । शास्त्रेति-अष्टाध्यायीत्यर्थः । अत एव तादृशवर्णसमाम्नायस्य शास्त्रबहिर्भूतत्वादेव । वृद्धिशब्द-प्रथमाध्याय प्रथमपाद प्रथमसूत्रवृद्धिरादैजिति घटकम् । अन्येति-वृत्तिसमवायेति वार्तिकेन वर्णसमाम्नायस्येत्यादि । वर्णसमाम्नायस्य पाणिनिभिन्न शिवोपदिष्टत्वे हेतुमाह-पाणिनीति । ननु शिवकर्तृके अनादिसिद्धवर्णसमाम्नायस्य ढक्कानिनादद्वाराऽभिव्यञ्जनरूपोच्चारणे कथमुपदेशपदप्रयोग इत्यत आह-सिद्धेति । सिद्धस्येत्यर्थः । उपदेशव्यवहारात्-उपदेशपदप्रयोगात् । ननु केन वर्णसमाम्नायस्य सिद्धत्वं सूचितमित्यत आह-अनुबन्धेति । इतरस्य-अनुबन्धातिरिक्तवर्णसमाम्नायस्य । ननु तर्हि अनुबन्धाः केन कृता इत्यत आह-तदिति । अनुबन्धेत्यर्थः । उपदेशकर्तृकर्तृकमेव-वर्णसमाम्नायोपदेशकर्तृशिवकर्तृकमेव । आद्येति-प्रथमसमासेत्यर्थः । इति इत्यनेन । इदम्-वर्णसमाम्नायोच्चारणम् । अस्य-वर्णसमाम्नायस्य । तत्कथम्-तर्हि कथम् । वर्णसमाम्नायस्योच्चारण इति शेषः । अभिव्यक्तिरिति-वर्णसमाम्नायस्येत्यादि । तथा च पाणिनिरूपशिष्यं प्रति महादेवरूपगुरुकर्तृके वर्णसमाम्नायस्य प्रथमं ढक्कानिनादद्वारा भिव्यञ्जनरूपे उच्चारण उपदेशपदप्रयोगो युक्त एवेति भावः ।

(१८ वर्णोपदेशप्रयोजनान्तरवार्तिकम् ॥ २ ॥)

॥ * ॥ अनुबन्धकरणार्थश्च ॥ * ॥

(भाष्यम्)

अनुबन्धकरणार्थश्च वर्णानामुपदेशः-अनुबन्धानासङ्क्ष्यामीति । नह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम् । स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च । वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । प्रत्याहारो वृत्त्यर्थः ॥

(प्रदीपः) प्रत्याहारार्थमिति । प्रत्याहारशब्देनाणादिका संज्ञा उच्यते ॥

(उद्द्योत) फलान्तरमाह-अनुबन्धकरणार्थश्चेति । अत्र बन्धकबोधनाय इत्यर्थः । चेनाकारस्य विवृतगुणत्वसंग्रहः । उपलक्षणत्वेन वा । अनुबन्धत्वं च समुदायापत्ये सति ना यथेति तात्पर्यम् ॥ ननु प्रत्याहारशब्देन सूत्र चेत् तादर्थ्यमनुबन्धानामनुपपन्नमत आह प्रत्याहारशब्देनेति । अधिकरणव्युत्पत्त्या अर्थोऽयमुच्यत इति भावः ॥ भाष्ये-वृत्त्यर्थ इति । लाघवेन शास्त्रप्रवृत्त्यर्थ इत्यर्थः । एतेन प्रत्याहारद्वारा समवायस्य वृत्त्यर्थता दर्शिता ॥

(तत्त्वालोक) भाष्ये-वार्तिककारेण वर्णोपदेशस्य द्वितीयप्रयोजनाभिधानायोक्तं अनुबन्धेति वार्तिकं व्याचष्टे-अनुबन्धेति । ननु अनुबन्धा उपदेशकृता इति कुतो ज्ञायते इत्यत आह-अनुबन्धानिति । आसङ्क्ष्यामि-करिष्यामि । इतीति-उपदेशकव्यवहारादिति शेषः । ननु अनुबन्धकरणाय वर्णोपदेशस्य कुत आवश्यकतेत्यत आह-नेति । हि-यत । शक्या इति-अत इति शेषः । तात्पर्यं पुनराह-स एष इति । ननु वृत्तिसमवायानुबन्धकरणयोरेव किं प्रयोजनमित्यत आह-वृत्तीति । ननु प्रत्याहार एव किम्प्रयोजनक इत्यत आह-प्रत्याहार इति ।

उद्द्योते-फलान्तरमिति-द्वितीयप्रयोजनमित्यर्थः । वार्तिककार वर्णोपदेशस्येत्यादि । विवृत गुण सग्रह-विवृतत्वगुण समुच्चय । तथा चाकारस्य विवृतत्वगुणबोधनार्थोऽपि वर्णोपदेश इति भावः । उपलक्षणत्वेन चेति-अनुबन्धशब्दस्येत्यादि । अकारस्य विवृतगुणत्वसंग्रह इत्यनुषज्यते । नन्वकारस्य विवृतत्वगुणस्यानुबन्धत्वमेव कुतो नेत्यत आह-अनुबन्धत्वमिति । चेद्-यदि । उच्यते तर्हीति शेषः । तादर्थ्यं-प्रत्याहारप्रयोजनकत्वम् । अधिकरणव्युत्पत्त्या-प्रत्याह्रियन्ते वर्णा एष्विति व्युत्पत्त्या । अर्थेति-प्रत्याहारोऽस्ति एषामिति व्युत्पत्तौ प्रत्याहारशब्दादित्यादि । वेति-विकल्पेनेति शेषः । समवायस्य-वर्णगतक्रमविशेषस्य । वृत्त्यर्थता-शास्त्रप्रवृत्त्यर्थता ।

(१९) वर्णोपदेशप्रयोजनान्तरवार्तिकम् ॥ ३ ॥)

॥ * ॥ इष्टबुद्ध्यर्थश्च ॥ * ॥

(भाष्यम्)

इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः-'इष्टान्वर्णान् भोत्स्यामहे' इति । नह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम् ॥

(प्रदीप) इष्टबुद्ध्यर्थश्चेति । सति ह्युपदेशे कलादिदोषरहिता ये वर्णा निर्दिष्टास्त एव प्रयोक्तव्या इत्युक्तं भवति ॥

(उद्द्योत) भोत्स्यामहे इति । अन्तर्भावितण्यर्थः । बोधयिष्यामहे इत्यर्थः ॥ एवं विज्ञातुमित्यस्य विज्ञापयितुमित्यर्थः ॥ सति ह्युपदेशे इति । एवं च व्याकरणाध्येतॄणामक्षरसमाम्नायेनैव वर्णस्य कलेष्टवर्णज्ञाने सिद्धे न तदर्थं मातृका पाठनायेति भावः ॥

(तत्त्वालोक) भाष्ये-वार्तिककार वर्णोपदेशस्य तृतीयप्रयोजनमाह-इष्टेति । इष्टबुद्ध्यर्थ-कलादिदोषरहितेष्टवर्णबोध

नार्थ । ननु तादृशेष्वर्णा उपदेशमन्तरा सुबोधयितव्या इति कुतो ज्ञायते इत्यत आह—इदानीमिति । इतीति—वर्णोपदेशकव्यवहारादिति शेष । नन्विष्टवर्णबोधनाय वर्णोपदेशस्य कुत आवश्यकतेत्यत आह—नेति । हि—यत । विज्ञातुमिति—अत इति शेष ।

प्रदीपे—सति हि उपदेशे इति—यत वर्णोपदेशे सतीत्यर्थं । अस्य इत्युक्त भवतीत्यनेनान्वय । निर्दिष्टा इति—शिक्षादिषु इत्यादिः । ते इति शेष । भवतीति—अत वर्णोपदेश कृत इति शेष ।

उद्योते—अन्तरिति—यत इत्यादि । घोषेति—अत इत्यादि । एवम्—इत्थंभाविन्यर्थनया । वर्णोपदेशस्य किं प्रयोजनमिति प्रश्ने कृतस्य समाधानत्रयस्याशयमाह—एवञ्चेति । वर्णोपदेशस्य तादृशफल त्रयमत्त्वे चेत्यर्थं । तदर्थं—व्याकरणाध्येतव्यम् ।

(२० आक्षेपवार्तिकम् ॥ ४ ॥)

॥ * ॥ इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः ॥ * ॥

(भाष्यम्)

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः । एवंगुणा अपि हि वर्णा इष्यन्ते ॥

(प्रदीपः) एकश्रुत्या हि सूत्राणां पाठात्तेषामुदात्तादीनामुपदेशः कर्तव्य इत्याह—इष्टबुद्ध्यर्थश्चेति चेदिति ।

(उद्योतः) एकश्रुत्येति । त्रैस्वर्यपाठे तु द्वयोरेव कर्तव्यता स्यादित्यर्थं । तेषां लोकत सिद्धौ तु दोषरहितानामपि तत एव सिद्धेरुपदेशवैयर्थ्यापत्तिरिति भाव ॥ त्रैस्वर्येण पाठेऽपि अन्यतमपाठे ऽपरस्य कर्तव्यत्वाभिप्रायेण सर्वेषा ग्रहणमित्यन्ये ॥

(तत्त्वालोकः) भाष्ये—प्राक्षेपाय वार्तिककृदुपस्थापितं इष्टेति वार्तिकं व्याचष्टे—इष्टबुद्ध्यर्थश्चेति । उपदेशैरित्यादि । वर्णोपदेश कृत इति शेष । चेत्—यदि । अभ्युपगम्यते तर्हि ते उदात्तत्वादिगुणकवर्णोपदेशनायेति शेष । कुत इत्यत आह—एवं गुणा इति । एवम् (उदात्तत्वादय) गुणा येषामिति व्युत्पत्ति । हि—यत । इष्यन्ते इति—प्रयत्नेत्यादि । अत इति शेष ।

प्रदीपे—एकश्रुत्या हि—स्वरान्तरेणैव । एककाले इत्यादि । सूत्र पाठाय स्वरान्तरो विनिगमनाविरहादाह—सर्वेषामिति ।

उद्योते—त्रैस्वर्यपाठे-त्रैस्वर्येण उदात्तानुदात्तस्वरितैनि स्वरत्रयेन पाठे । सूत्राणामित्यादि । एककाले स्वरत्रयेण सूत्राणां पाठासम्भवात् येनैकस्वरेण तेषां पाठ, तदपेक्षयान्योपादानादेव सिद्धत्वमभिप्रेत्याह—द्वयोरिति । येनैकस्वरेण सूत्राणां पाठः तदितरस्वरद्वयोपादानस्य स्वरदोषरित्यर्थं । तेषां—उदात्तादीनाम् । इत्याद्येनेति शेष । दोषरहितानामिति—वर्णानामिति शेष । ततः—लोकत । इत्यादि । उपदेशेति—वर्णोपदेशे । सिद्धान्तमाह—त्रैस्वर्येणेति । सूत्राणामिति शेष । अपि तु एकस्वरेण सूत्राणां पठे स्वरस्य सम्भव । एककाले स्वरत्रयेण सूत्राणां पाठासम्भवात्, स्वरान्तर स्वतन्त्रपदे विनिगमनाविरहादाह—अन्यतमपाठे इति । अन्यतमेनान्यतमस्वरेण पाठे इत्यर्थः । इत्यादिना । अन्यस्य—तत्रान्यैन स्वरेण सूत्राणां (तादृश्या वर्णतः) स्वरस्य । स्वरस्यैति शेष ।

(२१ सिद्धान्तवार्तिकम् ॥ ५ ॥)

॥ * ॥ आकृत्युपदेशात्सिद्धम् ॥ * ॥

(भाष्यम्)

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः ॥

(प्रदीपः) आकृत्युपदेशादिति । उपात्तोऽपि विशेषो नान्तरीयकत्वाज्जातिप्राधान्यविवक्षाया न विवक्ष्यत इत्यर्थं ॥

(उद्योतः) आकृत्युपदेशे किंचिदकारादिरूपव्यक्तिविशेषोपादानं तदुपादाने व्यक्त्यन्तरग्रहणानापत्तिरित्यत आह—उपात्त इति । नान्तरीयकत्वं च त विना जातेरुच्चारयितुमशक्यत्वात् ॥

(तत्त्वालोकः) भाष्ये—वार्तिककार समाधत्ते—आकृत्युपदेशादिति । वर्णगतजात्युपदेशादित्यथ । वर्णोपदेशेन त्रिविधानामित्यादि । उदात्तत्वादिगुणकवर्णाना बोधनमिति शेष । सिद्धमिति—तथा च उदात्तादिज्ञापनाय तदुपदेश कर्तव्यो न भवतीति शेष । आकृतीति वार्तिकं विशेषतो व्याचष्टे—अवर्णेति । अवर्णोपदेशेनेत्यादि । एवम-ग्रेऽपि । अवर्णकुलं—अवर्णसमूहम् । इवर्णाकृतिरिति—उपदिष्टा सर्वमिवर्णकुलं ग्रहीष्यतीति शेष । एवम ग्रेऽपि ।

प्रदीपे—उपात्त इति—जातिप्राधान्यविवक्षायां (मुख्यतया वर्णगतजात्युपदेशविवक्षायां) नान्तरीयकत्वात् । अकारादिरूपव्यक्तिविशेषोपादानं विना तद्गतजातेरुपदेष्टुमशक्यतया तदुपादानस्यावश्यकत्वात्) उपात्तोऽपि (गौणतयोपदिष्टोऽपि) विशेष (अकारादिरूपव्यक्तिविशेष) न विवक्ष्यते इत्यन्वय । तथा च व्यक्तिविशेषोपादानसामर्थ्यात् उपात्तव्यक्तिविशेषभिन्नव्यक्तिग्रहणानुपपत्ति सम्भाव्यमाना परिहृतेति भावः ।

उद्योते—आकृत्युपदेशे—वर्णगतजात्युपदेशे । विवक्षिते इति शेष । किमिति—कुतो हेतो । तदुपादाने—अकारादिरूपव्यक्तिविशेषोपादाने । क्रियते इत्यादि । कृते सति तदुपादान (करण) सामर्थ्यात् इति शेष । व्यक्त्यन्तरेति—उपात्तव्यक्तिविशेषभिन्नव्यक्तेरित्यर्थं । नान्तरीयकत्वमिति—तदुपादानस्येत्यादि । तम्—अकारादिरूपव्यक्तिविशेषम् ।

(२२ आक्षेपवार्तिकम् ॥ ६ ॥)

॥ * ॥ आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः ॥ * ॥

(भाष्यम्)

आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः ॥

के पुन. संवृतादयः ? ॥

संवृतः, कलो, ध्मात, एणीकृतो, अम्बूकृतो, अर्धको, ग्रस्तो, निरस्तः, प्रगीत, उपगीत', क्ष्विण्णो, रोमश, इति ॥ अपर आह—

"ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम् ।

संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः" इति ॥

अतोऽन्ये व्यञ्जनदोषाः ॥

(प्रदीपः) **संवृतादीनामिति ।** एकारादीनां संवृतत्वं दोषो नत्वकारस्य तस्य संवृतगुणत्वात्, तत्र सन्ध्यक्षरेषु विवृततमेषूच्चार्येषु संवृतत्वं दोषः । **कलः** स्थानान्तरनिष्पन्नः काकलिकत्वेन प्रसिद्धः । **ध्मातः** श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यते । **एणीकृतोऽविशिष्टः** किमयमोकार अथौकार इति यत्र सन्देहः । **अम्बूकृतो** यो व्यक्तोऽप्यन्तर्मुख इव श्रूयते । **अर्धको** दीर्घोऽपि ह्रस्व इव । **ग्रस्तो** जिह्वामूले निगृहीतः, अव्यक्त इत्यपरे । **निरस्तो** निष्ठुरः । **प्रगीतः** सामवदुच्चारितः । **उपगीतः** समीपवर्णान्तरगीत्यानुरक्तः । **क्ष्विण्णः** कम्पमान इव । **रोमशो** गम्भीरः । **अवलम्बितो** वर्णान्तरासम्भिन्नः । **निर्हतो** रूक्षः **सन्दष्टो** वर्धित इव । **विकीर्णो** वर्णान्तरे प्रसृतः । एकोऽप्यनेकनिर्भासीत्यपरे । **स्वरदोषभावना इति ।** स्वरदोषगोत्राणि । अनन्ता हि दोषा अशक्यप्रमदर्शना ॥

(उद्द्योतः) **संवृतादीनामिति** भाष्ये तादृशदोषसहितानामाकृतिग्रहणात्प्राप्तस्य ग्रहणस्य प्रतिषेधो वक्तव्य इत्यर्थः ॥ तदाह—**एकारादीनां संवृतत्वमिति ॥ अविशिष्ट इति ।** मश्लिष्टः सन्दिग्ध इति यावत् ॥ **ह्रस्व इवेति ।** तद्द्वकालसङ्कोचेनोच्चारित इत्यर्थः । **निष्ठुर इति ।** त्वरित इत्यन्ये ॥ **गोत्राणीति ।** स्वरदोषजातय इत्यर्थः ।

(तत्त्वालोकः) भाष्ये–वर्णगतजात्युपदेशात् स्थाना उदात्तत्वादिगुणकवर्णानां ज्ञेयत्वेन ग्रहणमिव अनिष्टानां संवृतत्वादिदोषकवर्णानामपि तथा ग्रहणं प्राप्नोति । अतस्तस्य प्रतिषेधो वक्तव्य इत्याशयेन वार्तिककार आक्षिपति–**आकृतीति । सिद्धमिति**–उदात्तत्वादिगुणकवर्णानां ग्रहणमित्यादि । **चेत्**–यदि । अभ्युपगम्यते तर्हीति शेषः । **संवृतादीनाम्**–संवृतत्वादिदोषसहितवर्णानाम् । वर्णगतजात्युपदेशात् प्राप्तस्य ग्रहणस्येति शेषः । संवृतत्वादिदोषवद्वर्णजिज्ञासया पृच्छति–**के पुनरिति ।** नाम्ना संवृतादीन् निर्दिशन्नुत्तरयति–**संवृत इति । इतीति**–संवृतादिपदेन बोध्या इति शेषः । प्रतिपाद्यभेदात् प्रतिपादकभेदविवक्षयाऽऽह–**अपर इति । इतीति**–ग्रस्तत्वादिदोषसहितवर्णानीति शेषः । **अतः**–संवृतादिभ्यः ।

प्रदीपे—**एकारादीनामिति**–आकारादीनामिति भावः । **अकारस्येति** संवृतत्वं दोष इति शेषः । कुत इत्यत आह–**तस्येति ।** अकारस्येत्यर्थः । **तत्र**–कारादिषु । **स्थानान्तरेति**–स्वस्थानभिन्नस्थानेत्यर्थः । **ह्रस्व इति**–य इत्यादि । लक्ष्यते इति स इति शेषः । **अविशिष्टः**–भेदकविशेषरहितः । अत एवाह–**किमिति । अथौकारः**–अथवा औकारः । **सन्देह इति**–स इति शेषः । **श्रूयते इति**–स इति शेषः । **दीर्घ इति** य इत्यादि । **इवेति**–स इति शेषः । **कम्पेति**–य इत्यादि । **इवेति**–स इति शेषः । **वर्धित इति**–य इत्यादि । **इवेति**–स इति शेषः । **एकोऽपीति**–य इत्यादि । स त्विति शेषः । **निर्भासीति**–स इति शेषः । **हि**–यतः ।

उद्द्योते–**तादृशेति**–संवृतत्वादीत्यर्थः । संवृतत्वगुणकह्रस्वावर्णग्रहणस्य प्रतिषेध्यताया व्यवच्छेदायाह–**दोषेति । सहितानामिति**–वर्णानामिति शेषः । **आकृतिग्रहणात्**–वर्णगतजात्युपदेशकरणात् । **तदाह**–तदाशयेनाह । **तद्वत्**–ह्रस्ववत् । **जातयः**–समूहाः ।

(सिद्धान्तिभाष्यम्)

नैष दोषः ॥

(२३ समाधानवार्तिकम् ॥ ७ ॥)

[॥ * ॥ गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिः ॥ * ॥]

(भाष्यम्)

गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति ॥

(उद्द्योतः) भाष्ये **गर्गादिबिदादिपाठादिति ।** संवृतादिदोषरहितानामेव तत्र पाठादिति भावः ॥

(तत्त्वालोकः) भाष्ये–उत्तरयति–**नेति । एषः**–वर्णगतजात्युपदेशप्रयुक्तसंवृतत्वादिदोषवद्वर्णग्रहणप्रतिषेधवक्तव्यतारूपः । कुत इत्याकाङ्क्षायां वार्तिककारः समाधत्ते–**संवृतादीनां**–संवृतत्वादिदोषसहितवर्णानाम् । **भविष्यतीति**–अतः इति शेषः ।

उद्द्योते–**संवृतादिदोषरहितानां**–संवृतत्वादिदोषरहितवर्णघटितगर्गादिबिदादीनाम् । **तत्र**–गर्गादिबिदादिगणयोः । **पाठात्**–पठनादित्यर्थात् ।

(आक्षेपभाष्यम्)

अस्त्यन्यद् गर्गादिबिदादिपाठे प्रयोजनम् ॥ किम् ? ॥

समुदायानां साधुत्वं यथा स्यादिति ॥

(प्रदीपः) **अस्त्यन्यदिति ।** गर्ग इत्यादिनैव सन्निवेशेन गर्गादीनां साधुत्वं यथा स्यात् गार्ग्य इत्यादीनां मा भूत् । ततश्च तद्गतानामेवाकारादीनां दोषनिवृत्तिः कृता स्यात्, न तु समुदायान्तरस्थानाम् । यद्यपि प्रत्ययविध्यर्थो गर्गादीनां पाठस्तथापि प्रसङ्गात्समुदायसाधुत्वार्थोऽपि भवति ॥

(उद्द्योतः) **साधुत्वमिति ।** निवृत्तकलादिदोषवत्त्वमित्यर्थः ॥ **गार्ग्य इत्यादीनामिति ।** तत्रत्यानां कलादिदोषनिवृत्तिर्न स्यादित्यर्थः । तदाह—**ततश्चेति ॥** परे तु **समुदायानामे**तत्प्रकृतिकयत्नस्यर्थः । समुदायानां साधुत्वं यथा स्यादित्यर्थः पाठश्चारितार्थो न कलादिदोषनिवर्तयेदित्येव भाष्यार्थः । **पाठश्चैव विशेष्यत** इत्यग्रिमभाष्यस्वरसादित्याहुः ॥

(तत्त्वालोकः) भाष्ये–आक्षिपति **अस्तीति । अन्यत्**–संवृतत्वादिदोषवद्वर्णनिवृत्तिभिन्नम् । गर्गादिबिदादिगणयोरिति शेषः । **गर्गादिबिदादिपाठे**–संवृतत्वादिदोषरहितवर्णघटितगर्गादिबिदादिपाठस्य, गर्गादिबिदादिपाठस्य वा । ननु तत्र (तादृश) गर्गादिबिदादिपाठस्य सदोषवर्णनिवृत्तिभिन्नं किं प्रयोजनमित्याशयेन पृच्छति–**किमिति ।** अन्यत् तस्य प्रयोजनमिति शेषः । उत्तरयति–**समुदायानामिति ।** गर्गादिबिदादिसमुदायानामित्यर्थः । **साधुत्वं**–कलत्वादिदोषरहितवर्णघटितत्वम्, यञादिप्रत्ययप्रकृतित्वं वा । **स्यादिति**–अत्र (तादृश) गर्गादिबिदादिपाठस्य प्रयोजनमिति शेषः ।

प्रदीपे–**सन्निवेशेन**–आनुपूर्व्या । **मा भूत्**–न भवतु । साधुत्वं (कलत्वादिदोषरहितवर्णघटितत्वम्) इत्यादि । इति तत्र तादृशगर्गादिपाठस्य प्रयोजनमिति शेषः । ननु कुतस्तस्य तत्प्रयोजनमुपपद्यते इत्यत आह–**तत इति ।** (तत्र) तादृशगर्गादिपाठादित्यर्थः । यत इत्यादि । **तद्गतानां**–गर्ग इत्यादिघटकानाम् । **दोषेति**–कलत्वादीत्यादि । गार्ग्यादिसमुदायानां तत्र पाठाभावादाह–**न त्विति । समुदायान्तरस्थानां**–गार्ग्य इत्यादिघटकानाम् । अत इति शेषः । **यद्यपीति**–गर्गादिभ्यो यञिति सूत्रेण गर्गादिशब्देभ्य इति शेषः ।

गर्गेति-तत्रेत्यादि । समुदायस्याधुत्वेति-गर्ग इत्यादिसमुदायस्य कल्वादिदोषरहितवर्णघटितत्वादित्यर्थः । स इत्यादि ।

उद्योते-निवृत्तकलादिदोषवत्त्व-कल्वादिदोषरहितवर्णघटितत्वम् । साधुत्वस्येदृशार्थकरणेन गार्ग्य इत्यादीनां साधुत्वस्य सत्त्वेऽपि नासङ्गति, न वा प्रकृतानानुकूल्या तस्येति भावः । तत्रत्यानां-गार्ग्य इत्यादिस्थानाम् । अकारादीनामिति शेषः । कलादीति-कल्वादीत्यर्थः । स्यात्-भवेत् । तदाह-तदाशयेनाह । कैयटोक्तभाष्यार्थस्याऽऽसाहत्य सूचयन् समन्तेन भाष्यार्थमाह-परे त्विति । एतदिति-गर्गादीत्यर्थः । चरितार्थं इति-सामर्थ्याभावादिति शेषः । कलादीति-कल्वादीत्यर्थः ।

(समाधानैकदेशिभाष्यम्)

एवं तर्ह्यष्टादशधा भिन्ना निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि ॥

(प्रदीपः) निवृत्तकलादिकामिति । अकारस्य संवृतत्वादिव्युदासार्थं संवृतत्वादिकामिति नोक्तम् । अकारस्य निदर्शनार्थत्वात्सर्ववर्णानां शास्त्रान्ते प्रत्यापत्तिरित्यर्थः ॥

(उद्योतः) निदर्शनार्थत्वादिति । तत्रावर्णस्य अ अ इति सूत्रेणैव, तदन्यदनन्तरमन्येषामपि करिष्यामीति भावः ॥ एतेनावर्णप्रत्यापत्तेः कृतत्वाद्वक्ष्यामीत्यनुपपन्नमिति परास्तम् ॥

(तत्त्वालोकः) भाष्ये एकदेशी समाधत्ते एवं तर्हीति । वर्णगतजात्युपदेशात् प्राप्तस्य संवृतत्वादिदोषवद्वर्णग्रहणस्य प्रतिषेधे कर्तव्ये सतीत्यर्थः । वर्णसमाम्नाये निर्दिष्टानामकारादिवर्णानां प्रत्येकं मष्टादश भेदाः सन्तीत्याशयेनाह-अष्टादशधेति । निवृत्तकलादिकां-कल्वादिदोषनिवृत्तिसहितां (शुद्धां) । प्रत्यापत्ति-प्रतिविधिम् । वक्ष्यामि-करिष्यामि ।

प्रदीपे-ननु संवृतादीनामिति भाष्यानुसारेण निवृत्तसंवृतत्वादिकामिति कुतो नावादीत्यत आह-अकारस्येति । संवृतत्वात्-संवृतत्वगुणयोगात् । ननु वर्णमात्रतादृशप्रत्यापत्तिकरणात् सर्वत्र निर्वाहः स्यादिति तदतिरिक्तवर्णानां तादृशप्रत्यापत्तिकरणाकथनान्न्यूनताऽऽपद्यते इत्यत आह अकारस्येति । अवर्णनिर्देशस्येत्यर्थः । निदर्शनार्थत्वात्-निदर्शनार्थत्वात् अष्टादशधाभिन्नामित्युक्तिमत्त्वेऽपि अवर्णपदं वर्णमात्रस्योपलक्षणं, न त्वकारादिमात्रस्येत्याशयेनाह-सर्ववर्णानामिति । शास्त्रान्ते-अष्टाध्याय्यन्ते । प्रत्यापत्तिरिति-कारष्यते, तथा च कल्वादिदोषरहितवर्णस्य तदादितत्त्वेन शुद्धा अकारादयो विधास्यन्ते इति शेषः ।

उद्योते-तत्र-वर्णानां मध्ये, अष्टाध्याय्यन्ते वा । इति-इत्यनेन । तादृशप्रत्यापत्तिः इति शेषः । तदन्यत्-अवर्णादेः तदनन्तरम्-अ अ इत्यनन्तरम् । अन्येषामपि-अवर्णभिन्नेषां वर्णानाम् । तादृशप्रत्यापत्तिमिति शेषः । एतेन-अवर्णेतरभिन्नवर्णानां तादृशप्रत्यापत्तेः करिष्यमाणत्वेन । इति-इति कथनम् ।

(आक्षेपभाष्यम्)

सा तर्हि वक्तव्या ॥

(उद्योतः) भाष्ये—सा तर्हि वक्तव्येति । तथा च प्रकारस्यासम्भवे गौरवमिति भावः ॥

(तत्त्वालोकः) भाष्ये-सा-तादृशप्रत्यापत्तिः । सर्वेषां वर्णानां शास्त्रान्ते इत्यादि । तर्हि-तत्रत्यानां संवृतत्वादिदोषवत्त्वे सर्वत्र [illegible] तादृशप्रत्यापत्तिः स्यादत्र । वक्तव्या-कर्तव्या [illegible] ।

उद्योते-तथा च-सर्ववर्णानां शास्त्रान्ते तादृशप्रत्यापत्तौ कर्तव्यायां च । संवृतत्वादिदोषरहितवर्णानामिति शेषः ।

(१४ एकदेशिसमाधानवार्तिकम् ॥ ८ ॥)

॥ * लिङ्गार्था तु प्रत्यापत्तिः ॥ * ॥

(भाष्यम्)

लिङ्गार्था सा तर्हि भवति ॥

(उद्योतः) लिङ्गार्था त्विति ॥ अनुबन्धस्यानौचित्त्यदात्वादिगतकलादिलिङ्गनिवृत्त्यर्थेत्यर्थः ॥ नाऽऽकृतिनिर्देशप्रयुक्तदोषपरिहारमात्रप्रयोजना प्रत्यापत्तिः, किं तु सर्वानुबन्धेष्वशास्त्रान्तरकरणस्यकारीति न गौरवमिति भावः ॥

(तत्त्वालोकः) भाष्ये-यत्कृते धात्वादिषु अनुबन्धाः पठन्ते, तत्कृते तत्रानुबन्धानपठितेषु धात्वादिपटकवर्णा एव कल्वादिदोषसहिताः पठिष्यन्ते, तेन वर्णगतजात्युपदेशेन च धात्वादिषु अन्यत्र च प्राप्तस्य कल्वादिदोषसहितवर्णानां ग्रहणस्य निवृत्तिः सर्ववर्णानां शास्त्रान्ते तादृशप्रत्यापत्तिकरणेन करिष्यते । तथा च अनुबन्धेष्वपि दोषशङ्कायामपि न कर्तव्यं भवतीति सर्ववर्णानां शास्त्रान्ते तादृशप्रत्यापत्तिकरणे न गौरवमापद्यते इत्याशयेन वार्तिककारः समाधत्ते-लिङ्गेति । लिङ्गार्था-लिङ्गार्थापि । सा-तादृशप्रत्यापत्तिः । सर्ववर्णानां शास्त्रान्ते कृतेत्यादि । तु शब्दार्थमाह-तर्हीति । वर्णगतजात्युपदेशप्राप्तसंवृतत्वादिदोषवद्वर्णग्रहणनिवृत्तये सर्ववर्णानां शास्त्रान्ते तादृशप्रत्यापत्तेराश्रयणे इत्यर्थः । भवति-भविष्यति । तथा च तादृशप्रत्यापत्तेः तादृशफलद्वयवत्त्वान्न तत्र गौरवमित्यर्थः ।

उद्योते-अनुबन्धेति-(तत्तद्धात्वादिषु अनुबन्धपाठस्य फलाय) अनुबन्धपाठानौचित्यतया तत्तद्धात्वादि(घटकवर्णेषु) गतानां कल (त्वा-दि)लिङ्गानां निवृत्त्यर्थापीत्यर्थः । नाऽऽकृतीति-न वर्णगतजातीयर्थः । तथा चेत्यादि । दोषेति-संवृतत्वादिदोषवद्वर्णग्रहणापत्तिरूपदूषणेत्यर्थः । अपि—ना धात्वादिपटकवर्णगतकल्वादिदोषनिवृत्तिरपि कार्या संग्रहः । इति-इति हेतौ । तत्रेति शेषः । भाव इति-गाम्भीर्ये कल्पते इत्यादि ।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ॥

(उद्योतः) तदेव विवृणोति—तत्तर्हीत्यादिना । धात्वादिगतकलादिलिङ्गमित्यर्थः ॥

(तत्त्वालोकः) भाष्ये-प्रत्यापत्तिरनुबन्धानाम् उच्चारणे पठितादीनाम् कर्तव्यत्वाभावान्न गौरवमिति वार्तिककाराशयं मनन् शङ्कते-तदिति । तर्हि-प्रत्यापत्तिरनुबन्धानाम् गौरवस्याभावाय उच्चरितया तादृशफलद्वये तादृशानुबन्धवत्त्वाभावात् । वक्तव्यमिति-मस्त्विति शेषः । तथा च तत्र गौरवं तदवस्थमेवेति भावः ।

उद्योते-तदेव-उक्तमनुबन्धानुच्चारणमेव । तत्त्वं वक्तव्यमिति शेषः । विवृणोति-स्फुटयति । तत्पदार्थमाह-धात्वादीति । धात्वादि(घटकवर्णे)गतकलादि (दुष्टरूप) लिङ्गमित्यर्थः ।

(समाधानभाष्यम्)

यद्यप्येतदुच्यते । अथवैतर्हि अनेकमनुबन्धशतं नोच्चार्यमित्संज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः । यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते ॥

(प्रदीपः) यदनुबन्धैरिति । तथा सर्वत्र वार्तिककारमतेना [illegible] करिष्यते [illegible] न त्वनुदात्तादिना [illegible] ॥ ननु अनुबन्धानां [illegible]

उपपद्यन्ते ॥ आदिरन्त्येनेत्यत्रादि कलै सहेत्युक्त्वा अ उ इत्यादि का संज्ञा करिष्यन्ते स्वरसन्धिश्चासन्देहाय न करिष्यन्ते इत्यशेष ॥

(**उद्द्योत**) अथवैनद्धल्यस्य तथाप्यर्थ ॥ **अनेकमनुबन्ध शतमिति** । एककस्यानुबन्धस्य शत उच्चारण तादृशाश्चानेक उच्चारणीया इत्यर्थ ॥ **यथेति** । एधस्पर्धयोरनुदात्तङित कलदोष युक्ता पाठ्या । स्वरितञितश्च ध्माता । तत्र 'कलादात्मनेपदम्' 'ध्मातात्कर्तृगामिनि क्रियाफले' इति सूत्रे कार्य । एव टकितौ कल ध्मातौ पठित्वाद्यन्तौ कलध्मातावितिं पाठ्यम् । एव श्वितोर्द्धकगोष युक्तान् पठित्वा **अधकात् श्वितारिति । ड्वितश्च** प्रस्तात्पठित्वा **प्रस्तादथुच्** इत्यादि बोध्यम् । एते च कलादय प्रक्रियादशायामेव । प्रयोगे तु शुद्ध एव, शास्त्रान्ते प्रत्यापत्तिकरणात् । **आदि कलै स** हेति पाठ ॥

(**तत्त्वालोक**) भाष्ये-उक्तवार्त्तिकाशयेन समाधत्ते-**यद्यपीति । एतत्**-धात्वादिस्थवर्णगततया कलत्वादिदूषणरूप लक्षम् । **उच्यते**-वक्तव्य भवति । **अनेकमिति**-यत प्रत्यापत्तिपक्षे इत्यादि **उच्चार्यमिति**-भवतीति शेष । एवमग्रेऽपि । अत तत्र पक्षे न गौरवमिति भाव । नन्वेव तत्र तत्रानुबन्धकरणफल कथमुपपद्यते त्यत आह-**यदिति** । फल तत्र तत्रेति शेष । **क्रियते**-प्राप्यते । पठितैरित्यादि । एवमग्रेऽपि । **तदिति**-फल तत्र तत्रेति शेष । **करिष्यते**-प्राप्स्यते ।

प्रदीपे—**अधिकारार्थमिति**-समाम्नायते पाणिनिनेति शेष । **इत्यादीति**-करिष्यत इति शेष **अनुबन्धेति**-अ इ उणित्यादाविल्यादि । **सज्ञा**-प्रत्याहारा । समाधत्ते-**आदिरिति । उक्त्वेति**-अणित्यादिप्रत्याहारस्थाने इति शेष । ननु स्वरसन्धे प्राप्त्या कथम् अ उ इत्यादिका प्रत्याहारा निष्पत्स्यन्ते इत्यत आह **स्वरसन्धिरिति । असन्देहायेति**-सहितायां अविवक्षयेति शेष ।

उद्द्योते—नन्वनेकमनुबन्धशतमित्यत्र अनेकपदोक्तार्थस्य शत पदेनोक्त्या पौनरुक्त्यमापद्यते इत्यत आह-**एकैकस्येति । तादृशा इति**-तादृशा (शतश उच्चार्या अनुबन्धा) अनेके उच्चारणीया श्चेत्यन्वय । अत एव नेत्यस्योभयत्र सम्बन्ध । प्रत्यापत्तिपक्षानङ्गीकारे एव तेषा वक्तव्यतया गौरव, न तु प्रत्यापत्तिपक्षे इति भाव । धर्मिकल्पनातो धर्मकल्पना न्याय्येति न्यायेन एधस्पर्धादिषु अनुदात्तङकाराद्यनुबन्धकरणापेक्षया कृताना एकारेकारादिव्यक्तीना कलत्वादिदोषसाहित्येन पठनमेव वरमित्याशयेनाह-**एधेति । ध्माता**-ध्मातत्वदोषयुक्ता । पाठ्या इति शेष । **तत्र**-अनुदात्तङित आत्मनेपदम्, स्वरितञित कर्तृगामिनि क्रियाफल इति सूत्रयो स्थाने । **कलध्मातौ**-कलत्वध्मातत्वदोषसहितौ । **पठित्वेति**-आद्यन्तौ टकितावित्यत्रेति शेष । **अधकादिति**-ड्वितः क्त्रिरित्यत्रेत्यादि । **इतीति**-पाठ्यमिति शेष । **प्रस्तान्**-प्रस्तत्वदोषसहितान् । **पठित्वेति**-ट्वितोऽथुजित्यत्रेति शेष । **आदिना**-डुकृञित्यस्य स्थाने 'कृ' इति द्विदोषस्य, दलोप इत्यादौ अश इत्यादेः स्थाने अ ओरित्यादेश्च सग्रह । **एते चेति**-यथा यथान्यासपक्षे अकारस्य विवृतता प्रक्रियामात्रविषया न तु प्रयोगसमवायिनी तथेत्यादि । कुत एवमित्यत आह-**शास्त्रान्ते इति । करणादिति**-अ अ इत्यस्येव पठिताना सकलशुद्धवर्णानामपि अनुबन्धादिनेव कलादिनाऽपि शास्त्रीयसकलकार्यनिर्वाहाय सम्पूर्णाष्टाध्याय्यां प्रत्येतामिद्धत्वादिति शेष ।

(**आक्षेपभाष्यम्**)

सिद्ध्यत्येवम् । अपाणिनीय तु भवति ॥

(**उद्द्योत**) भाष्ये—**अपाणिनीयमिति** । वर्णसमाम्नायसमर्थनाय प्रवृत्तस्य एतद्दोषपरिहाराय सकलशास्त्रस्य व्याख्यानसापेक्षत्व प्रकारेण यथाकरणे वृश्चिकभियेत्यादिन्याय आपद्यतेति भाव ॥

(**तत्त्वालोक**) भाष्ये-प्रत्यापत्तिपक्षे दोषमाह-**सिद्ध्यतीति**-यद्यपीत्यादि । **एव**-कलत्वादिदोषसहितवर्णानामितया धात्वादौ पाठे तथा शास्त्रान्ते सकलवर्णाना शुद्धाना पाठे । शास्त्रीयसकलकार्यमिति शेष । **अपाणिनीयमिति**-तथापि कलत्वादिदोषसहितवर्णपठनम्, तथा शास्त्रान्ते शुद्धसकलवर्णपठनमित्यादि तस्य पुनरनुक्ततानोपपद्यतेति भाव ।

उद्द्योते-**समर्थनायेति**-वर्णोपदेशप्रयोजनकथन इति शेष । **एतद्दोषेति**-उदात्तत्वादिगुणकवर्णाशोधनप्रयोजनकथनानन्तरं दर्शितमुक्तसवृतत्वादिदोषवद्वर्णग्रहणप्रतिषेधवक्तव्यत्वरूपेत्यादि । **आदिना**-"एताविदस्य सर्वमुख पात्र" इत्यस्य सग्रह

(**सिद्धान्तिभाष्यम्**)

यथान्यासमेवास्तु ॥

(**आक्षेपस्मारणभाष्यम्**)

ननु चोक्तम् ❀आकृत्युपदेशात्सिद्धमिति चेत्सवृतादीनां प्रतिषेध ❀इति ॥

(**समाधानभाष्यम्**)

परिहृतमेतत्,—गर्गादिबिदादिपाठात् सवृतादीना निवृत्तिर्भविष्यति—इति ॥

(**समाधानबाधकभाष्यम्**)

ननु चान्यद् गर्गादिबिदादिपाठे प्रयोजनमुक्तम् । किम्? । समुदायाना साधुत्व यथा स्यादिति ॥

(**समाधानसाधकभाष्यम्**)

एव तर्ह्युभयमनेन क्रियते—पाठश्चैव विशेष्यते, कलादयश्च निवर्त्यन्ते ॥

कथ पुनरेकेन यत्नेनोभय लभ्यम्? ।

लभ्यमित्याह ॥

कथम्? ॥

द्विगता अपि हेतवो भवन्ति । तद्यथा—आम्राश्च सिक्ता पितरश्च प्रीणिता इति । तथा वाक्यान्यपि द्विष्ठानि भवन्ति—श्वेतो धावति, अलम्बुसाना यातेति ॥

(**प्रदीप**) **उभयमिति** । यथाभूता गर्गादिस्था अकारादयस्तथाभूता एव सर्वत्र प्रयोक्तव्या इति प्रतिपाद्यते इत्यर्थ ॥ **द्विगता इति** । द्वावर्थौ गता प्रयोजनद्वयसम्पादका इत्यर्थ ॥ **तथा वाक्यान्यपीति** । शब्दस्याप्यर्थवद् द्विगतत्वमित्यर्थ ॥

(**उद्द्योत**) नन्वपठितेषु दोषनिवृत्तिर्न कृता स्यादत आह—**यथाभूता इति** । गर्गाद्यकारादिषु एकरूपेण पठितेषु तज्जातीया एव ते सर्वत्र, साधव इत्यनुमातु शक्यत इति भाव ॥ भाष्ये **पाठश्चैवेति विशेष्यते** तत्तत्प्रत्ययवैशिष्ट्येन बोध्यते इत्यर्थ ॥ **द्विष्ठानीत्यस्य** द्वयोरर्थयो स्थितानीत्यर्थं इत्याह—**शब्दस्यापीति** । तत्र क कीदृशो धावतीति प्रश्ने—श्वेत इति उत्तरम् । श्वा इत इति च्छेदेन क इत्यस्योत्तरम्, श्वेत इति च्छेदेन कीदृश इत्यस्योत्तरमित्यम् ॥ एव केषा जनपदाना गता को वा समर्थ इति प्रश्ने उत्तरम्—**अलमित्यादि** । अलम्बुसा देशविशेषा । बुसाना पलालवर्णाना यातात्मासमान् अल समर्थ इति चार्थ । **पातेन** क्वचित्पाठ । पा रक्षणे इत्यस्य रूपम् ॥

(**तत्त्वालोक**) भाष्ये समाधत्ते **यथेति** । ननु तर्हीत्यादि । आनीता यथान्यासपक्षेदत्त दोष स्मारयति-**ननु चेति** । समाधाना

तत्र दूषणपरिहारं स्मारयति-परिहृतमिति। एतत्-वर्णानामानुपदेशे अनुबन्धकरणाद्यदर्शनमिति दोषजातं पूर्वं परिहृतम्। इति-शब्देन। आचार्येण कृतं दूषणपरिहारानुसन्धेयं स्मारयति-ननु चेति। समाधत्ते एवमिति। अनेन-गर्गादिबिदादिगणपाठे अवृत्त्यादिदोषरहितत्वं गर्गादिबिदादिपाठेन। ननु किमुभयमनेन क्रियते इत्यत आह-पाठ इति। पाठेऽपि क्रियमाणे अवृत्त्यादयो दोषा आपद्यन्त एवेनानिवारणेन पाठश्च। अत एवाह गर्गादिबिदादिरित्यर्थं। एव-अपि। कलादय इति-कलादयः इत्यर्थः। गर्गादिबिदादिष्टकाकारादिवर्णनस्येन इत्यादि। च-चापि। पृच्छति-कथमिति। उत्तरमनुसरति वदतस्य-उभयमित्याहेति। (एकेनापि यत्नेनोभय) लभ्यमिति (सिद्धान्त) वदन्नित्यर्थः। पृच्छति-कथमिति। समाधत्ते-हि गता इति। यत इत्यादि। भवन्तीति-अत इति शेषः। उदाहरति-तद्यथेति। इतीति-अत्र आम्रानुकूले जलदानस्य अनेकविधफलसिद्धिरुभयस्योपलक्षणमित्यर्थः इति भावः। वाक्यान्माह-थेत इति।

प्रदीपे—एवेति-अकारादय इति शेषः। अर्थ इति-वर्णादयश्च निवर्त्यन्ते इत्यर्थः इति। गता इति-इति श्रुतस्वरति शेषः।

उद्द्योते—अपठितेषु-अत्र पठितशब्दस्य परकृतेषु। गर्गादिबिदादिष्वपठितेष्वित्यर्थः। एकरूपेण-शुद्धरूपेण। तज्जातीया-गर्गादिपदवाच्याः सदृशाः। अविस्वरादि। ते-अकारादयः। तत्र-वाक्येषु। श्वेत इति-शब्द इति शेषः। श्वेति-श्वेत्यादि। उत्तरमिति-इत्यत्र शेषः। इद-इदं इति। अलम्बुसा इति-नकेत्यादिः विशेषा इति-इत्यत्र व्याख्याने तत्रयमव्यपदेशेन ज्ञातमिति शेषः। इति चेति-व्याख्यानेन वर्णदर्शनमवगतमित्यर्थ इति शेषः।

(भाष्यम्)

अथ या इदं तावदयं प्रष्टव्यः—केमे सवृवादयः श्रूयेरन्निति ? ॥

आगमेषु।

आगमाः शुद्धाः पठ्यन्ते ॥

विकारेषु तर्हि ॥

विकारा अपि शुद्धाः पठ्यन्ते ॥

प्रत्ययेषु तर्हि ॥

प्रत्यया अपि शुद्धाः पठ्यन्ते ॥

धातुषु तर्हि ॥

धातवोऽपि शुद्धाः पठ्यन्ते ॥

प्रातिपदिकेषु तर्हि ॥

प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते ॥

यानि तर्ह्यग्रहणानि प्रातिपदिकानि ॥

एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः। शशः षष इति मा भूत्। पलाशः पलाष इति मा भूत्। मञ्चको मञ्जक इति मा भूत् ॥

'आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।

उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः' ॥ १ ॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये प्रथमाध्यायस्य प्रथमपादे प्रथममाह्निकम् ॥

(प्रदीप) अथ येति। केवलानां वर्णानां लोके प्रयोगाभावादागमादीनां च शुद्धानां पाठाद् तत्स्थत्वाच्च वर्णानां न वर्णोपदेश ॥ यानि तर्हीति। डित्थादीनि ॥ एतेषामपीति। डित्थप्रभृतीनामगृहीतानां पृषोदरादीनां च साधुत्वाभ्यनुज्ञाय उपदेशः कर्तव्य इति ॥

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥ १ ॥

(उद्द्योत.) केवलानामिति। एव च कलादिदोषापत्तेः न कुत्रापि प्रसक्तिरिति भावः ॥ भाष्ये यानि तर्ह्यग्रहणानीति। कार्यविशेषाग्रहणानुकरणानीत्यर्थः ॥ उपदेश इति। व्याप्तिरप्रातिपदिकादेशादिवनुवादरूपेण ग्रहणमित्यर्थः ॥ एतेन देशश्च प्रातिपदिकानां नोपदेश इत्यादेश्च इत्यस्य भाष्यविरोध इत्यपास्तम् ॥ नन्वेवमतिप्रसङ्ग इत्यत आह—डित्थेति। एव सवृवादीनां प्रतिषेध इत्युक्तेन प्रयोजनेन इत्थमुद्देश्यं इत्यपि प्रत्याख्यानमपनेयमित्यलम् ॥

इति शिवभट्टसुतसतीगर्भसम्भवनागोजीभट्टेन कृते भाष्यप्रदीपोद्द्योते प्रथमाध्यायस्य प्रथमे पादे आद्यमाह्निकम् ॥

(तत्त्वालोक) भाष्ये—वर्णोपदेशस्य वृत्तिसमवायार्थानुबन्धकरणार्थ एव, न तु इष्टबुद्ध्यर्थमित्याशयेनेष्टबुद्धेरप्यन्यथासिद्धिमाह—अथवेति। तावदिति-वाक्यालङ्कारे। अयं-वर्णोपदेशप्रयोजनवादिनो मम प्रतिपक्षी। इदमित्यनेन निर्देश्यमाह-केति। इमे-येषां सवृवादीनां निवृत्तये मया (वर्णोपदेशप्रयोजनवादिना) यत्नो विधेय ते अमी। सवृवादयः-प्रकृतवाक्य। प्रतिपक्षी-उत्तरयति-आगमेष्विति। इमे सवृवादय श्रूयेरन् प्रसज्यरन्। एवमग्रेऽपि। वर्णोपदेशप्रयोजनवादी उत्तरयति-आगमा इति। तत्रैषां सवृवादीनां प्रसङ्गस्य वारणायेत्यादि। एवमग्रेऽपि। प्रातिपदिकानीति-तेषु इमे सवृवादयः श्रूयेरन्निति शेषः। स उत्तरयति—एतेषामिति। अग्रहणानां प्रातिपदिकानामित्यर्थः। किमर्थं इत्यत आह-शश इति। मूदिति-इत्यर्थं इति शेषः। एवमग्रेऽपि। उपसंहरति—आगमाश्चेति। उच्चार्यन्ते इति-शुद्धा इत्यादि। तत-आगमादीनां शुद्धानामुच्चारणात्। तेषु-आगमादिषु।

प्रदीपे—तत्स्थत्वात्-आगमादिस्थत्वात्। दोष इति-कलादिरूप इत्यादि। कश्चित् श्रूयेतेति शेषः। डित्थादीनां-अग्रहणानाम्। सर्वेषामिति-साधुत्वज्ञानार्थमिति शेषः। अत्र-अनुकरणरूपेण ग्रहणे। अत्र निमित्तार्थे सप्तमी।

उद्द्योते-एवञ्च-शुद्धानां आगमादीनां पाठे च। दोषापत्तेरिति-वर्णानामिति शेषः। एतेन-वर्णोपदेशस्य 'अनुकरणेन ग्रहणमपि यथेष्टम्'। एव-कार्यं स्वरवर्णानुपूर्वीज्ञानम् अनुकरणरूपेण ग्रहणं कर्तव्ये। अग्रहणेष्वपि अनुकरणरूपेण ग्रहणादेति शेषः। एवं-शुद्धपाठेन पाठ न सर्व कलादिदोषप्रसक्ती निवारिता भवन्। इत्यपरिसमिति-इति शेषः। इत्यपीति-वाक्यमिति शेषः। तथा च वर्णोपदेशस्य प्रयोजनवदेव, न तु व्यर्थ प्रयोजनमिति बोध्यम्।

इति व्याकरण-न्याय-वेदान्ताचार्य-तत्त्वरत्नाकर पण्डित-श्रीरुद्रधरशर्मणा रचिते महाभाष्यतत्त्वालोके प्रथमाध्यायस्य प्रथमपादे प्रथममाह्निकम्।

॥ इति भगवत्पतञ्जलिमुनिविरचितं प्रथमं पस्पशाह्निकम् ॥

अथ द्वितीयं प्रत्याहाराह्निकम् ।

(शिवसूत्रम्)

अइउण् ॥ १ ॥

(२१ विवृतोपदेशप्रतिज्ञावार्तिकम् ॥ १ ॥)

॥ * ॥ अकारस्य विवृतोपदेश आकारग्रहणार्थः ॥ * ॥

(भाष्यम्)

अकारस्य विवृतोपदेशः कर्तव्यः ।

किं प्रयोजनम् ? ।

आकारग्रहणार्थः । अकारः सवर्णग्रहणेनाऽऽकारमपि यथा गृह्णीयात् ॥

(प्रदीप.) अइउण् ॥ सर्ववर्णानविशेषेण विचार्य विशेषेणात्र विचारः क्रियते—**अकारस्येति ।** अत्राकारादीनां स्वरूपेणानुकार्येण वा सतोऽप्यर्थवत्त्वस्याविवक्षितत्वाद्विभक्त्यनुत्पत्तिः । स्वरसन्धिस्तु न प्रवर्तते वर्णोपदेशकालेऽजादिसंज्ञानामनिष्पादात् ॥ तत्राकारस्य सर्वे त्वाद्दीर्घप्लुतयोर्विवृतत्वात्प्रयत्नभेदात्सवर्णसंज्ञायां अप्रसक्तायां प्रदेशेष्वकारेण दीर्घप्लुतयोर्ग्रहणं न प्राप्नोतीति विवृतत्वमस्योपदिश्यते । विवृतस्य गुणस्योद्देशो विवृतोपदेशः । तत्र गुणस्य नित्यसापेक्षत्वादकारापेक्षत्वेऽपि समासः । यथा—देवदत्तस्य गुरुकुलमिति ॥ **आकारग्रहणार्थ इति ।** विवृतोपदेश आकारग्रहणार्थ इति सामानाधिकरण्येन निर्देशादाकारग्रहणं विवृतोपदेशस्य प्रयोजनमिति सामर्थ्यादवगमात् प्रश्नानुरूपमुत्तरं न भवतीति न चोदनीयम् ॥ **सवर्णग्रहणेनेति ।** येन शास्त्रेणाणुदित्सवर्णस्येत्यनेन सवर्णा गृह्यन्ते तेन कारणेनेत्यर्थः ॥

(उद्द्योत) ननु चतुर्दशसूत्र्या प्रयोजनमुक्तमेव तत्किं पुनरत्र तद्ग्रहणेनेत्याशङ्क्याह—**सर्वेति ॥ विशेषेण ।** तत्तद्रूपेण ॥ प्रत्येकं वर्णेभ्यो विभक्तिमाशङ्क्याह—**स्वरूपेणेति ।** शब्दजन्यज्ञानविषयो हि शब्दस्यार्थः । एवं च स्वरूपमपि स्वजन्यबोधविषयत्वेनार्थः । अनुकार्यमर्थ इति तु स्पष्टमेव । एवं विद्यमानस्याप्यर्थवत्त्वस्याविवक्षितत्वादर्थवत्सूत्रेऽग्रहणादित्यर्थः । स्वरूपस्य श्रोत्रगृहीतस्यैव शाब्दे भानोपपत्तौ न तत्र शक्तिः कल्प्या । अनुकार्यं च सादृश्येनोपस्थापयतीति न तत्रापि वृत्तिः । वृत्त्यार्थबोधकत्वं चार्थवत्त्वमर्थवत्सूत्रे निविष्टमिति भावः ॥ अनुकरणत्वमतान्न विभक्तिरिति तत्त्वम् । सौत्रत्वाद्वा । कारप्रत्ययोऽपि बाहुलकात् ॥ **स्वरसन्धिस्त्विति ।** सौत्रत्वात्संहिताया अविवक्षणाद्वेति भावः ॥ **अजादिसंज्ञानामनिष्पादादिति** तु चिन्त्यं, वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे च निष्पन्ने प्रवर्तमानानां यणादीनां प्रवृत्तिः शास्त्र इत्यादौ तदस्य इत्संज्ञोद्देश्यतावच्छेदकाक्रान्ते वर्णोपदेशावस्थायाम् प्रवृत्तेर्दुर्वारत्वात् । अत एव तुल्यास्यप्रयत्नमित्यादौ सवर्णसंज्ञादिर्न स्यात् ॥ **अत्र सूत्रे ॥** तत्रेति पाठेऽप्ययमेवार्थः ॥ वाक्यापरिसमाप्तिन्यायेनेह ग्रहणकशास्त्राप्रवृत्ते सावर्ण्येऽपि नात्र तद्ग्रहणमिति व्यर्थो विवृतोपदेशोऽत आह—**प्रदेशेष्विति ।** अकः सवर्णे इत्यादौ । तत्राप्यकारः संवृत एवेति भावः ॥ ननु विवृतपदस्य गुणिपरत्वे सविशेषणत्वात्समासो न स्यादत आह—**विवृतस्य गुणस्येति ॥** भाष्ये **कर्तव्य** इत्यस्य प्रतिज्ञेय इत्यर्थः । एतेन तस्योच्चारणमशक्यत्वमित्यपास्तम् ॥ भाष्ये **किं प्रयोजनम्** इत्यत्र उद्दिश्येत्यध्याहारः । कर्तव्य इत्यनुषङ्गश्च ॥ नन्वाकारग्रहणं सवर्णग्रहणमेवेति भेदाभावात्कथमस्य करणत्वमत आह—**येन शास्त्रेणेति ॥**

(तत्त्वालोक) भाष्ये—**अकारस्य**—अइउणिति सूत्रघटकाकारस्य । शुक्लादिशब्दस्येव विवृतादिशब्दस्यापि गुणगुणिनोः प्रयोगो भवतीति प्रकृते विवृतशब्दं गुणपरतया प्रयुञ्जान आह—**विवृतोपदेश इति ।** नन्वेवमपि अकारस्य विवृतता, "विवृतकरणाः स्वराः, तेभ्य एओ विवृततरौ, ताभ्यामैऔ, ताभ्यामप्याकारः । संवृतोऽकारः" इति शिक्षावाक्येन आकारस्य च विवृततरतेति प्रयत्नभेदात् तयोः सावर्ण्यमनुपपन्नमेवेति चेन्न, अत्र विवृतपदस्य लक्षणया विवृततरपरताया आश्रयणात् । अथवा अकारस्य विवृतत्वप्रतिज्ञानसामर्थ्यात्तस्य विवृततरेणाप्याकारेण सावर्ण्यस्योपपत्तिः । वस्तुतस्तु आकारस्य विवृततैव त्रिमुनिसम्मता, "स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्, तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च" इति शिक्षावाक्यात् । तथा च लक्षणाऽपि नाश्रयणीया भवति । न्यासकारादिमताभिप्रायेणोक्तस्य प्रागुक्तशिक्षावाक्यस्य तु यथाश्रुतानुकूलत्वादनुपादेयतयाऽविरोधः । अथवा नास्त्येवेति पठन्ति पाणिनेर्मते विवृततरादिप्रयत्नानामभावात् अत एव विवृततरत्वेनाभिमतस्याऽऽकारस्याकारेण विवृतत्वमात्रेण सवर्णता । न चैवमैचो सावर्ण्यप्रसङ्गः, तथा सति तयोर्वर्णसमाम्नाये पृथङ्निर्देशस्य वैयर्थ्यापातात् ॥ **आकारग्रहणार्थ इति**—अकारेणेत्यादि । स कर्तव्य इति शेषः । कथितमेव स्पष्टयति—अकार इति ।

प्रदीपे—**अविशेषेण**—सामान्यरूपेण । अस्य प्रथमाह्निके इति शेषः । **अत्र**—द्वितीयाह्निके । **अत्र**—अइउणित्यादिसूत्रे । **वेति**—अर्थेनेति शेषः । **विभक्तीति**—तेभ्य इत्यादि । केचित्तु अकारादीनां चादिषु पाठान्निपातत्वेनाव्ययत्वात्तेभ्यो जातायाः विभक्तेर्लुगिति वदन्ति । वस्तुतस्तु अइउणित्यादीनां श्रुतितया "सुपां सुलुग्" इत्यनेन तेभ्यो निष्पन्नाया विभक्तेर्लुगिति भावः । **स्वरेति**—अत्रेत्यादि । **भेदादिति**—अकारस्य दीर्घप्लुताभ्यां सहेति शेषः । **इति**—इति हेतौ । **अस्य**—अकारस्य । **तत्र**—अकारस्य विवृतोपदेश इत्यत्र । **गुणस्य**—विवृतरूपस्य । **समासः**—विवृतस्योपदेश इति समासः । **इति**—इत्यत्र । अस्य देवदत्तापेक्षत्वेऽपि गुरोः कुलेन समास इति शेषः । **निर्देशादिति**—अकारेणेति शेषः । **चोदयेति**—प्रश्नेनेत्यर्थः । **चोदनीयम्**—शङ्कनीयम् ।

उद्द्योते—**प्रयोजनं**—वृत्तिसमवायादिरूपम् । **तद्ग्रहणेन**—चतुर्दशसूत्रविषयकविचारारम्भेण । **अर्थः**—स्वस्यार्थः । **अनुकार्यमिति**—अनुकरणस्य अइत्यादेरिति शेषः । **एवमिति**—स्वरूपार्थत्वेनाकारादाविति शेषः । **तत्र**—स्वरूपे । अनुकार्यानुकरणयोरभेदविवक्षायामाह **अनुकार्यमिति ।** अनुकरणमिति शेषः । तस्य कर्तृता । **तत्रापि**—अनुकार्येऽपि । नन्वीदृशार्थवत्त्वादेव तेषां कुतो न प्रातिपदिकत्वमत

आह-सूत्रेति। तयोर्भेदविवक्षायामाह-अनुकरणेति। अ-इत्यादौ नामित्यादि। विभक्तिरिति-नेभ्य इत्यादि। ननु अ-इत्यादिभ्य कारप्रत्यय कुतो नेत्यत आह-कारेति। वर्णात्कार इत्यत्र रोगाख्या या ण्वुल्बहुलमिति सूत्रतो बहुलमित्यनुवर्तते इत्याशयेनाह-बाहुल-कादिति। केचित्तु तत्र इक्श्तिपौ धातुनिर्देशे इत्यतो निर्देश इत्यनुवर्तते। तेन येनोच्चार्यमाणवर्णेन प्रयोगस्थवर्णो निर्दिश्य (प्रतिपाद्य.) तस्मात्कार प्रत्यय इति तदर्थः। तथा चानुपूर्वीसम्पादनमात्रे तात्पर्यं, न तु राम इत्यादौ दृष्टानामकारादीनां प्रतिपादने इति कारप्रत्ययो नेति वदन्ति। संहितायाः-"वाक्ये तु सा विवक्षामपेक्षते" इति वाक्यात् विवक्षाधानाया। ननु अ-इत्यादिभ्यो विभक्तिर्नोत्पद्यते इति मते तेषां पदत्वाभावेन अइउणित्यादीनां वाक्यत्वाभावात् कथमत्र वाक्यीयाऽविवक्षेति चेन्न, तत्र वाक्यपदेन परिनिष्ठितसमुदायस्य ग्रहणात्। तटस्थे-उपजीव्योपजीवकभावानाक्रान्ते। इह-सूत्रे। अत्र-सूत्रे। तदिति-आकारेत्यर्थः। अकारेणेत्यादि। गुणिपरत्वे-अकारस्य विवृतस्य विवृतगुणवत उपदेश इत्येव तस्य गुणिपरत्वे। तस्य-विवृतगुणस्य। अशक्यत्वमिति-इति विधिवैयर्थ्यमिति शेषः। कर्तव्य इति-स इत्यादि। तस्य-सवर्णग्रहणस्य।

(आक्षेपभाष्यम्)

किं च कारणं न गृह्णीयात्?॥

(प्रदीपः) किं च कारणमिति। आकृतिपक्षाश्रयेण ग्रहणकशास्त्रस्य प्रत्याख्यानादाकारस्याप्यत्वजातिसद्भावाद् सिद्धं ग्रहणमिति भावः। अत्र च *निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्* इति प्रथमा कृता। तेन कस्मात्कारणादित्यर्थः सम्पद्यते॥

(उद्द्योतः) नन्वाकृतिभेदात् कथं तत्पक्षेऽप्यकारेणाकारग्रहणमत आह-आकारस्यापीति। केवलकण्ठ्यत्वे सति स्वरत्वमत्वजातिव्यञ्जकमिति दीर्घप्लुतयोरपि सेति भावः॥ प्रातिपदिकार्थमात्रे प्रथमायां यथाश्रुतेऽन्वयो न जायतेऽत आह-अत्र चेति॥

(तत्त्वालोकः) भाष्ये-जातिपक्षमाश्रित्याक्षिपति-किं च कारणमिति। अकारेणाकारमिति शेषः।

प्रदीपे-सिद्धमिति-तेन तस्येति शेषः। अत्र-कारणमित्यत्र,

उद्द्योते-तत्पक्षेऽपि-आकृतिपक्षेऽपि। इति-इति हेतौ। साक्षात्कृतिः।

(समाधानभाष्यम्)

विवारभेदात्॥

(प्रदीपः) विवारभेदादित्यत्र तु कारणशब्दप्रयोगाभावात् तदपरणारसवर्णनाशो वा प्रथमाद्वितीययोरभावाद् विभाषा गुणेऽस्त्रियामिति पञ्चमी विहिता॥ विवारयति विकाशयति आस्यमिति विवारः प्रयत्नः॥ व्यक्तिपक्षे ग्रहणकशास्त्रस्यारम्भादोषाभावादिति॥

(उद्द्योतः) उपदेशेऽपि यदि प्रथमा कुतो नेत्यत आह-प्रयोगाभावादिति। निमित्तादिशब्दप्रयोगाभावेऽपि तदर्थे गम्यमाने स्यादेव विभक्तिरत आह-प्रायग्रहणादिति। विभाषा गुणे इति। निमित्तपर्यायप्रयोगे सर्वासामित्येवात्र पञ्चम्योरुपादानभावकं, किन्तु हेतावित्ति विभाषागुणेऽस्त्रियामिति सिद्धरूपप्रयोगेऽप्यनित्यत्वज्ञापनेनेति भावः॥ विवारयतीति। प्रयत्नत्वम्॥ दोषापत्तिरिति। दीर्घप्लुतादिषु सवर्णग्रहणाभावादिति भावः॥

(तत्त्वालोकः) भाष्ये-व्यक्तिपक्षमाश्रित्य समाधत्ते-विवारेति। विवारभेदादित्यर्थः। कर्तृकरणे इति सूत्रम्।

उद्द्योते-उत्तरे इति-यदि प्रश्ने प्रथमेत्यादि। तदर्थे-निमित्तार्थे। विभक्तिः-प्रथमा। तयोः-तृतीयापञ्चम्योः। अन्याभिः-प्रथमादिभिः। ननु विवारस्य बाह्यान्तर्गततया सवर्णसंज्ञायामग्रहणादुत्तरासङ्गतिरित्यत आह-स चेति। विवारश्चेत्यर्थः। तथा च विवारः विवृततरमिति भावः। आदिना ह्रस्वदीर्घयोस्तेन सह दीर्घस्वरस्य संग्रहः।

(आक्षेपभाष्यम्)

किमुच्यते—विवारभेदादिति, न पुनः कालभेदादपि। यथैव ह्ययं विवारभिन्नः, एवं कालभिन्नोऽपि?॥

(प्रदीपः) व्यक्तिपक्षे भेदान्तरसद्भावादाह—किमुच्यत इति॥

(उद्द्योतः) ननु प्रयत्नभेदेऽपि जातिसद्भावात्स्यादेव ग्रहणमत उक्तम्—व्यक्तिपक्ष इति॥

(तत्त्वालोकः) भाष्ये—व्यक्तित्वे सतो विवृतकालभेदयो विवृतभेदमात्रस्योपादानात् भाष्यकृतो न्यूनतेत्याशयेनाक्षिपति-किमुच्यते इति। अपि—इत्यपि हीति भाष्याध्याहारे। अयम्—आकारः।

प्रदीपे—भेदान्तरसद्भावात्-विवृतभेदभिन्नकालभेदस्यापि सत्त्वात्। आह-न्यूनतामाह।

उद्द्योते—जातीति-सवर्णजातीत्यर्थः। ग्रहणमिति-अकारेण आकारस्येत्यादि।

(समाधानभाष्यम्)

सत्यमेव तत्। वक्ष्यति "तुल्यास्यप्रयत्नं सवर्णम्" इत्यत्रास्यग्रहणस्य प्रयोजनम्—आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति। बाह्यश्च पुनरास्यात्कालः तेन स्यादेव कालभिन्नस्य ग्रहणम्, न पुनर्विवारभिन्नस्य॥

(प्रदीपः) बाह्यश्चेति। प्रयत्नाभिनिर्वृत्तत्वात्कालस्य प्रयत्नत्वमभ्युपगम्य शङ्का, बाह्यत्वेन परिहारः। प्रसिद्धपरिमाणस्य द्रव्यस्य परिच्छेदकक्रियान्तरापेक्षणात्कालव्यवहारस्य बाह्यत्वं कालस्य। यथा व्रीह्यादिषु प्रस्थादिव्यवहारः परिमाणाद्व्यवहार, एवमत्रापि मात्रादिव्यवहारो निमेषादिक्रियापेक्षः॥ अथ वा नाभिदेशात् प्रभृति विशिष्टप्रयत्नारम्भात्प्रभृति निष्पत्त्या नाभेरास्याद्यावत्कालस्य बाह्यत्वम्। विवृतत्वादीनां चास्य वर्णप्रयत्ननिष्पाद्यत्वादाभ्यन्तरत्वम्। ह्रस्वादिव्यवहारो यथा न भेदकस्तथा तपरसूत्रे वक्ष्यते॥

(उद्द्योतः) ननु कालस्य प्रयत्नत्वाद् बाह्यत्वेन समाधानमयुक्तम्॥ किं च कालो न प्रयत्न इति शङ्केव कथं सङ्गच्छतामित्यत आह—प्रयत्नाभिनिर्वृत्तेति। कालस्य परिच्छेदकत्वमाह—प्रसिद्धेति। प्रसिद्धपरिमाणं यद्द्रव्यं तस्य परिच्छेदकक्रियान्तरापेक्षया परिच्छेदकक्रियापेक्षया व्यवहारहेतुत्वादित्यर्थः। एवं च परिच्छेदकक्रियापेक्षया कालस्य ग्रहणमिति भावः॥ क्रियैव कालो नान्य इति मते इदम्॥ कल्पितः कालसमूहः काल इति मते परिहारान्तरम्—अथ वेति। अथ भावः। नाभिप्रदेशान्निर्गच्छता वायुना स्थानाभिघातेन वर्णाभिव्यञ्जक इति शिक्षायां स्पष्टम्। वायोरास्याभिघाताभिव्यक्तिव्यवहारादिषु व्यावहारिककालस्य बाह्यत्वमिति॥ ननु तपरसूत्रे कालभेदाद्भिन्नस्यापि दीर्घादेर्ग्रहणं भिन्नकालत्वात्कथं न स्यादित्यत आह—

ध्यापेक्षया कालाधिक्याद् ऐन्मात्रविधायके ग्रहणानपत्तिरत आह—द्रुतादीति ॥

(तत्त्वालोकः) भाष्ये—सत्यमेव—युक्तमेव। तत्—कालभेदानुपादानं कुत इत्यत आह—वक्ष्यतीति। यत इत्यादि। फलितमाह—बाह्यश्चेति।

प्रदीपे—अभिनिर्वृत्तेति—जन्येत्यर्थः। परिमाणद्रव्येति—परिमाणकद्रव्येन्यर्थः। अत्र—अकारादौ। मात्रादिव्यपदेश—एकमात्रिकत्वादिव्यवहारः।

उद्द्योते—व्यापकत्वादिति—आभ्यन्तरतया अपि सम्भवादिति शेष। इति—इति स्थितौ। तद्भेदे कालभेदे। प्रसिद्धपरिमाणं—लोकप्रसिद्धपरिमाणकम्। वस्त्वन्तरगतं—नयनप्रदेशगतम्। क्रियान्तर—निमेषोन्मेषादिरूपम्। परिच्छेदर्थक्रियेति—उच्चारणक्रियेत्यर्थ। क्रियैव—परिच्छेदकनिमेषोन्मेषादिरूपनयनप्रदेशगतक्रियैव। शिक्षादाविति—आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥ मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुत,। वर्णाञ्जनयते तेषां विभाग पञ्चधा स्मृत ॥ इत्यादिनेत्यादि।

(आक्षेपभाष्यम्)

किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते, आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते ?॥

(प्रदीपः) किं पुनरिति। किं सूत्रकारेणैव विवृतोपदेश कृतो वार्तिककारेण तु तस्य प्रयोजनमुक्तम्, अथाकृत एव विवृतोपदेशो वार्तिककृता चोद्यत्वेनोपन्यस्त इति प्रश्न। दुरवधारत्वादुपदिष्टोऽपि विवृतो व्याख्यानेन विना न शक्यते ज्ञातुमिति प्रत्यक्षेऽप्यकारे प्रश्नोऽयं नासमञ्जस।

(उद्द्योतः) उपदिश्यमानस्येत्यस्य वार्तिककृतः कर्तृत्वे पक्षयोर्भेदो न स्यादत आह—किं सूत्रकारेणेति। सूत्रकारो महेश्वरो वेदपुरुषो वा 'येनाक्षरसमाम्नायमित्याद्यैतिह्यादित्याहु ॥ ननु प्रत्यक्षतोऽकारे श्रुते तद्गतगुणस्यापि ज्ञानत्वात्प्रश्नोऽयमसङ्गतोऽत आह—दुरवधारत्वादिति। विवृतत्वादीना श्रोत्रेन्द्रियग्राह्यत्वाभावादिति भाव ॥

(तत्त्वालोकः) भाष्ये—विवृतस्य—गुणस्य। अस्य सूत्रकृता अकारे इत्यादि। अन्वाख्यायते इति—उच्यते इत्यर्थः। वार्तिककृतेति शेषः। संवृतस्य—संवृतगुणवतोऽकारस्य। अस्य सूत्रकृतेत्यादि। विवृतेति—गुणेनेति शेष। चोद्यते—प्रतिज्ञायते। अस्य वार्तिककृतेति शेष। प्रदीपे—तस्य—विवृतोपदेशस्य। चोद्यत्वेन—प्रतिज्ञेयत्वेन।

उद्द्योते—सिद्धान्तमतेनाह—वेदपुरुष इति। पाणिनिरित्यर्थः। तस्य कर्तृत्वाबोधः स्मृतित्वाभावादाह—ऐतिह्यादिति। तदिति अकारेत्यर्थ।

(समाधानभाष्यम्)

विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते ॥

कथं ज्ञायते ?॥

यदयम्—"अ अ"—इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति ॥

(प्रदीपः) तत्र प्रत्यापत्त्या पूर्वं पक्ष आश्रितः। अन्यथा शास्त्रान्ते प्रत्यापत्तिवचनमनर्थकं स्यात्, स्वरूपप्रच्यवाभावात् ॥

(उद्द्योतः) अन्यथा संवृतत्वे। स्वरूपप्रच्यवे हि पुनः संवृतविधानं युक्तं स्यादिति भाव ॥

(तत्त्वालोकः) भाष्ये—समाधाता प्रथमपक्ष स्वीकुर्वन्नुपस्थापयति—विवृतस्येति। कथमिति—प्रथमपक्ष इति शेष। यत्—यस्मात्। अयं—सूत्रकार। इति—इत्यनेन। प्रत्यापत्तिं—प्रतिविधिं। शास्तीति—अत इति शेष। यदि सूत्रकारोऽकारस्य विवृतता नोपादेक्ष्यत्तर्हि कथं विवृतत्वमुद्दिश्य संवृतता प्रतिव्यधास्यदिति ज्ञायते प्रथमपक्षस्तदभिमत इति भावः। न च विवृताकारेण ग्रहणात् दीर्घादीनामपि संवृततापतिविधानापत्ति, अद्—अ—इति निर्देशात् ॥

प्रदीपे—तत्र—संवृताकारे। प्रत्यापत्त्या—संवृततापतिविधिसामर्थ्येन। पूर्वः—प्रथम। यदयमित्यादिभाष्येणान्वयेन साधिना अ—अ—इत्यस्य प्रथमपक्षज्ञापकता व्यतिरेकेण व्यवस्थापयति—अन्यथेति। शास्त्रान्ते—अष्टाध्याय्यन्ते। प्रत्यापत्तिवचनम्—विवृताकारे संवृततापतिविधायकं अ अ इति सूत्रम्। कुत इत्यत आह—स्वरूपप्रच्यवेति। संवृतत्वविगमेत्यर्थ। अकारे इत्यादि।

उद्द्योते—संवृतत्वे इति—अकारस्येत्यादि। हि—यतः। प्रथमपक्षे समाश्रिते तु अकारे संवृततायाः प्रच्युततया तत्र तस्या प्रतिविधानाय सार्थकं अ अ—इति सूत्रमिति भाव।

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ॥

किम् ?॥

अतिखट्वः अतिमाल इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति, संवृतः स्यादित्येवमर्था प्रत्यापत्तिः ॥

(प्रदीपः) अस्ति ह्यन्यदिति। प्रयोग एव प्राप्ते विवृतत्वे संवृतत्वप्रत्यापत्ति स्यादित्यज्ञापकमेतदित्यर्थः ॥ नन्विहासति विवृतोपदेशे सावर्ण्याभावादकारेणाकारस्याग्रहणादचत्वाभावात्कथमतिखट्व इति ह्रस्व ॥ नैष दोष, उदीचामातः स्थाने इति ज्ञापकाद्भवत्याकारस्य ह्रस्व ॥

(उद्द्योतः) प्रयोग एवेति। अतिखट्व इत्यादिप्रयोगे ह्रस्वे आन्तरतम्याद्विवृतोऽकारः प्राप्त संवृत एव भवत्वित्यर्थः प्रत्यापत्तिवचनमिति भाव। नन्विति। अचश्चेत्युक्तेरच एव ह्रस्वत्वेन भाव्यमिति भाव। गोस्त्रियोरित्यत्रैतद्वारणार्थमेवोपस्थितिः स्यादिति तात्पर्यम् ॥ उदीचामात इति ॥ न चापोऽन्यतरस्यामिति ह्रस्वे चरितार्थमिदम्। न चात्राच्परिभाषोपतिष्ठते, फलाभावादिति वाच्यम्। शास्त्रस्यास्य विषयत्वात्तेर्गोशब्दसाहचर्येण रूढशेऽप्यचश्चेत्यस्याप्रवृत्तेश्च। तदंशे हि फलाभावान्न प्रवर्तते इति दिक्।

(तत्त्वालोकः) भाष्ये—अ अ—इत्यस्य प्रथमपक्षज्ञापकता निरस्यितुमाह—नेति। एतत्—अ अ—इति सूत्रम्। अस्तीति—प्रथमपक्षस्येति शेष। कुत इत्यत आह—अस्तीति। हि—यत। एतस्य—अ अ—इत्यस्य। किमिति—अन्यदिति शेष।

प्रदीपे—प्रयोगे एव—अतिखट्व इत्यादिप्रयोगे एव। अस्य अकारस्येति शेष। इति—इति हेतौ। एतत्—अ अ—इति। इह—अक्षरसमाम्नायिकाकारे। इति—इत्यत्र। अस्य गोस्त्रियोरित्यनेनेति

शेष । भवतीति-अन्यथा आकारस्थानिकाकारस्याभावात् उदीचामिति एतनैव अर्थं स्यादिति भाव ।

उद्योते-एतद्वारणार्थं-अतिलघ्व इत्यादावाकारादे उच्चारणार्थं । उपस्थिति-अन्तरिमायोदरिपनि । नचेति-अस्य वाच्यमित्यनेनान्वय । इद-उदाचामिति सूत्र । नच-नहि । अत्र-अपोडन्यनस्यामित्यत्र । शास्त्रस्य-उदाचामिति सूत्रस्य । तद्धी-गोशब्दादी । हि-यत फलेति-व्यावर्त्येत्यर्थ । ओकारस्यान्तेनेत्यादि । प्रवर्त्तते इति-अन्तरिमायेत्यादि ।

(समाधानसाधकभाष्यम्)

नैतदस्ति । नैव लोके न च वेदेऽकारो विवृतोऽस्ति ॥

कस्तर्हि ? ।

संवृत', योऽस्ति स भविष्यति । तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति 'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते' इति ॥

(प्रदीप) नैव लोक इति । प्रयुक्तानामनुशासनात् प्रयोग च विवृतस्याकारस्याभावात्संवृत एव भविष्यतीति प्रत्यापत्तिशास्त्रमिदं च ।

(तत्त्वालोक) भाष्ये—अ अ-इत्यस्य प्रथमपक्षस्तत्रकत्वाया विघटक तस्योक्तप्रयोजनकत्व साध्यन् तस्य तज्ज्ञापकत्व साधयति-नैति । एतत्-अ अ-इत्यस्योक्तप्रयोजनकत्व । कुत इत्यत आह-नैवेति । यत इत्यर्थः । अस्तीति-अत्र इति शेष । तत्-तस्मात् (अ अ-इत्यस्योक्तप्रयोजनकत्वाभावात्) । एतत्-अत्र-इति । ज्ञापयति-विवृतस्येति । इति-इत्यस्य ।

प्रदीपे-असम्भवादिति—भाव तर्हस्यासम्भवप्रसङ्गेनेति शब । इति-इति हेतौ ।

(आक्षेपभाष्यम्)

क' पुनरत्र विशेष —विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत, संवृतस्योपदिश्यमानस्य वा विवृतोपदेशश्चोद्येतेति ? ॥

(प्रदीप) क पुनरिति । विवृतोपदेश इत्यत्र कृत इति वा, कर्तव्य इति वा वाक्यशेषाध्याहारे न कश्चिद्विशेष इत्यर्थ ।

(उद्योत) न वाक्यशेषे प्रयोजनान्वाख्यानपरत्व, द्वितीये विवृतोपदेशपरत्वमतीति विशेषस्य स्पष्टत्वमत आह—विवृतोपदेश इत्यत्रेति ॥

(तत्त्वालोक) भाष्ये-अत्र-अनयो । प्रयो इत्यनयोर्मध्ये ।

प्रदीपे-प्रथम-पक्षाभिप्रायेणाह-कृत इति । द्वितीयपक्षाभिप्रायेणाह-कर्तव्य इति ।

उद्योते-द्वितीये इति-पक्षे इति शेष ।

(समाधानभाष्यम्)

न खलु कश्चिद्विशेष' । आहोपुरुषिकामात्र तु भवानाह—संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यत इति । वयं तु ब्रूमो—विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति ॥

(प्रदीप) आहोपुरुषिकेति । अहो अह पुरुष इत्यहङ्कारवानहोपुरुषस्तस्य भाव इति मनोज्ञादित्वाद्वुञ् । अहंकारवत्त्वमित्यर्थ ।

(उद्योत) पुरुषिकेत्यत्र वुञ प्राग् मयूरव्यंसकादित्वात्समास । अहो इति अहमित्यर्थे । तत्र प्रयोजनान्वाख्याननिमित्तैव ज्याय , प्रत्यापत्ते । अकर्तृके आशयाद्धनाभाश्चैव याद् ॥

(तत्त्वालोक) भाष्ये-खल्विति-वाक्यालङ्कारे ।

उद्योते-तत्र-तयो (पक्षयो) । अकर्तृके-अपौरुषेये (कइत्यादिवेदे) ।

(॥ २६ ॥ धात्वादिषु विवृतत्वप्रतिज्ञावार्तिकम् ॥ २ ॥)

॥ * ॥ तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः ॥ * ॥

(भाष्यम्)

तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्रापि विवृतोपदेश' कर्तव्यः ॥

क्वान्यत्र ? । धातुप्रातिपदिकप्रत्ययनिपातस्थस्य ॥

किं प्रयोजनम् ? । सवर्णग्रहणार्थः । आक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात् ॥

किं च कारणं न स्यात् ? ।

विकारभेदादेव ॥

(प्रदीप) तस्येति । यदा प्रत्याहारे विवृतोऽकार उपदिश्यते तदा प्रयत्नभेदात्तेन संवृतस्याकारस्य ग्रहणाभावाद्दत्कार्यं न स्यादिति तत्सिद्धये सर्वस्याकारस्य विवृतत्व कर्तव्यमित्यर्थ । तेन दण्डाग्रमित्यादौ दीर्घादि सिध्यति ॥ ननु च सर्वेषामकाराणां यत्सामान्य तदनुकरणमक्षरसमाम्नाये । तस्य च विवृतत्वे प्रतिज्ञायमाने सर्वेषां तत्प्रतिज्ञात भवतीति किमुच्यते—तस्य विवृतोपदेशादिति ॥ एवं तर्हि यदा कस्यचिदेवाकारस्येदमनुकरणं स्वरूपपदार्थको वा अकारस्तदेदमुच्यत इत्यदोष ।

(उद्योत) प्रत्याहारस्था अइउणित्यत्र प्रतिज्ञायमाना सर्वेषाकारे विवृत प्रतिज्ञान भवत्यतमत् इदिते—भाष्ये तस्य विवृतोपदेशादिति । तस्येति तस्य वर्णसमाम्नायस्थस्येत्यर्थ ॥ संवृतस्येति । वाक्यादिस्थस्येत्यर्थ ॥ ननु अइउणि यादौ कस्यानुकरणमित्यत रिनिगमकाभावादाह—स्वरूपपदेति । स्वरूपपदार्थकस्य यथा तथोक्तम् ॥ भाष्ये विकारभेदादिति । प्रयत्नभेदादित्यर्थ ॥ माहकस्य विवृतत्वाद् ग्राह्यस्य संवृतत्वादिति भाव ॥

(तत्त्वालोक) भाष्ये-एतस्य-अकारस्य । अन्यत्रापि-अन्यत्र विद्यमानस्यापि (अकारस्य) । विवृतोपदेशः कर्तव्य इति-अ अ-इत्यस्य इह शास्त्रे प्रयोजनकत्वेऽपि सर्वोऽकारो विवृत इति सामान्यप्रतिज्ञाकरणमावश्यकमिति भाव । क्वान्यत्र-कुत्रान्यत्र विद्यमानस्य । अत इदं प्रश्नोत्तरयोरनुकरणम् । अस्य-धात्वादिस्थस्य (अकारस्य) । कात्र अकारेणेत्यादि । किंचि-कस्मात् तेन तस्य ग्रहणमित्यादि ।

प्रदीपे-तेन-प्रत्याहारस्थविवृताकारेण । अस्य धात्वादिस्थस्यैति हेतौ । अपिति-प्रत्येति । इति-इति हेतौ । तत्सिद्धये-स्य इत्यादेर्ग्रहणे । दीर्घादीत्यत्र-दीर्घादिरित्यादि । सिद्धयतीति-स्पष्टमासमभिव्याहृत अकारेणैव दर्शितम्पत्ता वर्णग्रहणीयत्वा ज-

कोऽन्यपरिभाषाया उपस्थित्या तेन शाल्यतीत्यादावपत्यस्यैव दीर्घं स्यान्न त्वकारस्येति भावः । जातिपक्षाभिप्रायेणाशङ्कते-ननु चेति । यदिति-अत्वरूपमिति शेषः । अत्र-वर्णसमाम्नाये । तस्य-वर्णसमाम्नायस्थाकारस्य । तत्-विवृतत्वं । इति-इति हेतोः । इति-इत्यादि । व्यक्तिपक्षाभिप्रायेण समाधत्ते-एवमिति । इदं-वर्णसमाम्नायस्थाकाररूपं वस्तु । अकारः-वर्णसमाम्नायस्य । इद्-तस्य विवृतोपदेशादित्यादि ।

उद्द्योते-उक्तमिति-द्वितीयाह्निकादिमोद्द्योते इत्यादि ।

(धात्वादिषु विवृतत्वप्रतिज्ञाबाधकभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति-भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति । यदयम् "अकः सवर्णे दीर्घः" इति प्रत्याहारेऽको ग्रहणं करोति ॥

कथं कृत्वा ज्ञापकम् ? ।

न हि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति ॥

(प्रदीपः) यदयमिति । अत्र हि ककारेण चिह्नेन प्रत्याहारस्थो विवृतो निर्दिष्टः, तेन च सवृतस्याग्रहणे इकः सवर्णे इति वक्तव्यम् ॥ न हि द्वयोरिति । यद्यप्येकोऽपि विवृतो नास्ति, तथापि द्व्यधिष्ठानत्वादेकादेशस्य द्वयोरित्युक्तम् ।

(उद्द्योतः) प्रत्याहारे इति । सप्रत्याहारके शास्त्र इत्यर्थः ॥ वक्तव्यमिति । एवं च प्रयत्नभेदेनासवर्णस्यापि अत्वजात्याक्रान्तस्य विवृतेनाकारेण ग्रहणं ज्ञाप्यत इत्यर्थः ॥ यद्यप्येकोऽपीति । प्रत्युच्चारणं वर्णान्यत्वादाक्षरसमाम्नायिकस्य प्रयोगेऽभावादिति भावः ॥ आदिरन्त्येनेत्यस्य चान्त्यसदृशेन सहोच्चार्यमाण आदिसदृश इत्यर्थः । तत्र ककारादिचिह्नेनाकारादिशब्दस्य तत्सदृशश्च विवृत एव । सदृशश्च व्यक्तिभेदे सति सर्वधर्मसाम्यप्रयुक्तं ग्राह्यम् । तस्य च प्रयोगस्थेऽभावेऽप्यनेन तद्ग्रहणं ज्ञाप्यत इति तात्पर्यम् ॥ केचित्तु देवदत्त अत्रस्तीत्यादौ प्रत्याहारलिङ्गेनैक आक्षरसमाम्नायिकोऽस्ति तदर्थं भाष्ये द्वयोरित्युक्तमित्युक्तमित्याहुः ॥ भाष्ये युगपत्समवस्थानमिति । अस्य प्रयोगे इत्यादि ॥

(तत्त्वालोकः) भाष्ये-एकदेशी समाधत्ते-आचार्येति । आक्षरसमाम्नायिकेनेति-विवृताकारेणेति शेषः । धात्वादिस्थस्येति सवृताकारस्येति शेषः । कुत इत्यत आह-यदिति । यत इत्यर्थः । अयम्-पाणिनिः । अकः-ककारात्मकचिह्नानुमितवर्णसमाम्नायस्थविवृताकारस्य । करोतीति-अत इति शेषः । हि-यतः । आक्षरसमाम्नायिकयोः-विवृताकारयोः । अस्तीति-अत इति शेषः ।

प्रदीपे-अत्र हि-"अकः" इत्यत्र हि । विवृतः-अकारः । तेन-निर्दिष्टेन । सवृतस्य-धात्वादिस्थाकारस्य । विवृत इति-अकार प्रयोगे इति शेषः । द्व्यधिष्ठानत्वात्-द्वयोः स्थाने जायमानत्वात् ।

उद्द्योते-ननु सप्रत्याहारकया प्रत्याहारे अक इत्यनुपपन्नमित्यत आह-सप्रत्याहारके इति । शास्त्रे-सूत्रे । जात्याक्रान्तस्येति-धात्वादिस्थसवृताकारस्याक्षरसमाम्नायिकेनेति शेषः । आक्षरसमाम्नायिकस्य-विवृताकारस्य । ननु प्रत्युच्चारणं वर्णानां भेदे अनित्यादावाक्षरसमाम्नायिकाकारभिन्नोऽकार इति कथमन्त्यादिप्रत्याहारसिद्धिरित्यत आह-आदिरिति । इत्यादीति-अणादिना अनुबन्धान्तर्मध्यगानां स्वस्य च संज्ञा स्यादित्यस्य सङ्ग्रहः । तत्र-"अक" इत्यत्र । शब्दस्य-अकारः । तदिति-आक्षरसमाम्नायिकविवृताकारेत्यर्थः । एवेति-इति प्रतीयते इति शेषः । तस्य-प्रत्याहारस्थविवृताकारेण सर्वधर्मसाम्यस्य । प्रयोगस्थे-सवृताकारे । अनेन प्रत्याहारस्थविवृताकारेण । तदिति-प्रयोगस्थसवृताकारेत्यर्थः । केचित्-भाष्यतत्त्वविदः । लिङ्गेन-ककारादिना । अस्तीति-उभयत्रेत्यादि । प्रयोगे इति-एकत्रेत्यादि ।

(धात्वादिषु विवृतत्वप्रतिज्ञासाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ॥

किम् ? ।

यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति, तदर्थमेतत्स्यात् खट्वाढकं मालाढकमिति । सति प्रयोजने न ज्ञापकं भवति । तस्माद्विवृतोपदेशः कर्तव्यः ॥

(प्रदीपः) नैतदिति । अक इत्यकारेण विवृतेन दीर्घस्य विवृतस्य ग्रहणादज्ञापकमेतदित्यर्थः ॥

(तत्त्वालोकः) भाष्ये-पूर्वपक्षी तस्य तज्ज्ञापकतां विघटयति-नेति । एतत्-'अक' इत्यत्र कल्पितचिह्नस्थविवृताकारोपादानम् । ज्ञापकमिति-तन्मेत्यादि । कुत इत्यत आह-अस्तीति । हि यतः । एतस्य-अत्र शास्त्रे विवृताकारस्य । किमिति-अ यत इति शेषः । यस्येति-विवृतदीर्घस्येति शेषः । आक्षरसमाम्नायिकेन-विवृताकारेण । अस्ति-सम्भवति । तदर्थं-तद्ग्रहणार्थं । एतत्-(तत्र) विवृताकारोपादानं । इति-इत्यत्र । तस्मात्-(तस्य) तज्ज्ञापकत्वाभावात् । धात्वादिस्थाकारस्येति शेषः ।

प्रदीपे इति-इत्यत्र येन । अज्ञापकमिति-तन्मेत्यादि । एतत्-(तत्र) विवृताकारोपादानम् ।

(आक्षेपभाष्यम्)

क एष प्रयत्नश्चोद्यते, विवृतोपदेशो नाम । विवृतो वोपदिश्येत, संवृतो वा । कोन्वत्र विशेषः ? ॥

(प्रदीपः) क एष यत्न इति । धात्वादिस्थ पठितस्तत्राकारो विवृत पठ्यतां न हि किञ्चिद् गौरवं भवति तत्किमुच्यते—अन्यत्रापि विवृतोपदेशः कर्तव्य इतीति प्रश्नः ॥

(तत्त्वालोकः) भाष्ये-एकदेशी शङ्कते-क एष इति । चोद्यते-क्रियते । अस्य वा एकदेशिनेति शेषः । एव इत्यनेन निर्देश्यमाह-विवृतेति । धात्वादिस्थाकारस्येत्यादि । विवृत इति-स इत्यादि । अत्र-धात्वादावकारस्य कर्तव्ये विवृतसंवृतयोरुच्चारणयोरन्यतरोच्चारणे । न कोऽपि विशेष इति भावः ।

प्रदीपे-तत्र-तस्मात् धात्वादिषु

(समाधानभाष्यम्)

स एष सर्व एवमर्थो यत्नः क्रियते । यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते, तद् गुरु भवति । तस्माद्वक्तव्यम्—'धात्वादिस्थश्च विवृत' इति ।

(प्रदीपः) यानीति । प्रतिपदपाठस्याशक्यत्वात्तस्य विवृतोपदेशादित्यनेन सर्वस्याकारस्य विवृतोपदेशः कर्तव्यश्चोद्यत इत्यर्थः ॥ धात्वादिस्थ इति । अग्रहणप्रतिपदिकार्थे विवृतत्वस्यावश्यचोदनेन

धात्वादिस्थस्यापि संवृतस्यैव पठितस्य कार्यार्थं विवृतत्वं प्रतिज्ञेयम्। अन्यथा दोषरूपविवृतोच्चारणे प्रयत्नस्य गौरवं स्यात् ॥

(उद्द्योत) एवमर्थं इति । एतावेवशब्दः प्रकारवति वर्तते इति बहुव्रीहि ॥ प्रातिपदिकानीति । धातुप्रत्ययनिपातोपलक्षण बोध्यम् । सर्वाण्यग्रहणानि प्रातिपदिकादीनि विवृताकारयुक्तानि पठनीयानीत्यर्थः ॥ तद् गुरु भवति । तस्मादिति । यत्न सर्वोच्चारण गुरु भवति धात्वादिस्थ इति वाच्यमित्यर्थः ॥ ननु धातुना बहुधा पाठाद् धात्वादीनि अयुक्तमत आह—अग्रहणेति । प्रातिपदिकेष्वुपलक्षणम् ॥ धात्वादिस्थस्यापीति । पठितधात्वादिस्थस्यापीत्यर्थः । एतेनाग्रहणशब्द इत्येव वक्तुमुचितमित्यपास्तम् ॥ संवृतस्यैवेति । एवञ्च धात्वादिस्थस्य विवृतवत् कार्यं लभ्यते इत्यतिदेशोऽयमिति भाव ॥ अन्यथेति । गुणोच्चारणादोषोच्चारणे यत्नाधिक्यमिति भाव ।

(तत्त्वालोक) भाष्ये—सिद्धान्ती उत्तरयति—स एष इति । क्रियते इति—नेति शेष । यानीति—यदात्वादि । एतेन—विवृताकारसहितया पाठरूपेण । चोद्यते—क्रियते। तद्—सर्वेषां विवृताकारसाहित्येन पठनं । अस्य नहीत्यादि । विवृत इति—अकार इत्यादि ।

प्रदीपे—प्रतिपदेति—विवृताकारसाहित्येन अग्रहणप्रातिपदिकादीनामित्यादि । कार्यतया—अतिदेशतया । चोद्यते—कथ्यते । विवृतत्वे इति—प्रत्यासत्त्या [illegible] चोदनीये प्रत्येये । पठितस्येति—अकारस्येति शेष दोषरूपविवृतोच्चारणे—दोषरूपविवृतत्वसाहित्येनाकारोच्चारणे स्यादिति—प्रतिपत्त्यायत्ययनगत्युक्तमपि गौरवमिति भाव ।

उद्द्योते ननु एवशब्दस्य प्रकारवाचित्वे अर्थशब्देन सामानाधिकरण्याभावात् [illegible] तेन बहुव्रीहि [illegible] अत आह—एतावेवेति । इति—इति देशो [illegible] तयो सामानाधिकरण्यात् एवम् [illegible] रक अर्थ प्रतीत [illegible] इति शेष । सर्वोच्चारणं—सर्वेषां विवृताकारसाहित्येन पठनं धात्वादिस्थ इति—संवृताकारो विवृत इति शेष । उपलक्षणमिति—धातुप्रत्ययनिपातादीनामित्यादि । धात्वादिस्थस्येति—संवृताकार इति शेष । विवृतवत्—विवृताकारवत्। गुणोच्चारणात्—[illegible] दोषोच्चारणे—विवृतत्वेन साह [illegible] ।

(॥ २७ ॥ प्रयोजनान्तरवार्तिकम् ॥ ३ ॥)

॥✽ दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः ॥✽॥

(भाष्यम्)

दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्तव्यः दीर्घप्लुतौ संवृतौ मा भूतामिति । वृक्षाभ्याम्, देवदत्ता ३ इति ।

(प्रदीप) विवृतोपदेशस्य प्रयोजनान्तरमाह—दीर्घेति । असति विवृतोपदेशे [illegible] स्थाने सावर्ण्यात् [illegible] दीर्घप्लुतौ [illegible] ।

(तत्त्वालोक) भाष्ये—दीर्घप्लुतवचने इति—[illegible] स्थाने [illegible] (प्रदीपे) [illegible] । विवृतेति—[illegible] दीर्घप्लुतौ [illegible] । [illegible] इति—[illegible] ।

प्रदीपे—विवृतोपदेशे—[illegible] । आहे-

ति—सिद्धान्त्युक्तं श्रुत्वा आहोपुरुषिकयैकदेशीति शेष । असतीति—[illegible] तस्येत्यादि । प्रसङ्ग इति—इति तत्र तौ मा भूतामिति धर्म [illegible] संवृताकारस्य विवृतता प्रतिज्ञेयेति शेष ।

(निराकरणभाष्यम्)

नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः । कौ तर्हि ? ॥ विवृतौ ॥ यौ स्तस्तौ भविष्यतः ।

(प्रदीप) नैव लोक इति । असत्यपि सावर्ण्ये लिङ्गादकारस्य संवृतस्य विवृतौ दीर्घप्लुतौ भविष्यतः । यदयमतो दीर्घो यञि अतो रोरप्लुतादप्लुत इत्याहेति भाव ।

(उद्द्योत) ननु [illegible] संवृतस्य विवृतौ न स्यातामेव । आन्तरतम्याभावात् । न चैकोऽस्ति एव इगिवानन्तर [illegible] भविष्यत । सामर्थ्येन तत्र तथाङ्गीकारेऽपि [illegible] चरितार्थस्याकः सवर्णे इत्यादेर्विषये तथा कल्पने मानाभावात आह—असत्यपीति । सावर्ण्ये इति । आन्तरतम्ये इत्यर्थः । [illegible] यातो दीर्घ इति, अतो रोरित्यत्राप्लुतादित्यतो विशेषणं च सान्तरापेक्षं ज्ञापकमिति भाव ।

(तत्त्वालोक) भाष्ये—लोकवेदयो संवृतदीर्घप्लुतयोरभावादेव तत्र तयोरप्राप्तिरिति तत्र तयो निवृत्तये तस्य विवृतत्वं न प्रतिज्ञेयेत्याशयेन सिद्धान्ती तन्निराकरोति—नैवेति ।

प्रदीपे—सावर्ण्ये इति संवृताकारस्य विवृतदीर्घप्लुताभ्यां सह [illegible] स्यादि । लिङ्गादिति—वक्ष्यमाणात् । तदेवाह—यदयमित्यादि । लिङ्गमाह—यदिति । अयं—पाणिनि ।

उद्द्योते—तयो —दीर्घप्लुतयो । आन्तरेति—अस्य ताभ्यां सहेत्यादि । अनन्तरेति—तयोरित्यादि । भविष्यत इति—तौ स्यातामित्यादि । तत्र—यथादिविषये । तथाङ्गीकारेऽपि—अनन्तरतमादेशाङ्गीकारेऽपि । तथा कल्पने—अनन्तरतमादेशकल्पने।

(एकदेशिप्रयोजनसाधकभाष्यम्)

'स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम् ।
संवृतः स्थानी संवृतौ दीर्घप्लुतौ प्रकल्पयेद् ।

अनुस्वारो यथा यणम् । तद्यथा—सँय्यन्ता सँव्वँत्सरः यँल्लोकं तँल्लोकमिति—अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पयति ।

(उद्द्योत) [illegible] वेनेष्ट [illegible] मन्यमान आह—[भाष्ये] स्थानी प्रकल्पयेदित्यादि ।

(तत्त्वालोक) भाष्ये—स्थान [illegible] संवृत इति । अनुस्वार इत्यादि [illegible] —तद्यथेति । इति—[illegible] ।

उद्द्योते—मन्यमान इति—एकदेशीति शेष ।

(निराकरणभाष्यम्)

विषम उपन्यासः । युक्तं यत्सान्तत्र प्रकृतिनिर्वर्तयति । सन्ति हि यणः सानुनासिका निरनुनासिकाश्च । दीर्घप्लुतौ पुनर्नैव लोके नैव च वेदे संवृतौ स्तः ॥ कौ तर्हि ? । विवृतौ, यौ स्तस्तौ भविष्यतः ॥

(प्रदीप) सन्तस्तत्रेति । [illegible] [illegible] इत्यर्थः ।

(उद्द्योत:) तद्वत् संवृतौ दीर्घप्लुतावपि कुतो न सन्त्वित्यत आह—अशक्यत्वादिति ॥ केचित्तु शिष्टसंमतत्वात्ते सन्त' । इमौ तु न तथेति भाव इत्याहु ॥ सन्ति हि यण इति [भाष्ये] यण इति बहुत्वाभिप्रायेण, रेफस्यानुनासिकस्याभावादिति शेषम् ।

(तत्त्वालोकः) भाष्ये—सिद्धान्ती प्रकृते दृष्टान्तदार्ष्टान्तिकयो महावैषम्योपपादनेन दृष्टान्तं विघटयति-विषम इति । तत्र-अनुनासिकयण्विषये । हि-यत ।

उद्द्योते—तद्वत्-अनुनासिकयण्वत् । ते-अनुनासिकयण । इमौ-संवृतदीर्घप्लुतौ । तथा-शिष्टसम्मतौ । यण इतीति-बहुवचनान्त इति शेष । प्रायेणेति-प्रयुक्त, न तु नाकन्याभिप्रायेणेति शेष । कुत इत्यत आह-रेफस्येति ।

(आक्षेपभाष्यम्)

एवमपि कुत एतत्—तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः, न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्याताम् ईकार ऊकारौ वेति ? ॥

(प्रदीप:) एवमपीति । असति विवृतत्वप्रतिज्ञाने संवृतस्याकारस्य सवृत्तावेवैकारौकारौ प्राप्नुत, स्वृतः सवृता अन्यत्रासंवसान्न इति केश्चिदीकारोकारयो स्वृतत्वस्याभ्युपगमात् ॥

(उद्द्योतः) नन्वीकारोकारयो कथ सवृतत्वमत आह-स्वृतः संवृता इति । ईऊभ्रत इत्यर्थ ॥ कचित्तु स्वत इति पाठ । ईकारोकाराकारा इत्यर्थ ।

(तत्त्वालोक:) भाष्ये—एकदेशी शङ्कते-एवमिति । अनन्तरवमादेस्त्वीकारे इत्यर्थ । तुल्येति-सवृताकारस्य स्थाने इत्यादि प्रयत्नभिन्नाविति-विवृतदीर्घप्लुतावाकाराविति शेष । स्यातामिति-सवृतदीर्घप्लुताविति शेष ।

प्रदीपे—असतीति-धात्वादिस्थसवृताकारस्येत्यादि' । इति-इति वचनेन । केश्चित्-छन्दोगविशेषै ।

(समाधानभाष्यम्)

वक्ष्यति "स्थानेऽन्तरतम" इत्यत्र स्थान इत्यनुवर्तमाने पुनः स्थानेग्रहणस्य प्रयोजनम् 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो भवति' इति ॥

(तत्त्वालोकः) भाष्ये—सिद्धान्ती समाधत्ते-वक्ष्यतीति । यत इत्यादि । भवतीति-अ स्तन तथा भवतीति शेष । एव धात्वादिस्थसवृताकारे विवृतत्वप्रतिज्ञानस्यैकदेश्युक्त प्रयोजनान्तर निराकृत सिद्धान्तिने त भाव ।

(इति विवृतत्वप्रतिज्ञानिरूपणम्)

(वर्णसमाम्नाये जातिपक्षाधिकरणम्)

(२८ पूर्वपक्षयाक्षेपवार्तिकम् ॥ १ ॥)

॥ ※ ॥ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् ॥　॥

(भाष्यम्)

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति—"अस्य च्वौ" "यस्येति च" ॥ किं कारणम् ? । अनण्त्वात् । न ह्येतेऽणः येऽनुवृत्तौ ॥ के तर्हि ? । येऽक्षरसमाम्नाये उपदिश्यन्ते ॥

(प्रदीपः) तत्रानुवृत्तिनिर्देश इति । अकः सवर्णे दीर्घ इ या दावयमेवाकारोऽनुकूल इति ककारादिना चिह्नेन ज्ञायते । ततश्चास्यास्य प्राह्कत्वमस्तु । अस्य च्वावित्यादौ त्वकारस्यानण्त्वाद् ग्राहकत्व न प्राप्नोतीत्यर्थ ॥ वृत्ति शास्त्रस्य लक्ष्ये प्रवृत्तिस्तदनुगतो निर्देशोऽनुवृत्तिनिर्देश' ॥

(उद्द्योतः) एवचाप्रयोजनार्थमेव सर्वत्राकारस्य विवृतत्व प्रतिज्ञेयमिति स्थिते शङ्कते [भाष्ये] तत्रानुवृत्तीति ॥ एतद्विशेषणोपादानस्य फलमाह—अकः सवर्ण इति ॥ अनण्त्वादिति । अक्षरसमाम्नायेऽपठितत्वादाकारस्यैवानण्त्वमित्यर्थ ॥ प्रत्युच्चारण वर्णभेदेऽपि अक इत्यादौ ककारेण चिह्नेनैतदनुकरणत्वानुमानमिति भाव । तदनुगत इति । साक्षाल्लक्ष्यसस्कारकबोधजनक इत्यर्थ ।

(तत्त्वालोकः) भाष्ये—हि-यत । तर्हीति-अण इति शेष ।
प्रदीपे— अयमेव-आक्षरसमाम्नायिक एव । तस्य-अकारक स्य । प्राहकत्वमिति-सवर्णानामित्यादि ।
उद्द्योते—आद्येति-सवर्णग्रहणेत्यर्थ । शङ्कते इति-व्यक्तिपक्षे इव, न तु जातिपक्षे इति स एव दुष्ट इति प्रतिपादयितुमित्यादि । एतदनुकरणेति-वार्णसमाम्नायिकाकारानुकरणे यर्थ । तदनुगतत्वाया अक इत्यादावपि सत्त्वादाह-साक्षादिति । प्रत्याहारमद्दारीकृत्येत्यर्थ । अक इत्यादौ तु तद्द्वारा सेति भाव ।

(२९ एकदेशिसमाधानवार्तिकम् ॥ २ ॥)

॥ ※ ॥ एकत्वादकारस्य सिद्धम् ॥ ※ ॥

(भाष्यम्)

एकोऽयमकारो यश्चाक्षरसमाम्नाये, यश्चानुवृत्तौ यश्च धात्वादिस्थः ।

(प्रदीपः) एकत्वादकारस्येति । एकैवाकारव्यक्ति, उदात्तादिभेदप्रतिभासस्तु व्यञ्जकध्वनिकृत, खड्गैलादर्शादिभेदे प्रतिबिम्बप्रतिभासभेदवत । अकारस्य निदर्शनार्थत्वादिकारादीनामप्यैक्य बोद्धव्यम् ।

(उद्द्योत') नन्वदात्तादिविरुद्धधर्माध्यासाद्भेद स्यादत आह—उदात्तादीति ॥ प्रतिबिम्बप्रतिभासभेदवदिति । भिन्नभिन्नाकारप्रतिबिम्बप्रतिभासवदित्यर्थ ॥ इकारादीनामपीति । सर्वध्वनिभिरेकस्य स्फोटस्यैव तत्तद्रूपेणाभिव्यञ्जनात् । तत्तद्रूपाभिव्यक्तिकृतश्च परस्पर भेदव्यवहारोऽपीति भाव' ।

(तत्त्वालोकः) भाष्ये—एकदेशी उत्तरयति-एकत्वादिति । अनुवृत्तौ-प्रत्याहारमद्दारीकृत्य लक्ष्यसस्कारकबोधजनकनिर्देशे ।
प्रदीपे-आदर्शेति-दर्पणेत्यर्थ । निदर्शनेति-दिग्दर्शनेत्यर्थ ।
उद्द्योते—अकारादीना प्रत्येकमेकत्वमावेण निर्वाहसम्भवेऽपि सर्ववर्णानामेकत्वमिति सिद्धान्तरीत्या आह-सर्वेति । तथा च धात्वादिस्थसंवृताकारो न विवृतत्वेन प्रतिज्ञेय आक्षरसमाम्नायिकाभिन्नत्वादनुवृत्तिस्थवदिति भाव ।

(२० आक्षेपवार्तिकम् ॥ ३ ॥)

॥ * ॥ अनुबन्धसङ्करस्तु ॥ * ॥

(भाष्यम्)

अनुबन्धसङ्करस्तु प्राप्नोति । "कर्मण्यण्" "आतोऽनुपसर्गे कः" इति केऽपि णित्कृतं प्राप्नोति ॥

(प्रदीप) अनुबन्धसङ्कर इति । एकत्वे ककारादीनां भेदाभावात्कोदात्ते ङीबादि प्राप्नोति ।

(उद्द्योतः) [भाष्ये] अनुबन्धसंकर इति । अस्यानुबन्धकार्यसंकर इत्यर्थः ॥ ङीबादीति । टिड्ढेत्यादिना ङीप् । आदिना णित्प्रयुक्तयुक् । पर्यायेण कित्त्वणित्त्वप्रयुक्तकार्ययोरप्यविरोध इति भावः ।

(तत्त्वालोक) भाष्ये—अकाराणामेकत्वे अनुबन्धकार्यसङ्कररूपं प्रथमदोषमाह—अनुबन्धेति । अकाराणामेकत्वे सतीत्यादि ।

प्रदीपे—एकत्वे इति—अकारादीनामित्यादि । सतीति शेषः । भेदेति—सानुबन्धस्वरूपे भेदेऽपि निरनुबन्धस्वरूपे इत्यादि ।

उद्द्योते—युक् आतो युक् चिण्कृतोरित्यनेन ।

(२१ द्वितीयाक्षेपवार्तिकम् ॥ ४ ॥)

॥*॥ एकाजनेकाज्ग्रहणेषु चानुपपत्तिः ॥*॥

(भाष्यम्)

एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति ॥ तत्र को दोषः ? ॥ किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोति । इह च घटेन तरति घटिक इति द्व्यज्लक्षणष्ठन् न प्राप्नोति ॥

(प्रदीप) किरिणेति । न गोश्वन्साववर्णेति प्रतिषेधादकारो नोपात्तः ॥ घटेनेति । एक एवाकारो द्विरुच्चार्यत इति द्व्यच्त्वाभावः ठन् बाहुल्येन दिशु इत्यर्थः ।

(उद्द्योत) [भाष्ये] अनुपपत्तिरिति । इष्टव्यवस्थाया इति भावः ॥ अव्याप्त्यतिव्याप्त्योः प्रसङ्गादिति तात्पर्यम् ॥ प्रतिषेधादिति । सापेक्षत्व इति भावः ॥ ठन्स्विति । नौद्व्यचष्ठन्निति विहितः ॥

(तत्त्वालोक) भाष्ये—तत्र अनुपपत्तिरूपं द्वितीयदोषमाह—एकाजिति । तत्र—एकाजनेकाज्ग्रहणेषु । अत्र एकाच् अनेकाच् इति ग्रहणेषु तेष्वित्यर्थः । अपिशब्दो न त्वर्थः । इति इत्यत्र ।

प्रदीपे—इति—इत्यत्र । इति—इति देशे इत्यर्थः—चरितार्थः । उद्द्योते—अव्याप्त्यतिव्याप्त्योः—इदं इष्टव्याप्त्याः, ठिति विधीयते । इति—इत्यनेन ।

(२२ तृतीयाक्षेपवार्तिकम् ॥ ५ ॥)

॥ * ॥ द्रव्यवच्चोपचाराः ॥ * ॥

(भाष्यम्)

द्रव्यवच्चोपचारा प्राप्नुवन्ति । तद्यथा—द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं करोति । एवमिममकारं नानेको युगपदुच्चारयेत् ॥

(प्रदीप) द्रव्यवदिति । अन्यथा एकस्य एकेन घटेन घटेनैकदेशे दिशि युगपदनेको न करोति, एवमेकमकारं युगपदनेको नोच्चारयेदित्यर्थः ।

(तत्त्वालोक) भाष्ये—तत्र व्यवहारविरोधरूपं तृतीयदोषमाह—द्रव्यवदिति । द्रव्येषु—घटादिषु ।

(२३ प्रथमाक्षेपनिराकरणवार्तिकम् ॥ ६ ॥)

॥ * ॥ विषयेण तु नानालिङ्गकरणात्सिद्धम् ॥ * ॥

(भाष्यम्)

यद्य विषये विषये नानालिङ्गमकारं करोति—"कर्मण्यण्" "आतोऽनुपसर्गे कः" इति । तेन ज्ञायते—नानुबन्धसङ्करोऽस्तीति । यदि हि स्यात् नानालिङ्गकरणमनर्थकं स्याद्, एकमेवायं सर्वगुणमुच्चारयेत् ॥

(प्रदीप) विषयेणेति । वार्तिककारेण करणत्वेन सामान्यरूपतया चाभेदेन विषयो निर्दिष्टः । भाष्यकारस्त्वधिकरणत्वं वीप्सां च प्रतिपादयति—विषये विषय इति । सर्वगुणमिति । गुणा अनुबन्धाः, कार्याश्रितत्वादुपकारकत्वात् । तत्र कर्मणि कन्दि मृगादीत्यर्थः ॥

(उद्द्योत) करणत्वेनेति । अधिकरणस्य करणत्वविवक्षयेत्यर्थः सामान्यरूपतयेति । विषयस्वरूपेणैवेत्यर्थः ॥ भाष्यकारस्त्विति । एकविषये नानालिङ्गकरणाभावात् विषयभेदेन नेत्यत्र तात्पर्यम् ॥ गुणा उदात्तादय इति भ्रमं व्यावर्तयति गुणा अनुबन्धा इति ॥ तेषां गुणत्वमुपपादयति—कार्येति ॥

(तत्त्वालोक) भाष्ये—एकदेशी अकाराणामेकत्वे आपादितं अनुबन्धकार्यसङ्कररूपं प्रथमदोषं परिहरति—विषयेणेति । यद्—यस्मात् अयं—पाणिनिः । एवमग्रेऽपि । नानालिङ्गं—विभिन्नानुबन्धचिह्नितम् इति—शेषः । हीति—यस्मादर्थे । स्यादिति—अनुबन्धकार्यसङ्करः स्यात् । तर्हि अकारे इति शेषः । एकमेवेति—तथैव इति । अकारमिति शेषः । सर्वगुणं—सर्वानुबन्धचिह्नितम् ।

प्रदीपे—चाभेदेन—एकदेशेन च । अनुबन्धानां गुणत्वं कथमित्याशङ्क्याह उपकारकेति । यत्र गुणे फलं तदनुपकार्यत्वेनैवावतिष्ठते । गुणत्वं परार्थत्वादिदं शास्त्रे व्यवस्थितम् ॥ इत्यनुसारेण कथमनुबन्धानां गुणत्वमिति भावः । तत्र—एकलानुबन्धचिह्नितं कर्मण्यत्र उच्चारयेत् ।

उद्द्योते मानेति—अकारे इत्यादि । तत्—अकारे । विभिन्नानुबन्धचिह्नाकारम् । तेषाम्—अनुबन्धानाम् ।

(ज्ञापकनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम् । इत्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यात् । न ह्यनमनुबन्धे शक्यमयमत्रस्य उपवेतुम् । इत्संज्ञाया हि दोषः स्याद् । आद्यन्तयोर्हि द्वयोरित्संज्ञा स्यात् ॥

कयोः ? ॥

आद्यन्तयोः ॥

(प्रदीप) ज्ञापकमिति । अनुबन्धः प्रत्येकमेव । स चेत् प्रत्येकमनुबन्धयुक्तोऽकारः स्यात् निर्देशः । आद्यन्तयोरित्संज्ञाप्रसङ्गादिति । अन्यथा इत्संज्ञा दोषमाह इत्यादि दोषाः स्युः इत्यर्थः ॥

(उद्द्योत) आद्यन्तयोरिति । इत्संज्ञकेन मुक्तावस्थायां ॥ एवं च द्व्यन्तवर्त्यादिति । अन्तिमस्य लोपेऽपि अकारस्य अनुबन्धत्वं तात्पर्यम् ॥

(तत्त्वालोकः) भाष्ये—अकारे विभिन्नानुबन्धचिह्नितताकरणस्य अनुबन्धकार्यसङ्करामावज्ञापकत्वं विघटयति—**नेति** । **एतत्**—अकारे विभिन्नानुबन्धचिह्नितताकरणम् । एवमग्रेऽपि । **ज्ञापकमिति**—अनुबन्धकार्यसङ्करामावस्येत्यादि । कुत इत्यत आह—**इत्सञ्ज्ञेति** । यत इत्यादि । **प्रकल्प्तीति**—सिद्ध्यतीत्यर्थः । **स्यादिति**—अत इति शेषः । **हि**—यतः । **अयम्**—अकारः । कुत इत्यत आह—**इत्संज्ञायामिति** । तथा कृते इत्यादि । कृतायामिति शेषः । **हि**—यत । **दोषः**—मध्यपातिश्रवणरूपः । कुत इत्यत आह—**आयस्येति** । व्यावृत्य (स्वविषयत्वं सम्पाद्य) इत्यर्थः । **हि**—यतः । **आद्यन्तयोरिति**—न तु मध्यपातिनामिति भावः ।

प्रदीपे—**पचैरिति**—एतेन शल्यकस्य पक्षिना द्योत्यते । वस्तुतस्तु सर्वाङ्गव्यापककण्टकः पञ्चनखो मृगः शल्यकादवाच्य इति भावः । कुत इत्यत आह—**आद्यन्तयोरिति** । **इति**—इति हेतौ । अस्य (आद्यन्तयोः विषयीकरणरूपस्य) व्यापारस्येति शेषः ।

उद्द्योते—**विषयत्वेनेति**—आद्यन्तावित्यादि ।

(आक्षेपनिराकरणवार्तिकव्याख्यान्तरभाष्यम्)

एवं तर्हि—

॥ विषयेण तु पुनर्लिङ्गकरणात्सिद्धम् ॥ ।

यदयं विषये विषये पुनर्लिङ्गमकारं करोति—“प्राग्दीव्यतोऽण्” “शिवादिभ्योऽण्” इति तेन ज्ञायते नानुबन्धसङ्करोऽस्तीति । यदि हि स्यात्पुनर्लिङ्गकरणमनर्थकं स्यात् ॥

(प्रदीपः) एवं तर्हीति । विषयेणेत्येतदन्यथा व्याचष्टे नानाशब्दमपनीय पुनःशब्दः पठितः । यद्यनुबन्धसंकरः स्यादकारमेव शिवादिभ्यो विदध्यात् ॥ अथोच्येत—णित्कृतमेव यथा स्यात् नित्कृतं मा भूदिति नियमार्थमेतत् स्यात् । तन्न, नियमाद्विधेर्बलीयस्त्वात् ॥

(उद्द्योतः) नानेति स्थिते कथमन्यथाव्याख्यानमत आह—**नानाशब्दमिति** ॥ **नियमादिति** । ज्ञापकत्वे हि विध्यर्थत्वमिति भावः ॥

(तत्त्वालोकः) भाष्ये—**पुनर्लिङ्गम्**—पुनरनुबन्धचिह्नितम् । शेषं पूर्ववत् ।

प्रदीपे—**अकारमिति**—नहीत्यादि । **एतत्**—अकारस्य पुनरनुबन्धचिह्नितताकरणम् । **बलीयस्त्वादिति**—तथा च तस्य विधित्वमाश्रितस्य अनुबन्धकार्यसङ्करामावज्ञापकत्वेन मन्तव्येति भावः ।

(प्रथमव्याख्याभ्युपगमभाष्यम्)

अथवा पुनरस्तु—

॥ विषयेण तु नानालिङ्गकरणात्सिद्धम् ॥ इत्येव ॥

(ज्ञापकनिराकरणस्मारणभाष्यम्)

ननु चोक्तम्—इत्संज्ञाप्रक्लृप्त्यर्थमेतत् स्यादिति ॥

(ज्ञापकसाधकभाष्यम्)

नैष दोषः, लोकत एतत्सिद्धम् । तद्यथा लोके कश्चित्कञ्चित् देवदत्तमाह—इह मुण्डो भव, इह जटिलो भव, इह शिखी भवेति यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते । एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते ॥

(प्रदीपः) अथवेति । न ब्रूमः—सर्वं गुणमुच्चारयेदिति, किं तु यथा लोके—इह मुण्डो भव इह नग्नो भवेति यद्गुणको यत्रोच्यते तद्गुण एव तत्र भवति, एवमिहापि याभ्यः प्रकृतिभ्यो यदनुबन्धविशिष्टो विधीयते तासु तदनुबन्धनिमित्तमेव कार्यं सम्पादयति ॥

(उद्द्योतः) यथा लोके इति । प्रच्छन्नतया गूढचारादिरिति शेषः ॥ एवञ्च लोकव्यवहारदृष्टान्तेनैवायमर्थः सिद्ध इत्यर्थः ॥ **यत्र** देशे काले वा ॥ **तद्गुण एवेति** । भाष्येऽपि—तल्लिङ्गस्तत्रेति सावधारणं व्याख्येयमिति भावः ॥ [अत्र वाक्यत्रयेऽपि तु शब्दः पूर्वपक्षव्यावृत्त्यै ॥]

(तत्त्वालोकः) भाष्ये—नाना (अनुबन्धरूप) लिङ्गकरणस्यैव अनुबन्धकार्यसङ्करामावज्ञापकतेति पुनरुत्थापयति—**अथवेति** । तस्य तज्ज्ञापकताया कृतं निराकरणं स्मारयति—**ननु चेति** । लोकत अनुबन्धकार्यसङ्करामावं साधयति—**नेति** । **एषः**—अनुबन्धकार्यासङ्करासिद्धिरूपः । कुत इत्यत आह—**लोकत इति** । **एतत्**—अनुबन्धकार्यासङ्करणम् । लोकतस्तस्य सिद्धिमुपपादयति—**तद्यथेति** ।

प्रदीपे—**सर्वमिति**—अकारमित्यादि । **भवेतीति**—रूपेणेति शेषः । **इह**—व्याकरणशास्त्रे । **विधीयते इति**—अकार इत्यादि ।

उद्द्योते—**गूढचारेति**—गुप्तचरेत्यर्थः । **असङ्करे इति**—अनुबन्धकार्यस्येत्यादि । **वाक्यत्रये**—विषयेण तु नानेति प्रथमवाक्ये, विषयेण तु पुनरिति द्वितीयवाक्ये, लोकाभिप्रायके विषयेण तु नानेति तृतीयवाक्ये च ।

(द्वितीयाक्षेपानुवादभाष्यम्)

यदप्युच्यते ॥ एकाजनेकाज्ग्रहणेषु चानुपपत्तिः ॥ इति ॥

(२४ द्वितीयाक्षेपनिराकरणवार्तिकम् ॥ ७ ॥

॥ ॥ एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात् ॥ ॥ ॥

(भाष्यम्)

एकाजनेकाज्ग्रहणेषु चावृत्तेः संख्यानादनेकाच्त्वं भविष्यति । तद्यथा—“सप्तदश सामिधेन्यो भवन्ति” इति “त्रिः प्रथमामन्वाह त्रिरुत्तमाम्” इत्यावृत्तितः सप्तदशत्वं भवति । एवमिहाप्यावृत्तितोऽनेकाच्त्वं भविष्यति ॥

(प्रदीपः) आवृत्तिसंख्यानादिति । यथा विकृतियागे त्रयोदश सामिधेन्यः प्रथमोत्तमयोस्त्रिरावृत्त्या सप्तदश सम्पद्यन्ते । तथा घटेन तरतीति द्व्यच्लक्षण ठन् भवति ॥ ननु मुख्ये विषये कृतार्थत्वादचः गौणं द्व्यच्त्वं कथं कार्यस्य निमित्तम् ? उच्यते—**गोद्व्यचः** इत्यत्राद्व्यचः प्रतिषेधाल्लिङ्गादावृत्तिभेदेनापि भेदाश्रयकार्यप्रवृत्तिः ॥

(उद्द्योतः) यथा विकृतियागे इति । तत्र हि सप्तमामिधेन्यनुवादेन सप्तदशत्वं विहितम् । तच्च त्रिः **प्रथमा** मित्यादिवाक्यबोधितया प्रथमोत्तमयोस्त्रिरावृत्त्यैवेति भावः ॥ **त्रिरावृत्त्येति** । **आवृत्तिः** पुनरुच्चारणम् । तज्जन्यसङ्ख्यया सप्तदशत्ववदत्रानेकाच्त्वमिति भावः ॥ [**लिङ्गादिति** । अनेन लिङ्गेन श्रुतिस्मृतिसिद्धत्वादस्य व्यवहारस्य गौणत्वमेव नेति द्योत्यत इति भावः]॥ [भाष्ये] **आवृत्तेः संख्यानात्** । गणनादित्यर्थः ।

(तत्त्वालोक) भाष्ये—अनारैक्ये गमागादिनत्व इत्यनुपप त्तिरूपद्विर्वचदोषस्य परिहाराय तत्र दोषान्तरवचनमनुवदितुम्। एव देत्याह-यदपीति। एकानिति-अत्र यदोच्यते इत्यादि। इति-इत्यत्र। इतीति-रूपेणेति शेष। इह-वदेव इत्यादी।

प्रदीपे—इतीति-इत्यत्रेत्यर्थः। अकारस्यावृत्त्या द्वित्वादिनि शेष।

उद्योते—तत्र-विदृ तिसाग। प्राप्तोति-प्रकृतिवद्विरुक्ति कर्तव्ये त्यनिर्दिष्टेनेत्यादि। तच सत्यशब्दत। तन्नन्येति-आवृत्तिर येत्य र्थ। सप्तेति-तनेत्यादि। अत्र घटिक इत्यादौ। अस्य-आवृत्ति न्यायस्याविषयत्वस्य। ज्ञाप्यते इति-तथा च सख्याविषये गौणत्व स्य न्यायो न प्रवर्त्तते इति भाव।

(आक्षेपभाष्यम्)

भवेदावृत्तित कार्यं परिहृतम्। इह तु खलु— किरिणा गिरिणेत्येकाजुलक्षणमन्तोदात्तत्व प्राप्नोत्येव॥

(प्रदीप) भवेदिति। गिरिणेत्यादावावृत्तिभेदेऽपि मुख्यमेका च्त्व न निवर्तत इति भाव॥

(उद्योत) भवेदावृत्तित कार्यं परिहृतमिति। आवृत्त्या कार्यं सिद्धमिति कृत्वा दूषण परिहृत भवेदित्यन्वय॥ मुख्यमिति। आवृत्तिकृतद्वयच्त्वेन स्वगतैकाच्त्वस्य बाधायोग इति भाव॥

(तत्त्वालोक) भाष्ये—अय भवत परिहारप्रकारो न व्याप क, अनेनान्यातो परिहृतायामपि अतिव्याप्त परिशिष्यमाणत्वादि त्याशयेन शङ्कते—भवेदिति। इति-इत्यत्र।

उद्योते—कार्यं-घटेन तरति घटिक इत्यत्र इत्यत्र लक्षणघटनारूपम्। दूषण-तत्र अव्याप्तिरूपम्।

(समाधानभाष्यम्)

एतदपि सिद्धम्॥

कथम्?।

लोकत। तद्यथा-ऋषिसहस्रमेका कपिलामेकैकश सहस्रकृत्वो दत्त्वा तथा सर्वे ते सहस्रदक्षिणा सपन्ना॥ एवमिहाप्यनेकाच्त्व भविष्यति॥

(प्रदीप) एतदपीति। लोके पृथ सख्या सख्यान्तरेण मुख्येन गौणेन च व्याप्यत इत्यर्थ। ऋषिसहस्रमिति। विप्रेण केनचिद् २ प्रत्येक दत्ता सहस्रदक्षिणा ऋषय सपन्ना इत्यर्थ। ऋषिस हस्रम् ऋषिसहस्रमिति कर्मधारये मन्या इत्यस्य सामानाधिकरण्य भवत। षष्ठीसमासे तु सामर्थ्यमनुपपन्न भवतो, यथा गार्ग्यायण मोदन्ते इति दुर्वेधतने स्याद्॥

(उद्योत) ननु स्वार्थ प्रतिग्रहाद्दानमकस्य पुनरपि न च पुनर्दान दत्तस्य दत्त्वाकृत्स्नस्य पुन प्रतिग्रहादन आह— विशेषेणेति॥ ननु बहु समासे सहस्रशब्दस्य विशेष्यवाचक त्वेन सत्त्व। कथ वा संपन्ना इति बहुवचनान्तेन सामानाधिकरण्यमत आह—सहस्रकृत्व ऋषिसहस्रमिति। अत एव सर्वे ते इत्यनेन सामानाधिकरण्यम्। षष्ठीसमासे भाष्यमान्याद॥ [सामर्थ्यंल क्षण इति। सामर्थ्यंकृतो गुणभूतेऽपि विधि संबन्ध इत्यर्थ। सर्वे ते इत्यत्र स्वार्थत्वेन गुणभूतस्यापि परामर्शो न दोष इत्यर्थ। अत एव दारैरिति समासकृदिति भाव॥ गुणभूतकर्मेति। सहस्रत्व धर्मस्यानुगतस्य गुणभूतस्यापि तैरेव गुण संबन्ध इति भाव॥] [भाष्ये] एकैकश इत्यत्र एकदे शरि दोष्क येन दोषत्वमनुवन्धानाद च बहुशो दृष्टत्वेन द्विर्वचनवृत्तयोर्योगपद्यम्। यथा-यथागार्गादिको गार्ग्यायणीत्यादौ। तत्र च यथा गार्ग्यत्वे समुच्चित्य द्योतकता, तस्मात् गार्गीति ङीपैव, तथा प्रकृतेऽपि शसो वैकल्पिकत्वात् एकैकश इत्यपि। इत्यादिशब्दविषये तु न समुच्चित्य द्योतकता, अनभिधानात्। एकशब्दे तु समुच्चित्य प्रत्येकं च द्योतकता, अभिधानस्वभावात्। यत्र शसैव नानुक्ता वीप्सा तत्र द्विर्वचन भवत्येव यथैकैकशो देहीति। भाष्यस्याप्ययमाशय -यत्र तद्धितमात्रेण लोके वीप्साभिधान तत्र द्विर्वचनमपि। यत्र माषश इत्यादौ तावतैव वीप्साभिधानं तत्र न कदापि तयो समुच्चय इति दिक॥ [भा ये] सहस्रदक्षिणा इति। सहस्रं दक्षिणा गोरूपा येषां दातॄणां इत्यर्थ॥ तेन गोसहस्रदानफल त्वे, न त्वेकगोदानमात्रफला इति व्यवहारो यथा स्मृतौ तथा प्रकृतेऽपि भाव॥ [भा ये] अनेकाच्त्वमिति। तन्मात्रमित्यर्थ॥

(तत्त्वालोक) भाष्ये—अकारादीनामेकत्ववादी किरिणेत्यादौ अतिव्याप्तिमपि निराकरोति-एतदिति। किरिणेत्यादौ एकाज्लक्षणान्तोदात्तत्वाप्रापणमित्यर्थ। तथा-एवकपिल्या। इह-किरिणेत्यादौ।

प्रदीपे—इति भुजे इत्यत्र भुजे।

उद्योते— स्वस्येति-स्वकर्तृकसर्वोद्देश्यकदाने इत्यादि। केचित्तु ऋषीणां दानप्रतिग्रहमालासहस्रेण सहस्रदक्षिणत्वोपपादन युक्त, गो विक्रयस्य स्मृतिभिर्निषिद्धत्वादिति वदन्ति, तन्न, "अप्यपवृक्तं गाव सर्व पात्र विक्रीयन्ते" इत्येओकिति सूत्रभाष्यविरोधात्। षष्ठीति-ऋषिसह स्रमित्यत्रेत्यादि। कथमिति-विशेषणानां ऋषीणामिति शेष। इत्य नेनेति-ऋषीणामिति शेष। परेति-सहस्रशब्दस्येत्यादि। सामर्थ्य स्वरूप इत्यवधारणायाह-सामर्थ्यकृत इति। तथा चात्र सामर्थ्य लक्षणं निमित्त यस्येति व्युत्पत्तौ बहुव्रीहिरिति भाव। सम्बन्ध इति- दानस्येत्यादि। अत्र पक्षे-षष्ठीसमासपक्षे। अत एवेति-दानस्य स्वार्थेकवृत्तकत्वेति शेष। अन्यथा तयो संख्याकृतैकत्वसम्भावात् तदनुपपत्तिरिति भाव। सम्बन्ध इति-तथा प्रयोगस्तु गुणगुणिनोर भेदात् संख्याश्रये भोजिते संख्यैव भोजिता भवतीत्यनुमानेनेति भाव। उभयो-एकशब्दद्विर्वचनशसो। द्योतकसमुच्चयमुदाहरति-यथेति। तत्र-गार्ग्यायणीत्यत्र। तदभावे-अनाभावे। गार्गीति-गार्गी तत्र। ङीपैवेति-द्योत्यत इति शेष। देहीति-देहीत्यत्र। ते-ऋषय।

(तृतीयाक्षेपनिराकरणभाष्यम्)

यदप्युच्यते-द्रव्यवच्चोपचारा: प्राप्नुवन्तीति। भवेद् यदसभवि कार्यं तन्नानेको युगपत्कुर्याद्। यत्तु खलु सभवि कार्यमनेकोऽपि तद्युगपत्करोति। तद्यथा- घटस्य दर्शनं स्पर्शनं वा। संभवि चेद कार्यमपवारयो च्चारण नाम। अनेकोऽपि तद्युगपत्करिष्यति॥

(प्रदीप) संभवि चेति। एकदेशस्थस्य युगपद् दर्शन स्पर्शनमित्यनेकैरेकत्रावस्थितेरुच्चारणं संभवति द्वयं॥

(उद्योत) एकस्यैवेति। व्यासज्यवृत्तित्वेनेदमपि बोध्यम्। अकार द्वयस्य युगपदुच्चारणमित्युक्तम्। [भाष्ये] उच्चारणं नामेत्युदाहरण इति शेष॥

(तत्त्वालोक) भाष्ये—अकारादेकस्यैकदेशस्य व्यवहारविरोध स्योपपादनेऽपि तस्य परिहाराय तत्र दोषान्तरमनुवदितुम् एवं इत्याह—यदपीति। भवेदिति-भवेद् कुर्यादित्यनेनान्वय। कुर्याद्-कुर्यादिति। सभवीति-कार्यमित्यादि।

(३५ पूर्वपक्षिसंमतनानात्वसाधकवार्तिकम् ॥ ८ ॥)

॥ * ॥ आन्यभाव्यं तु कालशब्दव्यवायात् ॥ * ॥

(भाष्यम्)

आन्यभाव्यं त्वकारस्य ॥ कुतः ? ॥ कालशब्दव्यवायात् । कालव्यवायाच्छब्दव्यवायाच्च । कालव्यवायात्–दण्ड अग्रम् । शब्दव्यवायाद्—दण्ड । नचैकस्यात्मनो व्यवायेन भवितव्यम् । भवति चेद्भवत्यान्यभाव्यमकारस्य ।

(प्रदीपः) एवं परिहृतेष्वपि दोषेषु तत्र न्यायेनाकारस्य भेद साधयति—आन्यभाव्यमिति । अन्यस्य भावोऽन्यभावस्ततो ब्राह्मणादिषु स्वार्थे विधानार्थं त्पाठात् स्वार्थे ष्यञ् । अथवान्यो भावोऽन्यद्वस्तु तस्य भाव इति भावे ष्यञ् । इह कालशब्दाभ्यां व्यवधान भिन्नानां दृष्टम् । यथाऽसंहितायाम्–अ इ उ इत्यादीनां कालव्यवाय, वृत्तिरित्यादौ शब्दव्यवाय । तत्र तकारेण ऋकारेकारयोर्व्यवधानात् । एकत्वे तु व्यवधानं न दृष्टं यथा अ इति केवलाकार उच्चार्यते, तस्मादुदात्तादिगुणभेदात्कालशब्दव्यवायाच्च नानात्वमकारस्य । प्रत्यभिज्ञान चात्वादिसामान्यनिबन्धनम् । यद्यपि शब्दव्यवायेऽपि कालव्यवायोऽस्ति, तथापि कालव्यवाय एव द्विधा दर्शित शब्दशून्य शब्दवांश्च ॥

(उद्द्योतः) आन्यभाव्यमित्यस्यान्यत्वमित्यर्थो नेत्याह—अन्यस्येति ॥ अथवेति । भावशब्द कर्तृसाधन इति भाव ॥ एवच प्रतिप्रयोगमकारस्यान्यत्वमित्यर्थं । यथेति । एवंचाग्र इत्याद्यकारो दण्डेत्यकाराद्भिन्न । दण्ड अग्रमित्यादौ कालव्यवधानात्, दण्ड इवेति प्रयोग इकारवत् । तथा दण्ड इत्यत्राद्याकारोन्त्याकाराद्भिन्न, शब्दव्यवायात्, वृत्तिरित्यादौ तकारव्यवहितेकारवद्–इत्यनुमानैर्भेदे सिद्धे उदात्तादिविरुद्धधर्मप्रत्ययोऽपि पारमार्थिक एवेत्याशयेन तद्भेदादपि भेदसिद्धिरित्यभिप्रेत्याह—उदात्तादीति । नानात्वमकारस्येति । युक्तमिति शेष ॥ ननु य एवोदात्तोकार स एव देवदत्तेनानुदात्त कृत इति प्रत्यभिज्ञाविरोधोऽत आह—प्रत्यभिज्ञानं चेति ॥

(तत्त्वालोकः) भाष्ये—आन्यभाव्यं–परस्पर भेद ।

प्रदीपे—तत्रेति–अकारैकत्वे इत्यर्थं । समापन्नेष्विति शेष । भेदमिति–परस्परमित्यादि । उच्चार्यते इति–अत्र उच्चारिते इति पाठो युक्त ।

उद्द्योते—भेदे इति–अकारस्य परस्परमित्यादिः । तद्भेदादपीति–उदात्तत्वादिधर्मभेदादपीत्यर्थं । तस्य परस्परमिति शेष ।

(३६ नानात्वहेतुवार्तिकम् ॥ ९)

॥ * ॥ युगपच्च देशपृथक्त्वदर्शनात् ॥ * ॥

(भाष्यम्)

युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे—आन्यभाव्यमकारस्येति । यदयं युगपद्देशपृथक्त्वेषूपलभ्यते—अश्व, अर्कः, अर्थ इति । न ह्येको देवदत्तो युगपत्स्रुघ्ने च भवति मथुरायां च ॥

(उद्द्योतः) विभुत्व निराचष्टे [भाष्ये] युगपच्च देशेति । अकारादिशब्दा एव देशपदेनोच्यन्ते ॥ देशपृथक्त्वेष्विति । देशानां पृथक्त्वेषु भेदेषु सत्स्वित्यर्थं ॥

(तत्त्वालोकः) भाष्ये—अकारस्य एककालावच्छेदेन विभिन्नदेशेषूपलब्धिस्तस्य नानात्वस्याविभुत्वस्य च साधिके यादृशेनाह–युगपदिति । अयम्–अकार । इति–इत्यादौ । हि–यत ।

उद्द्योते—विभुत्वमिति–अकारस्यैकत्व निरस्य विभुत्वमपीति भाव । अत एवात्र भाष्ये कृत आन्यभाव्यमित्यस्यानुषङ्ग मन्यते ।

(एकत्ववादिभाष्यम्)

यदि पुनरिमे वर्णाः—

(३७ एकत्वसाधकवार्तिकम् ॥ १०)

॥ * ॥ शकुनिवत्स्युः ॥ * ॥

(भाष्यम्)

तद्यथा—शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते । एवमयमकारो द इत्यत्र दृष्टो एड इत्यत्र दृश्यते ॥

(प्रदीपः) यदि पुनरिति । कालशब्दाभ्यां व्यञ्जकानामेव ध्वनीनां व्यवायो, न व्यङ्ग्यस्येति व्यक्तिस्फोटवादिनो भाव ॥ यथा शकुनि पङ्क्तेरादौ स्थित आशुसंचारात्तदन्ते भवति, एवं व्यञ्जकध्वनिसंनिधानासंनिधानाभ्यामकारस्योपलम्भानुपलम्भावित्यर्थं ॥

(उद्द्योतः) एवं वर्णानामनेकत्वे परेण साधिते वर्णैकत्ववादी एकत्व स्थापयितु तद्दूषणोद्धारमाह [भाष्ये] यदि पुनरिति ॥ तत्र शकुनिवदिति दृष्टान्तस्य तद्वत्परिच्छिन्नत्वे न तात्पर्यम्, तन्मते तस्य विभुत्वादिति ध्वनयन्नाह—कालशब्दाभ्यामिति ॥ व्यक्तिस्फोटवादिन इति । व्यक्तेर्नित्यत्वैकत्ववादिन एकैव शब्दव्यक्तिरिति वादिन इत्यर्थं । अनेनाद्य दूषणं परिहृतम् ॥ द्वितीय परिहरति—यथेति । एवमिति । अस्यानेकदेशेषु युगपदुपलम्भो व्यञ्जकवशादिति शेष । पूर्वदृष्टस्य पश्चाद्दर्शनेऽपि, अव्यवहितस्य व्यवधानेऽपि न भेद इत्येतन्मात्रेण दृष्टान्त इति भाव ॥ नन्वेवं विभुत्वे नित्यत्वे च सर्वत्र देशे सर्वदोपलम्भापत्तिरत आह—व्यञ्जकेत्यादि ।

(तत्त्वालोकः) भाष्ये—इमे अकारादय । एवमग्रेऽपि । शकुनीति–पक्षीत्यर्थं । तद्यथेत्यादि ।

प्रदीपे—व्यङ्ग्यस्य–स्फोटस्य । तदन्ते–पङ्क्त्यन्ते ।

उद्द्योते—एकत्वं–तेषामेकत्वम् । तद्दूषणोद्धारं–तस्मिन् वर्णैकत्वे यद् दूषण तस्योद्धारम् । तत्र–शकुनिवत्स्युरिति वार्त्तिके । तद्वदिति–शकुनिवदित्यर्थं । वर्णस्येत्यादि तन्मते–वर्णैकत्ववादिमते । व्यक्तेर्वाचकत्वेनेति न व्यक्तिस्फोटपदार्थं इत्याशयेनाह–व्यक्तेरिति । वादिन इति–इत्यर्थं इति शेष । सिद्धान्तरीत्याह–एकैवेति । इत्यर्थं -इति भाव । अनेन–कालशब्दाभ्यामित्यनेन । आद्यम्–अकारस्य कालशब्दव्यवायादन्यत्वम् । द्वितीयं–तस्य विभुत्वनिराकरणम् । अस्य–अकारस्य । एवमिति –उक्तदोषद्वये निराकृते इत्यर्थं । अकारस्येति शेष । चेति–स्थिते, तस्येति शेष ।

(नानात्ववादिभाष्यम्)

नैवं शक्यम् । अनित्यत्वमेवं स्यात् । नित्याश्च शब्दाः । नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । यदि चायं द इत्यत्र दृष्टो एड इत्यत्र दृश्येत, नायं कूटस्थः स्यात् ॥

(प्रदीपः) जातिस्फोटवादी व्यक्तिस्फोटवादिनं पर्यनुयुङ्क्ते—अनित्यत्वमिति। भवता जातिस्फोटवादोऽभ्युपगम्यते, व्यक्तेरेवैकत्वनित्यत्वप्रतिज्ञानात्। तच्चैकत्वं नित्यत्वं च नोपपद्यते, दण्ड इत्युदात्तानुदात्तस्वरादिभेदेन भिन्नत्वात्। न चैकस्यैवोदात्तत्वपरित्यागेनानुदात्तत्वं युक्तम्, रूपान्तरपरिग्रहादनित्यत्वप्रसङ्गात्। तस्माद्भिन्ना एवानित्या एवाकारा प्रत्यभिज्ञा त्वाकृतिनिबन्धनेति जातिस्फोटपक्षोऽत्र व्यवस्थित ॥

(उद्द्योतः) जातिस्फोटेति। जातिरेव स्फोटः, शब्दव्यक्तयस्तु नन्ना इति वादीत्यर्थः ॥ [भाष्ये] अनित्यत्वमेवं स्यादिति। व्यक्तेरेकत्ववादी तस्या नित्यत्वं मन्यते इति भावः ॥ ननु विभोरेकस्यापि व्यञ्जकभेदादनेकत्रोपलब्धौ कथमनित्यतेत्यत आह भवतेति। भाष्येऽपि नित्याश्च शब्दा इत्यस्य तवेत्यादि। भाष्योक्तकूटस्थत्वाभावमुपपादयति—रूपान्तरेति ॥ तस्माद्भिन्ना एवानित्या एवाकारा इति पाठः। नित्या एवेति पाठस्त्वयुक्तः। अनन्तवर्णवादे तदनित्यत्वस्यैवेष्टत्वादिति बोध्यम्॥ यद्यप्युदात्तादीनां ध्वनिनिष्ठत्वादकारस्य दोषस्तथापि स्फटिकस्येवास्यापि इतरसंनिधानेन तद्रूपपरिग्रहे संसर्गोऽनित्यताविरोधिकूटस्थत्वाभाव इति भावः ॥

(तत्त्वालोकः) भाष्ये—पूर्वपक्षी उक्तदूषणद्वयोद्धारं निराकरोति—नेति। एवमिति—शङ्कितरीत्येत्यर्थः। वर्णः भवितुमिति शेषः। एवमिति—सति, वर्णानामिति शेषः। अयम्—अकारः।

प्रदीपे—इति—इत्यत्र। भेदेनेति—अकारस्येति शेषः। हि—यतः। इति—इति हेतौ।

उद्द्योते—तस्याः—वर्णव्यक्तेः। तदनित्यत्वस्य—वर्णानित्यत्वस्य। अस्यापि—अकारादेरपि। विरोधिकूटस्थत्वेति—विरोधिनः कूटस्थत्वस्येत्यर्थः।

(एकत्ववादिभाष्यम्)

यदि पुनरिमे वर्णाः—

(३८ एकत्ववादिमतवार्तिकम् ॥ ११ ॥)

॥ * ॥ आदित्यवत्स्युः ॥ * ॥

(भाष्यम्)

तद्यथा एक आदित्योऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्यते ॥

(उद्द्योतः) पुनरप्येकत्वनित्यत्वे साधयति—भाष्ये यदि पुनरित्यादिना। अकारस्यैवानेकदेशोपलम्भ आदित्यस्येव संभवति न तावता भेदः सिध्यति। स यथा आदित्यस्याप्यनेकत्वापत्तिरिति भावः। तद्देशगमनगमनाभ्यामाधिकरणत्वादित्युक्तमसर्वादिति भावः ॥

(तत्त्वालोकः) भाष्ये—आदित्येति—दृष्टान्तादिः।

उद्द्योते—एकस्येति—अकारस्येत्यादि। साधयतीति—"आदित्यवद्यौगपद्यम्" इति जैमिनिवचनमनुसृत्य एकत्ववादी मीमांसक इति शेषः। आदित्यस्येव—अकारस्यैवादित्यस्येव देशभेदेऽप्युपलब्धिरिव। इति—इति हेतौ। अस्यैति—अकारस्याकारस्य। अन्यथा—अनेकदेशोपलम्भे अनेकाधिकरणत्वदोषः स्यात्।

(नानात्ववादिभाष्यम्)

विषम उपन्यासः—नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते। अकारं पुनरुपलभते ॥

(उद्द्योतः) विषम इति। आदित्यदृष्टान्तेनानेकदेशोपलम्भमानाकारादिपक्षैक्यसाधकः प्रत्यभिज्ञायमानत्वहेतुरनेकद्रष्टृकानेकदेशोपलब्धिविषयत्वरूपोपाधियुक्त इति न तेन भेदसाधकशब्दप्रत्ययहेतो सत्प्रतिपक्षता युक्तेति भावः ॥ अकारं पुनरुपलभत इत्यादेरेकद्रष्टनेकाधिकरणस्थमिति शेषः ॥

(तत्त्वालोकः) भाष्ये—आदित्यदृष्टान्तं विघटयति—विषम इति। कुत इत्यत आह—नैक इति। नैक इत्यादिः। उपलभते इति—अत्र इति शेषः।

उद्द्योते—अनेकेति—एतद्घटकमर्थस्य विषयत्वेनान्वय इति भावः। उपाधीति—तत्त्वञ्च साध्यव्यापकत्वे सति साधनाव्यापकत्वम्। इति—इति हेतौ। तेन—एकत्वसाधकप्रत्यभिज्ञायमानत्वहेतुना।

(एकत्ववादिभाष्यम्)

अकारमपि नोपलभते। किं कारणम्? ॥ श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः। एकं च पुनराकाशम् ॥

(प्रदीपः) व्यक्तिस्फोटवाद्याह—अकारमपीति ॥ श्रोत्रोपलब्धिरिति। श्रोत्रोपलभ्याकाशदेशत्वं शब्दस्य प्रतिपादयति। आकाशप्रदेशविशेषस्य श्रोत्रत्वादिन्द्रियाणामसंबद्धविषयाग्रहणाच्छ्रोत्रस्य च निष्क्रियत्वाद्गमनाभावादाकाशदेशत्वं शब्दस्यावश्यमभ्युपेयम्॥ बुद्धिनिर्ग्राह्य इति। पूर्वपूर्वध्वन्युत्पादिताभिव्यक्तिजनितसंस्कारपरम्पराप्राप्तपरिपाकान्त्यबुद्धिनिर्ग्राह्य इत्यर्थः ॥ प्रयोगेणेति। प्रयुज्यत इति प्रयोगो ध्वनिस्तेनाभिव्यक्त ॥ देशभेदेन तु प्रतिभासो नियतदेशवर्तिप्रयुक्तोदीरिताभिव्यञ्जकध्वनिकृत ॥

(उद्द्योतः) शब्दस्याकाशरूपैकाधिकरणत्वेनानेकाधिकरणत्वमयुक्तमित्याशयेनाह [भाष्ये] अकारमपि नोपलभत इति। अकारमप्यनेकाधिकरणस्थं नोपलभत इत्यर्थः ॥ श्रोत्रोपलब्धिरिति। श्रोत्र एव उपलब्धिर्यस्येत्यर्थः ॥ करणविभक्त्यन्तत्वेन समानाधिकरणबहुव्रीहिर्वा ॥ श्रोत्रविशेषणस्य दर्शयति—श्रोत्रेति। ननु दिगेव वा श्रोत्रं स्यात्, कथं तत्रोपलभ्याकाशदेशत्वसिद्धिरित आह—आकाशेति। कर्णशष्कुल्यवच्छिन्नं नभ एव श्रोत्रम्। चक्षुरादिवच्छ्रोत्रस्यापि भूतत्वमावश्यकमिति भावः ॥ दिशोऽनतिरिक्त एव चाकाशमिति तत्त्वम्॥ ननु यथाप्यनेनोपलभ्यघटादिरूपस्य नेत्रस्य चक्षुर्गोलकादन्यत्रापि गमनं तथापि शब्दस्याप्याकाशदेशत्वेऽपि श्रोत्रगमनेन किं न स्यादित्याशङ्क्य किमसंबद्धं तद्ग्राहकं, गच्छति वा, नापि इत्याह—असंबद्धेति। अन्यथा ...... शब्दस्यापि प्रत्यक्षतापत्तेः। किं चेति किं श्रोत्रस्य विषयदेशगमनाभ्युपगम, उत शब्दस्य श्रोत्रदेशगमनात्, नोभयमपीत्याह—गमनाभावादिति। श्रोत्रस्य चेति। येन शब्दपरिग्रहः। उभयोरपि गमनाभावे हेतुर्निष्क्रियत्वं, दूरदेशस्थस्य ग्रहणं तु दूरत्वादेरौपाधिकत्वाच्छ्रोत्रदेशेऽभिव्यक्ते। आकाशदेशत्व च ...... भिद्यत इति भावः ॥ ...... इति भावः ॥ ...... शब्दस्य निष्पन्न इति बोध्यम् ॥ ...... पूर्वपूर्वेति। ...... बुद्धिरिति ...... इति। ...... ।

पपशद्रिप्रत्यक्षमिति भाव ॥ नन्वेव मर्वदा शब्दोपलम्भ स्यादतो [भाष्ये] प्रयोगेणाभिज्वलित इति । तद्व्याचष्टे-प्रयुज्यत इति ॥ ध्वनिरिति । वर्ण इत्यर्थ ॥ [भाष्ये] एक च पुनराकाशमिति । एव चैकस्मिन्नाप्रकृते एक एव यथा रूपरसगन्धादिस्तथा तदाश्रयस्यै कत्वात्तद्गत शब्दोऽप्येक एव । तत्रैव च तस्योपलम्भ इति भिन्नदे शोपलम्भ एवासिद्ध इति भाव ॥ नन्वेकस्येऽय पूर्वोऽय परोऽय देवगृहेऽय राजगृह इति भेदप्रतिभास कथमत आह—देशभेदेन त्विति । औपाधिको भेदस्तु आकाशस्येव न शब्दस्याप्येकत्वे बाधक । एव ससर्गानित्यत्वापि तस्यैव नास्यापि बाधिका तस्यापि नील नम इत्यादि ससर्गानित्यताप्रतीतेरित्याशय ॥ अत्र शब्द इत्येकवचनेन स्फोटस्यैकत्वमखण्डत्व च ध्वनितम् ॥

(तत्त्वालोक) भाष्ये—शब्दव्यक्त्येकत्ववादी मीमासक दृष्टान्तवैषम्य निराकरोति-अकारमिति । एको द्रष्टत्यादि । श्रोत्रेति-यत इत्यादि । आकाशमिति-अत इति शेष ।

प्रदीपे—असम्बद्धेति-असन्निकृष्टेत्यर्थे ।

उद्द्योते—उपलब्धिशब्दस्य भावक्तिन्ततया मत्वा व्यधिकरणत्वमुद्भावयितुमाह-श्रोत्र एवेति । तथा अगतिकगतिवादाह-करणेति । तस्येत्यादि । एतदिति-श्रोत्रोपलब्धीत्यर्थ । 'पद्भ्या भूमिर्दिश श्रोत्रादि' ति पुरुषसूक्तश्रुत्यनुसारेणाह दिश एवेति । तत्र-दिशि । अस्य शब्दस्येति शेष । 'दिक्कालौ नेश्वरादतिरिच्येते मानाभावादि' त्यादिग्रन्थेन दिश ईश्वरानतिरिक्तत्व प्रतिपाद्य, शब्दकारणत्वेन कल्पनस्येश्वरस्यैव शब्दसमवायिकारणत्वमित्यादिग्रन्थेन आकाशस्यापि ईश्वरानतिरिक्ततया दीधितिकृता प्रतिपादितत्वात् 'तदभिन्नाभिन्नस्य तदभिन्नत्वमि' ति न्यायेनाह-दिश इति । असम्बद्धमिति-श्रोत्रमिति शेष । अन्यथा-श्रोत्रस्यासम्बद्धस्य शब्दग्राहकत्वे । द्वितीये-सम्बद्धश्रोत्रस्य शब्दग्राहकत्वे । सम्बन्ध इति-शब्देनेत्यादि । उभयो-श्रोत्रशब्दयो । तद्धदेव-आकाशवदेव । तस्यापि-शब्दस्यापि । तेन-श्रोत्रेण । इत्येव-इत्यनेनैव । तदुक्त-बुद्धिमोश्च इत्युक्तम् । इति-इति हेतौ । तत्सहकृतेति-नादशसस्कारपरम्परासहकृतेत्यर्थ । प्रतिबिम्बवदिति-अत्र मतुप् । तदाश्रयस्य-शब्दाश्रयस्याकाशस्य । तद्गत-आकाशगत । तत्रैव-आकाश एव । तस्य-शब्दस्य । इति इति हेतौ । एकत्वे इति-शब्दस्येत्यादि । तस्यैव-आकाशस्यैव । अस्यापि-शब्दस्यापि । अस्य नित्यत्वे इति शेष । तस्यापि-आकाशस्यापि ।

(नानात्ववादिभाष्यम्)

आकाशदेशा अपि बहव । यावता बहव', तस्मादान्यभाव्यमकारस्य ॥

(प्रदीप') भेदमाह—आकाशदेशा इति । यथा पृथिव्या एकत्वेऽपि स्रुघ्नमथुरादिदेशव्यवहार एवमाकाशस्यापि सयोगिघटादिपदार्थावच्छेदेन भेदव्यवहार इत्यर्थ ॥

(उद्द्योत') ननु निरवयवस्य कथ प्रदेशबाहुल्यमत आह—यथेति । एव चौपाधिकभेदेन भेदो दुर्वार । सर्वत्र भेद औपाधिक एव, स एव च व्यवहारोपयोगीत्याशय । श्रोत्रमवच्छस्तु प्रदेशान्तरोत्पन्नशब्दस्यापि बीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा तत्रान्तरे व्युत्पादित एव ॥

(तत्त्वालोक) भाष्ये—बहव इति-अनेनाकाशत्वस्य जातितापि सूचिता । आह च-सयोगिधर्मभेदेन देशऽत्र परिकल्पिते । तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥ इति । यावता-यस्मात् ।

प्रदीपे—भेदेति-अकारस्येत्यादि । आकाशस्येति-एकत्वे इति शेष । उद्द्योते—निरवयवस्येति-आकाशस्येति शेष । भेद इति-आकाशस्येत्यादि । स एव-औपाधिकभेद एव । तन्त्रान्तरे-वैशेषिकदर्शने ।

(३१ सिद्धान्तसमाधानवार्तिकम् ॥ १२ ॥)

॥ * ॥ आकृतिग्रहणात्सिद्धम् ॥ * ॥

(भाष्यम्)

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृति', तथोवर्णाकृति. ॥

(प्रदीप) एव व्यक्तिस्फोटपक्षे निराकृते जातिस्फोटपक्ष एवाश्रीयते—आकृतिग्रहणादिति । अकारजाति सर्वप्रदेशेषु निर्दिश्यते । नान्तरीयकस्तु व्यक्तिनिर्देश तत्र । प्रत्याहारेष्वकारजातिनिर्देशात्तत्स्थाश्च विवृतत्वप्रतिज्ञानाच्छास्त्रान्ते तस्या एव प्रत्यापत्तिविधानम् । तत्रैव जातिनिर्देशादनुवृत्तिनिर्देशस्थेनाकारेण ग्रहणमाकारस्य सिद्धम् । अष्टन आ विभक्ताविति सत्यपि जातिनिर्देशे दीर्घोच्चारणसामर्थ्याद्धस्वस्य ग्रहण न भवति । अन्यथा ह्रस्वमेवोच्चारयेत् । प्लुतश्च विषये स्मृत इति न्यायात् प्लुतस्याग्रहणम् ।

(उद्द्योत') तत्रापि पक्षे स्य च्वावित्यादौ दोषो नेत्याह—भाष्ये आकृतिग्रहणादिति । तदाह—अकारजातिरिति । सर्वप्रदेशेष्विति । प्रत्याहारेष्व स्य च्वावित्यादौ च । अकारव्यक्तीनामानन्त्यमाश्रित्य वार्तिककृता वर्णसमाम्नायस्थस्य विवृतत्वेऽपि धात्वादिस्थस्यापि विवृतोपदेशो नोदित । भाष्यकृता तु प्रयोगस्थाना प्रत्याहारस्थैर्ग्रहणाय तत्र जातिनिर्देशे आवश्यके जातेर्विवृतत्वप्रतिज्ञानेनैव सर्वसिद्ध म इति वार्तिकमिति । अस्य च्वावित्यादौ तु सत्यपि विवृतस्योपादानत्वात्सवर्णग्रहण न स्यादित्यपि जातिनिर्देशेनैव परिहृतम् । एव चाणुदित्सूत्रेऽण्ग्रहण न कार्यमित्याशय ॥ तस्याश्चेति । स्वाश्रयव्यक्तिद्वारेत्यर्थ ॥ तत्र प्रत्यापत्तिविषये तपरनिर्देशात् षण्णामेकदेशनिर्देशाद्वा ह्रस्वस्यैव सवृतत्व बोध्यम् ॥ ननु जातिनिर्देशेऽतिप्रसङ्ग इत्याह—अष्टन इति । अन्यथा ह्रस्वमेवेति । न च तन्निर्देशेऽन्तरतमपरिभाषया दीर्घो न स्यादिति दीर्घविधानम्, दीर्घनिर्देशे तु तत्सामर्थ्यात्तस्यापि विधानम्, जातिग्रहणादन्यस्यापीति वाच्यम् । दीर्घनिर्देशसामर्थ्येनान्तरतमपरिभाषाबाधकल्पनापेक्षया ह्रस्वानुपस्थितेरेव कल्पने लाघवमित्याशयात् ॥ ननु दीर्घोच्चारणसामर्थ्यान्मा भूद्ध्रस्व प्लुतस्तु स्यादत आह—प्लुतश्चेति । विषये=दूराद्धूतादौ । अनेनापि प्लुतविधानेऽदोषवददोष स्यादिति भाव ॥

(तत्त्वालोक) प्रदीपे—तत्र-जातिनिर्देशे । तस्या-अत्वजाते । प्रत्यापत्तिविधान-सवृतत्वप्रतिविधानम् । अन्यथा-ह्रस्वस्य ग्राह्यत्वे ।

उद्द्योते—तत्रापि-व्यक्तिभेदेऽपि । नोदित-चोदत । तत्र-प्रत्याहारस्थेषु । जाते-अत्वजाते । स-सवर्णग्रहणरूप । ननु जातिपक्षे अ अ इत्यनेन दीर्घादेरपि सवृतत्व स्यादित्यत आह-तस्यैति । जातिपक्षे इत्यर्थ । प्रत्यापत्तिवाक्ये-अ अ इत्यत्र । तन्निर्देशे-ह्रस्वनिर्देशे । इति-इति हेतौ । तत्सामर्थ्यात्-दीर्घनिर्देशसामर्थ्यात् । अस्य अन्तरतमपरिभाषाबाधद्वारेति शेष । तस्यापि-दीर्घस्यापि । अस्य पर्यायेणेति शेष । अनेन-अष्टन आ इत्यनेन ।

(सिद्धान्तसाधकवार्तिकद्वितीयखण्डम् ॥ १२ ॥)

॥ * ॥ तद्वच्च तपरकरणम् ॥ * ॥

(भाष्यम्)

एवं च कृत्वा तपराः क्रियन्ते—आकृतिग्रहणेनातिप्रसक्तमिति ॥

(प्रदीपः) तद्वच्चेति । स आकृतिपक्षो यत्रास्ति तद्वत् । अथवा वत्यन्तमेतत्, तत्र न्यायेनाकृतिग्रहणस्य स्यादित्वात्तपरेष्वपि स एव पक्ष इत्यर्थः ॥

(उद्द्योतः) सर्वत्राकृतिनिर्दिष्टेत्यत्र ज्ञापकमाह—भाष्ये तद्वच्चेति । सादृश्ये वतिभ्रमं व्यावर्तयति—स इति । अथवा वत्यन्तमेतदिति । तदा तद्वदित्यस्यास्य ध्वाविन्यादिवदित्यर्थः ॥ तदाह—तत्र न्यायेनेति । तत्रास्य ध्वाविन्यादौ । आकृतिग्रहणप्रयुक्तातिप्रसङ्गनिवारणार्थमेव हि तत्र तत्र तपरकरणम् ॥ जातिपक्षेऽपि विवृतत्वप्रतिषेधकः सवर्ण इत्यादेर्दण्डानतिरित्यादौ दीर्घार्थमावश्यकत्वं । एवं प्रत्याहारविषयेऽप्यावश्यकमेव, तुल्यास्यायाम्नातिग्रहणप्रयुक्तातिप्रसङ्गनिवारणाय तपरत्वस्य । विधेये त्यदादीनाम इत्यादौ तकारणाय तपरस्य त्स्येनदिति बोधितम् । अत्र पक्षेऽण्ग्रहणप्रत्याख्यानेऽपि ऋल्वर्णयोः सावर्ण्येन समानजातित्वातिदेशान्न दोष इति भावः ॥

(तत्त्वालोकः) भाष्ये—तपरा इति-अ इत्यादय इत्यादि ।

प्रदीपे—एतत्-तद्वत् । स एव पक्षः-जातिपक्ष एव ।

उद्द्योते—तदा-तद्वत् वत्यन्तत्वे । तद्वारणाय-जातिनिर्देशप्रयुक्तातिप्रसङ्गवारणाय । अत्र पक्षे-जातिपक्षे ।

(सिद्धान्तदूषकभाष्यम्)

ननु च सवर्णग्रहणेनातिप्रसक्तमिति कृत्वा तपराः क्रियेरन् ॥

(तत्त्वालोकः) भाष्ये—तपरकरणस्य जातिपक्षज्ञापकत्वं विघटयति-ननु चेति । क्रियेरन्निति-तथा च तपरकरणस्य सवर्णग्रहणप्रयुक्तातिप्रसङ्गवारणार्थत्वेनान्यथासामर्थ्याभावात् सर्वत्र जातिनिर्देशज्ञापकता न सम्भवतीति भावः ।

(सिद्धान्तभूषकभाष्यम्)

प्रत्याख्यायते तत् * सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्च * इति ॥

(तत्त्वालोकः) भाष्ये—तपरकरणस्य सर्वत्राकृतिनिर्देशज्ञापकत्वं समर्थयति-प्रत्याख्यायते इति । तत्-सवर्णग्राहकेऽणुदित्सूत्रेऽण्ग्रहणम् । सवर्णे-सवर्णग्राहकेऽणुदित्सूत्रे । इति-इत्यनेन ।

(४० सिद्धान्तवार्तिकम् ॥ १६ ॥)

॥ * ॥ हल्ग्रहणेषु च ॥ * ॥

(भाष्यम्)

किम् ? ॥ "आकृतिग्रहणात्सिद्धम्" इत्येव । 'झलो झलि' अवात्ताम् अवात्तम् अवात्त । यत्रैतन्नास्ति—अणु सवर्णान्गृह्णाति—इति ॥

(प्रदीपः) हल्ग्रहणेषु चेति । [illegible] [illegible] न स्यात्, [illegible] छिन्नलोपो न स्यात्, अमित्था इत्यादावेव स्यात् ।

(उद्द्योतः) अवात्तामिति । वसेर्लुङ् । तसस्ताम् । सिच् । सः सीति तत्वम् । वदव्रजेति वृद्धिः । झलो झलीति सलोपः ॥ ननु वचनसामर्थ्याज्जात्यन्तरेऽपि भविष्यतीत्यत आह—अमित्था इति । भिदेर्लङि सिचि रूपम् ॥

(तत्त्वालोकः) भाष्ये—जातिपक्षाङ्गीकारे प्रयोजनान्तरमाह-हल्ग्रहणेति । तद् व्याचष्टे-झल इति । अवात्तेति-इत्येषु रूपेषु इति शेषः । कुत इत्यत आह-यत्रेति । हल्ग्रहणेषु इत्यर्थः । यत इत्यादिः । एतत्पदार्थमाह-अणिति । इतीति-अत इति शेषः । प्रदीपे-हि-यतः । इतीति-अत इति शेषः । इति-इति हेतौ ।

(४१ सिद्धान्तसमाधानवार्तिकम् ॥ १८ ॥)

॥ * ॥ रूपसामान्याद्वा ॥ * ॥

(भाष्यम्)

रूपसामान्याद्वा सिद्धमेतत् । तद्यथा—'तानेव शाटकानाच्छादयामः, ये मथुरायाम्' 'तानेव शालीन् भुञ्ज्महे, ये मगधेषु' 'तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतम्' अन्यस्मिंश्चान्यस्मिन् रूपसामान्यात् 'तदेवेदम्' इति भवति । एवमिहापि रूपसामान्यात्सिद्धम् ॥ १ ॥

(प्रदीपः) रूपसामान्यादिति । व्यक्तिनिर्देशेऽपि भेदाग्रहणेन लोकवदभेदव्यवहारोऽस्तीति सिद्धमिदम् । व्यक्तिव्यतिरिक्तं तु सामान्यं भवतु मा वा भूत्सर्वथा लोक इव शास्त्रे व्यवहार इत्यर्थः ।

(उद्द्योतः) आकृत्यनाश्रयणेऽप्याह—भाष्ये रूपसामान्यादिति ॥ तद् व्याचष्टे-व्यक्तीति । अभेदव्यवहार इति । रूपसादृश्यनिबन्धनप्रत्यभिज्ञाकृताभेदव्यवहार इत्यर्थः । [illegible] गोत्वदीर्घगोत्वादिषु गौर्दृष्ट इत्यादिव्यवहारवदिति भावः ॥ एवं च व्यक्तिव्यतिरिक्तजातिस्वीकारोऽपि व्यर्थ एवेत्याशयेनाह-व्यक्तिव्यतिरिक्तं त्विति । मा वेति । अनुगतप्रतीतिव्यवहारयोः सादृश्येनैवोपपत्तेरिति भावः । सादृश्यं चात्र समानरूपनिरूपणम् ।

(तत्त्वालोकः) भाष्ये—एतत्-प्रत्यभिज्ञाकृताभेदव्यवहरणम् । तद्यथेति-लोके इति शेषः । गृहीतमिति-इत्येवमिति शेषः ।

प्रदीपे—व्यक्तीति-व्याकरणशास्त्रे इत्यादि । इति-इति हेतौ । इदम्-अस्य ध्वाविन्यादौ सवर्णग्रहणम् । सामान्यं-जातिः ।

उद्द्योते—आकृतीति-उभयं पदार्थ इत्यनुसारेणेत्यादि । ननु जातिपक्षे किं सादृश्यमित्यत आह-सादृश्यमिति । अत्र-वर्णेषु । रूपमिति-न तु समानजातिमत्त्वप्रयुक्तमिति शेषः ।

(शिवसूत्रम्)

॥ ऋऌक् ॥

(आक्षेपभाष्यम्)

अथ ऌकारोपदेशः किमर्थः ? ॥

(उद्द्योतः) ऋऌक् ॥ [भाष्ये] अथ ऌकारेति । [illegible] [illegible] [illegible] [illegible]

नवेति एतत्तात्पर्यम् । अन्त्यवर्णचतुर्दशं तु पाणिन्युद्देशेनैवोपदिष्टमित्यपि तत्रैव स्पष्टम् ।

(तत्त्वालोकः) उद्द्योते—**एषा**-चतुर्दशसूत्री । **उक्तमिति**-नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ इति पद्येनेत्यादि । **इति**-इति हेतौ । **इदम्** लृकारोपदेशप्रयोजनप्रश्नादिकम् । **तथापीति**-तस्या इति शेषः । **तत्रैव**-अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् । धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये" इति नन्दीश्वरकृतकाशिकायामेव ।

(आक्षेपबाधकभाष्यम्)

किं विशेषेण लृकारोपदेशश्चोद्यते, न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते, यदि किंचिदन्येषामपि वर्णानामुपदेशे प्रयोजनमस्ति लृकारोपदेशस्यापि तद् भवितुमर्हति । को वा विशेषः ? ।

(तत्त्वालोकः) भाष्ये—**चोद्यते**-प्रयोजनप्रश्नविषयीक्रियते । **अस्तीति**-वर्ह्निति शेषः । **तत्**-प्रयोजनम् ।

(आक्षेपसाधकभाष्यम्)

अयमस्ति विशेषः । अस्य हि लृकारस्याल्पीयांश्चैव प्रयोगविषयः । यश्चापि प्रयोगविषयः सोऽपि क्लृपिस्थस्यैव । कृपेश्च लत्वमसिद्धम् । तस्यासिद्धत्वादृकारस्यैवाच्कार्याणि भविष्यन्ति नार्थं लकारोपदेशेन ।

(प्रदीपः) ऋॡक् । **अल्पीयानिति** । ऋकारापेक्षं प्रकर्षः । ऋकारस्याल्पः प्रयोगस्ततोऽप्यस्याल्पतर इत्यर्थः ॥ अल्पप्रयोगस्यापि कार्यार्थं उपदेशः कर्तव्य इत्याशङ्क्याह—**यश्चापीति** । तत्र ऋकारावस्थायामेवोदात्तादिषु कृतेषु **स्थानेऽन्तरतम** इति स्थानिसदृशः ऌकारो भविष्यति ।

(उद्द्योतः) [भाष्ये] **प्रयोगविषय** इति कर्मधारयः । प्रयोगादन्यत्रानभिव्यज्यमानतया प्रयोगो विषय इत्युक्तः । **अल्पेति** । यथा सुहृद्दर्णि यादे । ननु ऋकारे कार्यप्रवृत्तावपि ऌकारे कथं तत्कार्योदात्तत्वादीनां दर्शनमत आह—**तत्रेति** ॥ **स्थानेऽन्तरतम इतीति** । यद्यपि कृपो रो ल इत्यत्र रेफलकारयोः स्थान्यादेशभावस्तथापि तद्द्वारा ऋकारलकारयोरपि स इति भावः ।

(तत्त्वालोकः) भाष्ये—**हि**-यतः । **तस्य**-लत्वस्य । **नार्थं इति**-अत्र इत्यादि । प्रदीपे—**अस्य**-ऌकारस्य । **अल्पप्रयोगस्यापि**-अल्पतरप्रयोगस्यापि ऌकारस्य । **इति**-इत्यनेन । उद्द्योते—**तत्कार्येति**-ऋकारकार्येत्यर्थः । **तद्द्वारा**-रेफलकारद्वारा । **सः**-स्थान्यादेशभावः ।

(भाष्यम्)

अत उत्तरं पठति—

(४२ समाधानवार्तिकम् ॥ १ ॥)

॥ ※ ॥ ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः ॥ ※ ॥

(भाष्यम्)

ऌकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुत्याद्यर्थश्च ।

यदृच्छाशब्दार्थस्तावत्—यदृच्छया कश्चिद् ऌतको नाम । तस्मिन्नच्कार्याणि यथा स्युः—दध्य्ऌतकाय देहि मध्व्ऌतकाय देहि, उदड्ड्ऌतकोऽगमत्, प्रत्यङ्ङ्ऌतकोऽगमत् । चतुष्टयी शब्दानां प्रवृत्तिः-जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्थाः ॥

(प्रदीपः) **यदृच्छेति** । अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्त्रभिप्रायेणैव प्रवर्तते स **यदृच्छाशब्दो** डित्थादि । **ऋकारऌकारयोः सवर्णविधिरि**त्यस्य वार्तिककारवाक्यत्वात्प्रकारेणानाश्रितत्वादयं ऌकारोपदेशः कृतः ॥ **अर्थवत्सूत्रारम्भा**च्चानुकरणयदृच्छाशब्दाः सन्तीत्यवगम्यते । गाव्यादीनां तु गवादिभिर्निवर्तितत्वादसाधुत्वम् । ऋतकशब्दस्त्वर्थाश्रयेणैव विनियुक्त इति ऌतकशब्दस्यानिवर्तकः ।

(उद्द्योतः) **अर्थगतमिति** । शब्दातिरिक्तमर्थरूपमित्यर्थः । *यदा व्यक्तेरेव वाच्यता । तस्या च प्रकारत्वाविशेषणत्वस्यानिषेधात्तदुदा*हृतौकाराच्छक्तिग्रहोपपत्तिः । सविकल्पकोपपत्तिश्च तत इति भावः ॥ **प्रयोक्त्रभिप्रायेणैवेति** । शक्तिबोधनं प्रयोक्त्रधीनमिति भावः । अन्यथा शब्दार्थसम्बन्धस्यानित्यतापत्तिः । एवं च 'स्वेच्छयैकस्यां व्यक्तौ सङ्केत्यमानः शब्दो **यदृच्छाशब्द**ः' इति बोध्यम् ॥ ननु ऋकारस्यान्त्वे ऋऌवर्णयोः सावर्ण्याद् ऋकारेण ऌकारस्यापि ग्रहणादच्कार्यसद्धौ किम् ऌकारोपदेशेनेत्यत आह—**ऋकारेति** ॥ **उपदेशः कृत इति** । पाणिनये शिवेनेति शेषः । वस्तुतोऽत्र तस्यानुपदेशेऽप्रामाणिकत्वशङ्का सवर्णविधिरपि तयोर्वक्तुमशक्य इति तदुपदेशः ॥ सवर्णविधिद्वारकं फलमपि स्थलत्रय एवेति तत्रैव प्रयोजनोपन्यास इति बोध्यम् । ननु सन्तमसन्तं वा क्रियायोगमर्थगतमङ्गीकृत्य डित्थादीनामपि व्युत्पत्तेरर्थगतार्थरूपप्रवृत्तिनिमित्तानपेक्षशब्दसत्त्वे किं मानमत आह—**अर्थवदिति** । चिन्त्यमिदम् । बहुच्पूर्वे तस्य चारितार्थ्यात् । एतदर्थं तद्धितपदं तद्विशिष्टपरम् । **अप्रत्यय** उत्पुच्छनेश्च पचन्कीत्यादौ न दोषः । प्रत्ययश्च तद्धितभिन्न एव । बहुपटवस्तिष्ठन्तीत्यादौ **य समुदायमिति** न्यायेन न दोष इति कैयटाशयमन्ये । ननु ऌतकस्यासाधुत्वात्कथं शास्त्रविषयतेत्यत आह—**गाव्यादीनामिति** । ऋतकेन ऌतकानिवृत्तौ हेतुरर्थाश्रयेणेति । स्वगतक्रियारूपार्थाश्रयेणेत्यर्थः । अर्थेन सजातीयस्यैव निवृत्तिः । एकप्रवृत्तिनिमित्तकत्वे सति अन्वाख्यानमन्वाख्यानस्य निवर्तकमिति भावः । तद् ध्वनयन्नाह—भाष्ये **चतुष्टयीति** शब्दानामर्थे या प्रवृत्तिः सा प्रवृत्तिनिमित्तभेदात्प्रकारचतुष्टयवतीत्यर्थः । तत्र **यदृच्छाशब्दो** नाम वक्त्रा स्वेच्छया सन्निवेशितः । स चानेकविधः-एकव्यक्तिसन्निवेशितो डित्थादिरेकः, तत्र न किंचिदतिरिक्तं प्रवृत्तिनिमित्तमानन्त्यव्यभिचारयोरभावात् । किन्तु व्यक्त्यस्यैवार्थस्य विषयतात्वेन भानम् । तदुत्तरत्वादे प्रकारत्वावच्छिन्नः स एवार्थः । यद्वा शब्दपरावाच्येऽर्थे एव त्वादि । एवं कादिपदानां कादीनामेकत्वमते तेषु शक्तिः । ततो डित्थपदादिव शक्यार्थे एव त्वादि । कुत्वमिति कुरिति च पर्यायौ । अनेकत्वमते तत्तद्व्यक्त्युपलक्षिते सा । दिवुभादीनां तु तत्तद्व्यक्तीनामानन्त्यात्तत्तदमेव प्रवृत्तिनिमित्तम् । तदेव च तदुत्तरत्वाद्यर्थः । मत्वादिपदैर्मादिसंज्ञैवोच्यते । अत एव वृद्धिसूत्रे वक्ष्यति "कुत्वं कस्मान्न भवति चोः कुः पदस्येति । भत्वात् । कथं "भसंज्ञे"ति । अनेन च भाष्येण कुकुत्वपदयोः भत्वभसंज्ञापदयोः पर्यायत्वं स्पष्टमेव उक्तम् । संज्ञा च पदमेव ।

(तत्त्वालोकः) भाष्ये—**प्लुत्याद्यर्थं इति**-इतीति शेषः । **तस्मिन्**-ऌतकशब्दे परे । **अगमदिति**-इत्यादाविति शेषः । **चतुर्था इति**-इतीति शेषः । प्रदीपे—**अत्र**-वर्णसमाम्नाये । **इति**-इति हेतौ ।

उद्द्योते—तस्यां-प्रवृत्तौ। तत-मकारतादिविषयशास्त्रप्रकारात्। अत्र-[illegible] नाथे। तस्य- एकारस्य। तयो-रकारलकारयोः। इति-इति देव। तदुपदेश-लकारोपदेश। इति-इति देवे। तत्रैव-स्वन्वद एव। तस्य-अर्थस्य [illegible]। एतदर्थं-[illegible] र्थम्। तद्विशिष्टेति-[illegible] दर्थे। सन्निवेशित-[illegible]। स च-[illegible]। तत्र-[illegible]। विपयतेति-[illegible] हारदेनादि। तदुत्तरत्वादि-[illegible]। स एव-[illegible]। शब्दपरात्-[illegible]। तेषु-कादिषु। तत्र-[illegible]। अनेकस्येति-[illegible]। तत्त उज्जातीति-[illegible]। सा-[illegible]। तच्छब्दयानां-[illegible]। तत्पदमेव-[illegible] मेव। तदेव-[illegible]। तदुत्तरवाक्यार्थ-[illegible] रत्नादिमयपदार्थे।

(भाष्यम्)

अशक्तिजानुकरणार्थः—अशक्त्या कयाचिद् ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तम्। तस्यानुकरणं ब्राह्मण्यलृतक इत्याह कुमार्य्लृतक इत्याहेति ॥

(प्रदीप) अशक्तिजेति। अशक्तजानुकरणस्य [illegible] निन्दार्थ। [illegible] ॥

(उद्द्योत) ननु [illegible] अनुकरणशब्द [illegible] आह—अशक्तिजेति ॥ यस्मादिति। अनुकिरमाण [illegible]। [illegible] ॥ [illegible] ॥

(तत्त्वालोक) भाष्ये—इत्याहेतीति-[illegible]। प्रदीपे—कर्मा-अनुकार्यमिति। प्रत्याययतीति-[illegible]। उद्द्योते—चतुर्विधेषु-[illegible]।

(भाष्यम्)

प्लुत्याद्यर्थश्च [लृकारोपदेशः कर्तव्यः] ॥

के पुनः प्लुत्यादयः ? ॥

प्लुतिद्विर्वचनस्वरिताः क्लृप्तशिख। क्लृप्तः। प्रक्लृप्तम्। प्लुत्यादिषु कार्येषु कृपेर्लत्वं सिद्धम्। तस्य सिद्धत्वादच्कार्याणि न सिद्ध्यन्ति। तस्माद् लृकारोपदेशः क्रियते ॥

(उद्द्योत) प्लुत्यादिकं च, [illegible] ॥ [illegible] ॥

(तत्त्वालोक) भाष्ये—कार्येषु-[illegible]। तस्य-[illegible]। उद्द्योते—इति [illegible]। इति [illegible]। इति [illegible]।

(अथ प्रयोजननिराकरणभाष्यम्)

नैतानि सन्ति प्रयोजनानि।

(४३ प्रयोजनप्रत्याख्यानवार्तिकम् ॥ २ ॥)

॥ * ॥ न्याय्यभावात्कल्पनं संज्ञादिषु ॥ * ॥

(भाष्यम्)

न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं संज्ञादिषु, साधु मन्यन्ते—ऋतक एवासौ, न लृतक इति ॥

(प्रदीप) न्याय्यभावादिति। ऋतकशब्दो न्याय्य इदन्त नाम कुर्यादिति [illegible]। [illegible] ॥ संज्ञादिष्विति। [illegible] इति ॥ [illegible] किमर्थमसूत्र [illegible] ॥

(उद्द्योत) न्याय्य इति। [illegible]। तत्र हेतुमाह—इदन्तमिति। [illegible] सर्वशब्देति। [illegible] ॥ न च [illegible] इति वाच्यम्। [illegible] भाष्ये "साधु मन्यन्ते" इति [illegible] ॥ ऋतक एवासाविति। [illegible] एवासौ, न [illegible] ॥

(तत्त्वालोक) भाष्ये—एतानि-[illegible]। सन्तीति-[illegible]। [illegible] न्याय्येति। [illegible]। इतीति-[illegible]। [illegible]—तदर्थम्-अनुकरण [illegible]। उद्द्योते—तस्यैव-[illegible]। बोधकत्वे इति-[illegible]। असौ-[illegible]।

(प्रत्याख्यानान्तरभाष्यम्)

अपर आह—न्याय्य ऋतकशब्दः शास्त्रान्वितोऽस्ति। स कल्पयितव्यः साधुः संज्ञादिषु—ऋतक एवासौ, न लृतकः ॥

(प्रदीप) अपर आहेति। पूर्वमुक्तम् [illegible] इति, इदानीं तु [illegible] ॥

(उद्द्योत) इदानीमिति। [illegible]। अशक्तिजत्वादिति। [illegible] ॥

(तत्त्वालोक) भाष्ये—[illegible]। ऋतक इति-[illegible]। [illegible]—तथा-[illegible]। इति [illegible]। एतदेव-[illegible]।

(प्रत्याख्यानबाधकभाष्यम्)

एवं तर्हि [illegible]—[illegible] इत्सिद्ध्येति ॥

(**प्रदीपः**) **अयं तर्हीति।** ऋतकशब्दोऽन्वाख्यातत्वाद्भवतु वा लृतकशब्दस्य निवर्तकः। ऋफिड ऋफिड्ड इत्येतौ त्वनन्वाख्यातावितिकथम् लृफिडलृफिड्ड इत्येतयोर्निवर्तकौ स्यातामिति भावः॥

(**उद्द्योतः**) लृतकादृलृफिडे वैषम्यं दर्शयति—**ऋतकशब्द इति॥ लृतकशब्दस्येति।** अनन्वाख्यातस्येत्यादि॥

(**तत्त्वालोकः**) भाष्ये—लृकारोपदेशप्रयोजनवादी आह—**अयमिति।** प्रदीपे—**इति**—इति हेतोः। **एतयोरिति**—अनन्वाख्यातयोरिति शेषः।

(प्रत्याख्यानसाधकभाष्यम्)

एषोऽपि ऋफिडः, ऋफिड्डश्च। कथम्?। अर्तिप्रवृत्तिश्चैव हि लोके लक्ष्यते। फिडफिड्डावौणादिकौ प्रत्ययौ॥ त्रयी च शब्दानां प्रवृत्तिः—जातिशब्दा गुणशब्दाः क्रियाशब्दा इति। न सन्ति यदृच्छाशब्दाः॥

(**प्रदीपः**) **एषोऽपीति।** उणादयो बहुलमित्येवान्वाख्याताविति भावः॥ **अर्तिप्रवृत्तिरिति।** अर्तेः प्रकृतित्वेन प्रवृत्तिरित्यर्थः॥ **न सन्तीति।** अव्युत्पन्नेऽपि यदा नाम क्रियते, तदा प्रशस्यरूपा क्रिया गुणो वाऽध्यारोप्यत इति भावः॥

(**उद्द्योतः**) फिडफिड्डयोरुणादिष्वदर्शनादाह—**उणादय इति।** बाहुलकसिद्धावेतावित्यर्थः॥ **अर्तिप्रवृत्तिश्चैवेति।** तथा च फिडफिड्डयोः म एव प्रकृतिर्न तु ऋ इति धात्वन्तरं कल्प्यम्। **सञ्ज्ञासु धातुरूपाणीति** तु अनादिशिष्टप्रयोगसाधने उपायमात्रं न त्वाधुनिकक्रियमाणसञ्ज्ञाधातुग्राहकमिति भावः॥ **एवं च देशभाषानुसारेण क्रियमाणं कूचीमब्वीत्याद्यसाधु, शास्त्राविषयत्वेत्युक्तम्॥ अर्तेरिति।** यतस्तस्य लोके प्रवृत्तिर्लक्ष्यतेऽतः फिडादिप्रकृतित्वेनापि तस्यैव प्रवृत्तिरित्यर्थः॥ एवं यदृच्छाशब्दानङ्गीकृत्य शास्त्रान्विताना कचिच्छिष्टप्रयुक्तानामेव यत्रकुत्रचित्सञ्ज्ञात्वेन विनियोगो नान्येषामित्येवम् लृतकलृफिडादीनां शास्त्रविषयत्वाभावान्न तदर्थं लृकारोपदेश इत्युक्तम्॥ इदानीं **न सन्त्येव यदृच्छाशब्दा इति** पक्षावष्टम्भेन तदर्थत्वं प्रत्याचष्टे—[भाष्ये] **त्रयी चेति।** चेनेदं ध्वनितम्॥ न-वेवं डित्थादीनां कान्तर्भावोऽत आह—**अव्यक्तेऽपीति।** एवं च सर्वेऽपि व्युत्पन्ना क्रियादिशब्दा एवेति भावः॥ **प्रशस्यरूपेति।** अत्यन्तप्रशस्तयोरित्यर्थः—एवं च येषां क्रियागुणादिप्रवृत्तिनिमित्तकत्वं तेषां क्रियाद्यारोपेणार्थबोधकत्वमिति तात्पर्यम्। यद्वा पूर्वपूर्वोक्तथादिगतप्रशस्तगुणक्रियारोपेण तत्प्रवृत्तिनिमित्तक एव डित्थादिभ्यो बोधः। आद्ये डित्थे तु तद्व्यक्तेरेव विषयताद्वयेन भानमिति सैव प्रवृत्तिनिमित्तमपीति **तस्य भाव** इति सूत्रे भाष्ये उपपादयिष्यते॥

(**तत्त्वालोकः**) भाष्ये—लृकारोपदेशप्रयोजनखण्डक आह—**एषोऽपीति।** लृफिड लृफिड्डश्चापीत्यर्थः। ऋफिडऋफिड्डौ विनियोक्तुकामे भ्रमेण लृफिडलृफिड्डौ प्रयुक्ताविति आरोप्याधिष्ठानयोरभिन्नत्वादेवमुक्तिरिति भावः। **एवेति**—अयं भिन्नक्रमतया, लक्ष्यते इत्यनेनान्वेति। हि—यतः। **फिडेति**—अतस्तस्मादित्यादि।

प्रदीपे—**इत्येव**—इत्यनेनैव। **प्रवृत्तिः**—प्रयोगः।

उद्द्योते—**एतौ**—फिडफिड्डौ। **स एव**—ऋधातुरेव। **तस्य**—ऋधातोः। **तदर्थं**—लृतकलृफिडाद्यर्थं। **तदर्थत्वम्**—लृफिडाद्यर्थत्वम्। अस्य लृकारोपदेशस्येत्यादि। **इद**—तस्य तदर्थत्वप्रत्याख्यानम्। **एवं**—यदृच्छाशब्दासत्वे। **तत्प्रवृत्तिनिमित्तकः**—गुणक्रियादिप्रवृत्तिनिमित्तक। **विषयतेति**—प्रकारताविशेष्यतारूपेत्यादि। **इति**—इति हेतो। **सैव**—तद्व्यक्तिरेव।

(प्रयोजनवादिभाष्यम्)

अन्यथा कृत्वा प्रयोजनमुक्तम्, अन्यथा कृत्वा परिहारः। सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तम्, न सन्तीति परिहारः। समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति। तद्यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति, न गाव्यादीन्॥

(**प्रदीपः**) **अन्यथा कृत्वेति।** अव्युत्पत्तिपक्षाश्रयेणाचार्येणोपदिष्टं लृकारं। वार्तिककारस्तु व्युत्पत्तिपक्षाश्रयेण प्रत्याचष्टे—**समाने चेति।** इह च भिन्नार्थत्वम्। लृतकशब्दो हि यदा सञ्ज्ञात्वेन विनियुज्यते कस्मिंश्चित् पिण्डे तदा तच्छब्दरूपाध्यासः, ऋतके तु विपर्ययः। भिन्नस्वरूपौ चैतौ शब्दाविति भावः॥

(**उद्द्योतः**) **अव्युत्पत्तीति।** सञ्ज्ञाशब्दा अव्युत्पन्ना इति पक्षाश्रयणेनेत्यर्थः॥ **आचार्येति।** शिवो वेदपुरुषो वाऽऽचार्यः। एवञ्च यदृच्छाशब्दसद्भावाश्रयेण प्रयोजने उक्ते तदनाश्रयणेन तत्प्रयोजननिराकरणमयुक्तमिति भावः॥ ऋतकशब्द लृतकशब्दस्य साधुत्वाभावकल्पक इत्याद्य दूषणमप्ययुक्तमित्याह—भाष्ये **समाने चेति॥** तत्रार्थशब्द प्रवृत्तिनिमित्ताभिप्राय इत्याह—**इह चेति॥ तच्छब्दस्वरूपस्य** व्यक्तिस्वरूपस्य वार्थे प्रवृत्तिनिमित्तत्वेनाध्यास इत्यर्थः॥ **विपर्यय इति॥** क्रिया प्रवृत्तिनिमित्तमित्यर्थः॥ **भिन्नस्वरूपौ** भिन्नप्रवृत्तिनिमित्तौ। यदि तु ऋतकोऽपि शब्दप्रवृत्तिनिमित्तकस्तदा भिन्नस्वरूपत्वादेव प्रवृत्तिनिमित्तविपर्ययः। व्यक्तेरेव प्रवृत्तिनिमित्तत्वमिति पक्षे ऋतकसङ्केतविषयव्यक्तेर्लृतकसङ्केतविषयव्यक्तिभिन्नत्वेन तद्विपर्ययोऽस्त्येवेति बोध्यम्॥

(**तत्त्वालोकः**) भाष्ये—लृकारोपदेशप्रयोजनवादी त्रयी च शब्दानां प्रवृत्तिरित्युक्तौ दोषमाह—**अन्यथेति। प्रयोजनमिति**—लृकारोपदेशस्येत्यादि। **परिहार इति** प्रयोजनस्येत्यादि। उक्त **इति** शेषः। **सन्तीति इति**—इत्येति शेषः।

प्रदीपे—**प्रत्याचष्टे इति**—लृकारमित्यादि। **इह**—लृतकऋतकशब्दयोः। **तच्छब्देति**—लृतकशब्देत्यर्थः। **एतौ**—लृतकऋतकौ।

उद्द्योते—पूर्वान्वयिन प्रत्याचष्टे इति कैयटस्याशयमाह—**एवञ्चेति। प्रयोजने इति**—लृकारोपदेशस्येत्यादि। **इति**—इति हेतो। **तद्विपर्यय**—प्रवृत्तिनिमित्तविपर्ययः।

(प्रत्याख्यानभाष्यम्)

नैष दोषः। पक्षान्तरैरपि परिहारा भवन्ति॥

(**प्रदीपः**) **पक्षान्तरैरपीति।** यथा द्रव्यपक्षे सरूपाणामित्यस्यारम्भः जातिपक्षे तु प्रत्याख्यानम्। एवमस्यापीत्यर्थः। अव्युत्पन्नसञ्ज्ञाशब्दपक्षेऽपि पारम्पर्यागता शिष्टप्रयुक्ता एव सञ्ज्ञा कर्तव्या॥

(**उद्द्योतः**) भाष्ये समाधत्ते—**पक्षान्तरैरपीति॥ जातिपक्षे त्विति।** यत्तु—अक्षादिनानार्थानामेकशेषाय तत्पक्षेऽप्यावश्यकम्—इति। तत्तु जातिगतनानात्वस्वीकारेण परिहृतम्। **पक्षान्तरैरपि परिहारा भवन्तीति** वार्तिककृतैवमुक्तम्॥ वस्तुतस्तु तदुभयपक्षेऽपि दोषपरिहारः सुकरः॥ यदुक्तम्—ऋतको न लृतकनिवर्तक इति। मा भूत्तस्य निवर्तकत्वम्, शिष्टप्रयोगाभावात् तस्य चि॥ न्याय्यत्वमपि

वार्तिके शिष्टप्रयुक्तत्वनैवेत्यभिमन्याय भगवतानुक्तमपि स्वयं मन्दबुद्ध्यनुग्रहाय स्फुटमाह—अप्युक्तेति ॥ पारम्पर्यायाताः सनादयः। एव च शिष्टप्रयुक्तत्वस्याभावादसाधुत्वेन शास्त्रविषया इति भाष्यतात्पर्यम् ॥ यत्तु—चतुष्टयोति पदे लुकादीनां टिभादिवच्छास्त्रविषयत्वमेवेत्यस्माद्भाष्याल्लभ्यत—इति। तन्न पक्षभेदेनैकस्य शास्त्रविषयत्वतदविषयत्वयोः काले न चेति गुरुत्वभाष्यविरोधात्। टिभादीनां पाणिन्यादिशिष्टप्रयुक्तत्वेन साधुत्वाच्छास्त्रविषयत्वेऽपि अन्येषां तद्विषयत्वे मानाभावाच्च। किं च भाष्यसाधुबहिर्भूतानामपि शास्त्रविषयत्वे साध्वनुशासनेऽस्मिन्शास्त्रे इति तत्र तत्र भाष्योक्तत्यसङ्गतिः। किं च शास्त्रविषयत्वमपि तदुक्तप्रयोगसाधुत्वाभाव इत्युक्तमिति दिक् ॥

(तत्त्वालोकः) भाष्ये—लृकारोपदेशप्रयोजनखण्डयिता तत्प्रयोजनवादिना अप्यथेत्यादिना समाने चेत्यादिना चापादितमुभयदोषं समाधत्ते—नेति। एषः-उक्तोभयदोषः। कुत इत्यत आह-यथेति। यत इत्यादि। परिहारा इति-तत्प्रयोजनस्येत्यादि। भवन्तीति-जन इति शेषः।

प्रदीपे—अस्यापि-लृकारस्यापि।

उद्योते—समाधत्ते इति-तत्प्रयोजनखण्डकः तत्प्रयोजनवादिस्थापितमुभयाशङ्कामित्यादि। सम्पन्नेऽपीति-जातिपक्षेऽपीत्यर्थः। तद्रूपाणामिति शेषः। जातिगतजातीति-भक्षत्वादिनाना जातिगतानुगतत्वादिजातीत्यर्थः। इति-इति हेतोः। एवम्-न्यायप्राप्तादित्येवम्। दोषेति-समाने चेत्याद्युक्तेत्यादिः। तस्य-लृतकस्य तद्विषयत्वः-लृक इति। अन्येषाम्-लृकादीनाम्। तद्विषयत्वे-शास्त्रविषयत्वे। तद्व्यङ्ग्येति-तद्व्यङ्ग्येत्यर्थः।

(इति प्रयोजनान्तरनिराकरणम् ॥)

(॥ ४४ ॥ द्वितीयप्रयोजनप्रत्याख्यानवार्तिकम् ॥ ३ ॥

॥ * ॥ अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ॥ ० ॥

(भाष्यम्)

अनुकरणं हि शिष्टस्य वा साधु भवति, अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय भवति, नाभ्युदयाय ॥ यथा लौकिकवैदिकेषु। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावद्—य एवमसौ ददाति य एवमसौ यजते, य एवमसावधीते, इति। तस्यानुकुर्वन् दद्याच्च यजेत चाधीयीत च। सोऽप्यभ्युदयेन युज्यते ॥ वेदेऽपि—"य एवं विश्वसृजः सत्राण्यध्यासते" इति, तेषामनुकुर्वन् तद्वत्सत्राण्यध्यासीत। सोऽप्यभ्युदयेन युज्यते ॥ अशिष्टाप्रतिषिद्धं यथा—य एवमसौ हिक्कति, य एवमसौ हसति, य एवमसौ कण्डूयतीति। तस्यानुकुर्वन् हिक्केच्च हसेच्च कण्डूयेच्च, नैव तद्दोषाय स्यान्नाभ्युदयाय ॥ यस्तु खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात्सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात् ॥

(प्रदीपः) प्रयोजनान्तरमिति वार्तिककारः स्वयमाह—अनुकरणमिति। अनुकार्यस्य दुष्टत्वादनुकरणस्यापि दुष्टत्वं मन्यते सुराब्राह्मणवत् ॥

(उद्योतः) अनुकरणं शिष्टस्य वा अशिष्टाप्रतिषिद्धस्य वा भवति तत्राद्यं साधु, अन्त्यं न दोषाय नाप्यभ्युदयायेति भाष्येऽन्वयः। अर्थात्प्रतिषिद्धानुकरणस्य दुष्टत्वं बोध्यम् ॥ ननु शिष्टानुकरणं नामाधु, अशिष्टाप्रतिषिद्धस्य वा नासाधु। आद्यस्याभ्युदयजनकत्वात्, अन्त्यस्याभ्युदयाजनकत्वेऽपि दोषाजनकत्वात्। एवं च प्रकृते किमायातमत आह—अनुकार्यस्य दुष्टत्वादिति। अर्थलभ्यं तत्रादाय प्रकृतोपयोग इत्यर्थः ॥ अत एव भाष्ये तदुदाहरणेनोपपादयिष्यति—यस्तु खल्विति। एवं चासाध्वनुकरणस्यासाधुत्वाच्छास्त्राविषयत्वात्तदर्थता लृकारोपदेशस्य न युज्यत इति भावः ॥ भाष्ये यजेत चेति। यागोऽत्र स्मार्तो भाव्यः ॥

(तत्त्वालोकः) भाष्ये—तत्-अशिष्टाप्रतिषिद्धस्यानुकरणम्। कृतान्तेषु-कृतसिद्धान्तेषु। शिष्टानुकरणस्य लौकिकवैदिकोदाहरणे प्रतिपादयति—य एवमिति। सोऽपि-अनुकारकोऽपि। अशिष्टाप्रतिषिद्धानुकरणस्य वैदिकमुदाहरणं नास्तीति तस्य लौकिकमात्रमुदाहयथेति। अर्थादापन्नं प्रकृतोपयोग्यर्थमाह—यस्त्विति। पतित इति—तथा च ब्राह्मणहननाद्यनुकरणस्येव असाधुशब्दानुकरणस्य निषिद्धतया न लृकाराद्यनुकरणार्थता लृकारोपदेशस्येति भावः।

प्रदीपे—प्रयोजनान्तरमिति-एवमाद्यशब्दाशब्दरूपं प्रयोजनं निरस्य तस्य अशक्तिजानुकरणरूपमित्यादि।

उद्योते—वा नासाध्विति-अनुकरणमित्यादि। वार्तिकाभिप्रायत्वादाह-अर्थेति। तत्-प्रतिषिद्धानुकरणस्य दुष्टत्वम्। एवमपेऽपि। प्रकृतेति-वार्तिकार्थेत्यादि। तदर्थता-अशक्तिजानुकरणार्थता। ननु वैदिकस्य यागस्य कथं लौकिकोदाहरणत्वाऽभिधानमित्यत आह—याग इति। अत्र-लौकिकोदाहरणे। (प्रकृत) वार्तिके प्रयोगभेदाभिप्रायतया बहुवचनस्य, उभयविनोऽधिकरणत्वविवक्षया सप्तम्याश्च प्रयोग इति भावः।

(प्रयोजनसमर्थनभाष्यम्)

विषम उपन्यासः। यश्चैवं हन्ति, यश्चानुहन्ति, उभौ तौ हतः। यश्चापि पिबति, यश्चानुपिबति, उभौ तौ पिबतः ॥ यस्तु खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां वा पिबतीति तस्यानुकुर्वन्स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात्पयो वा पिबेत्, न स मन्ये पतितः स्यात् ॥

(प्रदीपः) भाष्यकारस्त्वनुकरणार्थं समर्थयते-विषम इति। न ह्यनुकार्यस्य दोषेणानुकरणस्य दुष्टत्वमिति दर्शयति—यश्चेति। [illegible] ॥ यश्चानुहन्ति इति। [illegible] ॥

(उद्योतः) [illegible]

तिरिक्तसादृश्याभावादित्याशयात्। तदाह—नास्त्येति ॥ दानादीनां कथं लौकिकत्वेनोपन्यासोऽत आह—स्मार्तत्वादिति ॥ अस्वस्थेनेति। आस्तिकत्वे सत्यपीति भावः ॥ माल्यगुणकण्ठ इति ॥ मालायां साधूनि माल्यानि पुष्पाणि तैर्युक्तो गुणः सूत्रं कण्ठे यस्येत्यर्थः। गद्गदादिस्वात्परनिपातः ॥ अकार्यं हीति। इह लोके मोक्षेत्यर्थः ॥ [अर्थभेदेन साधुत्वे दृष्टान्तमाह—अस्वेति ॥]

(तत्त्वालोकः) भाष्ये—एवमिति-ब्राह्मणमिति शेषः। अनुहन्ति-अमनुकृत्य ब्राह्मणं हन्ति। हत इति-ब्राह्मणमित्यादि। अपीति-एवमित्यर्थः। सुरामिति शेषः। अनुपिबति-तमनुकृत्य सुरां पिबति। पिबत इति-सुरामित्यादिः। अनुकार्यविजातीयानुकरणस्य अनुकरणत्वे सत्यपि अनुकार्यसमानफलकत्वाभावमाह-यस्त्विति।

प्रदीपे—भाष्यकारस्त्विति-लृकारोपदेशस्य अशक्तिजेति शेषः। तस्याः-सुरापानादिरूपायाः। अस्वगोण्यादिवदिति-यथा अस्वशब्दो वाहने असाधु, निर्धने तु साधु, गोणीशब्दश्च गवि असाधु, आवपने तु साधुरित्यर्थः।

उद्द्योते-एकेति-तदीयमिवेदमौषधमित्यादावित्यादि। सादृश्येन-सादृश्यरूपतया। तथा च अनुकार्यब्राह्मणहननाद्यनुकरणब्राह्मणहननाद्योः पातित्यजनकतावच्छेदकं ब्राह्मणहननत्वाद्येव, न त्वनुकार्यत्वमनुकरणत्वं वेति तयोः तदवच्छेदकत्वाभावप्रतिपादन एवात्र तात्पर्यं, न तु तत्र तयोरभावे इति भावः। नास्तिकत्वे सति तु स्वस्थेनापि चित्तेनाकार्यं क्रियते इत्यत आह—आस्तिकत्वे इति। साधुत्वे इति-लृतकशब्दस्येत्यादि। तथा चानुकरणस्यासाधुत्वेन अशक्तिजानुकरणार्थं लृकारोपदेशः कर्तव्य इति भाष्यकृदभिप्रायः।

(प्रयोजनप्रत्याख्यानभाष्यम्)

एवमिहापि य एवमसावपशब्दं प्रयुङ्क्ते इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत, सोऽप्यपशब्दभाक् स्यात् ॥

(उद्द्योतः) भाष्ये प्रयोजनप्रत्याख्यानवादी शङ्कते—एवमिहापीति ॥

(तत्त्वालोकः) भाष्ये—एवम्-ब्राह्मणहननानुहननसुरापानानुपानादिवत्। उद्द्योते—प्रयोजनेति-लृकारोपदेशस्येत्यादिः।

(समाधानभाष्यम्)

अयं त्वन्योऽपशब्दपदार्थकः शब्दो, यदर्थं उपदेशः कर्तव्यः। न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति। अवश्यं चैतदेव विज्ञेयम्। यो हि मन्यतेऽपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति, अपशब्द इत्येव तस्यापशब्दः स्यात्। न चैषोऽपशब्दः ॥

(प्रदीपः) अपशब्द इत्येवेति। अस्य हि गाव्यादयोऽपभ्रंशा वाच्याः ॥

(उद्द्योतः) प्रयोजनवादी समाधत्ते—अयं त्वन्य इति ॥ अस्य हीति। एवं च तदर्थे व्याकरणाननुगतत्वमपशब्दत्वमिति भावः ॥

(तत्त्वालोकः) भाष्ये—अयं-लृतकः। अन्यः-अपशब्दान्यः। उपेति-लृकारस्येत्यादिः। कुत इत्यत आह—न चेति। अन्वयमुखेनोक्त्वा व्यतिरेकमुखेनाह—अवश्यमिति। एतत्-लृतक इति। एवम्-अपशब्दभिन्नशब्दत्वेन। हि-यतः। एषः-लृतकशब्दः।

उद्द्योते—प्रयोजनेति-तस्येत्यादिः।

(प्रयोजनभाष्यम्)

अयं खल्वपि भूयोऽनुकरणशब्दोऽपरिहार्यः, यदर्थं उपदेशः कर्तव्यः—साध्व्लृकारमधीते मध्व्लृकारमधीत इति ॥

(प्रदीपः) अयमिति। असाधोरनुकरणमित्येतदप्यत्र नास्तीति भावः ॥

(उद्द्योतः) भाष्ये-तुष्यतु दुर्जनन्यायेन साध्वनुकरणार्थत्वं लृकारोपदेशस्याह—अयं खल्वपीति। यद्यप्यर्थशून्यवर्णानां न साधुत्वम्, तथापि वर्णोच्चारविधानेन तेषां साधुत्वमिति भावः ॥

(तत्त्वालोकः) भाष्ये—उपेति-तस्येत्यादिः। मधु-मनोहरम्।

प्रदीपे—अत्र-साध्व्लृकारमधीते इत्यादौ।

उद्द्योते—तेषाम्-अर्थशून्यत्ववर्णानाम्।

(खण्डनभाष्यम्)

कस्यस्य पुनरेतदनुकरणम् ? ॥

क्लृपिस्थस्य ॥

यदि क्लृपिस्थस्य, क्लृपेश्च लत्वमसिद्धम्। तस्यासिद्धत्वादृकार एवाच्कार्याणि भविष्यन्ति ॥

(तत्त्वालोकः) भाष्ये—साध्वनुकरणार्थेनाऽपि लृकारोपदेशस्य न युक्तत्याशयेन पृच्छति-कस्येति। सिद्धान्ती समाधत्ते-क्लृपिस्थेति। खण्डयिता आह-यदीति। क्लृपिस्थस्येति-लृकारस्यैतदनुकरणं तहीति शेषः। तस्य-लत्वस्य।

(प्रयोजनभाष्यम्)

भवेत्तदर्थेन नार्थः स्यात्। अयं त्वन्यः क्लृपिस्थपदार्थकः शब्दः, यदर्थं उपदेशः कर्तव्यः ॥

(प्रदीपः) भवेदिति। प्रयोगस्थस्येदमनुकरणम्। प्रयोगे च नास्ति पूर्वत्रासिद्धमिति भावः ॥

(उद्द्योतः) भवेत्तदर्थेनेति। तदर्थेन क्लृपिस्थलृकारार्थेन लकारस्योपदेशेन प्रयोजनं न भवति—एवं यद्यपि भवेत्तथापि तदनुकरणार्थेनार्थं इत्यर्थः। ननु क्लृपिस्थस्यासिद्धत्वात्कथं तदनुकरणमत आह—प्रयोगस्थस्येति ॥ प्रयोगे अनुकरणप्रयोगे। शास्त्रे तदीयकार्ये बाऽसिद्धत्वं पौर्वापर्यस्य तत्रैव सम्भवात्। न चैवं प्रकृते इति भावः।

(तत्त्वालोकः) भाष्ये—लृकारोपदेशप्रयोजनवादी आह—भवेदिति। उपेति-तस्येत्यादिः।

प्रदीपे—प्रयोगस्थस्येति-लृकारस्येति शेषः।

उद्द्योते—प्रयोजनमिति-तस्येत्यादिः। तदनुकरणार्थेन-क्लृपिस्थलृकारानुकरणार्थेन। अस्य तेन तस्येति शेषः। क्लृपिस्थस्येति-लस्यैवेति शेषः। तदनुकरणं-क्लृपिस्थलृकारानुकरणम्। नन्वनुकार्यप्रयोगे कार्यप्रवृत्तिसमये पूर्वत्रासिद्धमित्यस्य प्रवृत्तिसत्त्वेन कथं प्रयोगे तदप्रवृत्त्युक्तिरित्यत आह-अनुकरणेति। तत्रैव-शास्त्र एव।

(खण्डनभाष्यम्)

न कर्तव्यः। इदमवश्यं कर्तव्यम्—"प्रकृतिवदनुकरणं भवति" इति ॥ किं प्रयोजनम् ? ॥ 'द्विः पचन्त्वित्याह' "तिङ्ङतिङः" इति निघातो यथा स्यात्। 'अग्नी इत्याह' "ईदूदेद्द्विवचनं प्रगृह्यम्" इति प्रगृह्यसंज्ञा यथा स्यात् ॥

(प्रदीपः) प्रकृतिवदिति। तत्र यथा कल्पेर्लत्वस्यासिद्धत्वाद् कारद्वारेण लकारस्यानुकार्यं तथानुकरणस्यापीत्यर्थः। द्विरिति। पचन्तु पचन्त्विति यैनचिदुक्ते द्विः पचन्त्विरयनुकरणम्। एतच्च क्रिया साधनाधनभिधानात्सिद्ध्यन्त न भवति। एवमन्यो ह्यनुकरणं द्वयर्थाभिधानात् द्विवचनान्तम्॥ ननु गम्लृ सृप्लृ इत्यादिष्वस्य यदानुकरणं तदा कथं प्रकृतिवद्भावः। घुताद्युदित इति लकारे परतो ययादरकरणादिर्मर्यादानुवाराच्च भावनुकरणस्य लकारस्यानुकार्यत्वानुमीयन्ते तात्रदनुकरणस्य सिद्धं प्रकृतिवद्भाव॥

(उद्योतः) ऋकारद्वारेणेति। ऋकारमुद्भवेत्यर्थः॥ भाष्ये—द्विः पचन्त्विति। पचन्त्विति द्विराहेत्यन्वयः। असत्यतिदेशे तिङन्तत्वाभावे हेतुमाह—एतच्चेति। द्वयर्थेति। एतदर्थमेव द्विवचनविरथवर्यसंहारणम्॥ सन्त्विति। एव च पाठाभावे गृह्लदेवाभावात्वात्तदनुकरणेऽनुकार्यमिति तदर्थ उपदेश आवश्यक इति भाव॥ अनुमीयन्त इति। इद चिन्त्यम्। आनुमानिकवचनेन तृतस्य वर्णस्य प्रत्याख्यानायोगात्। तस्मादल् इत्यादिना ऌकारो धर्मानकत्वात्साधुरिति वक्तुं युक्तम्। एव चाशक्तिजानुकरणेति वार्तिकेऽशक्तिपदव्यर्थमिति कैयटनाशयम्॥

(छायालोकः) भाष्ये—नप्रयोजनसाधक आह-नेति। तदर्थ ऌकारोपदेश इति शेषः। कुत इत्यत आह-इदमिति। यत इत्यादिः। इत्याहेति-इत्यनेनेति शेषः। इति-इत्यनेन।

प्रदीपे—तत्र-अनुकार्ये। एव प्रकृतिवदित्यतिदेशाश्रयणेन ऌकारोपदेशस्य साधकारणार्थंतो भाष्यकृता खण्डिते तत्साहत्य एवम् कश्चिदेकदेशविवक्षया तस्य तदर्थत्वं प्रतिपादयितुमाह—सन्त्विति। पदेति-ऌकारस्येत्यादि। उपलब्धि-घुतेति। इति-इत्यनेन। तदनुकरणस्य-गम्लृप्रभृतिस्थऌकारानुकरणस्य।

उद्योते—अतिदेशे इति-प्रकृतिवदित्यतिदेशे इत्यर्थः। पचन्त्वित्यनुकरणस्येति शेषः। एतदर्थं-द्वयर्थाभिधानार्थम्। पाठेति-वर्णसमाम्नाये ऌकारस्येत्यादि। मूलस्यैव-अनुकार्यस्यैव ऌकारस्य। तदनुकरणे-ऌकारानुकरणे। इति-इति हेतौ। तदर्थः-अनुकरणार्थः। तथेति-तस्येत्यादि। ऌतस्य-उपदिष्टस्य। युक्तमिति—तथा च गम्लृप्रभृतिस्थऌकारानुकरणस्य दुष्टत्वेन शास्त्राविषयत्वात्साधुत्वानुकरणार्थेन ऌकारोपदेशस्येति भाव।

(खण्डनोपसंहारभाष्यम्)

यदि-प्रकृतिवदनुकरणं भवतीत्युच्यते, अपशब्द एवासौ भवति कुमार्य् ऌतक इत्याह माङ्गल्ऌतक इत्याह। अपशब्दो ह्यस्य प्रकृतिः॥

(उद्योतः) एव साध्वनुकरणार्थत्वे ऌकारोपदेशस्य प्रकृतिवदतिदेशाश्रयेण खण्डिते तैवाशक्तिजानुकरणार्थत्वमपि खण्डयति पूर्वपक्षी भाष्ये यदि प्रकृतिवदिति॥

(छायालोकः) भाष्ये—उच्यते इति-यदीति शेषः। असौ-ऌक। इत्याहेति-इत्याहेति शेषः। हि-यतः।

उद्योते—तेनैव-प्रकृतिवदित्यतिदेशाश्रयणेनैव। अस्य इत्येति शेषः।

(प्रयोजनभाष्यम्)

न चापशब्दः प्रकृतिः। नह्यपशब्दा उपदिश्यन्ते। न चानुपदिष्टा प्रकृतिरस्ति॥

(प्रदीपः) न चापशब्द इति। शिष्टभाषाः। प्रकृत्यर्थ शास्त्रीया प्रकृतिराश्रीयते, शास्त्रनिबन्धनं च कार्यमतिदिश्यते, अतश्च न शास्त्रीया प्रकृतिरनुकरणस्य, नचापशब्दस्य शास्त्रीयं कार्यं नापि तदतिदेशः शक्यम्। नहि गाव्यादीनां सतिदेशो युक्तिमान्। तदेवं भाष्यकारेणाशक्तिजानुकरणार्थत्वं ऌकारोपदेशस्य स्थापितम्॥

(उद्योतः) ननु मा भूदपशब्दोपदेशः प्रकृतिस्तु कथं नेत्यत आह—प्रकरणादिति। अतिदेशस्य शास्त्रीयत्वमनेन दर्शयते। तत्र च प्रत्यासत्त्या शास्त्रीयप्रकृत्यादेरेव ग्रहणमुचितमिति भाव॥ तदभाव माध्यमित्याह—शास्त्रनियन्धनं चेति॥ नापि तदतिदेशमित्यादि चिन्त्यम्। अशास्त्रीये माध्यरूपाद्यतिदेशस्यत्र्यस्मिन्नसम्भवादिति कश्चित्॥ तदेवमिति। अशक्तिजस्य शास्त्रीयप्रकृतिनाभावात् तदनुकरणेऽतिदेशप्रवृत्तिरित्यपशब्दत्वाभावादनुकार्यसिद्धयर्थं ऌकारोपदेश इत्यर्थः॥

(छायालोकः) भाष्ये—सिद्धान्ती अशक्तिजानुकरणार्थत्वं स्थापयति-न चेति। हि-यत।

प्रदीपे—यादीति-आदेति शेष। हि-यत। तद्-अपशब्दस्य। हि-यत। तद्-तस्मात्। एवम्-उक्तरीत्या।

उद्योते—कथमिति-तस्येत्यादि। ननु प्रकृत्यादिग्रहणस्य शास्त्रोक्तत्वात्तत्प्रकरणाभावात् कथं प्रकरणेन ग्रहणमिरयत आह-अतिदेशस्येति। अनेन-प्रकृतिवदिति वचनेन। तत्र-प्रकृतिवदिति वचनेऽतिदेशे वा। तदभावात्। तत्रो असाधुत्वातिदेशासम्भवात्। अशक्तिजस्य-अपशब्दस्य। अतिदेशेति-प्रकृतिवदित्यतिदेशेत्यर्थः। इति-इति हेतौ। अस्य अशक्तिजानुकरणस्येति शेष। अजिति-तन्नेत्यादि।

(इत्यशक्तिजानुकरणखण्डनमण्डनम्)

(४१ तृतीयप्रयोजनप्रत्याख्यानवार्तिकम्॥ ४॥)

॥ * ॥ एकदेशविकृतस्यानन्यत्वा-त्प्लुतयादयः॥ * ॥

(भाष्यम्)

"एकदेशविकृतमनन्यवद्भवति", इति प्लुत्यादयोऽपि भविष्यन्ति॥

(प्रदीपः) एकदेशविकृतस्येति। ऋकारे रेफभागस्य हे इ ते स एव ऋकार इति प्रत्यभिज्ञानादिति भाव॥

(उद्योतः) इदानीं प्लुत्याद्यर्थत्वं तस्य परिहरति भाष्ये—एकदेशेति॥ रेफभागस्येति। वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पक्षे इत्यर्थः॥ प्रत्यभिज्ञानादिति। एवं च लिङ्गाद्युक्तन्यायेन लोकन्यायसिद्धमस्य वार्तमित्यर्थः। अद्यास्यां भाष्ये अनन्यवद् इत्य स्थान्यव नेत्यर्थः। अन्यसादृश्यादपि निषेधः अस्य इतीदम्॥

(छायालोकः) भाष्ये—विकृतमिति-अत्र ... बहु ... सामा वै नपुंसकम्। इति-इत्यनेन।

उद्योते—तस्य-ऌकारोपदेशस्य। अस्य-ऌकारस्य। लाघवाद्विशिष्टस्य वर्णान्तरत्वेऽपि वर्णैकदेशस्य वैदृश्यं शास्त्रीयत्वं भाष्यव्याख्यानेनेति। अपिना च तदर्थं समुच्चय।

(प्रयोजनखण्डनभाष्यम्)

यदि 'एकदेशविकृतमनन्यवद्भवति' इत्युच्येत, "राज्ञः क च" राजकीयम् "अल्लोपोऽनः" इति लोपः प्राप्नोति॥

(तत्त्वालोकः) भाष्ये—एव तत्प्रयोजनखण्डकसिद्धान्त्येकदेशिना तस्य तदर्थत्वे निराकृते तत्प्रयोजनवादिसिद्धान्त्येकदेशी शङ्कते-यदीति । उच्यतेति-नहीति शेष । क चेति-इत्यनेन कादेशाविषन्ने इति शेष । कोयमिति-इत्यत्रेति शेष । इति-इत्यनेन । अस्य अकारस्येति शेष ।

(प्रत्याख्यातृसमाधानभाष्यम्)

एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य ॥

(प्रदीपः) षष्ठीनिर्दिष्टस्येति । राज्ञः क चेत्यत्र राजन्शब्द षष्ठीनिर्दिष्टो न त्वन् इति लोपाभाव ॥

(उद्द्योतः) सिद्धान्त्येकदेशो वर्तित दृष्ट्वा स्थानिवत्सूत्रमनेनोपन्यस्तमित्याशयेनाह—षष्ठीनिर्दिष्टस्येति ॥ तत्सम्बन्ध्येकदेशविकृतमादेशरूपमित्यर्थ । नन्वल्लोपोऽन इत्यत्राऽपि षष्ठीनिर्दिष्ट एवेत्यत आह—राज्ञ इति । येन विकारेण यस्य विकृतस्य यद्रूपमेकदेशविकृतन्यायेन प्राप्यते तद्रूपावच्छिन्नस्य तेन रूपेण तद्विकारविधौ षष्ठीनिर्दिष्टस्येति तदर्थ इति भाव ॥

(तत्त्वालोकः) भाष्ये—तत्प्रयोजनखण्डकसिद्धान्त्येकदेशी—समाधत्ते-एकदेशेति । प्रदीपे—इति-इति हेतौ । अस्य अकारस्येति शेष ।

उद्द्योते—सिद्धान्तीति-तत्प्रयोजनखण्डकेत्यादि । वर्तितम्—अनन्यवदित्यत्र वर्तितम् । अनेन-तत्प्रयोजनवादिना । तदिति-षष्ठीनिर्दिष्टेत्यर्थ । येन-ककाररूपादेशेन । यस्य-अकः । यद्रूपम्—अन्त्वम् । तद्रूपावच्छिन्नस्य-अन्त्वावच्छिन्नस्य अन । नन्वन्त्वावच्छिन्नस्यानो राज्ञ्येन षष्ठीनिर्दिष्टत्वमस्त्वेवेत्यत आह—तेन रूपेणेति । अन्मात्रनिष्ठान्त्वेन रूपेण । तद्विकारेति-ककाररूपादेशात्मकविकारे त्यर्थ । निर्दिष्टस्येति-एकदेशे विकृतमनन्यवद् भवतीति शेष । तदर्थः-प्रकृतवार्त्तिकार्थ ।

(प्रयोजनवादिभाष्यम्)

यदि—षष्ठीनिर्दिष्टस्येत्युच्यते, 'क्लृप्तशिख' इति प्लुतो न प्राप्नोति। नह्यत्र ऋकारः षष्ठीनिर्दिष्टः ॥ कस्तर्हि ? ॥ रेफः ॥

(प्रदीपः) यथैव कृपो रो ल इत्यत्रापि ऋकार षष्ठ्या न निर्दिष्ट इत्यनन्यत्व न प्राप्नोतीत्याह—यदीति ॥

(उद्द्योतः) भाष्ये प्लुतो न प्राप्नोतीति द्विर्वचनादेरप्युपलक्षणम् ॥ कस्तर्हि रेफ इति । इप इति स्वतयवषष्ठीति भाव ॥

(तत्त्वालोकः) भाष्ये-उच्यते इति-नहीति शेष । इति-इत्यत्र । हि-यत । अत्र-लत्वविधौ ।

प्रदीपे—एवमिति-नहीति शेष । इति-इति हेतौ । आहेति-तत्प्रयोजनवादिसिद्धान्त्येकदेशीति शेष । उद्द्योते-इति-इत्यत्र ।

(प्रत्याख्यातृभाष्यम्)

ऋकारोऽप्यत्र षष्ठीनिर्दिष्टः ॥ कथम् ? ॥ अविभक्तिको निर्देशः—कृप उः रः लः "कृपो रो ल" इति ॥

(उद्द्योत.) कृप उरिति ॥ कृपे रेफस्य लस्तदवयवऋकारस्य च लकारघटित आदेश इत्यर्थ । स्थानिनिर्देश एव तादृशादेशकल्पक इति भाव ॥ एतेन तस्यावयवषष्ठ्यन्तत्वेन स्थानषष्ठीनिर्दिष्टत्वाभावादिद चिन्त्यमित्यपास्तम् ॥

(तत्त्वालोकः) भाष्ये—तत्प्रयोजनखण्डक आह—ऋकार इति । अत्र-लत्वविधौ । अविभक्तिक इति-यत इत्यादि ।

उद्द्योते—ननु ल इत्युक्त्या कथ लकारघटितादेश इष्यत आह-स्थानीति । उरित्यनेनेत्यादि । तादृशेति-लकारघटितेत्यर्थ । एतेन-उरित्यस्य स्थानषष्ठ्यन्तत्वाश्रयणेन । तस्य-उरित्यस्य । इद-ऋकारस्य षष्ठीनिर्दिष्टत्वकथनम् ।

(प्रत्याख्यातुरेव भाष्यम्)

अथवा पुनरस्तु अविशेषेण ॥

(प्रदीपः) अथवेति । षष्ठीनिर्दिष्टस्येति नापेक्ष्यते ॥

(उद्द्योतः) ननु स्थानिवत्सूत्रे हि तथा। प्रकृते च न तेनातिदेश उच्यते, किं तु छिन्नपुच्छश्वदृष्टान्तेन प्रत्यभिज्ञया-नन्यत्वमुच्यते । तत्र षष्ठीनिर्दिष्टस्येति वक्तुमेवाशक्यमित्याशयेनाह भाष्ये—अथवेति ॥

(तत्त्वालोक.) भाष्ये—अविशेषेणेति-वार्त्तिकमिदमिति शेष । प्रदीपे—नेति-विशेष इत्यादि । उद्द्योते—तथा-षष्ठीनिर्दिष्टस्येति विशेष आश्रयितु शक्य । तेन-स्थानिवत्सूत्रेण । आहेति-तत्प्रयोजनखण्डक एवेति शेष ।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तं—"राज्ञः क च" राजकीयम् "अल्लोपोनः" इति प्राप्नोतीति ॥

(तत्त्वालोकः) भाष्ये—तत्प्रयोजनवादी अविशेषेण तदाश्रयणे दत्त दोष स्मारयति-ननु चेति ।

(आक्षेपबाधकभाष्यम्)

नैष दोषः । वक्ष्यत्येतत्—"⊛ श्वादीना संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम् ⊛" इति। तत्प्रकृतमुत्तरत्रानुवर्तिष्यते—"अल्लोपोनः" नकारान्तस्येति ।

(प्रदीपः) नकारान्तस्येति । न च राजन्शब्द. कादेशे कृते नकारान्तो भवति, श्वव पुच्छे छिन्ने न पुच्छवानिति भाव ॥

(उद्द्योतः) ननु कादेशेऽनत्वमिवैकदेशविकृतन्यायेन नकारान्तत्वमपि कुतो नेत्यत आह—न च राजन्निति । एकदेशपदेन समवन्धिकृतयोपस्थितावयवधर्म एव विकारविशिष्टे आरोप्यते, न त्ववयव एव, लोक व्यवहारादिति भाव ॥

(तत्त्वालोकः) भाष्ये—तत्प्रयोजनखण्डक त निराकरोति—नैष इति । कुत इत्यत आह-वक्ष्यतीति । यत इत्यादि । तत्—तस्मात् । अल्लोपोऽन इति-इत्यत्रेति शेष ।

(प्रयोजनवाद्याक्षेपभाष्यम्)

इह तर्हि क्लृप्तशिख "अनृत" इति प्रतिषेधः प्राप्नोति ॥

(तत्त्वालोकः) भाष्ये—तत्प्रयोजनवादी सिद्धान्त्येकदेशी प्लुत्यर्थस्तदुपदेश आवश्यक इत्याशयेन शङ्कते—इहेति । तर्हि-एकदेशेतिन्यायाश्रयणे । शिख इति-इत्यत्रेति शेष । इति-इत्यनेन । अस्य ऌकारस्येति शेष ।

(४६ प्रत्याख्यातृसमाधानवार्तिकम् ॥ ५ ॥)

॥ * ॥ रवत्प्रतिषेधाच ॥ * ॥

(भाष्यम्)

रवत्प्रतिषेधाच्चैतत्सिध्यति । "गुरोरऋवतः" इति वक्ष्यामि ॥

(प्रदीप:) ऋवत इति । रोऽस्यास्तीति नित्यमिति नित्ययोगे मतुप् । तेन ऋकार एव रवान् न तु वर्णैक इत्यादावकार । न रवाननरवानिति समास । नित्ययोगप्रतिपादनाय बहुव्रीहिर्न कृतो—गुरोररस्येति ॥

(उद्योत) भाष्ये इह तर्हीति । एकदेशविकृतन्यायेन ऋवादिति भाव ॥ रोऽस्यास्तीति । इद चिन्त्यम्—अवयवादावेव मत्वर्थीनान्तरादाविति वर्तक इत्यादौ रवत्त्वस्योपपादयितुमशक्यत्वान्नित्ययोगपर्यन्तधावनमफलमिति ॥

(तत्त्वालोक:) भाष्ये-तत्प्रयोजनवादक एकदेशी समाधत्ते-रवदिति । एतत्-ऋकारस्य प्लुतत्वम् । गुरोरिति-गुरोरऋवतस्येत्यस्य स्थाने इत्यादि ।

उद्योते—न्यायेनेति-ऋकारस्येति शेष । इतीति-इति हेतोरित्यर्थ । प्रकृतेऽवयवे मतुप्प्राप्तिशेष । रवत्त्वस्येति-ऋकारे इत्यादि । इतीति-इति हेतोरित्यर्थ । तथा च कल्पितस्य इत्यत्र ऋकारस्य रवत्त्वाभावात् प्लुतो भविष्यत्येवेति तस्य न तदर्थत्वमिति भाव । नचैकदेशिन्यायेन तत्र रवता सेत्स्यति, लोके छिन्नपुच्छस्य पुच्छवत्ताया अदर्शनात् ।

(आक्षेपभाष्यम्)

यदि 'ऋरवतः' इत्युच्यते, होतृ + ऋकारः 'होतॄकार.' अत्र न प्राप्नोति ॥

(तत्त्वालोक:) भाष्ये—तत्प्रयोजनवादी सिद्धान्त्येकदेशी प्रकृतन्यासेऽपि दोषमाह-यदीति । अत्र इत्यत्रेति शेष । उच्यते इति-तर्हीति शेष ।

(आक्षेपबाधकभाष्यम्)

"गुरोरऋवतो ह्रस्वस्य" इति वक्ष्यामि ॥

(प्रदीप:) ह्रस्वस्येति । तेन ह्रस्वस्यैव रवत प्लुतनिषेधो, न दीर्घस्य ॥

(तत्त्वालोक:) भाष्ये—तत्प्रयोजनवादक एकदेशी आह—गुरोरिति । नवेति शेष ।

(सिद्धान्तिभाष्यम्)

स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थं सन्प्रत्याख्यायते, सेषा महतो वंशस्तम्बाल्लट्वानुकृष्यते ॥२॥

(प्रदीप:) वर्णैकदेशस्य लृकारस्य दर्शनान् निष्प्रयोजनमित्याह—सैषेति ॥ २ ॥

(उद्योत) भाष्ये स एष इति प्लुताद्यर्थं विद्यमान ऋकारोपदेशोऽत्रवतो ह्रस्वस्येति गुरोरऋवतसूत्रभेदेन प्रत्याख्यातम् इति प्रत्युक्तमित्यर्थ ॥ [illegible] —सैषेति । [illegible] प्रत्याख्यानाश्रयेण [illegible] अदर्शनेन प्लुतादिनिषेधो [illegible] वंशस्तम्बात् [illegible] लट्वानुकृष्यते तदाह—निष्प्रयोजनमिति । सूत्रभेदपरिकल्पनं विना कल्पितप्लुतसाधनस्यानुकृतत्वात् निष्प्रयोजनमित्यर्थ । वंशस्तम्बादिति । ल्यब्लोपे पञ्चमी । तमवलम्ब्येत्यर्थ । लट्वा पक्षिविशेष पर्णविशेषो वा । तद्यथा वंशाद्यसमाप्यमल्पफल न युक्त तथा लृकारोपदेशाश्रयणमपीत्यर्थ ॥ २ ॥

(तत्त्वालोक:) भाष्ये—तत्प्रयोजनवादी सिद्धान्ती आह—स एष इति ।

उद्योते—प्रत्याख्यानेति-लृकारस्यादि । प्रत्याख्यानमिति—प्रयुक्तमिति शेष । "लट्वा करञ्जभेदे स्यात् फले मत्ते स्वगान्तरे" इति विश्वकोशानुसारेण प्रकृतोपयोगिनमर्थमाह-पक्षीति ।

(शिवसूत्रे)

एओङ् ॥ ३ ॥ ऐऔच् ॥ ४ ॥

(संध्यक्षरेषु अतपरत्वस्थापनभाष्यम्)

इद विचार्यते—'इमानि संध्यक्षराणि तपराणि वोपदिश्येरन् 'एत् ओत् ङ्' 'ऐत् औत् च्' इति, अतपराणि वा यथान्यासम्-' इति ॥

(प्रदीप) एओङ् ॥ ऐऔच् ॥ इद विचार्यत इति । तपरातपरसन्ध्यक्षरोपदेशो विचार्यत इत्यर्थ ॥ तत्रोपदिश्येरन्नित्यन्नासत्त्वभूता यद्यपि क्रियाभिधीयते, तथापि बुद्ध्या परामृष्टा सत्त्वरूपतामापादिता विचारक्रियायां कर्मभावमनुभवति । यथा पचन्ती पचतीति सत्त्वे दर्शने ॥

(उद्योत) एओङ् ॥ ३ ॥ ऐऔच् ॥ ४ ॥ विचार्यत इति । इत्याचिन्तायामित्यस्य विचार इति बोध्यम् ॥ इदमर्थमाह—तपरेति ॥ असत्त्वभूतेति । एव चैतस्या परामर्शोऽनुपपन्न इति भाव ॥ बुद्ध्या परामृष्टेति । उपदेशपदाभिधेत्यर्थ ॥ कर्मभावमिति । इदं दवाच्यत्वेनेत भाव ॥ यथेति । इद चिन्त्यम् । कर्तृकर्मत्वकारकभाववत्त्वस्यैवासत्त्वपदार्थे वात् ॥

(तत्त्वालोक:) भाष्ये—सूत्रन्यायाश्रयात् प्रश्नपञ्चदयस्य एकदेव विचारमारभते-एओङिति । इमानि-ए, ओ, ऐ, औ, इत्याद्यक्षराणि । इति-इत्येवम् । यथेति-उपदिश्येरन्नित्यादि ।

प्रदीपे—इत्यत्र-इत्यत्रोक्तम् । क्रिया—उपदेशक्रिया । भावतीति-भावत्वेन । दर्शने इति-कर्म भवतीति शेष ।

उद्योते—इत्या चिन्तान्यायेनेति-तेषां तपरातपरयोर्मध्ये कतरत्प्रयोज्यमिति चिन्ता (संशयः) एव विचार इत्यर्थ । प्रदर्शित इति शेष । इदमिति-उपदेशार्थमिति शेष । क्रियायां "कर्मवत् कर्मणा तुल्यक्रिय" इति भाष्यस्थेन कर्तृत्वस्य, "क्रियापि क्रियेप्सिततमा भवति । कथा क्रियया । ईक्षणेन यथा भार्यनक्रियया भवितव्यमिति" इति सामान्यार्थकत्वभाष्येण कर्मत्वस्य चाङ्गीकारादाह-कर्मभावमिति ।

(भाष्यम्)

कश्चात्र विशेष: ? ॥

(प्रदीप) कश्चात्रेति । उभयोः को विशेष इति प्रश्न ॥

(उद्योत) तपरत्वे इत्यत्र हल्प्रत्याहारानुपपत्तिरूपदोषस्य फलान्तरप्रयोजनविशेष आह—कार्ये इति ॥

(तत्त्वालोक) भाष्ये—अत्र-तथा तपराणामतपराणां वो पदेशे। उद्द्योते- तद्विषय -विशेषविषयक ।

(४७ तपरपक्षदूषणवार्तिकम् ॥ १ ॥

॥ ✲ ॥ संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् ॥ ✲ ॥

(भाष्यम्)

सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्तव्यम् ।

(प्रदीप) तपरोपदेशश्चेदिति । यद्यप्युपदेश उच्चारणं तथापि तपरोपदेशे फलं चेदस्ति तदतपरोच्चारणं कर्तव्यमित्यर्थः । सन्ध्यक्षराणीत्यन्वर्था पूर्वाचार्यसंज्ञा सन्धीयमानावयवत्वात् ॥

(उद्द्योत) भेदाभावादुद्देश्यविधेयभावोऽनुपपन्न इत्याशङ्कय परिहरति—यद्यपीत्यादि ॥ फलं चेदिति। सम्प्रदाने ध्वनित भाव ॥ फलस्यैव करणत्वविवक्षया करण ध्वनित्यन्ये ॥ सन्धीयमानावयवत्वादिति । अइउणिति शिष्यमाणवर्णसदृशावयवमत्त्वानेनास्य निष्पन्नत्वादित्यर्थ ॥

(तत्त्वालोक) भाष्ये—तपरोपदेश इति-सफल इति शेष । चेदिति-यदीत्यर्थ । तर्हीति शेष ।

प्रदीपे—उच्चारणमिति-इति तपरोपदेशतपरोच्चारणयो भेदा भावादुद्देश्यविधेयभावोऽनुपपन्न इति शेष । तथापीति-तेषामिति शेष । इत्यर्थ इति-तथा च तयो भिन्नत्वात् स उपपद्यते इति शेष । सन्ध्यक्षरेति-तेषामित्यादि ।

उद्द्योते—भेदेति-तयोरित्यादि । सम्प्रदाने-(तपरा) उपदिश्यन्ते यस्मै इति व्युत्पत्तौ । करणे-(तपरा) उपदिश्यन्ते येनेति व्युत्पत्तौ । अइउणिति अइउणित्यादौ अनुशिष्यमाणा ये वर्णा तत्सदृशा येऽवयवा एकदेशो गङ्गोदकम् देवैश्वर्यम् वृष्णौकण्ठ्यमित्यादिप्रयोगस्था तेषां सन्धा न तत्र अस्यैचो निष्पन्नत्वादित्यर्थ ।

(४८ तपरत्वपक्षदूषणवार्तिकम् ॥ २ ॥)

॥ ✲ ॥ प्लुत्यादिष्वज्विधिः ॥ ✲ ॥

(भाष्यम्)

प्लुत्यादिष्वजाश्रयो विधिर्न सिध्यति ॥ गो३त्रात नौ४त्रात इत्यत्र "अनचि च" इत्यच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति। इह च प्रत्यङ्ङै४तिकायन उदङ्ङौ४पगव इति 'अचि' इति ङमुडागमो न प्राप्नोति ॥

(प्रदीप) प्लुत्यादिष्विति । प्लुतसंज्ञानभ्युपगम्याच्कार्याणि न सिध्यन्तीत्युच्यते ॥

(उद्द्योत) भाष्ये प्लुतिग्रहणं त्रिमात्रपरम् । आदिना चतुर्मात्रग्रहणम् ॥

(तत्त्वालोक) भाष्ये—वक्ष्यमाणोभयसमुदायाद्-अजाश्रय इति । अत्र एव च प्लुत्यादिष्वित्यत्र न परसप्तमी, किन्तु विषयसप्तमीत्यभिप्रायेणोदाहरति-गो३त्रात इति । अत्र दूरात्तस्य सम्बोधने निष्पन्ने गुरोरनृत इत्यनेन प्लुत । नौ४त्रात इति-अत्र "प्लुतावैच इदुतौ" इत्यनुसारेण औकारस्योत्तरमा उकारे तेन प्लुते कृते तस्य त्रिमात्रतया तस्य पूर्वभागस्याकारस्यैकमात्रतया च चतुर्मात्र

तेति भाव । इति-इत्यनेन । इति-इत्यर्थकेन । इति-इत्यत्र । इतीति अस्य सम्बन्धेनेति शेष । न प्राप्नोतीति-तेषां तपरत्वेनो पदेश इते त्रिमात्रादीनामनन्त्वादिति शेष ।

प्रदीपे—प्लुतसंज्ञा-प्लुत प्लुतसंज्ञा। प्लुतस्य प्लुतसंज्ञापूर्वकत्वात्।

(४९ तपरत्वपक्षदूषणवार्तिकम् ॥ ३ ॥)

॥ ❀ ॥ प्लुतसंज्ञा च ॥ ❀ ॥

(भाष्यम्)

प्लुतसंज्ञा च न सिध्यति ॥ ऐ३तिकायन औ३पगव "ऊकालोऽज्झ्रस्वदीर्घप्लुत" इति प्लुतसंज्ञा न प्राप्नोति ॥

(प्रदीप) प्लुत एव न प्राप्नोतीति दर्शयितुमाह—प्लुतसंज्ञा चेति । त्रिमात्रस्याच प्लुतसंज्ञा विधीयते, तपरत्वे च त्रिमात्रस्याग्रहणादच्त्वाभाव । तत्रैचां प्लुते विधीयमाने इकारोकाराभ्यां गृह्येत ईकार ऊकारश्च स्यात्।

(उद्द्योत) मन्त्रोमम्यादाने इत्यादिनान्तरतमपरिभाषाम स्थानेन गुरुप्लुतविधानादनच्त्वेपि तेषां प्लुतसंज्ञा मविष्यतीत्यत आह—तत्रैचामिति । ताभ्यामपि तेषां यथाकथञ्चिदान्तरतम्यसत्त्वादिति भाव ॥

(तत्त्वालोक) भाष्ये—औपगव इति-इत्यत्रेति शेष । इति-इत्यनेन । प्रदीपे—तपरत्वे-एचां तपरत्वेनोपदेशे ।

उद्द्योते—तेषाम्-एचाम् । ताभ्याम्-ईकारोकाराभ्याम् ।

(अतपरपक्षाभ्युपगमभाष्यम्)

सन्तु तर्ह्यतपराणि ।

(तत्त्वालोक) भाष्ये—सिद्धान्ती तेषामतपरत्वेनोपदेश इति द्वितीयपक्षमवलम्बते-सन्त्विति-सन्ध्यक्षराणीति शेष । तर्हि-तेषां तपरत्वेनोपदेश इति प्रथमपक्षे दूषिते ।

(५० अतपरपक्षदूषणवार्तिकम् ॥ ४ ॥)

॥ ❀ ॥ अतपर एच इग्घ्रस्वादेशे ॥ ❀ ॥

(भाष्यम्)

यद्यतपराणि 'एच इग्घ्रस्वादेशे" इति वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ एचो (ङो) ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध ओकारो वा मा भूदिति ॥

(प्रदीप) अतपर इति । अतपरत्वे ह तपरत्वे एकारौकाराभ्यां मात्रिकयोरधैकारार्धौकारयोर्ग्रहणादच्त्वाद्ध्रस्वादिधान इत्यादिति सूत्रं कर्तव्यम् । तपरत्वे तु तयोरग्रहणात्प्राप्त्यभाव ।

(उद्द्योत) भाष्ये अर्ध एकार इति । मात्रिकत्वेनार्धत्वम् । समांशवाचिनोऽपि पुंस्त्वमेवद्भाष्यप्रामाण्यात् ॥

(तत्त्वालोक) भाष्ये—एकदेशी आह-अतपरे इति । अत परत्वे इत्यर्थ । तेषामित्यादि । अतपराणीति-तानीत्यादि । तर्हीति शेष । वक्तव्यमिति-भवतीति शेष । इति-इति हेतौ ।

प्रदीपे—इह-सन्ध्यक्षरेषु । इतीति-इति हेतोरित्यर्थ । अनिष्टवारणायेति शेष । सूत्रम्-एच इगिति सूत्रम् । तपरत्वे इति-तेषां मित्यादि । तयो-एकमात्रिकयोस्तयो । अस्य ताभ्यामित्यादि । अभाव इति-तथा ताभ्यां गृह्यतयो द्विमात्रिकयोस्तयो ह्रस्वत्वाभा-

यादेवामासिरिति तत्रैकारौकारावेव भविष्यत इति तन्सूत्र न कर्तव्य भवतीति शेष ।

उद्योते—ननु स्वस्थानीऽर्थे एकार इ यदि प्रयोगी न युज्यते इत्यत आह-मात्रिकत्वेनेति । द्विमात्रस्य ...मात्राद्वयेऽपि तस्य ... एकमात्रिकत्वेनेत्यर्थः । वाचिनो ऽपि—अर्थशब्दस्य ।

(प्रतिवन्दीसमाधानभाष्यम्)

ननु च यस्यापि तपराणि, तेनाप्येतद्वक्तव्यम् । इमावैचौ समाहारवर्णौ-मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोस्तयोर्ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ; मा कदाचिदवर्णो भूदिति ॥

(प्रदीप) ननु चेति । एतारम्भं प्रति न कश्चिद्विशेष इत्यर्थः । अतपरत्वे एच इति वक्तव्य, तपरत्वे स्वेच इति । एचोर्विशिष्टवर्णत्वा ... वर्णैकारौकारौ न भवत ॥

(उद्योत) भाष्ये तेनाप्येतद्वक्तव्यम् । इत्यत्र एतच्छब्देन नियामक एव परामृश्यते ॥ एतन्यासभेदेऽपि सूत्रसंख्यायां विशेषो नास्तीत्याह-सूत्रारम्भं प्रतीति ॥ विश्लिष्टेति । उपलभ्यमानेत्यर्थः ॥ संश्लिष्टेति । स्पष्टमनुपलभ्यमानेत्यर्थः । एवं चैङ्विषये नावर्णमात्रि । कर्येङोस्तु तपरनिर्देशेऽन्यत्वाद् ह्रस्वत्वमेव नेति भाव ॥ एङो शुद्ध तालव्यादित्वेनेति न तयो स्थानेऽवर्णमात्रिरिति तत्त्वम् ॥ संश्लिष्टा वर्णा वेति वैयग्र्यमात्रमेव तात्पर्यम् ॥

(तत्त्वालोक) भाष्ये—तदतपरत्ववादी स्वमते गौरवाभाव ... ननु चेति । यस्यापीति मते तानीति शेष । एतत्—मेच इत्यादेशे इति । कुत इत्यत आह-इमाविति । वर्णाविति-तवेति शेष । तयोरिति-ऐचोरित्यर्थ । मा इत्यादि । मेति-नेत्यादि । इति-इति हेतौ ।

प्रदीपे—सूत्रेति-पक्षद्वये इत्यादि । तयोः विशेषमाह-अतपरत्वे इति । तत्रामिति दि ।

उद्योते—ननु पक्षद्वये एतयो भिन्नस्वरूपत्वात् 'एचदि' ति कथनमसङ्गतमित्यत आह-नियामक सूत्रमिति । एवं च-एङो गतिश्चावर्तते च । तपरेति-तदन्यपक्षेत्यर्थ । इति-इति हेतौ । अवर्ण स्थानेऽन्येनापि शेष । तयो-एङो । अत्रैव-एङो स्थानद्वयानिष्पत्तिपूर्वक तुल्यताव्यादित्वे एव ।

(प्रतिवन्दीनिराकरणभाष्यम्)

प्रत्याख्यायत एतत्,-"ऐचोश्चोत्तरभूयस्त्वात्" इति ॥

(प्रदीप) ऐचोश्चेति । अवर्णमात्रायाः ... भूयस्त्वादेदोतोः ... मात्रादिवर्णेन्द्र एकारौकारावेव भविष्यत ॥

(उद्योत) भाष्ये प्रत्याख्यायत एतदिति । एतत् ऐन्द्विषये एच इतीति सूत्रम् । वर्तमानसामीप्ये लट् ॥ भूयसा चेति । भवति दकमपुं त्वं यद्यणामादित्यर्थ ॥ [इद च प्रत्याख्याने इति भाष्ये स्पष्टम् ॥ ... इति विरवलोक तु चिन्त्यम् । ... पूर्वमुक्त ... । ... 'नित्य पर्यायाद्येत्या' इत्यादिना 'अय परस्मिन्—' सूत्र भाष्ये ॥]

(तत्त्वालोक) भाष्ये—सिद्धान्ती तदपर ... वादिनो उत्तर माह-प्रत्याख्यायते इति । ... आह ऐचोश्चेति ।

प्रदीपे—अवर्णमात्रेति-... इति ... । इति-इति हेतौ । भाव ऐचोरिति शेष ।

उद्योते—इद च मतम्-अर्थमात्राऽवर्णस्य, अत्यर्थमेकारौकारौ ऐचोरिति मतम् । अष्टमेऽपि भाष्ये-प्लुतावैच इदुतौ इति सूत्र भाष्येऽपि ।

(समाधानसिद्धान्तिभाष्यम्)

यदि प्रत्याख्यानपक्ष, इदमपि प्रत्याख्यायते—"सिद्धमेङः सस्थानत्वात्" इति ॥

(प्रदीप) सिद्धमेङ इति । अर्धेकारार्धौकारौ न स्त, तत्र तालव्य एकार ओष्ठ्य ओकार इति तयो स्थाने एकारौकारावेव भविष्यत ॥

(उद्योत) भाष्ये इदमपीति । एङ्विषयमप्येत्यर्थ ॥ सस्थानत्वादिति । इकारोकाराभ्यां समानस्थानत्वादित्यर्थ । तदाह-तालव्य इति । तालव्य एवेत्यर्थ ॥

(तत्त्वालोक) भाष्ये—तदतपरत्ववादी सिद्धान्ती आह-यदीति । तत्पपरत्वपक्षमिति तत्रेति शेष । पक्ष इति-तर्हीति शेष । कुत इत्यत आह-सिद्धमिति ।

प्रदीपे—तत्र-एङो । इति-इति हेतौ । अत्र-स्थानमात्रादिति शेष । तयो -एङो ।

उद्योते—विषयमिति-एच इतीति सूत्रमिति शेष । तथा च तदतपरत्वेऽपि तत्सूत्र प्रत्याख्यानमिति नास्ति तयो विशेष इति भाव ।

(आक्षेपभाष्यम्)

ननु चैङः सस्थानतरावर्ध एकारोऽर्ध ओकार ॥

(तत्त्वालोक) भाष्ये—तदपरत्ववादी तदतपरत्वपक्ष तद्दोषो वयकता दर्शयति-ननु चेति । एच इति शेष । ओकार इति-च स्तोऽन्ते तदतपरत्ववादिना तत्सूत्रमारभ्यमिति शेष ।

(समाधानभाष्यम्)

न तौ स्त । यदि हि तौ स्याता तावेवायमुपदिशेत् ॥

(प्रदीप) तावेवेति । ताभ्यामुपदिष्टाभ्यां दार्घप्लुतयोरपि ग्रहण सिध्यतीति भाव । गुणवचनं तु तावेकारौकारौ निर्देश्यौ ॥

(उद्योत) भाष्ये तावेवेति । तावपि इति भाव ॥ ग्रहणमिति । प्रदेशेष्विति शेष ॥ न चैव मात्रिकयोरेव गुणसंज्ञा स्यादत आह-गुणेति । एवमपि ... इत्यपाठेऽर्थलाभाभाव भवति ॥

(तत्त्वालोक) भाष्ये—तदतपरत्ववादी स्वपरं तत्प्रत्याख्यानकर्ता तदर्शयति-नेति । तौ-अर्धैकारौकारौ । हि-यत । स्याताममिति-तर्हीति शेष । अयं-सिद्ध पाणिनिर्वा ।

प्रदीपे—ताभ्यां-अन्यतरविवक्षया एकारेण ओकारेण च । अर्थादिति-एकारौकाराभ्यामिति शेष ।

उद्योते—प्रदेशेषु-एचे इत्यादिषु । एवेति- ... ओकारश्च चेति शेष । एवमपि-गुणसंज्ञायां दार्घस्य ऐकारौकारयो निर्देशेऽपि । अत्र-वर्णसमाम्नाये । ह्रस्वपाठे-... एकारस्य ओकारस्य च पाठे । अर्थमात्रेति-सिद्धान्तपक्षे ... तथैव एकारौ ह्रस्वयो पाठेऽप्यस्ति मात्रायुक्तद्वयं, ... पाठे ... तदर्थमात्राद्वयमिति तदन्तरा प्रत्याख्यानमा । ... पाठे तथा मात्राद्वयम्, ... पाठे ... अत्र, ... अर्थमात्राप्रत्युक्तमिति महत्प्रयत्नेन ह्रस्व इति ... ह्रस्व एवे कर्तव्यमात्राद्वयमन्येऽपि भाव ।

(आक्षेपभाष्यम्)

ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते—सुजाते अश्वसूनृते, अध्वर्यो अद्रिभिः सुतम्, शुक्रं ते अन्यद्, यजतं ते अन्यत्—इति ॥

(प्रदीपः) सुजात इति । अन्त पादस्थस्यात्परस्याकारस्यार्धमेकारमर्धमोकार च विदधति ॥

(उद्द्योतः) अकारस्यार्धमिति । सुजाते ए अश्वेति अकारले सन्तु प्रामादिक ॥

(तत्त्वालोक.) भाष्ये—तत्परत्ववादी वर्णसमाम्नाये ह्रस्वयो ए ओ इत्यनयोरनुपदेशे तयोरसत्त्वे न प्रमाणं लक्ष्यविरोधादिति शङ्कते-ननु चेति । इति-इत्यत्र ।

प्रदीपे—अन्त इति-अत्रेत्यादि । उद्द्योते—इति-इत्यत्र ।

(समाधानभाष्यम्)

पारिषदकृतिरेषा तत्रभवताम्। नैव हि लोके नान्यस्मिन्वेदेऽर्ध एकारोऽर्ध ओकारो वास्ति ॥

(प्रदीपः) पारिषदकृतिरिति । गीतिविशास्तयोरुच्चारणमित्यर्थ ॥

(उद्द्योतः) शाखाविशेषाध्यायिनां समवाय परिषत्, पर्षद्वा तत्र भवा कृतिरित्यर्थ ॥

(तत्त्वालोकः) भाष्ये—तदतपरत्ववादी तत्परिहरति-पारिषदेति । एषा-ह्रस्वयो ए, ओ, इत्यनयो रचना । हि-यत ।

प्रदीपे—तथा-ह्रस्वयो ए, ओ, इत्यनयो । उच्चारणमिति—न तु तयो सत्त्वादिति न तयोरसत्त्वाङ्गीकारे लक्ष्यविरोध इति शेष ।

(५१ अतपरपक्षदूषणवार्तिकम् ॥ १ ॥)

॥ ॥ एकादेशे दीर्घग्रहणम् ॥ ॥

(भाष्यम्)

एकादेशे दीर्घग्रहणं कर्तव्यम्—"आद्गुणो दीर्घः" "वृद्धिरेचि दीर्घः" इति ॥ किं प्रयोजनम्? ॥ आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति । खट्वा इन्द्रः खट्वेन्द्रः, खट्वा उदकं खट्वोदकं, खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा, खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः, खट्वा ऐतिकायनः खट्वैतिकायनः, खट्वा औपगवः खट्वौपगव इति ॥

(प्रदीपः) आन्तर्यत इति । अन्यथासम्भवाच्चिदमत्र नास्ति प्लुतश्च विषये स्मृत इति ॥

(उद्द्योतः) तदेवमतपरत्ववादिमतसाधारण्येनैव दूषितं सूत्रस्य कर्तव्यताकर्तव्यते उपपादितपरवादिमतेऽसाधारणदूषणमाह—भाष्ये एकादेशे इति । एकः पूर्वपरयोर्दीर्घ इति सूत्रं कार्यमित्यर्थ. ॥ अन्यस्यासंभवादिति । अय भाव —यथा स्याध्वोरित्यत्रातपरत्वे स्याध्वोर्दीर्घस्य स्थाने घुमास्थेत्येव दीर्घकारे सिद्धे पुनर्वचनमदीर्घार्थमित्यविशेषाद् ह्रस्वप्लुतयो प्रसङ्गे उदुक्तं प्लुतश्च विषये इति । एव च दूराद्धूतादिविषयेऽप्यनेनैव प्लुते पक्षेऽनुवाददोषस्तत्र, इह तु प्लुत एव प्राप्नोतीति खट्वा इन्द्र इत्यादिविषयकशास्त्रवैयर्थ्यमेवेत्यनुवाददोष सोऽदन्य एवेति वैषम्यमिति ॥ [वस्तुतोऽस्य टित्वमात्रार्थेद्विषयेऽप्लुता प्रवृत्तेश्चिन्त्यमेवेदमिति स्था वोरिति सूत्रे निरूपयिष्याम ॥]

(तत्त्वालोक·) भाष्ये – एकादेशे-एकादेशस्य विधेयतया नियम्यतया वा बोधके सूत्रे । इति-इति रूपेण । "इत्यत एव चतुर्मात्र प्लुत 'इति "प्लुतावैच इदुतौ"ति सूत्रभाष्यानुसारेणाह-चतुर्मात्रा इति । इति-इति हेतो । इति-इत्यादौ ।

उद्द्योते—आहेति-तत्परत्ववादीति शेष । अतपरत्वे इति-इ, इत्यादौत्यादि । इत्येव-इत्यनेनैव । इति-इति हेतो । अविशेषात्-अनान्तर्याविशेषात् । अस्य तत्रेति शेष । प्लुतयोरिति इकारयोरिति शेष । अनेनैव-प्लुतश्चेत्यनेनैव । पक्षे-दूराद्धूतादिविषये । तत्र-स्था वोरित्येत्यत्र । इति-इति हेतो ।

(आक्षेपभाष्यम्)

तत्तर्हि दीर्घग्रहणं कर्तव्यम् ॥

(तत्त्वालोक.) भाष्ये—मध्यस्थः पृच्छति-तदिति । तर्हि-एचामतपरत्वेनोपदेशे । अस्य तत्रेति शेष ।

(समाधानभाष्यम्)

न कर्तव्यम्। उपरिष्टाद्योगविभागः करिष्यते—"अकः सवर्णे" एको भवति ॥ ततो—"दीर्घः" दीर्घश्च स भवति, यः स 'एकः पूर्वपरयोः' इत्येव निर्दिष्ट इति॥

(उद्द्योतः) (भाष्ये यः स इति प्रसिद्ध्यर्थकम् ॥)

(तत्त्वालोकः) भाष्ये—एकदेशी समाधत्ते-नेति । कुत इत्यत आह-उपरीति । यत इत्यादि । योगविभाग दर्शयति-अक इति । एकः-इत्येको योग । दीर्घ इति-इत्यपरो योग इति शेष । अपरयोगस्यार्थमाह-दीर्घश्चेति । तथा च तेनैव नियमेन सर्वत्रेष्ट सिद्ध्यतीति भाव ।

(आक्षेपभाष्यम्)

इहापि तर्हि प्राप्नोति—पशुं, विद्धं, पचन्तीति ॥

(तत्त्वालोकः) भाष्ये—सिद्धान्ती तथान्याले योगविभागे च दोषमाशङ्कते-इहेति । तर्हीति-तादृशनियमाङ्गीकारे इत्यर्थ । दीर्घ इति शेष ।

(समाधानभाष्यम्)

नैष दोषः। इह तावत्पशुमिति, "अम्येकः" इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनम्—यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति ॥

विद्धमिति। पूर्व इत्येवानुवर्तते ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति-नानेन सम्प्रसारणस्य दीर्घो भवतीति। यदयं हल उत्तरस्य सम्प्रसारणस्य दीर्घत्वं शास्ति ॥

पचन्तीति। "अतो गुणे पररूपम्" इतीयता सिद्धम्। सोऽयमेव सिद्धे सति यद्रूपग्रहणं करोति, तस्यैतत्प्रयोजनम्—यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्यथा स्यादिति ॥

(प्रदीपः) अम्येक इति । प्रथमयोरिति सिद्ध एतदपि किम

धंकुर्ध्वने इति चेद्, वा छन्दसी-प्रश्नानुवृत्त्यर्थम्। तस्मात् पूर्वश्रुति पूर्वरूपार्था। सैवोत्तरत्रानुवर्तत इति विद्धमिति पूर्वरूपं भविष्यति॥ अथवेति। विधिनियमसम्भवे विधिरेव बलीयानिति विधेरेवैष तत्तन्नियमो न भवति हल एव दीर्घश्च यथा स्यात्, उत तत्यादौ मा भूदिति॥

(उद्द्योतः) वा छन्दसीत्यत्रेति। वा छन्दसीत्यस्यानुवृत्त्यर्थमित्यर्थः॥ पूर्वरूपार्थेति। पूर्वस्य रस्यारमकपूर्वरूपार्थेत्यर्थः॥ भाष्ये पर इतीयतेति [illegible]मिति भावः॥ सिद्धान्ते तु रूपग्रहण स्पष्टार्थमेव, अस्य भाष्यस्य पूर्वपक्षयुक्तित्वात्॥

(तत्त्वालोकः) भाष्ये—एकदेशी समुद्धरति-नैव इति। ताववृति-व्याख्याकारे। अयं-पाणिनि। एवमग्रेऽपि। विद्धमितीति-सिद्ध मनि [illegible]। पूर्वं इति-यत्र सम्प्रसारणाच्चेत्यत्रेत्यादि। अनेन-नियमेन। यस्-यस्मात्।

प्रदीपे—इति-इत्यन्न। अस्य तस्मिन्निति शेष। एतत्-अमीति। सैव-पूर्वश्रुतिरेव। उत्तरत्र-सम्प्रसारणाच्चेत्यत्र। इति-इति पदोः। इति-इत्यत्र। इति-इत्यनेन। नियमाकारमाह-हल इति। हल परस्येत्यर्थ। तथा च विद्धमित्यादौ दीर्घवारणेन दोषस्तदवस्थ एवेति भाव।

(आक्षेपभाष्यम्)

इह तर्हि खट्वर्श्यो मालर्श्यं इति दीर्घवचनादकारो न, अनान्तर्यादिकारोकारौ न॥ [तत्र को दोषः ?॥] विगृहीतस्य श्रवणं प्रसज्येत।

(उद्द्योतः) अकारो नेति। रपरत्वेऽपि द्विमात्रत्वरूपदोषस्ता सम्भव एव॥ विगृहीतस्येति। दीर्घ त्रिपरिमाणयोर्विरोधेन जातिपक्षे व्यक्तिपक्षे वा [illegible]दिति भाव।

(तत्त्वालोकः) भाष्ये—तदपरत्ववादी तत्र दोषमुपन्यस्यति-इहेति। तर्हि-आद् गुणो दीर्घ इत्यादिकरणे। दीर्घ इति-तत्रेत्यादि। तत्रेति-तत्रेत्यादि। वि हीतस्य-[illegible] ऋवर्णस्य [illegible]।

उद्योते—रपरत्वेऽपीति-अकारस्येत्यादि। सावर्णमानिकत्वेनेति शेष। परिमाणेति-स्थानेऽन्तरतम इत्यादि।

(समाधानभाष्यम्)

न ब्रूमो—यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति। किं तर्हि ?॥ यत्र क्रियमाणे न दोषस्तत्र कर्तव्यमिति।

(तत्त्वालोकः) भाष्ये एवम् एकादेशे इति वार्तिके दूषिते [illegible] तदपरत्ववादी आह-न ब्रूम इति। यत्र-आद् गुण इत्यादौ। अस्य दीर्घग्रहणे इति शेष। तत्रेति-तत्रेति शेष। एवमग्रेऽपि। यत्रेति-[illegible]मिति शेष।

(आक्षेपभाष्यम्)

क च क्रियमाणे न दोषः ?॥

(तत्त्वालोकः) भाष्ये—[illegible] पृच्छति-क्व चेति। [illegible] शेष।

(समाधानभाष्यम्)

संज्ञाविधौ। वृद्धिरादैच् दीर्घः, अदेङ् गुणो दीर्घ इति॥

(तत्त्वालोकः) भाष्ये—तादृश तदपरत्ववादी समाधत्ते—संज्ञाविधाविति। एवञ्च एकादेशे इत्यस्य एकादेशविधिमूलभूतसंज्ञाविधाविस्यर्थकतया सङ्गतिः।

(आक्षेपभाष्यम्)

तत्तर्हि दीर्घग्रहणं कर्तव्यम्॥

(तत्त्वालोकः) भाष्ये—पुनरपि मध्यस्थ वस्व [illegible] पृच्छति-तत्तर्हीति। संज्ञाविधावित्यनुवर्तते।

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यम्।

(तत्त्वालोकः) भाष्ये—सिद्धान्ती समाधत्ते-नेति।

(आक्षेपभाष्यम्)

कस्मादेवान्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति ?॥

(तत्त्वालोकः) भाष्ये—मध्यस्थ पृच्छति—कस्मादिति।

(समाधानभाष्यम्)

तपरे गुणवृद्धी॥

(प्रदीपः) तपरे इति। तपरसदृशसञ्चरिते गुणवृद्धिसंज्ञे इत्यर्थः।

(उद्द्योतः) ननु गुणवृद्धिसंज्ञयोस्तपरत्वाभावात् पूर्वोक्तदोषापरिहारेऽथ भाष्यमयुक्तमित्याशङ्क्याह—तपरसंज्ञीति। तपरत्वेन निर्दिष्टे संज्ञिनि गुणवृद्धिसंज्ञे प्रवर्तेते इत्यर्थः। एव च त्रिमात्रादीनां तत्र संज्ञित्वाऽनिर्देशान्नोक्तदोष इति भाव॥

(तत्त्वालोकः) भाष्ये—सिद्धान्ती समाधत्ते-तपरे इति। यत्र इत्यादिः। उद्द्योते—तत्र-गुणवृद्धिसंज्ञे।

(आक्षेपभाष्यम्)

ननु च तः परो यस्मात्सोऽयं तपरः॥

(उद्द्योतः) भाष्ये ननु चेति। एव चैषां न तपरत्वमिति भाव॥

(तत्त्वालोकः) भाष्ये—ननु तपरत्वपक्षे बहुव्रीहिरेव ग्राह्यः, तत्पुरुषेऽपि पदे चोत्तरपदाभावदुपरोधात् दृश्य एवेति तदपरत्ववादी शङ्कते-ननु चेति।

(समाधानभाष्यम्)

नेत्याह, तादपि परस्तपर इति॥

(प्रदीपः) तादपीति। [illegible] दिशि [illegible] देशप्रत्यासत्तेः कार्यविधानमिति भाव।

(उद्द्योतः) नेत्याहेति। [illegible] इत्यर्थः॥ कर्मभेदेन शब्दभेदे-तन्त्रम्यायेति। [illegible] [illegible]पूर्वस्यैव द्विराविरित्यादिति॥ एकशेषेति। [illegible] एकशेषाभावे नैकवचनानुपपत्तेः चिन्त्यम्॥

(तत्त्वालोकः) भाष्ये—[illegible] सिद्धान्ती [illegible]—नेत्याहेति। [illegible] आह-नाहेति। अपितु तः परो यस्मात् [illegible]। इति-इति [illegible]। [illegible] गुणवृद्धिसंज्ञे [illegible] भाव।

[illegible]। आह—न आह। [illegible] इति-[illegible]। [illegible]। [illegible] भाव।

(आक्षेपभाष्यम्)

यदि तादपि परस्तपर "ऋदोरप्" इतीहैव स्यात्-यवः स्तवः, लवः पवः इत्यत्र न स्यात् ॥

(तत्त्वालोक) भाष्ये—तपरत्ववादी एकदेशी शङ्कते-यदीति। तपर इति- इति शेष। स्तव इति-इतीति शेष। स्यादिति-उकारस्य तपरत्वादिति शेष।

(समाधानभाष्यम्)

नैष तकारः॥ कस्तर्हि?॥ दकारः॥

(तत्त्वालोक) भाष्ये—तपरत्ववादी सिद्धान्ती परिहरति-नेति। एष -ऋदोरबित्यत्र विद्यमान।

(आक्षेपभाष्यम्)

किं दकारे प्रयोजनम्?॥

(प्रदीप) बहुव्रीहिवादी चोदयति—किं दकार इति।

(तत्त्वालोक) प्रदीपे—बहुव्रीहिति-तत्रेत्यादि।

(प्रतिवन्दीसमाधानभाष्यम्)

अथ किं तकारे?। यद्यसन्देहार्थस्तकारः, दकारोऽपि। अथ मुखसुखार्थस्तकारः, दकारोऽपीति॥

(प्रदीप) समासद्वयवादी त प्रत्याह-अथ किं तकार इति। तत्र केवलबहुव्रीहिवादिनो निश्चयेनैव तपरत्वम्, तकारस्यानङ्गत्वा भिन्नकालानां ग्रहणाप्रसङ्गाद्गुणानां चाभेदकत्वात्तत्प्रयोजनत्वाभावात्। अथ तत्रासन्देहार्थो मुखसुखार्थो वा तकार एवं मम दकार इत्यर्थः॥ तिरस्करितमित्यत्र भाष्येणास्य विरोध। तत्र हि-तिति प्रत्ययग्रहणं चोदितम्, इह मा भूत्-दिव उत् द्युभ्यामिति, ततो दित्त्वाश्रयणेन प्रत्याख्यानम्, तपर सूत्रे च तकारश्चर्त्वभूतो निर्दिश्यते। तेन तत्कालस्य ग्राहको दकार'-इत्युक्तम्। इह च दकाराभ्युपगमेन त्वादिषु दोष परिहृत॥ अन्ये त्वाहु-थकारस्थानिको धकारस्थानिको वा दकारोऽत्र विवक्षित -कस्तर्हि, दकार इति।

(उद्द्योत) मुखसुखार्थं इति पाठे मयूरव्यंसकादित्वात्समास। ननु एजिति महाप्राणत्वेऽपि भिन्नानेकारादीना किमागतमिति चेत्, न। तपरत्वाद्बोध्योऽपि वर्णस्तत्कालस्यैव सद्धेत्यर्थान्न दोष॥ गुणानां चेति। अणु गुणानां तत्त्वाभावेऽपि अनण्त्वादेव दीर्घादिविषये तत्त्वमिति भाव॥ ननु दित्वे दिव उदित्यत्र तत्कालग्रहणं न स्यादत आह-तपरसूत्रे चेति॥ इहेति। तपरसूत्रे दकारानाश्रयणेन चेत्यपि बोध्यम्॥ थकारस्थानिक इति। तस्य चैवदृष्टत्वादसिद्धत्वान्न तत्र तपरसूत्रप्रवृत्तिरिति भाव॥

(तत्त्वालोक) प्रदीपे—समासेति-तत्रेत्यादि। तं-बहुव्रीहिवादिनम्। तत्रेति-तत्रेति शेष। तपरत्वमिति-ऋदोरित्यत्र ऋकारस्येत्यादि। अनण्त्वादिति-तेनेति शेष। कालानामिति-ऋकाराणामिति शेष। तत्प्राप्तीति-ऋदोरितिप्राप्तीत्यर्थ। तस्य भिन्नकालगुणकेषु तेषु इत्यादि। असन्देहेति-तत्रेत्यादि। शङ्कते-तिडिति। अस्य-भाष्यस्य। हि-यत। कुत इत्यत आह-इहेति। इतीति—अत्र इति शेष। दित्वेति-दिव उदित्यनेन विहितोकारे इत्यादि। प्रत्ययेति-तिति प्रत्ययग्रहणमित्यादि। उत्पद्यते-अन्याहुरिति। इति-इत्यत्र।

उद्द्योते—अणुदित्विति-अणुदित्सूत्रे अणुग्रहणसामर्थ्यादित्यादि। तत्त्वेति-अभेदकत्वेत्यर्थ। एवमग्रेऽपि। दित्वे-उकारस्य दित्वे। तत्कालेति-तेनेत्यादि। एतद्दृष्ट्या-तपरसूत्रदृष्ट्या। तत्र-ऋदोरित्यत्र।

(इति सन्ध्यक्षरेष्वतपरपाठनिर्णय॥)

(अथ वर्णैकदेशग्रहणाग्रहणनिर्णय॥)

(भाष्यम्)

इदं विचार्यते—य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वेति॥ कुत पुनरियं विचारणा?॥ इह हि समुदाया अप्युपदिश्यन्ते, अवयवा अपि। अभ्यन्तरश्च समुदायेऽवयवः, तद्यथा वृक्षः प्रचलन् सहावयवैः प्रचलति। तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा॥

(प्रदीप) वर्णान्तरसमानाकृतय इति। आकारादिष्वकारादिसदृशा अवयवा ऋकारलृकारयो रेफलकारसदृशावयवौ सन्ध्यक्षरेष्वकारेकारोकारसदृशा, तत्र केवलवर्णकार्यमवयवेषु भवति न वेति विचार॥ इह हि समुदाया अपीति। ऋलृक्ओदैऔ इति॥ अवयवा अपीति। अइउण्ऋलृगिति॥ तत्र समुदायपरे निर्देशे सन्निहिता अप्यवयवा नान्तरीयकत्वादेवादिसंज्ञा न लभन्ते अवयवपरे च निर्देशे समुदायो न सज्ञाभाक् यथा हयवेत्यादावनचकस्य हलो दुरुच्चारत्वान्निर्दिष्टोऽप्यकारोऽन्यत्र प्राधान्येन निर्देशाद्धलादिसंज्ञा न प्रतिपद्यते इति दध्यत्रेत्यादावनच्क एव यणादेश प्रवर्तते। तत्रासत्याभ्येवादिसंज्ञायामयादय समुदायादेशा अपि नान्तरीयकत्वादवयवान्निवर्तयन्ति। एवं स्थिते अक्षइन्द्र इत्यादौ यत्रावयवकार्यं प्राप्नोति समुदायकार्यं च तत्रान्तरङ्गत्वाच्चेत्र च साक्षाच्चोदितत्वात्प्रत्यक्षत्वात्परत्वाच्चावयवकार्यप्रसङ्ग। अवयवावगतिपूर्वकत्वाद्धि समुदायावगमस्य समुदायकार्यं बहिरङ्गम्। अयादीनां चावकाश -अग्न आयाहीति॥ नत्वत्रापि यणादेशोऽवयवस्य प्राप्नोति॥ येन नाप्राप्ते इति वा मध्येऽपवादा इति वा यत एवायादयो बाधका स्यु। तत्र यथा दधीन्द्र इत्यत्र दधिशब्दस्य इकार सवर्णदीर्घत्वं प्रतिपद्यते, एवमैकारस्योऽपि प्रतिपद्येत। प्रत्याहारे एओङैऔजित्यत्रावयवाना प्राधान्येनानिर्देशादित्येव ग्रहणपक्षाशङ्काबीजमुपन्यस्तम्। इदानीमग्रहणपक्षाशङ्काबीजमुपन्यस्यते—अभ्यन्तरश्चेति। तिरोहितावयवाना समुदायकार्ये पारतन्त्र्यात् स्वकार्यस्याभयोः कत्वान्तरमिहवज्जात्यन्तरयोगाद्वर्णान्तरसारूप्यमात्रेण तत्कार्यप्रवर्तनादित्यर्थः।

(उद्द्योत) अवयवग्रहणेनावयवस्य शब्दग्रहणेन ग्रहणं स्यान्न वेति भाष्यार्थ। तत्फलितमाह—तत्र केवलेति॥ नन्वकारेण एडवयवग्रहणसन्देहपर अकारादीनामेङादिसंज्ञा प्राप्नोतीति विचारोऽपि कुतो नेत्यत आह—तत्र समुदायेति। अत एव प्राइत्यादौ न पररूपम्॥ तत्र दृष्टान्तमाह—अवयवपरे चेति। यथावयवपरे निर्देशे समुदायो न सज्ञाभाक् एव समुदायपरे निर्देशेऽवयवा न तद्भाज इत्यर्थ। तदुपपादयति—यथेति॥ अन्यत्रेति। सर्वेस्यावयवस्यान्यत्र पृथङ्निर्देशे समुदायनिर्देश स्वपर एव, सर्वेषामवयवस्यान्यत्रानिर्देशे तु समुदायनिर्देशोऽनिर्दिष्टावयवपर इति विवेक। नन्वेजादिसंज्ञानामवयवार्थत्वेऽपि कथमेचो निवर्तकेनायादिना तदवयवस्य निवृत्तिरत आह—तत्रासत्यामपीति। तन्निवृत्तिं विना समुदायनिवृत्ति कर्तुमशक्यत्वादिति भाव॥ अवयवकार्यं दीर्घं॥ समु-

दायकार्यम् ॥ तत्र च साक्षादिति । दीर्घे । यथादिकार्ये हि समुदायस्यप्राधान्येनावयवो नोद्दिष्टो न साक्षादिति भाव ॥ साक्षाच्चोदितत्व प्रयत्नभेदे हेतु ॥ न वर्णादिरनवकाशोऽत आह—अयादीनामिति ॥ नन्विति । तत्र विध्यन्तरपूर्वकोदाहि सर्वस्य बाधकस्यादिति भाव ॥ परिहरति—येनेति ॥ प्राधान्येनानिर्देशादिति । अस्यैकदेशत्वाभावेऽपि स्वरूपाकारेण ग्रहणं स्यादिति शेष ॥ भाष्ये अभ्यन्तरश्चेति । तदुच्चारणं विना समुदायोच्चारणस्यासंभवादित्यर्थ ॥ तदाह—तद्यथा वृक्ष इति ॥ तदुपपादयति—तिरोहितत्वादित्यादिना ॥ समुदायकार्ये पारतन्त्र्यादिति । समुदायसंपादनरूपे कार्ये पारतन्त्र्यादित्यर्थ ॥ स्वकार्यस्याप्रयोजकत्वादिति । स्वकार्यनिरूपितप्रयोजकत्वाभावादित्यर्थ ॥ तत्प्रयोजकत्वाभावे हेतु —तदसिद्धत्वादिति । तत्त्वतो नगराद्यभावेऽवयवेऽप्यवयवभाव इति भाव ॥

(तत्त्वालोक) भाष्ये वर्णेषु-आकारादिषु । वर्णैकदेशाः-आकारादयवयवाः । वर्णान्तरेति-स्वकारादीत्यर्थं । अवयवग्रहणेन-अवयवानव सदृशवर्णग्राहकत्वेन । ननु "कोटिद्वयस्य विज्ञान विचार इति कथ्यते । विचार्यमाणस्याज्ञानविषयीभूत उच्यते" । इति पदमञ्जर्युक्ते कोटिद्वयानुपस्थितौ कथमयं विचार इत्याशयेन पृच्छति-कुत इति । उत्तरयति-इहेति । वर्णसमाम्नाये इत्यर्थं । हि-यत । अवयवाः-अवयवा । तद्यथा-अत एव । तत्रेति-अत इत्यादि ।

प्रदीपे—सदृशा इति-अवयवा इत्यनुवर्तते । समुदायस्याकारं वर्णसमाम्नायानुपदिष्टत्वात् परित्यज्य गणयति-ऋलिति । अवयवपरे इति-पदे यदि । समुदाय इति -नान्तरीयकत्वात् सन्निहितोऽपीत्यनुवर्तते । अन्यत्र-अइउण्सूत्र । इति-इति हेतौ । तत्र-अवयवे । तत्र-अग्ने इन्द्र इत्यादौ । साक्षादिति-अवयवस्येत्यादि । हि-यत । अत्रापि-अग्ने आदाकीत्यत्रापि । इति-इत्यनेन । तत्र-अग्ने इन्द्र इत्यादौ । अपीति इकार दीर्घत्वमिति शेष । तिरोहितेति-समुदाये इत्यादि । स्वकार्येति-स्वसदृशवर्णान्तरकार्येत्यर्थं ।

उद्योते—पररूपमिति-एङि पररूपमित्यनेनेत्यादि । तद्भावः-तदभाव । अन्यत्र-अइउणित्यादौ । समुदायनिर्देशः-ऋ ऌ इत्यादिसमुदायनिर्देश । समुदायनिर्देशः-इय इत्यादिसमुदायनिर्देश । अनिर्दिष्टावयवस्य:-ऋ ॠ इत्यादिनिर्दिष्टावयवस्य । तदवयवस्य-तदवयवस्य । तिरोहितम्-अवयवनिष्ठरूपम् । विध्यन्तरेति-गुणादीनामपि । अस्य स्वस्य । तदुच्चारणम्-अवयवोच्चारणम् । तदवयवे-नरसिंहावयवे । एतदवयवे-नगरावयवे ।

(भाष्यम्)

पश्चात्र विशेषः ? ।

(तत्त्वालोकः) भाष्ये—पृच्छति-कथेति । अत्र-तत्र्यदि ।

(२१ प्रत्याख्यानाक्षेपवार्तिकम् ॥ ६ ॥)

॥ * ॥ वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः ॥ * ॥

(भाष्यम्)

वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति । स प्रतिषेध्य. ॥ अग्ने इन्द्र, वायो उदकम्, "अकः सवर्णे दीर्घः" इति दीर्घत्वं प्राप्नोति ॥

(प्रदीपः) समानाक्षरेति । समानशब्देन पूर्वाचार्यनिर्देशादकोऽभिधीयन्ते । दश समाना इति वचनात् । तेन समानकार्यं प्राप्नोतीत्यर्थं ॥

(उद्योतः) वचनादिति । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ दश समाना इति पूर्वव्याकरणवचनादित्यर्थं ॥ समानकार्यम् । अकूपमसमानाक्षरकार्यमित्यर्थं । सवर्णकार्यमिति । पाठे सवर्णदीर्घरूपकार्यमित्यर्थ ॥

(तत्त्वालोकः) भाष्ये - तेन तस्य ग्रहणमिति पक्षे दूषणमवर्णयति । चेदिति-यदीत्यर्थं । गृह्यन्ते, तदेति शेष । उदकमिति-इत्यादाविति शेष । इति-इत्यनेन । अस्य प्रयोगः प्राप्नोति शेष ।

(२२ आक्षेपान्तरवार्तिकम् ॥ ७ ॥)

॥ * ॥ दीर्घे ह्रस्वविधिप्रतिषेधः ॥ * ॥

(भाष्यम्)

दीर्घे ह्रस्वाश्रयो विधिः प्राप्नोति, स प्रतिषेध्यः । आलूय, प्रलूय "ह्रस्वस्य पिति कृति तुक्" इति तुक् प्राप्नोति ॥

(तत्त्वालोकः) भाष्ये—पुन रत पक्षे दोषमाह-दीर्घे इति । दीर्घघटको यो ह्रस्व तदाश्रय त स्थानित्वेन निमित्तत्वेन वा माश्रित्य यो विधि ह्रस्वस्य इत्योरस्य वा प्राप्तस्य प्रतिषेधो वक्तव्य इत्यर्थं । प्रलूयेति-इत्यादाविति शेष । इति-इत्यनेन ।

(आक्षेपबाधकभाष्यम्)

नैष दोष', आचार्यप्रवृत्तिर्ज्ञापयति-'न दीर्घे ह्रस्वाश्रयो विधिर्भवति' इति । यदयं दीर्घाच्छे तुकं शास्ति ॥

(उद्योतः) भाष्ये दीर्घाच्छे इति । दीर्घस्य पदे तुगिति शेषः ॥ ननु ह्रस्वाश्रये प्राप्ते इत्यत्र सिद्धे ह्रस्वान्तग्रहणसामर्थ्यादेव तुगिति चेन्न । पदान्तवाभावादित्याशयात् ॥

(तत्त्वालोक) भाष्ये—दोषं निरोद्धं परिहरति-नैष इति । कुत इत्यत आह-आचार्येति । यत इत्यादि । तुक् तावद्यं पदान्ताल् भाह-यदिति । यस्मादित्यर्थ । अयं-पाणिनि ।

उद्योते—दीर्घे पदान्ताच्छे । इतीव-इत्यनेनैव । पूर्वेणेति शेष ।

(आक्षेपसाधकभाष्यम्)

नैतदस्ति ज्ञापकम्, अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ॥ 'किम् ? ।' "पदान्ताद्वा" इति विभाषां वक्ष्यामीति ॥

(उद्योतः) अस्ति हीति । अत दीर्घादित्यस्याभावे तुकः पदान्ते नित्यः स्यादिति भाव ॥

(तत्त्वालोकः) भाष्ये—ज्ञापकत्वं खण्डयति-नैतदस्तीति । एतस्य-दीर्घात् । ज्ञापकमिति—आदेवादिः । हि—यत । एतस्य-दीर्घात् इत्यस्य । किमिति-प्रश्ने इति शेष । इति-इत्यनेन । ह्रस्वाश्च नत्र दीर्घग्रहणस्य पदान्ताद्वेत्यत्रानुवर्तनेन सार्थक्यमातन्त्र न तस्य ज्ञापकत्वमिति भाव ।

(आक्षेपबाधकभाष्यम्)

यत्तर्हि योगविभागं करोति । इतरथा हि "दीर्घात्पदान्ताद्वा" इत्येव ब्रूयात् ॥

(तत्त्वालोकः) भाष्ये—तस्य ज्ञापकान्तरमाह–यदिति । करोतीति–तत् तस्य ज्ञापकमिति शेषः । हि–यतः ।

(आक्षेपभाष्यम्)

इह तर्हि-खट्वाभिः, मालाभिः, "अतो भिस ऐस्" इत्यैस्भावः प्राप्नोति ॥

(तत्त्वालोकः) भाष्ये—एवं सति ज्ञापकस्य सजातीयापेक्षत्वात् तेनाकारेऽपि प्राप्नोति इति वार्तिककृत् लक्ष्यमाह–इहेति । मालाभिः–मालाभिरिति । इति–इत्यनेन ।

(आक्षेपबाधकभाष्यम्)

तपरकरणसामर्थ्यान्न भविष्यति ॥

(तत्त्वालोकः) भाष्ये—तदपि निराकरोति तपरेति । अत इत्यादि । न–तत्र स न ।

(आक्षेपभाष्यम्)

इह तर्हि—याता वाता "अतो लोप आर्धधातुके" इत्यकारलोपः प्राप्नोति ॥

(तत्त्वालोकः) भाष्ये—पुनः तस्य तादृशं लक्ष्यान्तरमाह इहेति । वाता वातेति । इति–इत्यनेन ।

(आक्षेपबाधकभाष्यम्)

ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति ॥

(तत्त्वालोकः) भाष्ये—तदपि खण्डयति ननु चेति । एवेति–अत्र न इति शेषः ।

(आक्षेपसाधकभाष्यम्)

अस्ति ह्यन्यत्तपरकरणे प्रयोजनम् ॥ किम् ? । सर्वस्य लोपो मा भूदिति ॥

(तत्त्वालोकः) भाष्ये—अतो लोप इत्यत्र तपरकरणस्य सामर्थ्यं विघटयति–अस्तीति । अत्रेति शेषः । किमिति–अन्यदिति शेषः । सर्वस्येति तदभावे तेन सवर्णग्रहणात् सम्पूर्णस्य आकारस्येत्यर्थः । मा भूदिति–किन्त्वाकारैकदेशस्य अकारस्य लोपो यथा स्यादिति शेषः ।

(प्रयोजनबाधकभाष्यम्)

अथ क्रियमाणेऽपि तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भवति ? ॥

(तत्त्वालोकः) भाष्ये—तत्र तपरकरणप्रयोजनासिद्धिं शङ्कते–अथेति । तत्रेति शेषः । परस्य–आकारैकदेशस्य अकारस्य । पूर्वस्य–तस्य । अस्य लोप इति शेषः । तथा च पुनः सर्वस्य आकारस्य लोपप्रसक्तिरिति भावः ।

(प्रयोजनसाधकभाष्यम्)

परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च ॥

(प्रदीपः) असिद्धत्वाच्चेति । असिद्धवदत्राभादित्यनेन ।

(उद्द्योतः) असिद्धवदिति । चिणो लुङ्न्यायेनेति भावः ।

(तत्त्वालोकः) भाष्ये—तां परिहरति–परेति । तथा च तत्र तपरकरणसत्त्वे आकारस्थस्यैकदेशस्य अकारस्य लोपो भवति तदसत्त्वे तु सम्पूर्णस्य आकारस्य लोपः स्यादिति तपरकरणं सार्थकमेवेति भावः ।

उद्द्योते–चिण इति–यथा चिणो लुगित्यनेन तस्य लुकि, चिणः परत्वात् तरामित्यस्यापि प्रसक्तौ, न तस्य तत्र लुकोऽसिद्धता स्वीक्रियते, तथा अत्रापि अतो लोप इत्यनेन परलोपे, पूर्वस्यापि तस्मिन् प्रवृत्ते, तत्र तस्य परलोपस्यासिद्धता क्रियते इति भावः ।

(समाधानसाधकभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'नाकारस्थस्याकारस्य लोपो भवति' इति । यदयम् "आतोऽनुपसर्गे कः" इति ककारमनुबन्धं करोति ॥ कथं कृत्वा ज्ञापकम् ? ॥ कित्करणे एतत्प्रयोजनम्- क्ङितीत्याकारलोपो यथा स्यादिति । यद्याकारस्थस्याकारस्य लोपः स्यात्, कित्करणमनर्थकं स्यात् । परस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्याद्—गोदः कम्बलद इति । पश्यति त्वाचार्यो—नाकारस्थस्याकारस्य लोपः स्यादिति, अतः ककारमनुबन्धं करोति ॥

(तत्त्वालोकः) भाष्ये—शङ्कां वार्तिककृत् पूर्वपक्षिणं वारयितुं ज्ञापकान्तरमवलम्बते–एवमिति । यत्–यस्मात् । अयम्–पाणिनिः । इति–इत्यत्र । कृत्वेति तदुच्यतेति शेषः । किदिति–उक्ते त्यादि । क्ङितीति–क्ङिति चेत्यनेन । स्यादिति–तर्हि वदति शेषः । हि–यतः ।

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । उत्तरार्थमेतत्स्यात्–"तुन्दशोकयोः परिमृजापनुदोः" इति ॥

(उद्द्योतः) भाष्ये उत्तरार्थमेतदिति । इह किंचित्रपो इतीति न्यायस्तु नास्ति । अत्र केवलाकारोच्चारणे उत्तरत्र ककाराकारयोरुच्चारणे गौरवादिति भावः ॥

(तत्त्वालोकः) भाष्ये—तत्र किंकरणस्य ज्ञापकतां विघटयति–नेति । एतत्–तत्र किंकरणम् । ज्ञापकमिति–तदेवेत्यादि । कुत इत्यत आह–उत्तरेति ॥

उद्द्योते–इह किञ्चित्त्रपो इतीति न्यायस्तु लाघवे मयोपपादयिष्यते । अत्र–आतो नुपसर्गे इत्यत्र । उत्तरत्र–तुन्दशोकयोरित्यत्र ।

(समाधानसाधकभाष्यम्)

यत्तर्हि "गापोष्टक्" इत्यनन्यार्थं ककारमनुबन्धं करोति ॥

(प्रदीपः) यत्तर्हीति । असति कित्त्वे आकारस्थस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपस्य धातु प्रयत्नवद्भा । द्वितीयादेव्य आतो धातोरित्याकारलोपप्रसङ्गः । नैष दोषः, सन्निपातपरिभाषया लोपो न भविष्यति । अकार ह्याश्रित्य नद्यादि इतो लोपस्यानिमित्तम् । दर्धं तु कथयेति निपातयिष्यते ॥

(उद्द्योतः) सन्निपातेति । न व दीर्घेणैव स निवर्तितो, दीर्घस्यापि निमित्तत्वेन न तस्य सन्निपातकृतः । लोपे तु तस्यापि

निवृत्तेस्तद्विरोधस्य स्पष्टत्वादिति भाव ॥ परे तु जातिपक्षे सवर्णत्वं व्याप्यजातिनिर्देशस्यैव बोधकमिति वत्वनिमित्तसन्निपातस्य दीर्घस्य निवृत्तिर्नैव न कस्य तदनुवृत्तिप्रसमाद्यपाद्यात्वमाति तस्मादिमनिपातनिमित्तो दीर्घो न इत्वनिमित्तविघातकोऽयनिमित्तम्। सन्निपातपरिभाषायाश्च तस्मवृत्ते प्राक् निमित्तभूतो यादृश सन्निपातः तदतिरिक्तसन्निपातस्य स्वयमनिमित्तमित्यर्थः । मात्राकालिकत्वसमानाधिकरणव्यापकजातिनिर्देशपक्षे ऽप्यन्तःसंज्ञा सवर्णनिमित्तं स्यादिति कृत्स्नमेजन्तत्वमवश्यमागमाश्रयत्वा यादेशनिमित्तसन्निपात च न तेऽपि सर्वेऽपि सन्तीति वदन्ति॥ प्रावृषेत तद्व्यवहार इत्यादौ 'रो रि' लोपोऽपीति तु नाशङ्क्यम्, तस्याभिक्तो ऽभ्यागमत्वेन तेन व्यवधानाप्रसक्ते ॥

(छायाऽऽलोकः) भाष्ये—एव सति तस्य अनन्यार्थत्वादिदं ज्ञापकमाह-यद्धीति। इति-स्थव। करोतीति-तद् वस्य ज्ञापकमिति शेष ।

प्रदीपे—तस्य ज्ञापकताप्रयोजकम् अनन्यार्थत्व विघटयितु शङ्कते-नन्विति। तस्येति शेष । अकारस्य-उत्तरभागस्य। अन्तवद्भावादिति-धात्ववयवत्वे, तस्य गुणे चेत्यनेन दीर्घे, तदेकदेशविकृतन्यायेन धात्वत्वदर्शनादिति शेष । इति-इत्यनेन। तस्य क्रियते सति तु तत्र "आतो लोप इटि" इत्यनेनाल्लोपे, प्रत्ययाकारस्य गुणे चेत्यनेन दीर्घेऽपि तत्र धात्ववयवत्वाभावात् "आतो धातो" रित्यस्याप्राप्तिरिति भाव । द्वि-त्व । ननु तथा सत्र दीर्घत्वाभावस्तिरिति कुतो नेत्यत आह-दीर्घत्वमिति । तत्रैत्यादि ।

उद्द्योते—नचेति-अस्य निर्वाहित इत्यनेनान्वय । स-चकार । तथा-दीर्घत्वे । तस्यापि-अत्वस्यापि । तद्विरोधस्य-सन्निपातपरिभाषाविरोधस्य । व्याप्येति-मत्वादीनि शेष । इति-इति दैवो । सन्निपातस्य-एत्वाकारयोसन्निपातस्य । यमादीति-प्रत्ययेन शेष । सन्निपातकस्य-स्वप्रवृत्तिनिमित्तभूतस्य सन्निपातविघटकस्य। तथा च इत्थ तद्विघाते न ना परिभाषा प्रवर्तते इति भाव । ननु भाष्यस्था ककारलकारयोरपि दीर्घोद्भावन कुतो न इत्यत आह-प्रावृषेति । तस्य-ऋकारादे । तेन-प्रथा । तद्भावे:-रोरीत्यादत्वर्थं ।

(५४ आक्षेपवार्तिकम् ॥ ८ ॥)

॥ * ॥ एकवर्णवच्च ॥ * ॥

(भाष्यम्)

एकवर्णवच्च दीर्घो भवतीति वक्तव्यम् ॥ किं प्रयोजनम्? ॥ वाचा तरतीति वाग्लक्षणस्तन्मा भूदिति। इह च वाचो निमित्तम्, "तस्य निमित्तं संयोगोत्पातौ" इत्यनुवर्तमाने "गोद्व्यच" इति द्व्यच्लक्षणो यन्मा भूदिति ॥

(प्रदीपः) एकवर्णवदिति । भवदवयवेदसमुदायस्य [illegible] कार्यं प्राप्नोतीति दीर्घविधिरिति [illegible] ॥

(छायाऽऽलोकः) भाष्ये—वर्णदेशे [illegible] ठगित्यत्र इति इत्यत्र [illegible] एकेति । [illegible] इति भाव । [illegible] इति शेष । तस्यति-[illegible] इति शेष । इति-इति दैवो । निमित्तम्-[illegible] । इति-इति दवित् । इति-इति दैवो । इति-इति दैवो । प्रदीपे—इतिनिकरणे दैवो ।

(आक्षेपबाधकभाष्यम्)

अत्रापि गोनीग्रहणं ज्ञापकम्—'दीर्घाद् द्व्यच्लक्षणो विधिर्न भवति' इति ॥

(प्रदीपः) गोनीग्रहण ज्ञापकमिति । समाधानेन शास्त्र वर्णावयवाश्रयकार्याभावस्येति अत्र पदे ऽध्यायवेदः पदान्ताद् इत्यापि न भवति ॥

(उद्द्योतः) अग्रे इन्द्रेत्यादौ सवर्णदीर्घव्यावृत्तये आह—सामान्येनेति ॥ गोद्व्यचोऽसङ्ख्येति गोग्रहणं नौद्व्यचष्ठन्निति नौग्रहणम्॥ वर्णावयवाश्रयकार्याभावस्येति । वर्णावयवेषु भेदेनाप्रतिभासमानेषु वर्णाश्रयकार्याभावस्येत्यर्थ । तेन मातॄणामित्यादौ णत्वादिसिद्धिः । भेदेन प्रतिभासात् ॥

(छायाऽऽलोकः) भाष्ये-तद् परिहरति-अत्रेति । प्रदीपे-इति-इति दैवो । उद्द्योते—इति-शेषत्र । एकमपेऽपि । भेदेनेति तत्र वर्णावयवस्येत्यादि । तथा च तेन तेन महणमित्यत्र पक्षे न कोऽपि दोष इति सिद्धम् ।

(सर्वाक्षेपपरिहारभाष्यम्)

अयं तु सर्वेषामेव परिहारः—

(५५ सिद्धान्तसमाधानवार्तिकम् ॥ ९ ॥)

॥ * ॥ नाव्यपवृक्तस्यावयवे तद्विधिर्यथा द्रव्येषु ॥ * ॥

(भाष्यम्)

नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्भवति यथा द्रव्येषु। तद्यथा द्रव्येषु "सप्तदश सामिधेन्यो भवन्ति" इति न सप्तदशारत्निमात्रं दारुमग्नावभ्याधीयते ॥

(प्रदीपः) नाव्यपवृक्तस्येति। व्यपवर्गो व्यवृत्त भेद । तेनाव्यपवृक्तस्याभिन्नबुद्धिविषयस्यैकस्याव्यवच्छेदमाश्रय समुदायावयवेऽवयवस्याश्रितस्य विधिः पृथग्भूतवर्णविधिर्भवतीत्यर्थ ॥ अव्यपवृक्तस्यावयवस्येति । व्यधिकरणे षष्ठ्यौ, अव्यपवृक्तस्य समुदायस्य योऽवयवस्तस्येत्यर्थ । न हि गोमयमात्रेण कश्चिदेव विदधाति, अपि तु तत्र तद्बुद्धिरस्ति इत्येवेत्यर्थ । माषा न भोक्तव्या इति निषेधस्तु मिश्रेष्वपि प्रवर्तते ॥ तत्र तद्बुद्धिरस्त्येव [illegible] ॥ सप्तदशेति। सामिधेनीशब्द ऋचां वाचकः तास्वपत्यर्थेषु वर्तते। तत्र सप्तदशारत्नि काष्ठं सप्तदश काष्ठानि इति [illegible] व्याख्यानम् ॥

(उद्द्योतः) सामान्यापेक्षज्ञापक विनापि व्यादेः निर्वाहमाह—भाष्ये—अयमित्यादि। अभिन्नबुद्धिविषये तस्य व्यवहार—पृथगाकारमसमानाकारस्येति ॥ समुदायस्य योऽवयव इति। [illegible] । व्यधिकरणे इति । [illegible] अव्यपवृक्तस्येति अर्थ, [illegible] भाव ॥ भाष्ये अवयवाश्रयः । [illegible] गुणमाह—न हीति । ननु [illegible] तेन काष्ठमात्राभ्याधीयत इति [illegible] आह—सप्तदशेति । [illegible] आह । तत्र सप्तदशेति । [illegible] निरन्तरं [illegible] । [illegible]

लिमात्रत्वं भवति, परस्यापि तावत्त्वमस्ति, तथाप्यव्यपवृक्तसमुदायावयवत्वाद् न व्यपवृक्ताश्रयकार्यप्रसङ्ग इति भावः ॥

(तत्त्वालोक.) भाष्ये—द्रव्येषु-द्रव्येष्विति । इति-इ येनाव्यवप्रदीपे—मिश्रेषु-माषमिश्रितवण्डुलादिषु । कुत इत्यत आह-तत्रेति । माषमिश्रितवण्डुलादिष्वित्यर्थः । यत इत्यादि । तद्बुद्धि-माषबुद्धिः । अत्र अस्तीति शेषः । तत्र हेतुमाह-तद्वसेति । माषरसेत्यर्थः । तस्य-सप्तदशप्रादेशकाष्ठस्य । अत्र अग्नाविति शेषः ।

उद्द्योते—सामान्येति-तयो गोनोर्ग्रहणस्य तादृशेत्यादि । ज्ञापकं-ज्ञापकत्वम् । न्यायेन-न्यायेनात्र । सामानाधिकरण्येनेति-अव्यपवृक्तसमुदायत्वे इत्यादि । अन्वये इति-अवयवस्य विशेषणत्वमिति शेषः । मात्रत्व-प्रमाणत्वम् । एकस्यापि सप्तदशप्रादेशकाष्ठस्य । तावत्त्वं-सप्तदशारत्निमात्रत्वम् ।

(दृष्टान्तवैषम्यभाष्यम्)

विषम उपन्यासः, प्रत्यृचं चैव हि तत्कर्म चोद्यते । असंभवश्चाग्नौ वेद्यां च ॥

(प्रदीप.) असंभव इति । अर्धचतुर्हस्ता हि वेदिः ॥

(उद्द्योत.) न व्यपवृक्तत्वमात्रनिबन्धनं तदनभ्याधानं, किं तु असंभवनिबन्धनमित्याह—भाष्ये विषम इति । आहितपुनर्ग्रहणस्य निषिद्धत्वादेकस्य काष्ठस्य प्रत्यृचमाधानं न सम्भवतीति भावः ॥ युक्त्यन्तरमाह—असंभवश्चेति ॥ तमुपपादयति—अर्धचतुर्हस्तेति । अर्धेन चतुर्हस्तेति तृतीयातत्पुरुषः । समिधोऽग्निवेदिवद्दिर्भावनिषेधाच्चासम्भव इति भावः ॥

(तत्त्वालोक.) भाष्ये—एकदेश्युक्तं दृष्टान्तं सिद्धान्ती विघटयति-विषम इति । हि-यत । तत्कर्म-समिध आधानं कर्म । असम्भव इति-सप्तदशप्रादेशकाष्ठाधानस्येत्यादि । प्रदीपे—हि-यतः ।

उद्द्योते—तदनभ्याधानं-सप्तदशप्रादेशकाष्ठस्यैकस्य अनभ्याधानम् ।

(दृष्टान्तान्तरभाष्यम्)

यथा तर्हि "सप्तदश प्रादेशमात्रीराश्वत्थीः समिधोऽभ्यादधीत" इति न सप्तदशप्रादेशमात्रं काष्ठमग्नावभ्याधीयते ॥

(प्रदीपः) यथा तर्हीति । अप्रमाणत्वात्संभव इति भावः ॥

(तत्त्वालोकः) भाष्ये—एकदेशी दृष्टान्तान्तरमाह-यथेति । इति-इत्येवंविना । प्रदीपे—असंभवेति-असंभवेत्यादिः ।

(दृष्टान्तवैषम्यभाष्यम्)

अत्रापि प्रतिप्रणवं चैतत्कर्म चोद्यते । तुल्यश्चासंभवोऽग्नौ वेद्यां च ॥

(तत्त्वालोकः) भाष्ये—पूर्वदृष्टान्तस्येव अस्य दृष्टान्तस्यापि निराकरणमाह-अत्रेति । दृष्टान्ते इति शेषः । च-हि । एतत्कर्म-समिधोऽग्नौ आधानं कर्म । आहितपुनर्ग्रहणस्य निषिद्धतया एककाष्ठस्य प्रतिप्रणवं तत्राधानं न सम्भवतीत्याशयः । तुल्यश्चेति-पूर्वदृष्टान्ते नात्र दृष्टान्ते इत्यादि । सप्तदशप्रादेशमात्रकाष्ठाधानस्येति शेषः । वेद्याम्-अर्धचतुर्हस्तायाम् । चेति-समिधोऽग्निवेदिवद्दिर्भावनिषेधादिति । शेषः ।

(सिद्धान्तदृष्टान्तभाष्यम्)

यथा तर्हि "तैलं न विक्रेतव्यम्" "मांसं न विक्रेतव्यम्" इति व्यपवृक्तं च न विक्रीयते, अव्यपवृक्तं गावः सर्षपाश्च विक्रीयन्ते । तथा "लोमनखं स्पृष्ट्वा शौचं कर्तव्यम्" इति व्यपवृक्तं स्पृष्ट्वा नियोगतः कर्तव्यम्, अव्यपवृक्ते कामचारः ॥

(प्रदीप.) अव्यपवृक्तमिति । व्यपवर्गं बाधा ...

(उद्द्योत.) अव्यपवृक्तमिति । अर्थाभावे ... तदाह व्यपवर्गस्येति । वस्तुतः ... व्यपवृक्तं ... सरूपा गावः सर्षपाश्चेत्यर्थः ... मान्ये कामचार इति । स्पर्शे कामचारेणैव शौचं भाव इत्यर्थः

(तत्त्वालोकः) भाष्ये – सिद्धान्ती दृष्टान्तमाह-यथेति । इति-इति निषेधवचनसत्त्वेन । अव्यपवृक्तमिति-अत्र नवीयाया अभावः । किन्त्वित्यादि । इति-इति विधिवाक्येन । कामचार इति-स्पृष्टे इत्यादि । विधेय इति शेषः ।

उद्द्योते अयमिति-अव्यपवृक्तमित्यत्रेत्यर्थः । तथा चेति शेषः । स्पर्शे-अव्यपवृक्तस्पर्शे ।

(आक्षेपभाष्यम्)

यत्र तर्हि व्यपवर्गोऽस्ति ॥ क्व च व्यपवर्गोऽस्ति ?॥ सन्ध्यक्षरेषु ॥

(प्रदीप.) यत्र तर्हीति । ऐ औ इत्यत्र हि स्फुटोऽकारप्रतिभासोऽस्ति ॥

(उद्द्योत.) एदा महिस्वावर्णेन व्यपवर्गस्यास्पष्टत्वात्सन्ध्यक्षरग्रहणमैजभिप्रायमित्याह—ऐ औ इति ॥

(तत्त्वालोक.) भाष्ये नन्वेवं समानाक्षरे अव्यपवृक्तेऽकारादिषु सम्भवेऽपि व्यपवृक्तेष्वैकारादिषु दोषस्तदवस्थ एवेत्याशयेन शङ्कते-यत्रेति ।

(४६ समाधानवार्तिकम् ॥ १० ॥)

॥ ॐ ॥ सन्ध्यक्षरेषु विवृतत्वात् ॥ ॐ ॥

(भाष्यम्)

यदत्रावर्णम्, विवृततरं तदन्यस्मादवर्णाद् । ये अपीवर्णोवर्णे, विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम् ॥

(प्रदीप.) विवृतत्वादिति । अकारस्य विवृतोपदेशादत्र प्रकर्षो विवक्षितः । तदाह—विवृततरमिति । तत्र प्रयत्नभेदात्सावर्ण्याभावेन सन्ध्यक्षरावयवस्य ग्रहणं नास्तीत्यर्थः । तदेवमाकारादेर्यावदा कारेण सन्ध्यक्षरावयवस्य ग्रहणं सन्ध्यक्षरस्यैव तन्त्राण्वर्णे । अकारस्यस्तु रेफो भेदेन प्रतिभासादृश्याने इति तुल्यादिसिद्धिः ॥

(उद्द्योतः) अकारस्येति । यद्यप्यैचो विवृततमास्तथापि विवृततरत्वमस्त्येवेति भावः ॥ प्रयत्नभेदादेव एचोः परस्परं सावर्ण्याभावः । एदौ विवृततरत्वादैचौ विवृततमत्वादिति बोध्यम् ॥ कुड़ादीति । आदिना चकारादेः इत्यत्र लत्वम्, मातृणामित्यादौ णत्वं चेति बोध्यम् ॥

(तत्त्वालोकः) भाष्ये—समाधत्ते-सन्ध्यक्षरेष्विति । अत्र—ऐ, औ, इत्यत्र । अन्यस्माद्-"अक" इत्यादिस्थात् । एवमग्रेऽपि ।

प्रदीपे—अत्र-[illegible] । [illegible]—तद्वेव मिति । [illegible] । सन्ध्यक्षरस्य [illegible]—भेदेन [illegible] । असावर्ण्यादिति-अग्रहणमिति शेष । इति-[illegible]।

उद्योते—तथापीति-[illegible] । [illegible] मात्रे [illegible]मिति भाव । योऽयमिति-यथा च न [illegible] दिति भाव ।

(अग्रहणपक्षाभ्युपगमभाष्यम्)

अथवा पुनर्न गृह्यन्ते ।

(प्रदीप) अथवेति । [illegible] वर्णानां समुदाये नास्ति सत्त्वम्। समुदायवाचोयुक्तिरपि [illegible] वर्णान्तरे न [illegible], [illegible] [illegible] प्रवृत्ता ।

(उद्योत) सादृश्याच्चेति । चत्वर्थे । समुदाये [illegible] रादौ ॥ सत्यपि गोसादृश्ये गवये गोत्वस्येव सन्ध्यक्षरावयवेषु [illegible] ग्रहणं नेति भाव ॥ ऐका रादीनामेकैकस्य [illegible] एवैषा [illegible] प्रतिभाम इति तदेवाह—समुदायवाच इति ॥ भ्रान्तिवशादिति । [illegible] । एवं च भ्रान्तिरेव [illegible] बोधमिति भाव ॥ अत एव गोनीग्रहणं चरितार्थम् ॥

(सारालोक) भाष्ये—अग्रहणपक्षेऽपि [illegible] विशेषवचनं विनैव [illegible] अथवेति ।

प्रदीपे—नेति-[illegible]मित्यादिः । सादृश्याच्चेति-[illegible] । तत्र-[illegible] ।

उद्योते—अवयवेषु इति-[illegible] । ग्रहणमिति-[illegible] । आह—[illegible] । तत्र [illegible]—ऐकारादीति । अत एव-[illegible] । एषां-सन्ध्यक्षरादीनाम् । अत एव-[illegible] ।

(२७ अग्रहणपक्षदूषणवार्तिकम् ॥ ११ ॥)

॥ * ॥ अग्रहणं चेन्नुड्विधिलादेशविना-
मेषु ऋकारग्रहणम् ॥ * ॥

(भाष्यम्)

अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम्। "तस्मान्नुड् द्विहलः" ऋकारे चेति वक्तव्यम्॥ इहापि यथा स्यात्—आनृधतुः, आनृधुरिति। यस्य पुनर्गृह्यन्ते 'द्विहलः' इत्येव तस्य सिद्धम्॥

(उद्योतः) [illegible] विनामो [illegible]॥

(सारालोक) भाष्ये—अग्रहणपक्षे दूषणमाह-अग्रहणमिति। [illegible] । [illegible]—इहेति । यस्येति-[illegible] । इत्येव-[illegible] । सिद्धम्-[illegible] ।

(अग्रहणपक्षदूषणोद्धारभाष्यम्)

यस्यापि न गृह्यन्ते, तस्याप्येष न दोषः। द्विहल्ग्रहणं न करिष्यते। तस्मान्नुड् भवतीत्येव॥

(सारालोक) भाष्ये—[illegible]—यस्येति । [illegible] आह-द्विहल्विति । [illegible] । तस्मादिति-[illegible] । इत्येव-[illegible] ।

(आक्षेपभाष्यम्)

यदि न क्रियते, आटतुः, आटुरित्यत्रापि प्राप्नोति॥

(सारालोकः) भाष्ये—[illegible]—यदीति । तत्र द्विहल्ग्रहणमिति शेष । क्रियते इति-[illegible] आटुरित्यादावपि [illegible] इति शेष ।

(आक्षेपबाधकभाष्यम्)

अश्नोतिग्रहणं नियमार्थं भविष्यति—अश्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपधस्येति॥ [नुड्विधिः]॥

(प्रदीपः) अश्नोतेरेवेति । [illegible] निवर्तते, न [illegible] सामान्यापेक्षत्वान्नियमज्ञापकस्य ॥

(उद्योतः) ननु विकरणविशेषनिर्देशेन [illegible] आह—न [illegible]रेवेति । तथा हि सति [illegible] भाव ॥ नियमज्ञापकस्य नियमबोधकस्य ॥

(सारालोक) भाष्ये—[illegible]—अश्नोतीति ।

उद्योते—तथा हि सति-[illegible] निवार्यं [illegible] । यदेविति-न तु [illegible] शेष ।

(आक्षेपवार्तिकखण्डभाष्यम्)

लादेशे च ऋकारग्रहणं कर्तव्यम्। "कृपो रो लः" ऋकारस्य चेति वक्तव्यम्। इहापि यथा स्यात्—क्लृप्तः क्लृप्तवानिति। यस्य पुनर्गृह्यन्ते, र इत्येव तस्य सिद्धम्॥

(सारालोकः) भाष्ये—अग्रहणमिति [illegible]-लादेशे इति । [illegible]—इहेति । इत्येव-[illegible] ।

(आक्षेपनिरासभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। ऋकारोऽप्यत्र निर्दिश्यते॥ कथम्?॥ अविभक्तिको निर्देशः—कृप, उः, रः, लः = "कृपो रो लः" इति॥ अथवा उभयतः स्फोटमात्रं निर्दिश्यते—रश्रुतेर्लश्रुतिर्भवतीति॥ [लादेशः]॥

(प्रदीपः) अविभक्तिक इति । [illegible] । स्फोटमात्रमिति । [illegible] ॥

(उद्योतः) [illegible]

प्रसङ्गे लकारत्वमाम स्फोट इत्यर्थः ॥ एवं च कृपावपि तत्प्रवृत्ति सम्भवत्येव। तत्रापि रेफत्वभासस्सत्वात्। आकारादौ तु नैव एत्वाय वमाम इति न तत्राकारावमामप्रयुक्तकार्यापत्तिः। तदुक्तं रश्रुतेरित्यादि। यत्तु स्वतन्त्रास्वरत्वमसाधारणजातिपरत्वमैतद्भाष्यं तन्न। तत्र। तद्रूपजातौ मानाभावात्। नरसिंहदृष्टान्तानुपपत्तेश्च सादृश्यात् प्रत्यभिज्ञेत्यादिस्वोक्तिविरोधाच्च। किं चैवं सति रजातेरिवैव मत्वानर्थेदेव ॥ किं च तादृशजातिसत्त्वे वर्णैकदेशानामपि तत्मानित्वेन वर्णग्रहणेन ग्रहणप्रसक्त्यैव सिद्धया ग्रहणपक्षमुक्त्वाऽथ वा न गृह्यन्त इति पक्षे तत्समाधानपरभाष्यासङ्गतेः। अत एवाङ्गमे रषाभ्यामिति सूत्रे-यथा नरसिंहावयवानां नरत्वसिंहत्वजात्योर्योगाभावात् पुरुषकृतात्माभ्यामेकार्थनियोगाभावः, एवं वर्णैकदेशयोरपीति कैयट आहेति वदन्ति ॥

(तत्त्वालोकः) भाष्ये—तत् स्पष्टयति-यस्येति। कुत इत्यत आह ऋकार इति। यत इत्यादि। अत्र-कृपो रो लः इत्यत्र। कृप इति-अस्य लुप्तषष्ठीकस्य तन्त्रेणावृत्त्या वा ऋके रेफे चावय दर्शनं च कृपो रेफस्य ल इति, कृपिघटकऋकारावयवो यो रेफः एकम इश तस्य ल इति च तदर्थः। एवञ्च न तत्रानुपपत्तिरिति भावः। उभयतः-उद्देश्यविधेययोः।

प्रदीपे-तत्र-कृपो रो लः इत्यत्र। विभागमिति-करणेऽपि कारे इत्यादि। आदेश-रेफस्य लादेशः।

उद्द्योते—पद इति-तत्रेति शेषः। कथमिति-तदिति शेषः। तत्सदृश-रेफसदृशः। सामान्येति-जातीत्यर्थः। इति-इति हेतौ। तस्य-स्फोटस्य। रत्ववत्-जात्यौ। अस्य-कृपो रो ल इत्यस्य साम्प्रवृत्ति-कृप इत्यस्य प्रवृत्तिः। तत्रापि-कृपावपि। इति-इति हेतौ। तत्र-आकारादौ। ऋकारावयवे रत्वादिजात्यभ्युपगमे नरसिंहावयवे नरत्वजातेरभ्युपगमे च ऋकारादिनरसिंहयो दृष्टान्तदार्ष्टान्तिकते नोपपद्येते इत्याशयेनाह-नरेति। प्रत्यभिज्ञेति-न तु समानजातिमत्त्वादिति शेषः। तादृशेति-अवयवानवयवसाधारणेत्यर्थः।

(आक्षेपवार्तिकसङ्ग्रहभाष्यम्)

विनामे ऋकारग्रहणं कर्तव्यम्। "रषाभ्यां नो णः समानपदे" ऋकाराच्चेति वक्तव्यम्। इहापि यथा स्यात्-मातॄणां पितॄणामिति। यस्य पुनर्गृह्यन्ते रषाभ्यामित्येव तस्य सिद्धम् ॥

(तत्त्वालोकः) भाष्ये—वक्तव्यम् अग्रहणमिति चैकभाग व्यावर्ष्ट-विनेति। कुत इत्यत आह-इहेति। इत्येव-इत्यनेनैव।

(अग्रहणवादिभाष्यम्)

न सिध्यति। यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति ॥

(प्रदीपः) यत्तदिति। रेफाद्भक्तेरिति समानाधिकरणे पञ्चमी।

(तत्त्वालोकः) भाष्ये—तद् निराकरोति अग्रहणवादी-नेति। तस्य तदिति शेषः। कुत इत्यत आह-यत्तदिति। यदित्यर्थः। यत इत्यादि। भक्ते-भागात्। तेन-भक्त्या। नेति-तत्र तदिति शेषः।

(ग्रहणवादिभाष्यम्)

मा भूदेवम्। अड्व्यवाय इत्येव सिद्धम् ॥

(प्रदीपः) अड्व्यवाये इति। ऋकारेण यथा दीर्घो गृह्यते एवमृकारभागोऽपीत्यर्थः ॥

(उद्द्योत) ऋकारेणेति। ऋकारावयवस्य रेफस्यैव तदनुमा स्यापि केनचित्कारादिना अड् गादत्वमिति मन्यत ॥

(तत्त्वालोक) भाष्ये ग्रहणवादी स्वेष्टं साधयति-मा भूदिति। न भवतीत्यर्थः। कुत इत्यत आह-अडिति। इत्येवेति-इत्येव नुवृत्तिसत्त्वादित्यर्थः। तत्र तेन तदिति शेषः। प्रदीपे—भाग-भक्त्या उद्द्योते-रेफस्यैव रेफस्य रेफेण। तदिति-ऋकारावयवेत्यर्थः।

(अग्रहणवादिभाष्यम्)

न सिध्यति। वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते, ये व्यपवृक्ता अपि वर्णा भवन्ति। यच्चापि रेफात्परं भक्तेः, न तत्क्वचिदपि व्यपवृक्तं दृश्यते ॥

(प्रदीप) न सिध्यतीति। तस्य भागस्य स्फुटप्रतिभासाविरहात् जात्यभिव्यक्तिहेतुत्वाभावाच्चेति भावः ॥

(उद्द्योत) जात्यभिव्यक्तीति। अत्वादिजातीत्यर्थः। एव च न केनापि तद्ग्रहणमिति भावः। अत्र जात्यभिव्यक्तिहेत्वभावे च स्फुटप्रतिभासाविषयत्वं हेतुः चात्र हेतौ अतो न सिध्यतीत्यर्थः।

(तत्त्वालोक) भाष्ये—अग्रहणवादी तद् खण्डयति-नेति। तस्य तेन तदिति शेषः कुत इत्यत आह-वर्णेति। यत इत्यादि। वर्णा-वर्णग्रहणा प्रदीपे—तस्य भागस्य ऋकारावयवस्य अजभा उद्द्योते—तदिति-ऋकारावयववाचित्यर्थः। अत्र-ऋकारावयववाचि।

(ग्रहणवादिभाष्यम्)

एवं तर्हि योगविभागः करिष्यते, "रषाभ्यां नो णः समानपदे" ततः-'व्यवाये' व्यवाये च रषाभ्यां नो णो भवतीति। ततः-'अट्कुप्वाङ्नुम्भि' इति।

इदमिदानीं किमर्थम्?।

नियमार्थम्—'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये, नान्यैः' इति ॥

(प्रदीप) एतैरेवेति। आकारादयोऽप्यकारादिभिः प्रत्याय्याक्षरसमाम्नायिका। भक्तिस्तु न प्रत्याय्या न च प्रत्यायिकेति नियमेन न निवर्त्यते ॥

(उद्द्योत) नन्वाकारादिभिर्व्यवायेऽपि न स्यादक्षरसमाम्नायिकत्वाभावादत आह-आकारादयोऽपीति ॥ भक्तिस्त्विति। असवर्णत्वादनुपदेशाच्चेति भावः।

(तत्त्वालोक) भाष्ये—ग्रहणवादी पुनः स्वेष्टं साधयति-एवमिति। रषाभ्यामिति-प्रथममित्यादि। इति-इति हेतौ।

प्रदीपे—भक्ति-ऋकारावयवा भक्तिः। इति-इति हेतौ। अस्य सा तेनेति शेषः।

उद्द्योते—न स्यादिति-रेफषकाराभ्यां परस्य नकारस्य णत्वमित्यादि। तेषामिति शेषः। तस्याः प्रत्याय्यत्वाभावे हेतुमाह-असवर्णत्वादिति। तस्याः प्रत्यायकत्वाभावे हेतुमाह-अनुपदेशादिति।

(अग्रहणवादिभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—भवत्यृकारान्नो णत्वमिति। यदयं क्षुभ्नादिषु नृनमनशब्दं पठति ॥

(उद्द्योत) भाष्ये—नृनमनशब्दमिति । [illegible] प्रद । [illegible] पूर्वं समासेऽपि [illegible] शब्दपदे [illegible] पद [illegible] ग्रहणेन [illegible] छन्दस्यपि [illegible] प्राप्ति । ईदृशे विषये [illegible] ॥

(तत्त्वालोक) भाष्ये—अग्रहणवादी सिद्धान्ती स्वमते गौरव निराकरोति-यस्येति । एकदेशी आह-यदीति । [illegible] ।
उद्द्योते—अत्र-नृनमनशब्दे । ईदृशे विषये-[illegible] ।

(ग्रहणवादिभाष्यम्)

नैतदस्ति ज्ञापकम् । वृद्ध्यर्थमेतत्स्यात्—नार्कलिः ॥

(तत्त्वालोक) भाष्ये—ग्रहणवादी स्वस्य [illegible] यति-नैतदिति । एतद्-[illegible] नृनमनशब्दस्य पाठम् । वृद्ध्यर्थ-[illegible] इत्येव ।

(अग्रहणवादिभाष्यम्)

यत्तर्हि तृप्नोतिशब्दं पठति ॥

(तत्त्वालोक) भाष्ये—अग्रहणवादी सिद्धान्ती [illegible] यत्तर्हीति । [illegible] । पठतीति-[illegible] । अत्र वृद्धिर्न सम्भवतीति भावः ।

(एकदेशिभाष्यम्)

यच्चापि नृनमनशब्दं पठति ॥

(तत्त्वालोक) भाष्ये—एकदेशी [illegible] यच्चापीति । [illegible] । पठतीति-[illegible] ज्ञापकमिति शेषः ।

(बाधकस्मारणभाष्यम्)

ननु चोक्तम्—वृद्ध्यर्थमेतत्स्यात् ॥

(तत्त्वालोक) भाष्ये—ग्रहणवादी [illegible] स्मारयति-ननु चेति । स्यात्-स्यादिति ।

(समाधानभाष्यम्)

बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥ अथवा उपरिष्टाद्योगविभागः करिष्यते—"नृन" नो णो भवति । ततः—"छन्दस्यवग्रहात्" णत इत्येव ॥

(उद्द्योत) बहिरङ्गा वृद्धिरिति । [illegible] नो ण इति । [illegible] ।

(तत्त्वालोक) भाष्ये-[illegible] बहिरङ्गेति । [illegible] । "छन्दस्यवग्रहात्" [illegible] इति । [illegible] ।

(उद्द्योत.) ननु गुर्वक्षरमैतिदर्थम् [illegible] रयात आह—तन्त्रेति । [illegible] । गुर्वक्षरवृद्धिश्चैव [illegible] भावः ॥

(तत्त्वालोक) भाष्ये—ग्रहणवादी अग्रहणपक्षे गौरव [illegible] एतच्चेति । अग्रहणपक्षे इति शेषः । इत्येव-[illegible] । [illegible] गौरवमग्रहणपक्षे । ग्रहणपक्षे तु गुरोरित्येव [illegible] । गुरोः-गुरुवर्णस्य ।

[illegible] शब्दस्य गौरवात्, [illegible] इति भावः । अत्र-[illegible] । [illegible] ।

(५८ आक्षेपवार्तिकम् ॥ १२ ॥)

॥ * ॥ प्लुतावैच इदुतौ ॥ * ॥

(भाष्यम्)

एतच्च वक्तव्यम् । यस्य पुनर्गृह्यन्ते गुरोश्चेरित्येव प्लुत्या तस्य सिद्धम् ॥

(प्रदीप) गुरोश्चेरिति । ऐकारो गुरुः [illegible] सिद्धम् । [illegible] प्लुतो भवति [illegible] ॥

(आक्षेपबाधकभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । क्रियेत एतन्न्यास एव ॥

(प्रदीप) क्रियत एतन्न्यास एवेति । [illegible] ॥

(उद्द्योत) अभ्यासाभावादिति । [illegible] बोध्यम् ॥

(तत्त्वालोकः) भाष्ये—अग्रहणवादी सिद्धान्ती [illegible] परिहरति यस्येति । [illegible] । (पृ.[illegible]) [illegible] ।

प्रदीपे—[illegible] । [illegible] ।

(५९ आक्षेपवार्तिकम् ॥ १३ ॥)

॥ * ॥ तुल्यरूपे संयोगे द्विव्यञ्जन-विधिः ॥ * ॥

(भाष्यम्)

तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति—कुक्कुटः पिप्पली पित्तमिति । यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ ॥

(प्रदीपः) तुल्यरूप इति । तुल्यरूपावयवत्वात्संयोगस्य तुल्यरूपस्यैकवर्णत्वं पूर्वपक्षे, सिद्धान्ते तु वर्णद्वयरूपता । आनन्त्यादनन्तस्यैकत्वज्ञानमिति शिष्टसमाचारः ॥

(उद्द्योतः) संयोग इति । संयोगसञ्ज्ञाहं इत्यर्थः । तस्यैकवर्णत्वमिति । एवं च संयोगसंज्ञा न स्यादिति भावः ॥ संयोगे इति भाष्यं तु संयोगार्ह इत्यर्थपरमिति तात्पर्यम् ॥ शिष्टसमाचारः । शिष्टव्यवहारः ॥

(तत्त्वालोकः) भाष्ये—अग्रहणवादी अग्रहणपक्षे दोषान्तरमाह–तुल्येति । संयोगे–क्क् इत्यादौ । विधि–संयोगसंज्ञा । इतीति–हल्त्वेनेत्यर्थः । अत्र अग्रहणपक्षे तत्र संयोगसंज्ञाया वक्तव्यत्वाद् गौरवमिति शेषः । तद्वेति–तत्रेति शेषः । तकारावितीति हेतौ. सा सिद्ध्यतीति ग्रहणपक्षे तत्र तस्या अवक्तव्यत्वात् लाघवमिति शेषः ।

प्रदीपे—तस्य–संयोगस्य क्क् इत्यादेः । आनन्त्येति–तत्त्वेत्यादि ।

उद्द्योते—शिष्टेति–शास्त्रकारकल्पितप्रक्रियादशायामित्यादि । परमार्थदशायान्तु "पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन" इति वाक्यपदीयोक्त्या स्फोट सिद्धान्तयतो नास्य पूर्वपक्षस्यावसर इति भावः ।

(आक्षेपबाधकभाष्यम्)

यस्यापि न गृह्यन्ते तस्यापि द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ ॥ कथम्? ॥ मात्राकालोऽत्र गम्यते । न च मात्रिकं व्यञ्जनमस्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् । असच्च कथं शक्यं प्रतिपत्तुम् ॥

(उद्द्योतः) [भाष्ये] मात्राकालोऽत्रेति । बहुव्रीहिः, संयोगोऽन्यपदार्थः ॥ मात्रिकव्यञ्जनाभावेऽनुपदिष्टत्वं हेतुः । कुक्कुट इत्यादुच्चारणं तु न उपदेशः ॥ अनुपदिष्टत्वं नाम अक्षरसमाम्नायेऽपठितत्वं ग्राहकशास्त्रेणागृहीतत्वं च ॥ अनुपदिष्टं सत् सत्त्वेन कथं शक्यं विज्ञातुमित्यर्थः । एवं चानुपदिष्टस्यासत्त्वात् तत्प्रतिपत्तिरशक्येत्याह—असच्चेति । क्वचित्तु असच्चेत्यादिग्रन्थो न दृश्यते ॥ अनेन लकारापाठे तस्यासत्त्वापत्त्या तयोः सावर्ण्यविधिर्व्यर्थस्य इति सूचितम् ॥

(तत्त्वालोकः) भाष्ये—अग्रहणवादी स्वपक्षे तं निराकरोति–यस्येति । तस्यापीति–तत्रेति शेषः । अत्र–क्क् इत्यादौ । न च–न हि । कुत इत्यत आह–अनुपेति ।

उद्द्योते—अनेन–अनुपदिष्टमित्यादिग्रन्थेन । तस्य–लकारस्य । तयोः–ऋलृवर्णयोः ।

(आक्षेपसाधकभाष्यम्)

यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रैतन्नास्ति–'अण् सवर्णान् गृह्णाति' इति । इह तु कथम्–सय्ँयन्ता, सव्ँवत्सरः, यल्ँलोकम्, तल्ँलोकमिति यत्रैतदस्त्यण् सवर्णान् गृह्णातीति ? ॥

(उद्द्योतः) यत्रैतदस्तीति भाष्ये हलोऽनन्तरा इत्यत्र यकारादिभिरस्य ग्रहणे इष्टानुपपत्तिभाव इति भावः ॥

(तत्त्वालोकः) भाष्ये—एवमग्रहणपक्षे उक्तदोषवारणेऽपि अन्यत्र दोषोऽस्त्येवेति ग्रहणवादी आह–यद्यपीति । तावदिति–वाक्यालङ्कारे । अत्र–कुक्कुट इत्यादौ ।

उद्द्योते—अस्येति । यँय् इत्यादेरित्यर्थः । अन्त्वादिति शेषः ।

(आक्षेपबाधकभाष्यम्)

अत्रापि मात्राकालो गृह्यते । न च मात्रिकं व्यञ्जनमस्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् । असच्च कथं शक्यं प्रतिपत्तुम् ॥ ४ ॥

(प्रदीपः) अत्रापीति । सानुनासिकनिरनुनासिकौ द्वावत्र वर्णावित्यर्थः ॥

(उद्द्योतः) सानुनासिकेति । अणुदित्सूत्रं हि विद्यमानस्य लोकसिद्धस्य सवर्णस्य ग्राहकमेव, न त्वप्रसिद्धसवर्णकल्पकमिति भावः ॥

(तत्त्वालोकः) भाष्ये—अग्रहणवादी तत्रोक्तपरिहारमेवात्राऽतिदिशति–अत्रेति । यँय् इत्यादावित्यर्थः ।

उद्द्योते—ननु ग्रहणकशास्त्रागृहीतत्वरूपमनुपदिष्टत्वन्तु यँय् इत्यादावपि वर्तते एवेति कथमुच्यतेऽत्रानुपदिष्टेत्यत आह–अणुदिति ।

(शिवसूत्रम्)

हयवरट् ॥ ५ ॥

(अथ हकारस्य द्विरुपदेशाधिकरणम्)

(आक्षेपभाष्यम्)

सर्वे वर्णाः सकृदुपदिष्टाः, अयं हकारो द्विरुपदिश्यते—पूर्वश्चैव परश्च । यदि पुनः पूर्व एवोपदिश्येत, पर एव वा । कश्चात्र विशेषः ? ॥

(प्रदीपः) हयवरट् ॥ पूर्वश्चेति । पूर्वपरोच्चारणक्रियाभेदादेकस्यैव हकारस्य पूर्वपरव्यपदेशः ॥

(उद्द्योतः) हयवरट् ॥ नन्वत्र हकार इत्यनेनैकत्वं हकारस्य सूचितमिति कथं तद्विरुद्ध पूर्वश्चेत्यादिना भेदाश्रयणमत आह–पूर्वपरेति । एतद्भाष्यादेकत्वं वर्णानामित्येव पक्षो भगवत संमत इति ज्ञायते ॥ भाष्ये यदि पुनरिति । न चैवं परहकाराभावे लकारस्याप्यभावेन तदाश्रयणेन हलन्त्यमित्यत्रान्योन्याश्रयपरिहारो वक्ष्यमाणो विरुध्येतेति वाच्यम् । हन्त्यं हरिति न्यासेन लन्त्यं हलिति न्यासेन वा तत्परिहारस्य सम्भवादेवमपि एवं कर्तुं शक्य न वेत्येव विचारतात्पर्यात् । यद्वा हरन्त्यमित्यस्यैवावृत्त्या हबोधकसूत्रसमुदायान्त्यमित्यर्थः ॥ परे तु परहकाराभावेऽपि "ल्" इत्येव सूत्रं कार्यं प्रातिपदिकाख्यादिप्रसिद्धहलादिप्रत्याहारसिद्ध्यर्थम् । तदर्थं रान्तस्यापि शक्तिकल्पने गौरवात् । हलन्त्यमित्यस्यावृत्त्या 'हल्प्रत्याहारबोधकसूत्रसमुदायान्त्यमित्' इत्यर्थं इत्यदोष इत्याहुः ॥

(तत्त्वालोकः) भाष्ये—क इति–तर्हीत्यादि ।

उद्द्योते—इति–इति हेतौ । तद्विरुद्धम्–एकत्वविरुद्धम् । लकारस्य–अनुबन्धरूपस्य । तत्परिहारात्–अन्योन्याश्रयपरिहारात् । तदुभयाभावे लाघवादाह–यद्वेति । तदर्थं–हलर्थं । रान्तस्य–हरित्यस्य ।

(१० पूर्वत्रानुपदेशे दूषणवार्तिकम् ॥ १ ॥)

॥ * ॥ हकारस्य परोपदेशोऽड्ग्रहणेषु हग्रहणम् ॥ * ॥

(भाष्यम्)

हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणं कर्तव्यम्

"आतोऽटि नित्यम्" "शश्छोऽटि" "दीर्घादटि समानपादे" हकारे चेति वक्तव्यम् ॥ इहापि यथा स्यात् महाँ हि सः ॥

(प्रदीपः) शश्छोऽटीति । हकारपरस्य शकारस्यासम्भवात् प्रत्युदाहरणमेतत् ॥

(उद्योतः) अट्ग्रहणेष्विति । अट् गृह्यते येषु सूत्रेष्वित्यर्थः ॥ शश्छोऽटी त्यस्योदाहरणाभावे बीजमाह—हकारपरस्येति । न च तच्छ्लोकेन इत्याद्युदाहरणमेव । शश्छोऽपि न सौत्रं च विहाय हलामुच्चारणार्थं विनेच्चारणस्यासाधुत्वेन शश्छोऽद्युदाहरणाभाव इत्याशयः । अत्र च भाष्ये एतदुदाहरणादानमेव मानम् । आतोऽटिदीर्घादटीत्युभयोरुदाहरणं महाँ हि स इति । अट्कुष्विति सूत्रेऽपि हकारग्रहणमिति बोध्यम् ॥

(तत्त्वालोकः) भाष्ये—हकारे चेति—अस्य प्रत्येकमन्वयः । सः—स इति ।

उद्योते—सूत्रेष्विति—तेष्विति शेषः । शश्छोऽटीति—हकारपरकशकारपदमित्यर्थः । अत्र च—हकारपरकशकारकोदाहरणाभावे च । एतदिति—शश्छोऽटीत्यस्येत्यर्थः । महाँ हि स इति—अत्र "दीर्घादटि समानपादे" इत्यनेन नकारस्य रुत्वे, "आतोऽटि नित्यम्" इत्यनेनानुनासिकत्वे, "भो भगो अघो" इत्यनेन यत्वे "हलि सर्वेषाम्" इत्यनेन यलोपः । ग्रहणेति—हकारग्रहणेत्यर्थः ।

(११ पूर्वत्रानुपदेशे दूषणवार्तिकम् ॥ २ ॥)

॥ ❀ ॥ उत्त्वे च ॥ ❀ ॥

(भाष्यम्)

उत्त्वे च हकारग्रहणं कर्तव्यम् । "अतो रोरप्लुतादप्लुते हशि च" हकारे चेति वक्तव्यम् । इहापि यथा स्यात्—पुरुषो हसति, ब्राह्मणो हसतीति ॥

(प्रदीपः) उत्त्वे चेति । उत्वमपि न प्राप्नोतीति वक्तव्यं भो हसतीति रोरुत्वार्थम् ॥

(उद्योतः) अस्त्यमतीति । [illegible] । तेन [illegible] विभाषेत इति [illegible] केचित् ॥ भाष्ये हशि चेति [illegible] निर्देशः । इदानीं तु यशि चेति [illegible] ॥

(तत्त्वालोकः) भाष्ये—[illegible] हकारे [illegible] इत्यर्थः । [illegible] हकारग्रहणमिति शेषः । इति-[illegible] ।

उद्योते—इति-[illegible] । इदानीम्—केवलहकारोपदेशे ।

(पूर्वोपदेशाङ्गीकारभाष्यम्)

अस्तु तर्हि पूर्वोपदेशः ।

(१२-१३ परत्रानुपदेशे दूषणवार्तिके ॥ ३-४ ॥)

॥ ❀ ॥ पूर्वोपदेशे किरवक्सेड्विधयो झल्ग्रहणानि च ॥ ❀ ॥

(भाष्यम्)

यदि पूर्वोपदेशः कित्त्वं विधेयम्—स्निहित्वा स्नेहित्वा सिस्निहिषति सिस्नेहिषति "रलो व्युपधाद्धलादेः-" इति कित्त्वं न प्राप्नोति ॥

क्सविधिः—क्सश्च विधेयः—अघुक्षत् अलिक्षत् "शल इगुपधादनिटः क्सः" इति क्सो न प्राप्नोति ॥

इड्विधिः । इट् च विधेयः—रुदिहि । वलादिलक्षण इण् न प्राप्नोति ॥

झल्ग्रहणानि च ॥

किम् ? ॥

अझकाराणि स्युः ॥

तत्र को दोषः ? ॥

"झलो झलि" इतीह न स्यात्-अदाग्धाम् अदाग्धम् । तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च ॥

(उद्योतः) अझकाराणि स्युरिति । अतस्तत्र हकारग्रहणं कर्तव्यमिति भावः । अदाग्धामिति । [illegible] ॥

(तत्त्वालोकः) भाष्ये—विधेयेति—[illegible] निर्दिष्टे [illegible] "सुपां सुलुक्" इत्यनेन जसो लुक् । तथा विधिशब्दे [illegible] । कित्त्वमिति—स्नी [illegible] । सिस्नेहिषतीति—[illegible] शेषः । इति-एतेन । प्राप्नोतीति—[illegible] शेषः । एवमग्रेऽपि । अलिक्षदिति । [illegible] शेषः । इति-एतेन । रुदिहि—[illegible] । अदाग्धम्—[illegible] । तस्मात्—एवमुभयत्र पूर्वोपदेशस्य, परोपदेशस्य च फलस्य दर्शितत्वात् ।

उद्योते – तत्र-[illegible] ।

(उपसंहारभाष्यम्)

यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति, तत्राप्युपदेशः कर्तव्यः ॥

(प्रदीपः) यदि च किंचिदिति । प्रयोजनार्थो हि [illegible] देशो न [illegible] ॥

(उद्योतः) [illegible] इति भ्रम [illegible] भाष्ये यदि च किंचिदिति । [illegible]—प्रयोजनार्थं इति । [illegible] प्रयोजनं [illegible] । [illegible] दुर्योगादिति [illegible] । [illegible] पूर्वहकारोपदेश [illegible] ॥ कर्तव्य [illegible] शेषः । उपदेशोऽभ्यासमात्रम् ॥ [illegible] सर्वथा हकारस्य द्विरुपदेश [illegible] तात्पर्यम् ॥

(तत्त्वालोकः) भाष्ये—तत्रेति—[illegible] । [illegible]—द्विः—[illegible] ।

उद्योते—अर्थानि—[illegible] । प्रयोजनेति—[illegible] शेषः । स्यादिति—अत्र [illegible] । [illegible] न स्यात्, [illegible] न स्यात् । [illegible] उपदेशः [illegible] भावः । अस्य-[illegible] ।

(इति हकारस्य द्विरुपदेशाधिकरणम्)

(अथ रेफोपदेशस्थानाधिकरणम्)

इदं विचार्यते—अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिश्येत—हयवरडिति, पर एव वा यथान्यासमिति। कश्चात्र विशेषः ?॥

(प्रदीपः) इदमिति। उभयत्रापि दोषप्रयोजनसद्भावात्प्रश्न ॥

(उद्द्योतः) दोषप्रयोजनेति। अन्यतरपक्षीयदोष एवान्यतरपक्षे प्रयोजनमिति बोध्यम् ॥

(तत्त्वालोकः) भाष्ये—अत्र-पक्षद्वये।

(६४ यथान्यासोपदेशदूषणवार्तिकम् ॥ २ ॥)

॥ * रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः ॥ * ॥

(भाष्यम्)

रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः ॥

अनुनासिकस्य—स्वर्नयति प्रातर्नयति। "यरोऽनुनासिकेऽनुनासिको वा" इत्यनुनासिकः प्राप्नोति ॥

द्विर्वचनस्य—मद्रह्रदः भद्रह्रदः "यरः" इति द्विर्वचनं प्राप्नोति। परसवर्णस्य—कुण्डं रथेन; वनं रथेन "अनुस्वारस्य ययि-" इति परसवर्णः प्राप्नोति ॥

(प्रदीपः) स्वर्नयतीति। णकारोऽत्र प्राप्नोति। न ह्यत्र सवर्णग्रहणमस्ति ॥ मद्रह्रद इति। द्विर्वचने कृते तस्यासिद्धत्वाद् रो रीति रेफलोपो नास्ति, हलो यमामिति लोपस्तु पाक्षिक इति पक्षे रेफद्वय श्रवणप्रसङ्ग ॥ कुण्डं रथेनेति। अनुनासिकेनैव परसवर्णेन भाव्यमिति नियमाभावाद्रेफ प्राप्नोति, तस्य चासिद्धत्वाद् रो रीति लोपो नास्ति ॥

(उद्द्योतः) णकारोऽत्रेति। स्थानेऽन्तरतमत्वादिति भाव ॥ ननु रेफस्य सवर्णाभावात्कथमत्रानुनासिकोऽत आह—न ह्यत्रेति ॥ ननु द्वित्वेऽपि रो रीति हलो यमामिति वा लोपान्न दोषोऽत आह—द्विर्वचन इति ॥

(तत्त्वालोकः) भाष्ये—अनुनासिकस्येति-प्रतिषेधो वक्तव्य इत्यनुषज्यते। एवमग्रेऽपि। प्रातर्नयतीति-इत्यत्र, यत्र तत्रेति शेष। एवमग्रेऽपि। इति-इत्यनेन। एवमग्रेऽपि।

प्रदीपे—अत्र-रेफे। हि-यतः। अत्र-अनुनासिकविधौ। तस्य-द्विर्वचनस्य। इति-इति हेतौ। तस्य-रेफस्य।

उद्द्योते—अत्र-रेफे।

(इति यथान्यासे दूषणानि ॥)

(यकारात्पूर्वत्रपाठाभ्युपगमभाष्यम्)

अस्तु तर्हि पूर्वोपदेशः।

(६५-६६ पूर्वोपदेशदूषणवार्तिके-६-७)

॥ * ॥ पूर्वोपदेशे कित्त्वप्रतिषेधो व्यलोपवचनं च ॥ * ॥

(भाष्यम्)

यदि पूर्वोपदेशः किस्त्वं प्रतिषेध्यम्। देवित्वा दिदेविषति 'रलोऽव्युपधादिति किस्त्वं प्राप्नोति ॥

(तत्त्वालोकः) भाष्ये—किस्त्वमिति-तर्हीत्यादि। दिदेविषतीति-इत्यत्र, यत्रतत्रेति शेष।

(दूषणनिराकरणभाष्यम्)

नैष दोषः, नैव विज्ञायते—'रलः व्युपधाद्' इति ॥

किं तर्हि ?॥

"रलः अव् व्युपधाद्" इति ॥

'किमिदम् अव् व्युपधाद्' इति ?॥

अवकारान्ताद्व्युपधादव्व्युपधादिति ॥

(उद्द्योतः) भाष्ये-अव्व्युपधादिति। अव् इति लुप्तपञ्चमीकम् ॥ ननु पूर्वोपदेशे हयण इत्यादौ यथासङ्ख्यनिर्देह कथमिति चेन्न। सञ्ज्ञाविधानसामर्थ्येन तत्र तद्भावितपक्षाश्रयणान्न दोष ॥

(तत्त्वालोकः) भाष्ये—कुत इत्यत आह–नैवमिति। यत इत्यादि। तथा च दिवित्यस्य रलन्तत्वेऽपि अवकारान्तत्वाभावाद् ततः परस्य किस्त्वाप्रवृत्तिरिति भाव.।

(भाष्यम्)

व्यलोपवचनं च ॥ व्योश्च लोपो वक्तव्यः। गौधेरः, पचेरन्, यजेरन्; 'जीवे रदानुः'—जीरदानुः। वलीति लोपो न प्राप्नोति ॥

(तत्त्वालोकः) जीरदानुरिति—इत्यत्र, यत्रतत्रेति शेषः।

(दूषणनिराकरणभाष्यम्)

नैष दोषः, रेफोऽप्यत्र निर्दिश्यते—"लोपो व्योर्वलि" इति रेफे च वलि चेति ॥

(तत्त्वालोकः) अत्र व्यलोपानुपपत्तिं परिहरति-नैष इति। कुत इत्यत आह-रेफ इति। यत इत्यादि। एवञ्च ओन्धटकसकारस्य रुत्वे रोरीति लोपे च व्योर्वलीति निर्देश इति भाव।

(यथान्यासाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु परोपदेशः ॥

(तत्त्वालोकः) एवं पूर्वोपदेशसमर्थनसम्भवेऽपि तत्र तत्र पाणिनीयन्यासमपरिवर्त्तनेन इह शास्त्रे पुण्यजनकता मन्येतेत्यत आह—अथवेति।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् *रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः* इति ॥

(समाधानभाष्यम्)

अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न वक्तव्यः, रेफोष्मणां सवर्णा न सन्ति ॥

(प्रदीपः) रेफोष्मणामिति। अनुनासिकपरसवर्णविधाने हि स्थानेऽन्तरतमपरिभाषोपस्थानाद्दोषाभाव.। नहि रेफस्य णकारोऽन्तरतमो, नाप्यनुस्वारस्य रेफः॥

(उद्द्योतः) भाष्ये रेफोष्मणामिति। विजातीया इति शेष। तेन सजातीयेषु सत्स्वपि न दोष ॥ ननु मामूद्रेफस्य विजातीय

सवर्णसंज्ञकानुनासिकविधौ सवर्णग्रहणाभावादनुनासिक स्यादित्यत आह—अनुनासिकपरेति ॥ नहि रेफस्येति ॥ न च रेफस्य एकार [illegible] स्थानेऽन्तरतमे इति [illegible] स्थानतस्तोऽप्यान्तरतम्यस्य [illegible] योऽनुनासिकविधि [illegible] भावः ॥ नास्तीति । [illegible] स्थानेऽन्तरतम [illegible] सत्त्वेन नियम, [illegible] भावः । रह इति केचित् ॥ वस्तुतो [illegible] —"द्रव्येऽपि [illegible]" इति ॥ कश्चित्तु स्थानेऽन्तरतम इति [illegible] । किं चैव सति [illegible] स्यात् । तस्मादनुनासिकविधौ सवर्णग्रहणाभावादेव भाष्ये रेफोष्मणामिति । [illegible] प्रयोजनम् । [illegible] रेफोष्मणां [illegible] इति भाष्याशयः ॥

(तत्त्वालोकः) भाष्ये—रेफोष्मणामिति—दय इत्यादि ।

उद्योते—सर्वत्रेति—[illegible] । स्यादेवेति तथा अनुनासिकेनैव [illegible] सवर्णो रेफ [illegible] । इति—[illegible] । ननु [illegible] अन्तरतम [illegible] आह—इदमिति । [illegible] भावः । [illegible] इत्याशयेनाह—वस्तुत इति । [illegible] । अस्यां दशायां—[illegible] । अत एव वदितुमाह—केचिदिति । [illegible] । "अनुस्वारादे" [illegible] "सवर्णे" [illegible] सवर्णं चेति ।

(भाष्यम्)

द्विर्वचनेऽपि । नेमौ रहौ कार्यिणौ द्विर्वचनस्य ॥ किं तर्हि ? ॥ निमित्तमिमौ रहौ द्विर्वचनस्य । तद्यथा 'ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्' इति । नेदानीं तौ भुञ्जाते ॥

(प्रदीपः) नेमौ रहाविति । [illegible] न कार्यं [illegible] । [illegible] ।

(उद्योतः) [illegible] इत्यर्थ इति । ननु [illegible] ।

कादिमात्रं किं न स्यात् । [illegible] माह—तत्रेति । [illegible] । सामान्यविशेषभावे [illegible] । [illegible] । अर्थ [illegible] । [illegible] माठरकौण्डिन्यौ दधि दीयतां तक्रं कौण्डिन्यायेत्यादि [illegible] । [illegible] ॥ परिहारवदिति पाठः । एवं [illegible] सामान्यविशेषभावात् [illegible] —अथवेति । [illegible] । [illegible] ॥ तत्रेति । [illegible] सामान्यविशेषभावे [illegible] भावः । [illegible] । यथेति । [illegible] ॥ केचित्तु तक्रकौण्डिन्यन्यायेऽपि [illegible] । [illegible] । न [illegible] एवं [illegible] । न [illegible] । [illegible] ॥

(तत्त्वालोकः) भाष्ये—द्विर्वचनेऽपीति—[illegible] न [illegible] इत्यनुवर्तते । नेमाविति—दय इत्यादि । कार्यिणौ—[illegible] । निमित्तमिति—अत्र [illegible] भावः । इति—[illegible] इदानीम्—[illegible] । तौ—माठरकौण्डिन्यौ । [illegible] अनुनासिक [illegible] सवर्णग्रहणेन [illegible] द्विर्वचननिषेधः [illegible] इति भावः ।

प्रदीपे—इति—इति शेषः । इति—[illegible] ।

उद्योते—यथा इति—तथा [illegible] । [illegible] । [illegible] —भिन्ने इति । [illegible] । [illegible] इति—[illegible] । [illegible] । [illegible] । समादेशी इति—[illegible] । केचित्तु—भाष्य [illegible] । [illegible] । [illegible] । सामान्ये—[illegible] । कार्यित्वाय इति—[illegible] । [illegible] । अथैवम्—[illegible] ।

(इति द्विर्वचनाधिकरणम् ।)

(अयोगवाहोपदेशाधिकरणम्)

(भाष्यम्)

इदं विचार्यते—इमेऽयोगवाहा न क्वचिदुपदिश्यन्ते, श्रूयन्ते च । तेषां कार्यार्थ उपदेशः कर्तव्यः ॥ के पुनरयोगवाहाः ? ॥ विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारानुनासिक्ययमाः ॥ कथं पुनरयोगवाहाः ? ॥ यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते ॥

(प्रदीपः) इम इति। विधानार्थेषा साधुत्वं स्यात्। प्रत्याहारप्रतिबद्धं तु कार्यं न प्राप्नोति॥ के पुनरिति। तत्स्वरूपप्रश्नः॥ कथमिति। प्रवृत्तिनिमित्तप्रश्नः। अयुक्ता इत्यस्यैव हेतुकथनम् अनुपदिष्टाश्चेति। अयुक्ताः प्रत्याहारलक्षणेन पाठाभावादसंबद्धा इत्यर्थः। उपदेशो द्विविधः पाठो ग्रहणकशास्त्रेण प्रत्यायनं च। स द्विविधोऽप्येषां नास्तीत्यर्थः॥ चशब्दो हेतौ। यतोऽनुपदिष्टास्ततोऽयुक्ता इत्यर्थः। क्वचित्तु चशब्दो न पठ्यते॥

(उद्द्योतः) ननु कार्यार्थं इत्यत्र कार्यं साधुत्वं चेत् स्वरवर्णानुपूर्वीत्यादिना सिद्धम्। आह—विधानादिति। उपदिश्यन्त इति पाठे भाष्ये वर्तमानसामीप्ये लट्। उपदिष्टा इत्यर्थः॥ प्रवृत्तिनिमित्तेति। प्रकृते मामभानवैशिष्ट्यप्रतियोगिरूपः प्रकारस्थमर्थ इति भावः। केन प्रवृत्तिनिमित्तेनायोगवाहशब्दवाच्यत्वमेषामित्यत्र तात्पर्यम्॥ नन्वनुपदिष्टाश्चेति चकारश्रवणादनुच्चारितत्वमयोगवाहशब्दस्य प्रवृत्तिनिमित्तमित्याभाति, तद्युक्तम्। अनुपदेशपदार्थस्यानुच्चारणस्य तत्राभावात्। प्रयोगेषूच्चारितत्वात्। न च प्रत्याहारसूत्रानुच्चारितत्वं तथा, यद्युक्ता इत्यनेनैव तदर्थलाभेन पौनरुक्त्यापत्तेरत आह—अयुक्ता इत्यस्यैव हेतुकथनमिति। प्रत्याहारबोधकलक्षणेनायुक्ता इत्यन्वयः। तद्व्याचष्टे—पाठाभावादिति। ग्रहणकशास्त्रेण प्रदेशे प्रवर्तमानेन यो वर्णस्तेषां ग्राहकस्तस्य पाठाभावादित्यर्थः॥ एषां नास्तीति। अतोऽयुक्ता इत्यर्थः। एवं चाक्षरसमाम्नायेऽयुक्ता सन्तो वहन्ति प्रयोगं निर्वाहयन्तीत्ययोगवाहपदव्युत्पत्तिर्दर्शिता॥ न पठ्यत इति। तत्र चेत् इत्यध्याहार्यमिति भावः॥

(तत्त्वालोकः)—भाष्ये-"अयोगवाहानाम्" इति वार्तिकव्याख्यानाय विचारमारभते-इदमिति। नन्वेवं ते न सन्त्येवेत्यत आह-श्रूयन्ते चेति। लक्ष्ये, विसर्जनीयस्य स इत्यादिलक्ष्ये चेति शेषः। कर्तव्य-कर्तव्य इति। नासिक्येति-हुँ इत्यर्थः। यत्न्य। वहन्ति-प्रयोगं निर्वाहयन्ति। श्रूयन्ते इति-अतोऽयोगवाहा इति शेषः। तथा च वर्णसमाम्नायेऽकारादिवदनुपदिष्टत्वात् तत्रोपदिष्टैराकारादिवदगृहीतत्वाच्च अविद्यमानं योगः सम्बन्धः प्रत्याहारेषु येषां ते अयोगाः प्रत्याहारसम्बन्धशून्याः। वाहयन्ति सत्कर्तेत्यादिप्रयोगं निर्वाहयन्ति इति वाहाः। अयोगाश्च ते वाहाश्चेति अयोगवाहाः। प्रत्याहारसम्बन्धशून्यत्वे सति प्रयोगनिर्वाहकतया श्रूयमाणा इत्यर्थः।

प्रदीपे-एषाम्-अयोगवाहानाम्। एवमग्रेऽपि। प्रतिबद्धम्-सम्बद्धम्।

उद्द्योते—चेदिति-तर्हीति शेषः। सिद्धम्-तत्सिद्धम्। एषाम्-विसर्जनीयादीनाम्। तत्र-अयोगवाहेषु। तथा-प्रवृत्तिनिमित्तम्। तदर्थलाभेनेति-प्रत्याहारसूत्रानुच्चारितत्वरूपार्थलाभेनेत्यर्थः। अनुपदिष्टाश्चेत्यनेन तस्येति शेषः। प्रदेशे-इको यणचीत्यादौ। तेषाम्-अयोगवाहानाम्। ग्राहक इति-सम्भवेदिति शेषः।

(भाष्यम्)

क पुनरेषामुपदेशः कर्तव्यः? ॥

(६७ सिद्धान्तवार्तिकम् ॥ ८ ॥)

॥*॥ अयोगवाहानामट्सु णत्वम् ॥*॥

(भाष्यम्)

अयोगवाहानामट्सूपदेशः कर्तव्यः॥

क प्रयोजनम्?॥ णत्वम्। उरःकेण, उरᳲकेण, उरःपेण, उरᳲपेण। "अड्व्यवाये" इति णत्वं सिद्धं भवति॥

(उद्द्योतः) भाष्ये उरःकेणेति। उरः कायतानि सुपुप्ते पूर्वं समासे पि सोपपदात् वनि न सत्वम्। पाशकल्पककाम्येष्वेव तत्प्रवृत्तेः।

(तत्त्वालोकः) भाष्ये—अट्स्विति-अकारानन्तरमित्यर्थः। अकारादौ शेषः। तेन तथा मिश्रणत्वादन्तर्भावात् यथ शिरसादौ इण्कोरित्यविकृत्य विधीयमानम् आदेशप्रत्यययोरित्यनेन षत्वं न भवति। उरᳲपेणेति इत्यादावपि शेषः।

उद्द्योते—इति-इत्यत्र। अपिना सुपुप्तसुपूर्व समासे तत्र तदप्रवृत्तिरेवेति समसूचि। तत्प्रवृत्तेः-सोऽपदादावित्यस्य प्रवृत्तेः।

(६८ सिद्धान्तवार्तिकम् ॥ ९)

॥ * ॥ शर्षु जश्भावषत्वे ॥ * ॥

(भाष्यम्)

शर्षूपदेशः कर्तव्यः॥ किं प्रयोजनम्? जश्भावषत्वे। अयमुब्जिरुपध्मानीयोपधः पठ्यते। तस्य जश्त्वे कृते उब्जिता उब्जितुमित्येतद्रूपं यथा स्यात्॥

(प्रदीपः) शर्ष्विति। शर्षु पाठे झल्त्वमिति झलां जश् झशीति जश्त्वं सिध्यति॥

(उद्द्योतः) ननु शराम् जशो भवन्तीति लक्षणाभावाच्छर्षु पाठस्य न जश्भावः प्रयोजनमत आह-शर्षु पाठे इति॥

(तत्त्वालोकः) भाष्ये—अयोगवाहानां हकारस्येवानेकत्र पाठः कार्य इत्याशयेनाह-शर्ष्विति। च तेषामिति शेषः। तस्येति-उब्जेरुपध्मानीयस्येति शेषः।

प्रदीपे—पाठे इति-तेषामित्यादि शेषश्च। इति-इति हेतौ। झला जशोऽन्ते इत्यस्याप्रवृत्तिस्तु न शङ्क्या, एतद्दृष्ट्या विसर्गादीनामसिद्धत्वात्।

(उपध्मानीयोपधदूषणभाष्यम्)

यद्युब्जिरुपध्मानीयोपधः पठ्यते, उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति। दकारोपधे पुनः "न न्द्राः संयोगादयः" इति प्रतिषेधः सिद्धो भवति॥

(प्रदीपः) उपध्मानीयादेरिति। यदि द्विर्वचने पूर्वं कर्तव्ये जश्त्वमसिद्धमथापि पूर्वत्रासिद्धीयमद्विर्वचन इति सिद्धं सर्वथोबिजिषतीति प्राप्नोति॥

(उद्द्योतः) यदीति। पूर्वत्र द्विर्वचने इत्यन्वयः॥ ननु पूर्वं द्वित्वे जश्त्वात्पूर्वमेव हलादिः शेषे कथमुपध्मानीयस्याभ्यासे जश्त्वं, भपरत्वाभावात्। अभ्यासे चर्चेत्यनेन स्थानतरतम्यात्प्रकृतिचरां चर एवेति उपध्मानीय एव स्यादिति चेच्चिन्त्यमेवैतत्। उपध्मानीयश्रवणापादनेनापि भाष्यसामञ्जस्यात्। अन्त्ये तु द्वित्वे कृतेपि द्वित्वाश्रयस्य कार्ये कर्तव्ये सिद्धत्वं नेत्यपि पूर्वत्रासिद्धीयमित्यस्यार्थ इति परत्वाज्जश्त्वे कृत एव हलादिः शेषः इत्याद्याशय दोषः॥

(तत्त्वालोकः) भाष्ये—पक्षं दूषयति-यदीति। पठ्यते इति-तर्हीति शेषः। इति-इत्यत्र। उपध्मानीयादेः-जश्त्वस्यासिद्धत्वात् अज्ञादेर्द्वितीयस्येति सूत्रेण उपध्मानीयजकारविशिष्टस्य। प्राप्नोतीति-तथा च उबिजिषतीत्यनिष्टं रूपं प्रसज्यते इति भावः।

पुनरिति—तस्मिन् पठिते इत्यादि । तथैति शेषः । भवतीति—तथा च जिम् इत्यस्य द्वित्वे दश्च कर्ते च उब्जिजिषतीति इत्यर्थं सिद्धान्तीयाशयः ।

प्रदीपे—प्राप्नोतीति—न तु उब्जिजिषतीति इति शेषः ।

उद्द्योते—पूर्वत्रासिद्धीयमिति परिभाषाया उभौ साम्प्रतस्येष्यत्वेन नियमाया द्वारत्वादस्याप्रवृत्ति-दर्भे इत्युक्ते-तन्विति । अस्याददिति—अस्य स्थानिनि तत्त्वापेन उभयत्र पूर्वमिति यथान्वयः । चेदिति—नहीति शेषः । एतत्—उब्जिजिषत्यायासादनम् । अन्ये तु—तत्परिभाषानङ्गौ तु । इति—इति शेषः । न दोष इति—एवञ्च भाष्ये उपस्थानाधदन्दस्य स्था यादेशाधारणेनेति उपस्थानं यादेशत्वे इष्टरूपसिद्धौ भाष्यकैयटयोस्तात्पर्यमिति भावः ।

(दकारोपधदूषणभाष्यम्)

यदि दकारोपधः पठ्यते, का रूपसिद्धिः—उब्जिता उब्जितुमिति ? ॥

(सारालोकः) पठ्यत—पठ्येति । न इति शेषः । केति—कोदृगर्थः । उब्जितेत्यादि । इति—शयनम् ।

(दकारोपधदूषणनिराकरणभाष्यम्)

असिद्धे भ उदुजे । इदमस्ति—"स्तोः श्चुना श्चुः" इति, ततो वक्ष्यामि "भ उदुजेः" उदुजेः श्चुना सन्निपाते भो भवतीति ॥

(सारालोकः) समाधत्ते—असिद्धे इति । पूर्वत्रासिद्धमित्यधिकरणेत्यर्थः । भ उदुजेरिति—इति वाच्यमिति शेषः । भ उदुजेः—भ उदुजेरिति । सन्निपाते—योगे ।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ॥

(समाधानभाष्यम्)

न वक्तव्यम्, निपातनादेव सिद्धम् । किं निपातनम् ? ॥ "भुजन्युब्जौ पाण्युपतापयोः" इति ॥

(प्रदीपः) निपातनादिति । द्विर्वचनं बधम् । निपातनाद्धात्व देशोऽनुमानं—उब्जिदुब्जतौ गोऽनुदात्तत्वे दर्शनं इति । तत्र न न्यूना इति एव एव द्विर्वचननिषेधः कर्तव्यो न तु द्विर्वचनमिति पूर्वत्रासिद्धीयमद्विर्वचने इत्यस्यानुवृत्त्या भव वाप्तिरुक्तवादिद्विर्वचनमिति । यदापि न वास्तवोऽनुमानं, निपातनेनैव प्रतिपादकं, तथापि दकारो देशोऽत्र द्विर्वचने कृते भकारस्य बाध प्रसङ्गः ॥

(उद्द्योतः) द्विर्वचनं कथमिति न प्रसक्तमित्यादेरिति शेषः ॥ ननु निपातनाद्धात्वन्तमात्रं तत्र न तु भकारविशेषणविधानं स्यात्—अपार्थीति । न च उब्जिता इत्यादौ दकारोच्चारणार्थं, नैतदुक्ते रूपमिति सम्बन्धः स्या देशान्तरम् । तस्यासिद्धत्वविधेरित्यादू यत्र यानमित्यादिविशेषसम्भवात् । अकुत्वविषये निपातनमिति वक्ष्यते तत्पूर्वभावः ॥

(सारालोकः) भाष्ये—तुदादिगण अत्र—निपातनादिति । तत्पठनादि । सिद्धम्—इष्टसिद्धम् ।

प्रदीपे—द्विर्वचनमकुत्वविषयत्वे तत्पक्षावधिरिष्टानामपि देवनापि उब्जिद्वित्वसम्भवे कृते द्विर्वचनमिति । असम्भवे—निपातनादिति । अथापि—अत्र इति । पूर्वमिति—अत्र कस्य पूर्वे दिर्वे शेषः ।

उद्द्योते—प्रदेशविशेषेति—प्रसिद्धत्वप्रतिपत्त्यर्थं । अस्मात्—उब्जे. । आद्यमिति—अभ्युद्ग इत्यत्र उब्जे रूपमत्र तत्र दकारोच्चारणस्य सार्थक्याभावप्रसङ्गादिः ।

(समाधानबाधकभाष्यम्)

इहापि तर्हि प्राप्नोति—अभ्युद्गः समुद्ग इति ॥

(सारालोकः) प्राप्नोतीति—भत्वमित्यादिः ।

(समाधानसाधकभाष्यम्)

अकुत्वविषये तन्निपातनम् ॥ अथवा नैतदुब्जे रूपं, गमेरेतद् डप्युपसर्गाड्डो विधीयते । अभ्युद्गतोऽभ्युद्गः समुद्गतः समुद्ग इति ॥

(प्रदीपः) अकुत्वविषय इति । विशिष्टविषयमनुमानमित्यर्थः ॥

(सारालोकः) भाष्ये—तदिति—भत्वमित्यर्थः । एतत्—अभ्युद्ग इत्यादि । गमेरिति—किं तर्हीत्यादि । इति—शयनम् ।

प्रदीपे—विशिष्टेति—विशेषविषयस्य भावस्यैवानुमानमित्यर्थः । तथा च कुत्वाभावनिपातनस्योपस्थापकविषयत्वेन अन्यत्रविषयत्वाभावात् तद्विषये एव श्चुना भो । भत्वमिति पर्यवस्यति । तेन अभ्युद्ग इत्यादौ प्रतिबन्धकेऽपि उपस्थाप्यविषयत्वात् "नकुत्वे"ति कुत्वविधानेन तत्र श्चुनाऽयोगात् भत्वं न । उपस्थाप्यविषय बाध उब्जिजिषतीत्यादिसिद्धिश्च । एवमायोगावाहानां चर्पूर्वदेशस्य तत्र बाधः प्रयोजनम् उपस्थानायोपयोगिमिति बोध्यं भाष्यकारमतेऽपि, दकारोपधत्वं च भाष्यकारमते तु नास्तीति परिष्कृतम् ।

(प्रयोजनभाष्यम्)

षत्वं च प्रयोजनम् । सर्पिष्षु । धनुष्षु । 'शर्व्यवाये' इति षत्वं सिद्धं भवतीति "नुम्विसर्जनीयशर्व्यवायेऽपि" इति विसर्जनीयग्रहणं न कर्तव्यं भवति ॥

(सारालोकः) भाष्ये—षत्वं असिद्धत्वात् इति वर्तिकेऽस्या वार्त्तिकस्याशयः अभावे—षत्वं चेति । षत्वं इत्युपदेशस्येति शेषः । धनुष्ष्विति—इत्यादावपि च । इति—वचनेन । इति—तथा । इति—शयनम् ।

(आक्षेपभाष्यम्)

नुमश्चापि तर्हि ग्रहणं शक्यमकर्तुम् ।

कथं, सर्पींषि धनूंषि ? ।

अनुस्वारे कृते 'शर्व्यवाये' इत्येव सिद्धम् ॥

(सारालोकः) ग्रहणमिति—नोऽत्यादि । इत्येव—इ वचनेन ।

(समाधानभाष्यम्)

अवश्यं नुमो ग्रहणं कर्तव्यम् । अनुस्वारविशेषणं नुम्ग्रहणम्, नुमो योऽनुस्वारस्तत्र यथा स्यात्, इह मा भूत्—पुंक्षि ॥

(प्रदीपः) अवश्यमिति । नुमस्तत्र दर्शन्त्यापत्तौ कृते सिद्धे नुमग्रहणं नियमार्थं—नुमो योऽनुस्वारस्तत्रैव यथा स्यादेव मा भूत्—पुंक्षि ।

(उद्द्योतः) अनुस्वारस्य कार्यादिति । यदि स्थानिवद्भावेन तुमनो नुमा स्थानिवत् तदुक्ते शर्वस्य त्वप्रवृत्तौ नोदितम्, नस्ति नहतनिषेधे मतः । दुःसिद्धस्य सानुस्वारस्यैवानुस्वारविशिष्टस्य

रणग्रन्थस्तु चिन्त्य एव। तस्य समस्सुटि, पुम खय्यम्परे, कानाम्रेडिते इति सूत्रत्रयमात्रविषयत्वात् ॥

(तत्त्वालोक) भाष्ये—अवश्यमिति—तत्रेत्यादिः। कुत इत्यत आह—अनुस्वारेति। यत इत्यादि। ननु तत् तद्विशेषणनेव किमर्थमित्यत आह—नुम इति। पुम्स्वितीति—इति नियमार्थमिति शेषः।

प्रदीपे—पुम्स्विति—पुम्शब्दादि।

उद्द्योते—तदिति—पुम्शब्दस्य तस्येत्यर्थः। तस्य—रुपुक्रानामित्यस्य।

(भाष्यम्)

अथवाऽविशेषेणोपदेशः कर्तव्यः ॥

(प्रदीप) अविशेषेणेति। प्रयोजनविशेषमनपेक्ष्य सकलप्रयोजनोद्देशेन यत्र यत्र प्रदेशे प्रयोजनसिद्धिस्तत्र तत्रोपदेशः कार्य इत्यर्थः ॥

(उद्द्योत.) ननु सूत्रविशेषाणां प्रयोगे तत्प्रत्याहाराणां निर्देशात्कथं तन्निबन्धनकार्यप्रवृत्तिरत आह—प्रयोजनविशेषमिति ॥ अविशेषेणेति भाष्यस्य प्रयोजनविशेषनिर्देशं विनेत्यर्थ इति भावः ॥ यत्र यत्रेत्यादि यत्प्रयोजनसिद्धिरुद्देश्या तत्तद्विषयसकलप्रयोजनोद्देशेनेत्यर्थः ॥

(तत्त्वालोक) भाष्ये—उपदेश इति—अयोगवाहानामित्यादिः। एव प्रदीपेऽपि।

उद्द्योते—सूत्रेति—अयोगवाहानामुपदेशे येत्यादि। तत्प्रत्याहारेति—शर्वादिप्रत्याहारेत्यर्थः। तेषामित्यादि। तन्निबन्धनेति—अच्प्रत्याहारनिबन्धनेत्यर्थः। यत्रेत्यादि। तत्तद्विषयेति—उच्चप्रदेशस्थेत्यर्थः। अनेन प्रदीपे सकलप्रयोजनोद्देशेनेत्यस्य उपदेश इत्यनेनान्वय सूचितः। तथा च अच्छब्दरेव तेषामुपदेशेन सकलकार्यानां सिद्धत्वात् तयोरेव तेषां स कार्य इति भावः।

(भाष्यम्)

किं प्रयोजनम् ? ॥

(६९ सिद्धान्तवार्तिकम् ॥ १०)

॥ * ॥ अविशेषेण संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः ॥ * ॥

(भाष्यम्)

अविशेषेण संयोगसंज्ञा प्रयोजनम्—उ३ꣳजकः "हलोऽनन्तराः संयोग." इति संयोगसंज्ञा, 'संयोगे गुर्विति" गुरुसंज्ञा, "गुरो"रिति प्लुतो भवति ॥

(प्रदीप) उ३ꣳजक इति। उपध्मानीयस्य यत्वे कृते संयोगसंज्ञाया तस्यासिद्धत्वात्संयोगसंज्ञाभावाद्गुरुत्वाभावात् प्लुतो न स्यात् ॥

(उद्द्योतः) जश्त्वे कृते संयोगसंज्ञायामिति। कार्यकालपक्ष इदम् ॥

(तत्त्वालोक) भाष्ये—उपध्मानीयोपधे श्वेत्वीकर्तुर्वार्तिककारमतेनाह—अविशेषेणेति। तेषामुपदेशस्येति शेषः। उ३ꣳजक इति—इत्यत्रेति शेषः।

प्रदीपे—तस्य—जश्त्वस्य।

(प्रयोजनभाष्यम्)

उपधासंज्ञा च प्रयोजनम्—दुष्कृतं, निष्कृतं, दुष्पीतं निष्पीतम् "इदुदुपधस्य चाप्रत्ययस्ये"ति षत्वं सिद्धं भवति ॥

(उद्द्योतः) भाष्ये इदुदुपधस्येति। विसर्गस्य षत्वे इदुपधात्वमिति भावः ॥

(तत्त्वालोक) भाष्ये—चेति—अथ वार्तिककारमतेन पूर्वपरसमुच्चायकः। भाष्यकारमतेन तु वक्ष्यमाणमात्रसमुच्चायक इति भावः। निष्पीतमित्यादौ, यत्रस्तत्रेति शेषः।

(प्रयोजननिरासभाष्यम्)

नैतदस्ति प्रयोजनम्। न इदुदुपधग्रहणेन विसर्जनीयो विशेष्यते ॥

किं तर्हि ? ॥

सकारो विशेष्यते—इदुदुपधस्य सकारस्य यो विसर्जनीय इति ॥

अथ वोपधाग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः—इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति ॥

(उद्द्योत) इदुदुपधस्य सकारस्येति। विसर्गस्यापि उपलक्षणमेतत्। अत एव निरोषि निष्कृतमिति सिध्यति। अत एव वक्ष्यमाणपक्षान्तरेणाविरोधः। निष्कृतमित्यादौ तु उत्पत्तेः पूर्वं समानेऽपि इण्‌ः प इति न। पाशकल्पककाम्येष्वेव तत्प्रवृत्ते ॥

(तत्त्वालोक) भाष्ये—एतत्—उपधासंज्ञारूपम्। कुत इत्यत आह—नेति। यत इत्यादि। इति—इत्येवम्। लाघवादाह—अथवेति। तत्रेति शेषः। इदुद्भ्यामिति—इद तृतीयान्तम्। तु—यतः। परम्—परत्वेन। इति—इत्येवम्। एतावता 'इदुद्भ्यामप्रत्ययस्ये'ति न्यास सूचितः।

उद्द्योते—स्थानीति—रेफेत्यर्थः। एतत्—सकारपदम्। तथा च इदुतो रेफरूपमन्त्यमलमादाय उपधात्वं वाच्यं, न तु विसर्गरूपमन्त्यमलमादायेति विसर्गस्य अन्त्यत्वाभावेऽपि न काऽपि क्षतिरिति भावः। अपिना निस इत्यस्य संग्रहः। वक्ष्यमाणेति—अथवेत्यादिनेत्यादि। तत्प्रवृत्ते—इण्‌ः ष इत्यस्य प्रवृत्तेः।

(प्रयोजनभाष्यम्)

अलोन्त्यविधिश्च प्रयोजनम्—वृक्षस्तरति प्लक्षस्तरति "अलोऽन्त्यस्य" विधयो भवन्तीत्यलोन्त्यस्य सत्वं सिद्धं भवति ॥

(तत्त्वालोकः) प्लक्षस्तरतीति—इत्यादौ, यत्रस्तत्रेति शेषः। विधयः—आदेशाः। इति—इति विध्येकवाक्यतया लभ्येनार्थेन। भवतीति—तत् विसर्गस्यालत्वे एव सम्भवतीति भावः।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्—"निर्दिश्यमानस्यादेशा भवन्ति" इति विसर्जनीयस्यैव भविष्यति ॥

(तत्त्वालोकः) निर्दिश्येति—यत इत्यादि। इति—इति परिभाषाबलेन। एवेति—सत्वमिति शेषः।

(प्रयोजनभाष्यम्)

द्विर्वचनं प्रयोजनम्—उर꞉꞉कः। उर꞉꞉पः।

"अनचि च" अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति ॥

(उद्द्योतः) द्विर्वचनं प्रयोजनमिति । विसर्गजिह्वामूलीयादेरित्यादि [illegible] ॥

(छायालोकः) भाष्ये—भाष्यकारमतेन प्रथमम [illegible] प्रयोजनमाह-द्विर्वचनमिति । अत्र [illegible] चकारो न प्रयुक्तः । उर च इति-इत्यादौ, [illegible] । चेति-[illegible] । इति—[illegible] ।

(प्रयोजनभाष्यम्)

स्थानिवद्भावप्रतिषेधश्च प्रयोजनम्—यथेह भवति-उरःकेण, उरःपेणेति "अड्कुप्वाङ्" इति णत्वम्; एवमिहापि स्थानिवद्भावात्प्राप्नोति-वृक्षोरःकेण महोरस्केनेति । तत्र "अनल्विधौ" इति प्रतिषेधः सिद्धो भवति ॥

(प्रदीपः) महोरस्केनेति । पूर्वत्रासिद्धीये न स्थानिवदिति निषेधोऽत्र परस्मिन्पूर्वविधावित्यस्य, न तु स्थानिवदादेश इत्यस्य ॥

(उद्द्योतः) ननु सोऽपदादाविति सत्वस्य स्थानिवत्त्वं पूर्वत्रासिद्धीये इति निषेधो [illegible] पूर्वत्रेति ॥

(छायालोकः) भाष्ये—भवतीति-तथा च वार्तिककृता तेषामविशेषेणोपदेशः प्रयोजनमुक्तं, [illegible] ।

(इत्ययोगवाहोपदेशाधिकरणम् ॥)

(अथ वर्णार्थवत्ताधिकरणम्)

(भाष्यम्)

किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः ?

(प्रदीपः) [illegible] किं पुनरिति । [illegible] प्रयोजनम् ॥

(उद्द्योतः) इमे [illegible] इदानीमिति । अर्थवन्त इति भाष्यम् । वर्णा इति [illegible] ॥

(छायालोकः) प्रदीपे—[illegible] ।

(७० अर्थवत्तासाधकप्रथमवार्तिकम् ॥ ११ ॥)

॥ ॥ अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ॥ ॥

(भाष्यम्)

अर्थवन्तो वर्णाः ॥

कुतः ? ॥

धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ॥

धातव एकवर्णा अर्थवन्तो दृश्यन्ते—एति, अध्येति, अधीत इति ॥

प्रातिपदिकान्येकवर्णान्यर्थवन्ति-आभ्याम्, एभिः, एषु ॥

प्रत्यया एकवर्णा अर्थवन्तः,-औपगवः, कापटवः ॥

निपाता एकवर्णा अर्थवन्तः,—अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, ए अपक्राम । धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे—अर्थवन्तो वर्णाः—इति ।

(उद्द्योतः) भाष्ये धातव इत्यादि । [illegible] । अर्थं च [illegible] मान्योपयोगी । [illegible] हरन्ति धर्मे चैवं [illegible] इति बोध्यम् ॥

(छायालोकः) भाष्ये—इति-[illegible] । अर्थवन्तीति-[illegible] । [illegible] । एभिरिति-[illegible] । [illegible] उत्तिष्ठेति-धात्विति ।

उद्द्योते—अर्थ-[illegible] । एतदिति-[illegible] । यथा-[illegible] । एव मिथेति-[illegible] ।

(७१ अर्थवत्तासाधकद्वितीयवार्तिकम् ॥ १२ ॥)

। ॥ वर्णव्यत्यये चार्थान्तरगमनात् ॥ ॥

(भाष्यम्)

वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहेऽर्थवन्तो वर्णा इति । कूपः सूपो यूप इति । कूप इति ककारेण कश्चिदर्थो गम्यते । सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते । यूप इति ककारसकारापाये यकारोपजने चार्थान्तरं गम्यते । तेन मन्यामहे-यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति ॥

(प्रदीपः) वर्णव्यत्यय इति । [illegible] स ककारस्येति । [illegible] ॥

(उद्द्योतः) [illegible] वर्णव्यत्यये चेति । ननु [illegible] ॥

(छायालोकः) भाष्ये—इति-[illegible] । इति-[illegible] । [illegible] ।

प्रदीपे —[illegible] । अनुपिबते-[illegible] । अर्थवत्ता-[illegible] ।

उद्द्योते—[illegible]

अन्वयव्यतिरेकरूपमित्यादि । अत एव-द्योतकत्वेन अर्थवत्त्वादेव । तेषा-ञादीनाम् । एषाम्-ऊपादीनाम् ।

(७२ अर्थवत्तासाधकतृतीयवार्तिकम् ॥ १३ ॥)

॥ * ॥ वर्णानुपलब्धौ चानर्थगतेः ॥ * ॥

(भाष्यम्)

वर्णानुपलब्धौ चानर्थगतेर्मन्यामहेऽर्थवन्तो वर्णा इति । वृक्ष ऋक्ष, काण्डीर आण्डीर । वृक्ष इति सवकारेण कश्चिदर्थो गम्यते, ऋक्ष इति वकारापाये सोऽर्थो न गम्यते । काण्डीर इति सककारेण कश्चिदर्थो गम्यते, आण्डीर इति ककारापाये सोऽर्थो न गम्यते ॥

(प्रदीप) वर्णानुपलब्धौ चेति । अर्थान्तरावगमात्प्रकृतोऽर्थो न गम्यत इति विवक्षितम् ॥

(उद्द्योत) तृतीयहेतुमाह--वर्णानुपलब्धौ चेति ॥ अनर्थगतेरित्यस्य तद्वर्णसत्त्वाया योऽर्थस्तद्दर्शनावगतेरित्यर्थ इत्याह—अर्थान्तरेति ॥

(तत्त्वालोक) आण्डीर इति—इत्यत्रेति शेष । इति-इत्य-नेन । एवमग्रेऽपि ।

(आक्षेपभाष्यम्)

किं तर्ह्युच्यते—'अनर्थगते.' इति । न साधीयो ह्यत्रार्थस्य गतिर्भवति ॥

(प्रदीप) इतरस्त्वर्थावगत्यभावमात्रमनेनोक्तमिति मत्वा पृच्छति—किं तर्हीति । न साधीय इति । परमतापेक्षया प्रकर्ष आरोप्यते । यथा न किंचिदयं तत्र करोति युक्ते कश्चिदाह सुतरामयं करोतीति ॥

(उद्द्योत) प्रश्नमुपपादयति—भाष्ये न साधीय इति । नेति काकु । परमतापेक्षयेति । परेणानर्थगतेरित्युक्तत्वादिष्टार्थगति रस्तीत्यभ्युपगमस्य परमते कटाक्षेण अन्यस्थलीयार्थगत्यपेक्षयात्रातिश येनार्थगतिरस्तीति विवक्षेति भाव ॥

(तत्त्वालोक) भाष्ये—हि-यत । तथा च अनदर्थगतेरिति वक्तव्यमिति भाव ।

प्रदीपे—अनेन अनर्थगतेरित्यनेन ।

(समाधानभाष्यम्)

एवं तर्हीदं पठितव्यं स्याद्—"*वर्णानुपलब्धौ चातदर्थगतेः*" इति ॥

किमिदम्—अतदर्थगतेरिति ॥

तस्यार्थस्तदर्थ', तदर्थस्य गतिस्तदर्थगति', न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति ॥ अथवा सोर्थस्तदर्थस्तदर्थस्य गतिस्तदर्थगतिर्न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति ॥

(प्रदीप) एवं तर्हीति । प्रकृतोऽर्थो न गम्यतेऽर्थान्तर तु गम्यत इत्यर्थ ॥ तस्यार्थ इति । तस्य वर्णस्य ॥ पर प्रति वर्णाना मर्थवत्त्वमसिद्धमिति कथं तस्येति वर्णं परामृशत इत्याह—सोऽर्थ इति । प्रकृतोऽर्थ इत्यर्थ ॥

(उद्द्योत') तच्छब्दार्थमाह—वर्णस्येति ॥ परे तु तच्छब्देन तद्वर्णघटितपरामर्शे न कश्चिद्दोष ॥ अत एव पूर्वं भाष्ये सककारेण कश्चिदर्थो गम्यत इत्युक्तमित्याहु ॥ लाघवेन तु कर्मधारयमाह—भाष्ये सोऽर्थ इति । प्रकृतोऽर्थ । तस्मिन्वर्णे सति योऽर्थ प्रतीयते स इत्यर्थ ॥

(तत्त्वालोकः) भाष्ये—तुष्यतु दुर्जन इति न्यायेन इतरोक्त मभ्युपगम्य पर समाधत्ते-एव तर्हीति । इष्टार्थस्य स्पष्टप्रतिपत्तये इति शेष । इतर प्रकृते न स , अस , असश्चासौ अर्थ अतदर्थ , अतद र्थस्य गति अतदर्थगतिरिति समासमभिप्रेत्य पृच्छति-किमिदमिति ।

प्रदीपे—इति-इति हेतो । कथमिति-तत्प्रतीति शेष । इति-इत्यनेन । इत्याह-इयत आह ।

उद्द्योते—घटितेति-समुदायेति शेष । प्रतीयते इति-समुदायेनेत्यादि ।

(आक्षेपभाष्यम्)

स तर्हि तथा निर्देश' कर्तव्य' ? ॥

(तत्त्वालोक) न्यासान्तर प्रत्याख्यापयितु तदन्य पृच्छति—स तर्हीति । तथा-तत्पदघटित ।

(सिद्धान्तभाष्यम्)

न कर्तव्यः । उत्तरपदलोपोऽत्र द्रष्टव्य' । तद्यथा—उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुख' । एवमतदर्थगतेरनर्थगतेरिति ॥

(प्रदीप) उष्ट्रमुख इति । गतार्थत्वादप्रयोग एव द्वितीयमुखशब्दस्य लोपोऽभिधीयते । अत्र हि उष्ट्रो मुखमस्येत्येव विग्रह ॥ न च प्राणी प्राण्यन्तरस्य मुख भवतीति विशिष्टावयववृत्तिरुष्ट्रशब्द सादृश्यात् मुख विशिनष्टि । एवमिहाप्यनर्थगतेरित्यत्रार्थशब्देन प्रक्रान्तोऽर्थ उच्यते, नार्थमात्रमित्यर्थ ॥

(उद्द्योत) ननु दृष्टान्ते सप्तम्युपमानपूर्वेति वचनेनोत्तरपद लोपेऽपि प्रकृते तच्छब्दलोप केन । किं च तच्छब्द उत्तरपदमपि न । तच्छब्देन नञ समासाभावादत आह—गतार्थत्वादिति । तथा च तद्वदत्रापि लक्षणेति भाव ॥

(तत्त्वालोक) भाष्ये—तस्य व्याख्यानविशेषेणैव इष्टार्थलाभ इत्यभिप्रायेण सदृष्टान्त समाधत्ते-नेति । उत्तरेति-यत इत्यादि । तत्-उत्तरपदलोपनम् । अस्येति-स इति शेष । खरमुख इति—इत्यत्रेति शेष । इति-इत्यत्रापि ।

प्रदीपे—हि-यत । इति-इति हेतो । विशिष्टावयववृत्ति—विलक्षणाकृतिमुखरूपावयवे लक्षणया वृत्ति ।

उद्द्योते—प्रकृते-अनर्थगतेरित्यत्र । तद्वत्-उष्ट्रमुख इत्यत्रोष्ट्र-शब्दस्य विचित्रमुखे लक्षणावत् । अत्रापि-अनर्थगतेरित्यत्रापि अर्थशब्दस्य प्रक्रान्तार्थे ।

(७३ अर्थवत्तासाधकचतुर्थवार्तिकम् ॥ १४ ॥)

॥ * ॥ संघातार्थवत्त्वाच्च ॥ * ॥

(भाष्यम्)

संघातार्थवत्त्वाच्च मन्यामहेऽर्थवन्तो वर्णा इति । येषा संघाता अर्थवन्तोऽवयवा अपि तेषामर्थवन्तः ॥ [येषा पुनरवयवा अनर्थका. समुदाया अपि तेषाम-

नर्थकाः ।] तद्यथा—एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदायश्च शतमपि समर्थम्, एकश्च तिलस्तैलदाने समर्थः तत्समुदायश्च खार्यपि तैलदाने समर्था ॥ येषां पुनरवयवा अनर्थकाः, समुदाया अपि तेषामनर्थकाः । तद्यथा—एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम्, एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम् ॥

(उद्द्योतः) चतुर्थमनुमाह—भाष्ये सङ्घातार्थवत्त्वाच्चेति । [illegible]

(तत्त्वालोकः) [illegible]

(अर्थवत्तादूषणभाष्यम्)

यदि तर्हीमे वर्णा अर्थवन्तः । अर्थवत्कृतानि प्राप्नुवन्ति ॥

कानि ? ॥

"अर्थवत्प्रातिपदिकम्" इति प्रातिपदिकसंज्ञा, "प्रातिपदिकाद्" इति स्वाद्युत्पत्तिः, "सुबन्तं पदम्" इति पदसंज्ञा ॥

तत्र को दोषः ? ॥

"पदस्य" इति नलोपादीनि प्राप्नुवन्ति—धनं वनमिति ॥

(प्रदीपः) नलोपादीनीति । [illegible]

(उद्द्योतः) [illegible]

(तत्त्वालोकः) [illegible]

[illegible]

(७४ अर्थवत्तायां दोषनिराकरणवार्त्तिकम् ॥ १५ ॥)

॥ * ॥ संघातस्यैकार्थ्यात्सुबभावो वर्णात् ॥ * ॥

(भाष्यम्)

संघातस्यैकत्वमर्थः । तेन वर्णात्सुबुत्पत्तिर्न भविष्यति ॥

(प्रदीपः) तत्र परिहारमाह—संघातस्येति । [illegible]

(उद्द्योतः) [illegible]

(तत्त्वालोकः) [illegible]

[illegible]

वयवेरनतिरिक्तत्वात्। एवेन अवयवाना व्यावृत्ति । चेदिति-नहीति शेष । यत -समुदायात्। एषाम्-अवयवानाम्। वैयाकरणोक्तौ वक्ष्यमाणार्थ्या सिद्धान्तमनेनाह-केचिदिति। पदकप्रातिपदिकार्थ इत्याशयेनाह-प्रकृतिबोध्येति। इति इति हेतौ। तेभ्य: प्रत्येकवर्णेभ्य। सा-सङ्ख्या। तद्भाव -सम्बन्धाय। एकवचनमिति-औत्सर्गिकैकवचनमित्यर्थ । अवयवेभ्यो पीलवादि । तथेति-औत्सर्गिकैकवचनमर्थ । एषाम्-अवयवानाम्। इति-इति हेतौ ।

(७५ अनर्थकतासाधकप्रथमवार्तिकम् ॥ १६ ॥)

॥ ७५ ॥ अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः ॥ * ॥

(भाष्यम्)

अनर्थकास्तु वर्णाः ॥

कुतः ? ॥

प्रतिवर्णमर्थानुपलब्धेः । नहि प्रतिवर्णमर्था उपलभ्यन्ते ॥

किमिदं प्रतिवर्णमिति ? ॥

वर्णं वर्णं प्रति प्रतिवर्णम् ॥

(प्रदीप) अनर्थकास्त्विति । धात्वादिव्यतिरिक्ता वर्णा पक्षीक्रियन्तेऽन्यथा शास्त्रविरोध प्राप्नोति ॥ किमिति । असमासशङ्कया प्रश्न, समासेन तूत्तरम् । तेनैव वीप्सा द्योतितेति द्विर्वचनं न भवति ॥

(उद्द्योतः) अनुमानेन साधितमर्थवत्त्वं प्रत्यक्षविरोधेन दूषयति—अनर्थकास्त्विति ॥ सर्ववर्णाना पक्षत्वे हेतोर्भागासिद्धत्व स्यादत आह—धात्वादीति ॥ किञ्चि बाधकमाह—अन्यथेति ॥ वर्णव्यत्यये त्यादिहेतोरर्थानुपलब्धेरिति हेतोश्च धात्वाद्यनतिरिक्तविषयत्वे एव सङ्गतेरित्यपि बोध्यम् ॥ असमासशङ्कयेति । तथा च वीप्सा न प्रतीयेतेति भाव ॥ तेनैवेति । वीप्साया तस्य विधानादिति भाव ॥

(तत्त्वालोकः) भाष्ये—अर्थानुपलब्धेरिति-यदि प्रतिवर्णमर्था भवेयु तर्हि ते तथोपलभ्येरन्, यतस्ते तथा नोपलभ्यन्ते, अतस्ते न सन्तीति निश्चीयते। योग्यानुपलब्धेरभावग्राहकत्वात्।

प्रदीपे—अन्यथेति-सकलवर्णाना पक्षत्वे इत्यर्थ । धातुरूपवर्णानां शास्त्रेणार्थवत्ताया बोधनादिति शेष । समासेनेति-वीप्सार्थकेनेत्यादि । एवञ्च प्रतिशब्दस्यानेकार्थत्वात् संशयेन समुत्पन्नत्वाद्व्ययप्रश्न, वीप्सा प्रतिशब्दो येनोत्तरमिति भाव । तेनैव-समासेनैव। इति-इति हेतौ ।

उद्द्योते—साधितमिति-वर्णानामिति शेष । विपक्षे—सर्ववर्णाना पक्षत्वे। तथा च-अनुमाने च। तस्य-समासस्य।

(७६ अनर्थकत्वसाधकद्वितीयवार्तिकम् ॥ १७ ॥)

॥ ७६ ॥ वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात् ॥ * ॥

(भाष्यम्)

वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहे-अनर्थका वर्णा इति ॥ वर्णव्यत्यये-कृतेस्तर्कः, कसेः सिकता, हिंसेः सिंहः । वर्णव्यत्ययो नार्थव्यत्ययः ॥ अपायो लोपः—हतः, घ्नन्ति, घ्नन्तु, अघ्नन् । वर्णापायो नार्थापायः ॥ उपजन आगमः—लविता, लवितुम् । वर्णोपजनो नार्थोपजनः ॥ विकार आदेशः-घातयति घातकः । वर्णविकारो नार्थविकारः ॥ यथैव वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम् । न चेह तद्वत् । अतो मन्यामहे—अनर्थका वर्णा इति ॥

(प्रदीप) वर्णव्यत्यये इति । यदुक्तम्—वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः इति तस्यानैकान्तिकत्वमुद्भाव्यते ॥

(उद्द्योतः) ननु वर्णव्यत्ययादिष्वर्थदर्शनं नार्थवत्त्वाभावसाधकमत आह—यदुक्तमिति । एवचार्थवत्त्वसाधके हेतौ व्यभिचारप्रदर्शनद्वारानर्थकत्वसाधकत्वमस्य ॥ भाष्ये अर्थदर्शनादित्यस्य वर्णव्यत्ययाद्यभावे योऽर्थस्तस्यैव दर्शनादित्यर्थ ॥ नार्थव्यत्यय इत्यस्य नार्थान्तरगतिः, किं तु तस्यैवावगतिरित्यर्थ ॥

(तत्त्वालोकः) भाष्ये—विकारेष्विति-सत्स्वपीति शेष । क्रमेणोदाहरति वर्णव्यत्यये इत्यादिना। सिंह इति-इत्यत्रेति शेष । स्वमतेनेदि। अपायस्य प्रसिद्धत्वात्पर्यायमाह-लोप इति। उपसमीपे जनि इत्युपजनस्तस्य अप्रसिद्धत्वात्पर्यायमाह आगम इति। भावरूप अव्ययीभाव विकार इत्यत्र देन तत्र इति पर्यायमाह-आदेश इति। उदाहरति-यथैवेति। वर्णानामवत्त्वे इत्यादि । न चेति-यत इत्यादि। अत इति-तत्र अर्थव्यत्ययाभावादिति। यत्र व्यभिचारादिति शेष ।

प्रदीपे—अनैकान्तिकत्व-सव्यभिचारत्वम्। उद्भाव्यते इति-वर्णेषु अर्थवत्त्वसाधनायेति शेष ।

उद्द्योते—दर्शनमिति-विरोधादिति शेष । अस्य-वर्णव्यत्ययापायेत्यादे ।

(तटस्थाक्षेपभाष्यम्)

उभयमिदं वर्णेषूक्तम्—अर्थवन्तोऽनर्थका इति च ॥ किमत्र न्याय्यम् ?

(समाधानभाष्यम्)

उभयमित्याह ॥ कुतः ?

स्वभावतः । तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न । न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वाऽनर्थक इति कृत्वा सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम्—यद्धातुप्रातिपदिकप्रत्ययनिपाता एकवर्णा अर्थवन्तोऽतोन्येऽनर्थका इति । स्वाभाविकमेतत् ॥

(प्रदीप) उभयमित्याहेति । यथा ह्यन्यत्रैकान्तिकमर्थवत्त्वं शक्यते कल्पयितुं तत्रैवास्त्यभ्युपगन्तव्यम्, न सर्वत्रेत्यर्थ ॥

(उद्द्योत) उभयस्य न्याय्यत्व विरुद्धमेवेत्यत आह—यथान्यत्रेति। यथा पति इति इत्यादौ ॥ न सर्वत्र कुण्डादिष्वित्यर्थ ॥

(तत्त्वालोकः) भाष्ये—स्वभावत -स्वाभाविकत्वादित्यर्थ

स्यात्। केषाञ्चिद्वर्णानां स्वाभाविकार्थकत्वेन अर्थवत्त्वेऽपि सर्वेषां नार्थवत्ता, केषाञ्चित् स्वाभाविकार्थशक्तिमत्त्वेन अनर्थकत्वेऽपि सर्वेषां नानर्थकत्वमित्यत्र दृष्टान्तमाह-तद्यथेति। समानमिति-अस्य उभयत्र क्रियायामन्वयः। इदानीम्-अर्थोपार्जनसमये। अनर्थकैरिति-न च भवितुं शक्यमित्यनुषज्यते। एतत्-तदुभयम्।

प्रदीपे—असौ-अर्थवत्ता।

उद्योते—वर्णस्य घटेन अर्थवत्त्वानर्थकत्वयो व्याप्यत्वस्य दुर्वचत्वादाह-विषयभेदेनेति। समुदायस्य सार्थकत्वसम्पादनेन इतरेषां समुदायस्थवर्णानां फलवत्त्वसन्निधाविति न्यायात् न पृथगर्थवत्ता कल्प्यत इत्याशयेनाह-कूपादाविति।

(आक्षेपभाष्यम्)

यश्च एष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः-'अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वात्' इति ?॥

(सारालोकः)—एव निर्णयमधस्य वक्तुं पूर्वपक्षिणं पृच्छति-कथमिति। तथा निर्णयवत्त्वे इत्यादि। यश्च इत्येव यो हेतुः स तन्निर्णयसरणे कथं सिद्धान्तिनं प्रति किमुत्तरमभिप्राय) भवता (पूर्वपक्षिणा) वर्णानामर्थवत्तायाम् उपदिष्ट इत्यन्वय। हेतुरिति-अत्र [illegible]वचनम्।

(समाधानभाष्यम्)

संघातान्तराण्येवैतान्येवंजातीयकानि अर्थान्तरेषु वर्तन्ते—कूप सूपो यूप इति। यदि हि वर्णव्यत्ययकृतमर्थान्तरगमनं स्यात्, भूयिष्ठः कूपार्थः सूपे स्यात्, सूपार्थश्च कूपे, कूपार्थश्च यूपे, यूपार्थश्च कूपे, सूपार्थश्च यूपे, यूपार्थश्च सूपे। यतस्तु खलु न कश्चित् कूपस्य वा सूपे, सूपस्य वा कूपे, कूपस्य वा यूपे, सूपस्य वा यूपे, यूपस्य वा सूपे, यूपस्य वा कूपे। अतो मन्यामहे—संघातान्तराण्येतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्त इति। इदं तर्ह्यपि—भवता वर्णानामर्थवत्तां ब्रुवता साधीयोऽनर्थकत्वं द्योतितम्। यो हि मन्यते—यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति। उपशब्दस्त्वस्यानर्थकः स्यात् ॥

(प्रदीपः) संघातान्तराणीति। तदुक्तं—

'न कूपसूपयूपानामन्वयोऽर्थस्य विद्यते।
अतोऽर्थान्तरवाचित्वं संघातस्यैव गम्यते ॥' इति।

(उद्योतः) न कूपसूपेति। वर्णानामर्थत्वे उभयत्र [illegible] च इत्यर्थः। समुदायान्तरत्वबुद्धौ [illegible] न तु [illegible] ॥ ननु [illegible] [illegible]। [illegible] [illegible], [illegible]। [illegible]। [illegible]—अन्यो इदं [illegible] ॥

(सारालोकः) भाष्ये—पूर्वपक्षिणि मूकीभूते सिद्धान्ती मतस्थं प्रति समाधानमाह-संघातेति। हि-यतः। स्यादिति-स्यादेव। कूपार्थश्चेति-भूयिष्ठ इत्यनुषज्यते। एवमग्रेऽपि। सूपे इतिस्यादित्यनुषज्यते। एवमग्रेऽपि। वर्तत इति निश्चये। इदं तर्ह्यपीति-इदं युक्त्यन्तरमपि निश्चितं तवोच्यते इत्यर्थः। तदेवाह-भवतेति। हि-यत।

उद्योते—त्रिषु-कूपयूपसूपेषु। अर्थान्वय इति-अन्योऽन्येषु स्थितमित्यादि। न च दृश्यते-न हि [illegible] [illegible] दृश्यते। इति-इति शिष्टौ। चेत्तर्हि-चेत्, तर्हि। संगच्छतीति-अत्र संख्याया इति पाठः। त्रिधंघनेन-[illegible]।

(आक्षेपभाष्यम्)

तत्रेदमपरिहृतम्—'संघातार्थवत्त्वाच्च' इति ॥

(समाधानभाष्यम्)

एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति ॥

(प्रदीपः) एतस्यापीति। 'दृष्टो ह्यनर्थेन गुणेन गुणिनोऽर्थभावः' इत्यादिना परिहरिष्यते इति ॥

(उद्योतः) दृष्टो हीति। अनर्थेन रथाङ्गेन गुणिनो रथस्य यथार्थवत्ता तथा प्रकृतेऽपीति भावः।

(सारालोकः) भाष्ये—एतस्य-संघातार्थवत्त्वाच्चेत्यस्य। परिहारम्-अवयवस्यानर्थकत्वेऽपि समुदायस्यार्थवत्त्वे दृष्टान्तम्।

उद्योते—तथेति-यथा रथाङ्गानां प्रत्येकं गमनाजनकत्वेऽपि समुदायस्य रथस्य गमनजनकता, यथा च तुराङ्गानां प्रत्येकम् उन्मादाजनकत्वेऽपि समुदायस्य सुरायाः उन्मादजनकता, तथा वर्णानां प्रत्येकम् अनर्थकत्वेऽपि समुदायस्य शब्दस्यार्थवत्ता। एवञ्च संघातार्थवत्त्वस्य व्यभिचारित्वादिदमसाधकमिति भावः।

इति वर्णानामर्थवत्ताधिकरणम् ॥

(अथ प्रत्याहारेष्वनुबन्धग्रहणाभावाधिकरणम्)

(भाष्यम्)

अइउण् ऋलृक् एओङ् ऐऔच् ।

(सारालोकः) भाष्ये—प्रागेवेदमुक्तं प्रत्याहारेऽनुबन्धानामिति इत्येतयोस्तु बाधकस्त्वाद् आपतन्तु पदार्थानिदिशति-अइउणित्यादिना।

(७१ आक्षेपवार्तिकम् ॥ १४ ॥)

॥ * ॥ 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' ॥ * ॥

(भाष्यम्)

य एतेऽक्षु प्रत्याहारार्था अनुबन्धाः क्रियन्ते, एतेषामज्ग्रहणेन ग्रहणं कस्मान्न भवति ?॥

किं च स्यात् ?॥

दधि णकारीयति, मधु णकारीयति, "इको यणचि" इति यणादेशः प्रसज्येत ॥

(प्रदीपः) अन्ये अनुबन्धेष्विति। प्रत्याहारा अज्ग्रहणात्

येऽज्ग्रहणेषु अन्प्रत्याहारग्राहकेषु पठितानामनुबन्धानां प्रत्यासत्त्याद्ग्रहणं कुतो नेत्यर्थः ॥ तत्फलितार्थमाह—य एते अक्षु इति । तद्बोधकसूत्रेषु प्रागुक्तेषु ॥ प्रत्याहारार्थास्तदुपकारकाः ॥ अज्ग्रहणेन अच्छब्देन ॥ अणादिप्रत्याहारेषु तेषां ग्रहणे फलाभावं मनसि निधायाज्ग्रहणेनेत्युक्तम् । न च इशादौ टग्रहणस्यापत्तिः । हल्सु उच्चारणार्थाकारोच्चारणेनोच्चारणार्थवर्णहीनहलां हल्घटितप्रत्याहारे ग्रहणाभावस्य वक्तुं शक्यत्वात् ॥

(तत्त्वालोकः) भाष्ये—प्रासङ्गिकशङ्कया "प्रत्याहारेऽनुबन्धानामि"ति श्लोकवार्तिकं स्पष्टशो व्याख्यातुम् असक्तानुबन्धसूत्राणि निर्दिशति—अइउणित्यादिना । किं चेति–यदि तेषामनुबन्धानाम् अच्छब्देन ग्रहणं स्यात्तर्हीत्यादि । मधु णकारीयतीति–इत्यादावि ति शेषः । उद्द्योते—ग्राहकेष्विति–सूत्रेष्विति शेषः । तेषाम्–अनुबन्धानाम् ।

(७८ सिद्धान्तसमाधानवार्तिकखण्डम् ॥ १९ ॥)

॥ ॐ ॥ आचारात् ॥ ॐ ॥

(भाष्यम्)

किमिदमाचारादिति ? ॥

आचार्याणामुपचारात् । नैतेष्वाचार्या अच्कार्याणि कृतवन्तः ॥

(प्रदीपः) आचारादिति । आचारो व्यवहारः । कृषिमृषिकृपेरिति यण् न कृतः ॥

(तत्त्वालोकः) भाष्ये—एतेषु–अनुबन्धेषु परेषु ।

प्रदीपे—इतीति–इत्यत्रेत्यर्थः । ककारे परे इति शेषः । तथा चात्र यणकरणरूपेण आचार्यव्यवहारेण अक्षु अनुबन्धानामग्रहणं ज्ञापितमिति भावः ।

(७९ सिद्धान्तसमाधानवार्तिकखण्डम् ॥ २० ॥)

॥ ॐ ॥ 'अप्रधानत्वात्' ॥ ॐ ॥

(भाष्यम्)

अप्रधानत्वाच्च । न खल्वप्येतेषामक्षु प्राधान्येनोपदेशः क्रियते ॥

क्व तर्हि ? ॥

हल्षु ॥

कुत एतत् ? ॥

एषा ह्याचार्यस्य शैली लक्ष्यते—यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति—अचोऽक्षु हलो हल्षु ॥

(प्रदीपः) अप्रधानत्वादिति । प्रधानाप्रधानसंनिधौ प्रधानमेव कार्याणां प्रयोजकमिति परार्थानामनुबन्धानामच्संज्ञा न प्रवर्तत इत्यर्थः ॥ शैलीति । शीले भवा शैली समवधानपूर्विका प्रवृत्तिः । यथा लोके ब्राह्मणैः सह ब्राह्मणा भोज्यन्ते क्षत्रियैः सह क्षत्रिया इति एवमिहाप्याचार्येण वर्णा निर्दिष्टा इत्यर्थः ॥

(उद्द्योतः) प्राधान्येन प्रत्याहारेषु ग्रहणार्थत्वेन । परार्थेति । अजादिस्वरूपबोधनार्थत्वेन परार्थत्वम् । यथाकारादयः संज्ञिविशेषसमर्पणायोपात्ता न तथा णादय इत्यर्थः ॥ अप्रधानत्वमप्याचार्याचारेण साधयति—[भाष्ये] आचार्यस्येति । आचार्यशब्देनानादिः शब्दपुरुषः । एवञ्चान्यत्र संज्ञिविशेषसमर्पणायोपात्तत्वाद् इतामसञ्ज्ञित्वमेवेति भावः ।

(तत्त्वालोकः) भाष्ये—एतेषाम्–अनुबन्धानाम् । तर्हीति–तेषां प्राधान्येनोपदेश इति शेषः । हि–यतः ।

प्रदीपे—इति–इति लौकिकन्यायेन । इति–इति व्यवहारः वर्णा इति–सजातीयेषु सजातीया इत्यादि ।

उद्द्योते—तथेति–संज्ञिविशेषसमर्पणायोपात्ता इति शेषः । शब्दपुरुषः–शिवः । अन्यत्र–हल्षु । इतामिति–अनुबन्धानामित्यर्थः । अच्त्वमिति शेषः । आचार्याचारेण ज्ञापितस्यैव अक्षु अनुबन्धानामग्रहणस्य प्रधानेति लोकन्यायेन दृढीकृतत्वात् एक एव हेतुरिति वार्तिककाराशयः । किन्तु भाष्यकृता सचकारं व्याख्यानत्वात् प्रकृते हेतुद्वयमेव बोध्यम् ।

(८० सिद्धान्तसमाधानवार्तिकखण्डम् ॥ २१)

॥ ॐ ॥ 'लोपश्च बलवत्तरः' ॥ ॐ ॥

(भाष्यम्)

लोपः खल्वपि तावद्भवति ॥

(प्रदीपः) लोपश्चेति । परत्वान्नित्यत्वाद्वा आदिरन्त्येनेत्यनेनाच्संज्ञाविधानकालेऽनुबन्धानां लोपादसन्निधानादच्संज्ञा न प्रवर्तते । अनुबन्धा ह्युच्चारण एव सन्ति इत्संज्ञाप्रतिबद्धं च कार्यमसन्त एव प्रतिपादयन्ति, स्वतस्तु न किंचित्कार्यं प्रतिपद्यन्ते ॥

(उद्द्योतः) परत्वादित्याद्यन्तरङ्गत्वोपलक्षणम् । एवञ्च पूर्वमनुबन्धलोपादादिरन्त्येनेति संज्ञाविधानकालेऽसन्निधानादित्यन्वयः । एव चानुबन्धसदृशभिन्नानामेव मध्यगसदृशानां ग्रहणं बोधयतीति भावः ॥ भाष्ये लोपः खल्वपि तावदिति । सर्वतः प्रथममित्यर्थः ॥ यत्तु एवमपि लणित्यकारस्य हल्षु ग्रहणप्रसक्तेराचारादित्येव समाधिरत्र युक्त इति ॥ तन्न । अतो रान्तस्येति सूत्रे लकारोच्चारणेन लण्सूत्रस्थस्यानुनासिकत्वाभावज्ञापनात् । एवञ्च तस्यानुबन्धत्वमेव न, किन्तूच्चारणार्थत्वमेव । अत एव भाष्ये अइउणित्यादिसूत्रचतुष्टयोपादानेनैवैतद्विचारप्रवृत्तिः कृता । श्लोके चाज्ग्रहणेष्वित्येवोक्तम् । उरण्रपरसूत्रे च लपरत्वस्योपसंख्यानमेव कार्यमिति तुल्यास्यसूत्रे वक्ष्यते ॥

(तत्त्वालोकः) भाष्ये—बलवत्तरलोपाच्चेत्याशयेनाह—लोपश्चेति । प्रदीपे—परत्वादिति "आदिरन्त्येने"त्येतदपेक्षया "तस्य लोप" इत्यस्येत्यादि । नित्यत्वादिति–कृताकृतप्रसङ्गित्वेनेत्यादि । प्रतिबद्धं–सम्बद्धम् ।

उद्द्योते—एवञ्च–परत्वान्नित्यत्वाद्वाऽन्तरङ्गत्वाद्वा तस्य तद्बाधकत्वे च । सर्वतः—सकलसञ्ज्ञा० । एवमपीति–लोपस्य बलवत्त्वेऽपीत्यर्थः । हल्प्रत्याहारसिद्धेः पूर्वमच्पदार्थनिश्चयाभावेन "उपदेशेऽजि"त्यस्य वाक्यार्थाभावात् लण्घटकाकारस्येत्संज्ञालोपयोरभावेनेति शेषः । तस्य–लण्सूत्रस्थाकारस्य । तथा च तस्य विचारकोटिप्रविष्टत्वाभावात् समाधानाविषयत्वेऽपि न क्षतिरिति भावः । एवञ्च अनुबन्धाः (अच्) प्रत्याहारजन्यबोधविषयत्वाभाववन्तः आचार्यकर्तृकाच्सम्बन्धिनिमित्तत्वेनानाश्रितत्वात्, अप्रधानत्वाच्च, लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वाच्चेति अनुमानप्रयोगः सिद्धः ।

(८१ सिद्धान्तसमाधानरीत्यन्तरवार्तिकम् ॥ २२ ॥)

॥ ॐ ॥ ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत्। अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति ॥ ॐ ॥

(भाष्यम्)

अथवा योगविभागः करिष्यते—"ऊकालोऽच्" उ ऊ ऊ३ इत्येवं कालोऽज्भवति। ततो "ह्रस्वदीर्घप्लुतः" ह्रस्वदीर्घप्लुतसंज्ञश्च भवति—ऊकालोऽच्॥

(प्रदीप) ऊकालोऽजिति। सिद्धेऽप्येवं योगविभागेन [illegible] निवर्त्यते [illegible] ॥

(उद्द्योतः) भाष्ये तत्कालानामचां ग्रहणमच्शब्देन यथा स्यादिति योगविभाग कार्य इत्यर्थः। सिद्धेऽप्येवं इति। [illegible] ॥

(तत्त्वालोकः) भाष्ये—[illegible] प्रति समाधानान्तरमाह-ऊकालोऽजिती ति। तत्कालानाम्—उ ऊ ऊ३ इत्येवं [illegible]। ग्रहणमिति-[illegible]। अच्कार्यम्-[illegible]। तेन-[illegible]। एषाम्-[illegible]। अथवेति-[illegible] ह्रस्वदीर्घप्लुत [illegible] इति शेषः।

प्रदीपे—सिद्धे इति-[illegible]। अच्चम्-[illegible]। ततः-[illegible]।

उद्द्योते—इति इति शेषः।

(आक्षेपभाष्यम्)

एवमपि कुक्कुट इत्यत्रापि प्राप्नोति॥

(प्रदीपः) एवमपीति। [illegible] ॥

(उद्द्योतः) ननु [illegible], [illegible] आह—कुक्कुट इतीति॥

(तत्त्वालोकः) भाष्ये—[illegible]-एवमपीति। [illegible] इति शेषः।

प्रदीपे—[illegible] इति शेषः।

(समाधानभाष्यम्)

तस्मात्पूर्वोक्त एव परिहारः॥

(प्रदीपः) [illegible] परिहारोऽस्ति, [illegible] ककारो, [illegible]। तथापि पूर्वेव [illegible] गम्यते। [illegible] ॥

(उद्द्योतः) [illegible] ॥

(तत्त्वालोकः) भाष्ये-[illegible] परिहार-[illegible]। [illegible] इति शेषः।

प्रदीपे—[illegible] अपृक्तिरिति [illegible]-न चेति। पुनरिहेति-[illegible]। स "[illegible]" परिहार इति शेषः।

उद्द्योते—[illegible]।

(भाष्यम्)

एष एवार्थः॥ अपर आह—

॥ ॐ ॥ ह्रस्वादीनां वचनात् प्राग्यावत्तावदेव योगोऽस्तु। अच्कार्याणि यथा स्युस्तत्कालेष्वेषु कार्याणि ॥ ॐ ॥

(उद्द्योतः) भाष्ये एष एवार्थ इति। अपर आहेत्यादिना [illegible] ॥ ह्रस्वादीनामिति। ह्रस्वदीर्घप्लुत [illegible] ऊकालोऽजिति [illegible]। [illegible]—अच्कार्याणीति। [illegible] कार्याणि [illegible] स्युरित्यन्वय ॥

(तत्त्वालोकः) भाष्ये-[illegible] ऊकालोऽजितीति समाधान[illegible] समर्थयति-एष एवेति। तत्कालेषु-ऊकालेषु।

(इति [illegible] महाभाष्याधिकरणम् ॥)

('अणुदित्' सूत्रेऽन्तःस्थानामणुपदेशप्रयोजनाधिकरणम् ॥)

(आक्षेपभाष्यम्)

अथ किमर्थमन्तःस्थानामणुपदेशः क्रियते?।

(प्रदीपः) अथ किमर्थमिति। [illegible] प्रश्न ॥ [illegible] अन्तःस्थानां [illegible] उपदेशो—[illegible] यथा स्यादिति ॥

(उद्द्योतः) अण + उपदेशः = अणुपदेश = [illegible]। [illegible] अणुदित् [illegible] किमर्थं [illegible] भाष्ये [illegible]—अणुदिदिति॥ [illegible]। [illegible] स्थाने किमर्थं [illegible]—[illegible] ॥

(तत्त्वालोकः) भाष्ये—[illegible] प्रयोजनं पृच्छति-अथेति। प्रदीपे-अत्र [illegible]। इति-इति शेषः। उद्द्योते-अत्र स्थाने-[illegible]।

(समाधानभाष्यम्)

इह सय्यँय्यन्ता सव्वँत्सरः यल्ँलोकं तल्ँलोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनम्। तत्र परस्य परसवर्णे कृते तस्य यवलग्रहणेन ग्रहणाद् पूर्वस्यापि परसवर्णो यथा स्यात्॥

(उद्द्योतः) इह [illegible] इति [illegible]। [illegible] इति भाव। [illegible]। [illegible]। [illegible] इति [illegible] ॥

(तत्त्वालोकः) भाष्ये-[illegible]। [illegible]-[illegible]। [illegible]-[illegible]। [illegible]-[illegible]